SRIMANMAHABHARATAM

A NEW EDITION
MAINLY BASED ON
THE SOUTH INDIAN TEXTS,
With footnotes and Readings.

VANAPARVA III—VIRATAPARVA IV.

श्रीः ।

श्रीमन्महाभारतम् ।

दाक्षिणात्यबहुकोशानुसारेण संशोधितम् ।

सटिप्पणम् ।

वनपर्व ३—विराटपर्व ४.

EDITED BY
T. R. KRISHNACHARYA & T. R. VYASACHARYA,
Proprietors, Madhva Vilas Book Depot, Kumbakonam.

Printed by B. R. Ghanekar for the proprietors,
at Tukaram Javaji's "Nirnaya-sagar" Press,
BOMBAY.

1909.

वेदग्रन्थाः ।

आपस्तम्बशाखोक्ता देवेमन्त्राः. ....

आश्वलायनगृह्यसूत्रम्—पांक्तं चतुरध्यायात्मकम् ....

उदकशान्तिः—सप्रयोगा. ....

ऋक्संहितापदपाठः—(पदानि) इदं पुस्तकं वेदाध्येतॄणामध्यापकानां वैदिकानां चोपयोगार्थं सम्यक् शुद्धं कारयित्वा वैदिकपाठानुगुणमेवाङ्कितमस्ति. ....

ऋग्वेदोक्ता देवेमन्त्राः..... ....

*ऋग्वेदसंहिता मूलम्—अष्टकाः ८ परिशिष्टादिसंहिताशेषसहिता. ....

*ऋग्वेदमन्त्रसंहिता—ग्लेज ....

*ऋग्वेदमन्त्रसंहिता—रफ ....

गणपत्यथर्वशीर्षम्. ....

पवमानपञ्चसूक्तानि. ....

पुरुषसूक्तम्. ....

रुद्रः—(नमकचमकात्मकोऽध्यायः) ....

वेदांगशिक्षाचतुष्टयं—नाम शिक्षा, ज्योतिषं, छंदः, निघंटः इति । ....

शुक्लयजुर्वेदमाध्यन्दिनसंहिता—इदं पुस्तकं स्थूलाक्षरैरङ्कयित्वास्यान्ते याज्ञवल्क्यशिक्षा, प्रतिज्ञासूत्रम्, सर्वानुक्रमः, अनुवाकसूत्रम्, संहितास्थसर्वमन्त्राणामकारादिवर्णक्रमकोशश्च योजितोऽस्ति. ....

शुक्लयजुर्वेदीया रुद्राष्टाध्यायी—स्थूलाक्षरा. ....

श्रीसूक्तम्. ....

सौरसूक्तानि. ....

कर्मकाण्डग्रन्थाः ।

आह्निकचन्द्रिका–(सायनमन्त्रभाष्यसहिता)—आचारचन्द्रिकेत्यपरमस्या एवाभिधानमस्ति । अस्यां यथावकाशं आह्निकान्तर्गताः सर्वे मन्त्राः, सूक्तानि, सौरसूक्तानि, रुद्राध्यायः, रुद्रसूक्तानि, विष्णुसूक्तानि, देवीसूक्तं, श्रीसूक्तं, गणपतिसूक्तं चेति विषयाः सायनाचार्यभाष्यसंवलिताः, सभाष्यं गणपत्यथर्वशीर्षं च संगृहीतमस्ति ....

*आह्निकसूत्रावली—शुक्लयजुर्वेदीयानाम्. ....

उत्सर्जनोपाकरणविधिः—(ऋग्वेदिश्रावणी.).... ....

ऋग्वेदीयो नित्यविधिः. ....

गणेशसहस्रनामावलिः. ....

र स पुनर्लब्ध्वा सावित्रीमभ्यभाषत ।
ात इव प्रेम्णा पुनःपुनरुदीक्ष्य वै ॥ ६५
सुप्तोस्मि किमर्थं नावबोधितः ।
ामो योसौ मां संचकर्ष ह ॥ ६६

त्वं प्रसुप्तोसि ममाङ्के पुरुषर्षभ ।
भगवान्देवः प्रजासंयमनो यमः ॥ ६७
तोसि महाभाग विनिद्रश्च नृपात्मज ।
क्यं समुत्तिष्ठ विगाढां पश्य शर्वरीम् ॥ ६८
य उवाच ।
ततः संज्ञां सुखसुप्त इवोत्थितः ।
र्वा उवे वनान्तांश्च निरीक्ष्योवाच सत्यवान् ॥
स्य भाय निष्क्रान्तस्त्वया सह सुमध्यमे ।
ण च सेदाष्टं शिरसो मे रुजाऽभवत् ॥ ७०
तापत्त..तः स्थातुं चिरमशक्नुवन् ।
सङ्के प्रसुप्तोसि इति सर्वं स्मरे शुभे ॥ ७१
पगूढस्य च मे निद्रयाऽपहृतं मनः ।
ऽपश्यं तमो घोरं पुरुषं च महौजसम् ॥ ७२
त्वं विजानासि किं तद्ब्रूहि सुमध्यमे ।
मे यदि वा दृष्टो यदि वा सत्यमेव तत् ॥ ७३
ाचाथ सावित्री रजनी व्यवगाहते ।
सर्वं यथावृत्तमाख्यास्यामि नृपात्मज ॥ ७४
ष्ठोत्तिष्ठ भद्रं ते पितरौ पश्य सुव्रत ।
गाढा रजनी चेयं निवृत्तश्च दिवाकरः ॥ ७५
क्तंचराश्चरन्त्येते हृष्टाः क्रूराभिभाषिणः ।
यन्ते पर्णशब्दाश्च मृगाणां चरतां वने ॥ ७६
ता घोरं शिवा नादान्दिशं दक्षिणपश्चिमाम् ।
ास्थाय विरुवन्त्युग्राः कम्पयन्त्यो मनो मम ७७
त्यवानुवाच ।
नं प्रतिभयाकारं घनेन तमसा वृतम् ।
विज्ञास्यसि पन्थानं गन्तुं चैव न शक्ष्यसि ॥ ७८
वित्र्युवाच ।
स्मिन्नद्य वने दग्धे शुष्कवृक्षः स्थितो ज्वलन् ।
वायुना धम्यमानोत्र दृश्यतेऽग्निः क्वचित्क्वचित् ७९
ततोऽग्निमानयित्वेह ज्वालयिष्यामि सर्वतः ।
काष्ठानीमानि सन्तीह जहि संतापमात्मनः ॥ ८०
यदि नोत्सहसे गन्तुं सरुजं त्वां हि लक्षये ।
न च ज्ञास्यसि पन्थानं तमसा संवृते वने ॥ ८१
श्वः प्रभाते वने दृश्ये यास्यावोऽनुमते तव ।
वसावेह क्षपामेकां रुचितं यदि तेऽनघ ॥ ८२
सत्यवानुवाच ।
शिरोरुजा निवृत्ता मे स्वस्थान्यङ्गानि लक्षये ।
मातापितृभ्यामिच्छामि संयोगं त्वत्प्रसादजम् ८३
न कदाचिद्विकाले हि गतपूर्वोहमाश्रमात् ।
अनागतायां सन्ध्यायां माता मे प्ररुणद्धि माम् ८४
दिवाऽपि मयि निष्क्रान्ते सन्तप्येते गुरू मम ।
विचिनोति हि मां तातः सहैवाश्रमवासिभिः ८५
मात्रा पित्रा च सुभृशं दुःखिताभ्यामहं पुरा ।
उपालब्धश्च बहुशश्चिरेणागच्छसीति हि ॥ ८६
कात्ववस्था तयोरद्य मदर्थमिति चिन्तये ।
तयोरदृश्ये मयि च महद्दुःखं भविष्यति ॥ ८७
पुरा मामूचतुश्चैव रात्रावस्रायमाणकौ ।
भृशं सुदुःखितौ वृद्धौ बहुशः प्रीतिसंयुतौ ॥ ८८
त्वया हीनौ न जीवाव मुहूर्तमपि पुत्रक ।
यावद्धरिष्यसे पुत्र तावन्नौ जीवितं ध्रुवम् ॥ ८९
वृद्धयोरन्धयोर्दृष्टिस्त्वयि वंशः प्रतिष्ठितः ।
त्वयि पिण्डश्च कीर्तिश्च सन्तानश्चावयोरिति ॥ ९०
माता वृद्धा पिता वृद्धस्तयोर्यष्टिरहं किल ।
तौ रात्रौ मामपश्यन्तौ कामवस्थां गमिष्यतः ॥ ९१
निद्रायाश्चाभ्यसूयामि यस्या हेतोः पिता मम ।
माता च संशयं प्राप्ता मत्कृतेऽनपकारिणी ॥ ९२
अहं च संशयं प्राप्तः कृच्छ्रामापदमास्थितः ।
मातापितृभ्यां हि विना नाहं जीवितुमुत्सहे ॥ ९३
व्यक्तमाकुलया बुद्ध्या प्रज्ञाचक्षुः पिता मम ।
एकैकमस्यां वेलायां पृच्छत्याश्रमवासिनम् ॥ ९४
नात्मानमनुशोचामि यथाऽहं पितरं शुभे ।

यमाणकौ रुदन्तौ ॥ ८८ ॥ नौ आवयोः ॥ ८९ ॥

प्रज्ञाचक्षुरन्धः ॥ ९४ ॥

भर्तारं चाप्यनुगतां मातरं भृशदुःखिताम् ॥९५
मत्कृते न हि तावद्य सन्तापं परमेष्यतः ।
जीवन्तावनुजीवामि भर्तव्यौ तौ मयेति ह ॥ ९६
तयोः प्रियं मे कर्तव्यमिति जीवामि चाप्यहम् ।
'परमं दैवतं तौ मे पूजनीयौ सदा मया ।
तयोस्तु मे सदाऽस्त्येवं व्रतमेतत्पुरातनम् ॥' ९७
मार्कण्डेय उवाच ।
एवमुक्त्वा स धर्मात्मा गुरुभक्तो गुरुप्रियः ।
उच्छ्रित्य बाहू दुःखार्तः सुस्वरं प्ररुरोद ह ॥ ९८
ततोऽब्रवीत्तथा दृष्ट्वा भर्तारं शोककर्शितम् ।
प्रमृज्याश्रूणि पाणिभ्यां सावित्री धर्मचारिणी ९९
यदि मेऽस्ति तपस्तप्तं यदि दत्तं हुतं यदि ।
श्वश्रूश्वशुरभर्तॄणां मम पुण्याऽस्तु शर्वरी ॥ १००
न सराम्युक्तपूर्वं वै स्वैरेष्वप्यनृतां गिरम् ।
तेन सत्येन तावद्य ध्रियेतां श्वशुरौ मम ॥ १०१
सत्यवानुवाच ।
कामये दर्शनं पित्रोर्याहि सावित्रि माचिरम् ।
'अपिनाम गुरू तौ हि पश्येयं ध्रियमाणकौ ॥'१०२
पुरा मातुः पितुर्वाऽपि यदि पश्यामि विप्रियम् ।
न जीविष्ये वरारोहे सत्येनात्मानमालभे ॥१०३
यदि धर्मे च ते बुद्धिर्मां चेज्जीवन्तमिच्छसि ।
मम प्रियं वा कर्तव्यं गच्छावाश्रममन्तिकात् ।
मार्कण्डेय उवाच । । ३९
सावित्री तत उत्थाय केशान्संयम्य भामि
पतिमुत्थापयामास बाहुभ्यां परिगृह्य वै ॥ ४०
उत्थाय सत्यवांश्चापि प्रमृज्याङ्गानि पाणि ।
सर्वा दिशः समालोक्य कठिने दृष्टिमादधे ॥ ४१
तमुवाचाथ सावित्री श्वः फलानि हरिष्यसि
योगक्षेमार्थमेतं ते नेष्यामि परशुं त्वहम् ॥ ४२
कृत्वा कठिनभारं सा वृक्षशाखावलम्बिनम् ।
गृहीत्वा परशुं भर्तुः सकाशे पुनरागमत् ॥ ४३
वामे स्कन्धे तु वामोरूर्भर्तुर्बाहुं निवेश्य [illegible]णः
दक्षिणेन परिष्वज्य जगाम गजगामि[illegible]
सत्यवानुवाच ।
अभ्यासगमनाद्भीरु पन्थानो वि[illegible]
वृक्षान्तरालोकितया ज्योत्स्नया[illegible]लक्षये ४४
आगतौ स्वः पथा येन फलान्यवचितानि
यथागतं शुभे गच्छ पन्थानं मा विचारय ॥
पलाशखण्डे चैतस्मिन्पन्था व्यावर्तते द्विधा
तस्योत्तरेण यः पन्थास्तेन गच्छ त्वरस्व च ॥
स्वस्थोस्मि बलवानस्मि दिदृक्षुः पितरावुभौ ।४५
ब्रुवन्नेव त्वरायुक्तः सम्प्रायादाश्रमं प्रति ॥ १

॥ इति श्रीमन्महाभारते अरण्यपर्वणि पतिव्रतामाहात्म्यपर्वणि अष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥

एकोनत्रिशततमोऽध्यायः ॥ २९९ ॥

अकस्माच्चक्षुर्लाभतुष्टेनापि पुत्रानागमविषण्णेन द्युमत्सेनेन तत्रतत्र तदन्वेषणम् ॥ १ ॥ ऋषिगणेन शुभनिमित्त[illegible]पनेन समाश्वासिते तस्मिन्सावित्र्यासह सत्यवता पितुराश्रमाभिगमनम् ॥ २ ॥ मुनिगणाय सावित्र्या वने वृत्तवृत्त निवेदनम् ॥ ३ ॥

मार्कण्डेय उवाच ।
एतस्मिन्नेव काले तु द्युमत्सेनो महाबलः ।
लब्धचक्षुः प्रसन्नायां दृष्ट्यां सर्वं ददर्श ह ॥ १
स सर्वानाश्रमान्गत्वा शैब्यया सह भार्यया ।
पुत्रहेतोः परामार्तिं जगाम भरतर्षभ ॥ २
तावाश्रमान्नदीश्चैव वनानि च सरांसि च ।
तस्यां निशि विचिन्वन्तौ दम्पती परिजग्मतुः ।
श्रुत्वा शब्दं तु यं कंचिदुन्मुखौ सुतशङ्कया ।
सावित्रीसहितोऽभ्येति सत्यवानित्यभाषताम् ॥
भिन्नैश्च परुषैः पादैः सव्रणैः शोणितोक्षितैः

ध्रियेतां जीवेताम् । श्वशुरौ श्वश्रूश्वशुरौ ॥ १०१ ॥ कठिने फलपूर्णे पात्रे ॥ १०६ ॥ कृत्वा आच्छिद्य आदायेत्यर्थः ॥ १०८ ॥ जगाम मृदुभामिनी इति थ. पाठः ॥ १०९ ॥

अष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥
भिन्नैर्विदीर्णैः । परुषैः कर्कशैः ॥ ५ ॥

मूर्ध्नां टकविद्धाङ्गावुन्मत्ताविव धावतः ॥ ५
ततोऽभिसृत्य तैर्विप्रैः सर्वैराश्रमवासिभिः ।
तैश्चार्य समाश्वास्य तावानीतौ स्वमाश्रमम् ॥ ६
शैब्याभार्यासहायः स वृतो वृद्धैस्तपोधनैः ।
नरयुासितोपि चित्रार्थैः पूर्वराजकथाश्रयैः ॥ ७
ततो पुनराश्वस्तौ वृद्धौ पुत्रदिदृक्षया ।
पुत्रं वृत्तानि पुत्रस्य सावित्र्या दर्शनानि च ।
ततः जग्मतुरन्योन्यं स्मरन्तौ भृशदुःखितौ ॥ ८
तद्वै क्त्वा च करुणां वाचं तौ शोककर्शितौ ।
भ्रातृ हासाध्वि वधु क्वासिक्वासीत्यरोदताम् ।
सत्यवाक्तेषामुवाचेदं तयोर्वचः ॥ ९
उवाच ।
स्य भार्या सावित्री तपसा च दमेन च ।
रेण च संयुक्ता तथा जीवति सत्यवान् १०
न उवाच ।
ः साङ्गा मयाऽधीतास्तपो मे संचितं महत् ।
ारब्रह्मचर्यं च गुरवोऽग्निश्च तोषिताः ॥ ११
संहितेन चीर्णानि सर्वाण्येव व्रतानि मे ।
भक्षोपवासश्च कृतो मे विधिवत्सदा ॥ १२
न तपसा वेद्मि सर्वं परचिकीर्षितम् ।
ामेतन्निबोधध्वं ध्रियते सत्यवानिति ॥ १३
य उवाच ।
ाध्यायस्य मे वक्त्राद्यथा वाक्यं विनिःसृतम् ।
जातु भवेन्मिथ्या तथा जीवति सत्यवान् १४
त्र्य ऊचुः ।
श्र्याऽस्य भार्या सावित्री सर्वैरेव सुलक्षणैः ।
ाधव्यकरैर्युक्ता तथा जीवति सत्यवान् ॥ १५
रद्वाज उवाच ।
सथाऽस्य भार्या सावित्री तपसा च दमेन च ।
व ाचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १६
न ल्भ्य उवाच ।
ा दृष्टिः प्रवृत्ता ते सावित्र्याश्च यथा व्रतम् ।
गताऽऽहारमकृत्वैव तथा जीवति सत्यवान् ॥ १७
आपस्तम्ब उवाच ।
यथा वदन्ति शान्तायां दिशि वै मृगपक्षिणः ।
पार्थिवीं चैव वृद्धिं ते तथा जीवति सत्यवान् ॥ १८
धौम्य उवाच ।
सर्वैर्गुणैरुपेतस्ते यथा पुत्रो जनप्रियः ।
दीर्घायुर्लक्षणोपेतस्तथा जीवति सत्यवान् ॥ १९
मार्कण्डेय उवाच ।
एवमाश्वासितस्तैस्तु सत्यवाग्भिस्तपस्विभिः ।
तांस्तान्विगणयन्सर्वांस्ततः स्थिर इवाभवत् ॥ २०
ततो मुहूर्तात्सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥ २१
'दृष्ट्वा चोत्पतिताः सर्वे हर्षं जग्मुश्च ते द्विजाः ।
कण्ठं माता पिता चास्य समालिङ्ग्याभ्यरोदतां ॥'
ब्राह्मणा ऊचुः ।
पुत्रेण संगतं त्वां तु चक्षुष्मन्तं निरीक्ष्य च ।
सर्वे वयं वै पृच्छामो वृद्धिं वै पृथिवीपते ॥ २३
समागमेन पुत्रस्य सावित्र्या दर्शनेन च ।
चक्षुषश्चात्मनो लाभात्त्रिभिर्दिष्ट्या विवर्धसे ॥ २४
सर्वैरस्माभिरुक्तं यत्तथा तन्नात्र संशयः ।
भूयोभूयः समृद्धिस्ते क्षिप्रमेव भविष्यति ॥ २५
मार्कण्डेय उवाच ।
ततोऽग्निं तत्र संज्वाल्य द्विजास्ते सर्व एव हि ।
उपासांचक्रिरे पार्थ द्युमत्सेनं महीपतिम् ॥ २६
शैब्या च सत्यवांश्चैव सावित्री चैकतः स्थिताः ।
सर्वैस्तैरभ्यनुज्ञाता विशोकाः समुपाविशन् ॥ २७
ततो राज्ञा सहासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ पप्रच्छुर्नृपतेः सुतम् ॥ २८
प्रागेव नागतं कस्मात्सभार्येण त्वया विभो ।
विरात्रे चागतं कस्मात्कोनु बन्धस्तवाभवत् ॥ २९
संतापितः पिता माता वयं चैव नृपात्मज ।
कस्मादिति न जानीमस्तत्सर्वं वक्तुमर्हसि ॥ ३०

लानि च यानि मे इति ध. पाठः ॥ १२ ॥ शान्तायां प्रस- ाम् ॥ १८ ॥ विरात्रे बहुरात्रे काले आगतं आगमनम्

॥ २९ ॥ एकोनत्रिंशततमोऽध्यायः ॥ २९९ ॥

सत्यवानुवाच ।
पित्राऽहमभ्यनुज्ञातः सावित्रीसहितो गतः ।
अथ मेऽभूच्छिरोदुःखं वने काष्ठानि भिन्दतः ३१
सुप्तश्चाहं वेदनया चिरमित्युपलक्षये ।
तावत्कालं न च मया सुप्तपूर्वं कदाचन ॥ ३२
सर्वेषामेव भवतां संतापो मा भवेदिति ।
अतो विरात्रागमनं नान्यदस्तीह कारणम् ॥ ३३
गौतम उवाच ।
अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः ।
नास्य त्वं कारणं वेत्सि सावित्री वक्तुमर्हति ॥ ३४
श्रोतुमिच्छामि सावित्रि त्वं हि वेत्थ परावरम् ।
त्वां हि जानामि सावित्रि सावित्रीमिव तेजसा ३५
त्वमत्र हेतुं जानीषे तस्मात्सत्यं निरुच्यताम् ।
रहस्यं यदि ते नास्ति किंचिदत्र वदस्व नः ॥ ३६
सावित्र्युवाच ।
एवमेतद्यथा वेत्थ संकल्पो नान्यथा हि वः ।
न हि किंचिद्रहस्यं मे श्रूयतां तथ्यमेव यत् ॥ ३७
मृत्युर्मे पत्युराख्यातो नारदेन महात्मना ।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ॥ ३८
सुप्तं चैनं यमः साक्षादुपागच्छत्सकिंकरः
स एनमनयद्बद्ध्वा दिशं पितृनिषेविताम् । ३९
अस्तौषं तमहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान्मम । ४०
चक्षुषी च स्वराज्यं च द्वौ वरौ श्वशुरस्य मे ।
लब्धं पितुः पुत्रशतं पुत्राणां चात्मनः शतम् । ४१
चतुर्वर्षशतायुर्मे भर्ता लब्धश्च सत्यवान् ।
भर्तुर्हि जीवितार्थं तु मया चीर्णं त्विदं व्रतम् । ४२
एतत्सर्वं मयाऽऽख्यातं कारणं विस्तरेण वः ।
यथावृत्तं सुखोदर्कमिदं दुःखं महन्मम ॥ ४३
ऋषय ऊचुः ।
निमज्ज्यमानं व्यसनैरभिद्रुतं
कुलं नरेन्द्रस्य तमोमये ह्रदे ।
त्वया सुशीलव्रतपुण्यया कुलं
समुद्धृतं साध्वि पुनः कुलीनया ॥ ४४
मार्कण्डेय उवाच ।
तथा प्रशस्य ह्यभिपूज्य चैव
वरस्त्रियं तामृषयः समागताः ।
नरेन्द्रमामन्त्र्य सपुत्रमञ्जसा
शिवेन जग्मुर्मुदिताः स्वमालयम् ॥ ४५

॥ इति श्रीमन्महाभारते अरण्यपर्वणि पतिव्रतामाहात्म्यपर्वणि एकोनत्रिशततमोऽध्यायः ॥ २९९ ॥

त्रिशततमोऽध्यायः ॥ ३०० ॥

साल्वदेशीयैर्द्युमत्सेनंप्रति तन्मन्त्रिणा तच्छत्रुनिबर्हणनिवेदनपूर्वकं निजनगरंप्रत्यागमनप्रार्थना ॥ १ ॥ सभार्येण द्युमत्सेनेन सावित्रीसत्यवद्भ्यां सह मुनिगणाभिवादनादिपूर्वकं स्वपुरंप्रत्यागमनम् ॥ २ ॥

मार्कण्डेय उवाच ।
तस्यां रात्र्यां व्यतीतायामुदिते सूर्यमण्डले ।
कृतपौर्वाह्णिकाः सर्वे समेयुस्ते तपोधनाः ॥ १
तदेव सर्वं सावित्र्या महाभाग्यं महर्षयः ।
द्युमत्सेनाय नातृप्यन्कथयन्तः पुनः पुनः ॥ २
ततः प्रकृतयः सर्वाः साल्वेभ्योऽभ्यागता नृपम् ।
आचख्युर्निहतं चैव स्वेनामात्येन तं द्विषम् ॥ ३
तं मन्त्रिणा हतं प्रोच्य ससहायं सबान्धवम् ।
न्यवेदयन्यथावृत्तं विद्रुतं च द्विषद्बलम् ॥ ४
ऐकमत्यं च सर्वस्य जनस्य स्वं नृपं प्रति ।
सचक्षुर्वाऽप्यचक्षुर्वा स नो राजा भवत्विति ॥ ५
अनेन निश्चयेनेह वयं प्रस्थापिता नृप ।
प्राप्तानीमानि यानानि चतुरङ्गं च ते बलम् ॥ ६
प्रयाहि राजन्भद्रं ते घुष्टस्ते नगरे जयः ।
अध्यास्स्व चिररात्राय पितृपैतामहं पदम् ॥ ७
मार्कण्डेय उवाच ।
चक्षुष्मन्तं च तं दृष्ट्वा राजानं वपुषाऽन्वितम् ।

चिररात्राय बहुकालम् ॥ ७ ॥

मूर्ध्ना निपतिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ८
ततोऽभिवाद्य तान्वृद्धान्द्विजानाश्रमवासिनः ।
तैश्चाभिपूजितः सर्वैः प्रययौ नगरं प्रति ॥ ९
शैब्या च सह सावित्र्या स्वास्तीर्णेन सुवर्चसा ।
नरयुक्तेन यानेन प्रययौ सेनया वृता ॥ १०
ततोऽभिषिषिचुः प्रीत्या द्युमत्सेनं पुरोहिताः ।
पुत्रं चास्य महात्मानं यौवराज्येऽभ्यषेचयन् ॥ ११
ततः कालेन महता सावित्र्याः कीर्तिवर्धनम् ।
तद्वै पुत्रशतं जज्ञे शूराणामनिवर्तिनाम् ॥ १२
भ्रातॄणां सोदराणां च तथैवास्याभवच्छतम् ।
मद्राधिपस्याश्वपतेर्मालव्यां सुमहाबलम् ॥ १३
एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।
भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात्समुद्धृतं १४
तथैवैषा हि कल्याणी द्रौपदी शीलसंमता ।
तारयिष्यति वः सर्वान्सावित्रीव कुलाङ्गना ॥१५
वैशंपायन उवाच ।
एवं स पाण्डवस्तेन अनुनीतो महात्मना ।
विशोको विज्वरो राजन्काम्यके न्यवसत्तदा ॥१६
यश्चेदं शृणुयाद्भक्त्या सावित्र्याख्यानमुत्तमम् ।
स सुखी सर्वसिद्धार्थो न दुःखं प्राप्नुयान्नरः ॥१७

॥ इति श्रीमन्महाभारते अरण्यपर्वणि पतिव्रतामाहात्म्यपर्वणि त्रिशततमोऽध्यायः ॥ ३०० ॥

समाप्तं चेदं पतिव्रतामाहात्म्यपर्व ॥ १९ ॥

(अथ कुण्डलाहरणपर्व ॥ २० ॥)

एकाधिकत्रिशततमोऽध्यायः ॥ ३०१ ॥

सूर्येण स्वप्ने कर्णंप्रति इन्द्रेण पाण्डवप्रियचिकीर्षया भाविकवचकुण्डलयाचनानिवेदनपूर्वकं तद्दानप्रतिषेधवचनम् ॥ १ ॥ कर्णेन सूर्यंप्रति हेतूक्तिपूर्वकमिन्द्राय तद्दानप्रतिज्ञानम् ॥ २ ॥

जनमेजय उवाच ।
यत्तत्तदा महद्ब्रह्मँल्लोमशो वाक्यमब्रवीत् ।
इन्द्रस्य वचनादेव पाण्डुपुत्रं युधिष्ठिरम् ॥ १
यच्चापि ते भयं तीव्रं न च कीर्तयसे क्वचित् ।
तच्चाप्यपहरिष्यामि धनंजय इतो गते ॥ २
किंतु तज्जपतांश्रेष्ठ कर्णं प्रति महद्भयम् ।
आसीन्न च स धर्मात्मा कथयामास कस्यचित् ॥
वैशंपायन उवाच ।
अहं ते राजशार्दूल कथयामि कथामिमाम् ।
पृच्छतो भरतश्रेष्ठ शुश्रूषस्व गिरं मम ॥ ४
द्वादशे समतिक्रान्ते वर्षे प्राप्ते त्रयोदशे ।
पाण्डूनां हितकृच्छक्रः कर्णं भिक्षितुमुद्यतः ॥ ५
अभिप्रायमथो ज्ञात्वा महेन्द्रस्य विभावसुः ।
कुण्डलार्थे महाराज सूर्यः कर्णमुपागतः ॥ ६
महार्हे शयने वीरं स्पर्द्ध्यास्तरणसंवृते ।
शयानमतिविश्वस्तं ब्रह्मण्यं सत्यवादिनम् ॥ ७
स्वप्नान्ते निशि राजेन्द्र दर्शयामास रश्मिवान् ।
कृपया परयाऽऽविष्टः पुत्रस्नेहाच्च भारत ॥ ८
ब्राह्मणो वेदविद्भूत्वा सूर्यो योगर्द्धिरूपवान् ।
हितार्थमब्रवीत्कर्णं सान्त्वपूर्वमिदं वचः ॥ ९
कर्ण मद्वचनं तात शृणु सत्यभृतांवर ।
ब्रुवतोऽद्य महाबाहो सौहृदात्परमं हितम् ॥ १०
उपायास्यति शक्रस्त्वां पाण्डवानां हितेप्सया ।
ब्राह्मणच्छद्मना कर्ण कुण्डलोपजिहीर्षया ॥ ११

सर्वसिद्धार्थो दीर्घमायुरवाप्नुयात् इति क. पाठः ॥ १७ ॥
त्रिशततमोऽध्यायः ॥ ३०० ॥
विभावसुः विशिष्टा भाः दीप्तिः सैव वसु धनं यस्य तादृशः
सूर्यः ॥ ६ ॥ स्पर्ध्यं विमर्दसहं स्पृहणीयं वा ॥ ७ ॥ स्वप्नान्ते स्वप्नमध्ये ॥ ८ ॥ एकाधिकत्रिशततमोऽध्यायः ॥ ३०१ ॥

विदितं तेन शीलं ते सर्वस्य जगतस्तथा ।
यथा त्वं भिक्षितः सद्भिर्ददास्येव न याचसे १२
त्वं हि तात ददास्येव ब्राह्मणेभ्यः प्रयाचितम् ।
वित्तं यच्चान्यदप्याहुर्न प्रत्याख्यासि कस्यचित् ॥
त्वां तु चैवंविधं ज्ञात्वा स्वयं वै पाकशासनः ।
आगन्ता कुण्डलार्थाय कवचं चैव भिक्षितुम् ॥१४
तस्मै प्रयाचमानाय न देये कुण्डले त्वया ।
अनुनेयः परं शक्त्या श्रेय एतद्धि ते परम् ॥ १५
कुण्डलार्थेऽब्रुवंस्तात कारणैर्बहुभिस्त्वया ।
अन्यैर्बहुविधैर्वित्तैः सन्निवार्यः पुनःपुनः ॥ १६
रत्नैः स्त्रीभिस्तथा गोभिर्धनैर्बहुविधैरपि ।
निदर्शनैश्च बहुभिः कुण्डलेप्सुः पुरंदरः ॥ १७
यदि दास्यसि कर्ण त्वं सहजे कुण्डले शुभे ।
आयुषः प्रक्षयं गत्वा मृत्योर्वशमुपैष्यसि ॥ १८
कवचेन समायुक्तः कुण्डलाभ्यां च मानद ।
अवध्यस्त्वं रणेऽरीणामिति विद्धि वचो मम ॥ १९
अमृतादुत्थितं ह्येतदुभयं रत्नसंमितम् ।
तस्माद्रक्ष्यं त्वया कर्ण जीवितं चेत्प्रियं तव ॥ २०
कर्ण उवाच ।
को मामेवं भवान्प्राह दर्शयन्सौहृदं परम् ।
कामया भगवन्ब्रूहि को भवान्द्विजवेषधृक् ॥ २१
ब्राह्मण उवाच ।
अहं तात सहस्रांशुः सौहृदात्त्वां निदर्शये ।
कुरुष्वैतद्वचो मे त्वमेतच्छ्रेयः परं हि ते ॥ २२
कर्ण उवाच ।
श्रेय एव ममात्यन्तं यस्य मे गोपतिः प्रभुः ।
प्रवक्ताऽद्य हितान्वेषी शृणु चेदं वचो मम ॥ २३
प्रसादये त्वां वरदं प्रणयाच्च ब्रवीम्यहम् ।
न निवार्यो व्रतादस्मादहं यद्यस्मि ते प्रियः ॥ २४

व्रतं वै मम लोकोऽयं वेत्ति कृत्स्नं विभावसो ।
यथाऽहं द्विजमुख्येभ्यो दद्यां प्राणानपि ध्रुवम् ॥२
यद्यागच्छति मां शक्रो ब्राह्मणच्छद्मना वृतः ।
हितार्थं पाण्डुपुत्राणां खेचरोत्तम भिक्षितुम् ॥ २
दास्यामि विबुधश्रेष्ठ कुण्डले वर्म चोत्तमम् ।
न मे कीर्तिः प्रणश्येत त्रिषु लोकेषु विश्रुता ॥ २
मद्विधस्यायशस्यं हि न युक्तं प्राणरक्षणम् ।
युक्तं हि यशसा युक्तं मरणं लोकसंमतम् ॥ २
सोहमिन्द्राय दास्यामि कुण्डले सह वर्मणा ।
यदि मां बलवृत्रघ्नो भिक्षार्थमुपयास्यति ॥ २
हितार्थं पाण्डुपुत्राणां कुण्डले मे प्रयाचितुम् ।
तन्मे कीर्तिकरं लोके तस्याकीर्तिर्भविष्यति ॥ ३
वृणोमि कीर्तिं लोके हि जीवितेनापि भानुमन्
कीर्तिमानश्नुते स्वर्गं हीनकीर्तिस्तु नश्यति ॥ ३
कीर्तिर्हि पुरुषं लोके संजीवयति मातृवत् ।
अकीर्तिर्जीवितं हन्ति जीवतोपि शरीरिणः ॥ ३
अयं पुराणः श्लोको हि स्वयं गीतो विभावसो ।
धात्रा लोकेश्वर यथा कीर्तिरायुर्नरस्य ह ॥ ३३
पुरुषस्य परे लोके कीर्तिरेव परायणम् ।
इह लोके विशुद्धा च कीर्तिरायुर्विवर्धनी ॥ ३४
सोहं शरीरजे दत्त्वा कीर्तिं प्राप्स्यामि शाश्वतीम्
दत्त्वा च विधिवद्दानं ब्राह्मणेभ्यो यथाविधि ॥ ३५
हुत्वा शरीरं संग्रामे कृत्वा कर्म सुदुष्करम् ।
विजित्य च परानाजौ यशः प्राप्स्यामि केवलम् ३६
भीतानामभयं दत्त्वा संग्रामे जीवितार्थिनाम् ।
वृद्धान्बालान्द्विजातींश्च मोक्षयित्वा महाभयात् ३७
प्राप्स्यामि परमं लोके यशः स्वर्ग्यमनुत्तमम् ।
जीवितेनापि मे रक्ष्या कीर्तिस्तद्विद्धि मे व्रतम् ३८
सोहं दत्त्वा मघवते भिक्षामेतामनुत्तमाम् ।
ब्राह्मणच्छद्मिने देव लोके गन्ता परां गतिम् ३९

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि एकाधिकत्रिशततमोऽध्यायः ॥ ३०१ ॥

द्व्यधिकत्रिशततमोऽध्यायः ॥ ३०२ ॥

सूर्येण हेतुकथनपूर्वकं पुनरिन्द्राय कवचकुण्डलदानप्रतिषेधोक्तिः ॥ १ ॥

सूर्य उवाच ।
माऽहितं कर्ण कार्षीस्त्वमात्मनः सुहृदां तथा ।
पुत्राणामथ भार्याणामथो मातुरथो पितुः ॥ १
शरीरस्याविरोधेन प्राणिनां प्राणभृद्वर ।
इष्यते यशसः प्राप्तिः कीर्तिश्च त्रिदिवे स्थिरा ॥२
यस्त्वं प्राणविरोधेन कीर्तिमिच्छसि शाश्वतीम् ।
सा ते प्राणान्समादाय गमिष्यति न संशयः ॥३
जीवतां कुरुते कार्यं पिता माता सुतास्तथा ।
ये चान्ये बान्धवाः केचिल्लोकेऽस्मिन्पुरुषर्षभ ॥४
राजानश्च नरव्याघ्र पौरुषेण निबोध तत् ।
कीर्तिश्च जीवतः साध्वी पुरुषस्य महाद्युते ॥ ५
मृतस्य कीर्त्या किं कार्यं भस्मीभूतस्य देहिनः ।
मृतः कीर्तिं न जानीते जीवन्कीर्तिं समश्नुते ॥ ६
मृतस्य कीर्तिर्मर्त्यस्य यथा माला गतायुषः ।
अहं तु त्वां ब्रवीम्येतद्भक्तोसीति हितेप्सया ॥ ७
भक्तिमन्तो हि मे रक्ष्या इत्येतेनापि हेतुना ।
भक्तोयं परया भक्त्या मामित्येव महाभुज ॥ ८
ममापि भक्तिरुत्पन्ना स त्वं कुरु वचो मम ।
अस्ति चात्र परं किंचिदध्यात्मं देवनिर्मितम् ।
अतश्च त्वां ब्रवीम्येतत्क्रियतामविशङ्कया ॥ ९
देवगुह्यं त्वया ज्ञातुं न शक्यं पुरुषर्षभ ।
तस्मान्नाख्यामि ते गुह्यं काले वेत्स्यति तद्भवान् ॥
पुनरुक्तं च वक्ष्यामि त्वं राधेय निबोध तत् ।
माऽस्मै ते कुण्डले दद्या भिक्षिते वज्रपाणिना ॥ ११
शोभसे कुण्डलाभ्यां च रुचिराभ्यां महाद्युते ।
विशाखयोर्मध्यगतः शशीव विमले दिवि ॥ १२
कीर्तिश्च जीवतः साध्वी पुरुषस्येति विद्धि तत् ।
प्रत्याख्येयस्त्वया तात कुण्डलार्थे सुरेश्वरः ॥ १३
'पाण्डवानां हिते युक्तो भिक्षन्ब्राह्मणवेषधृत् ।'
शक्या बहुविधैर्वाक्यैः कुण्डलेप्सा त्वयाऽनघ ।
विहन्तुं देवराजस्य हेतुयुक्तैः पुनःपुनः ॥ १४
उपपत्त्युपपन्नार्थैर्माधुर्यकृतभूषणैः ।
पुरंदरस्य कर्ण त्वं बुद्धिमेतामपानुद ॥ १५
त्वं हि नित्यं नरव्याघ्र स्पर्धसे सव्यसाचिना ।
सव्यसाची त्वया चेह युधि शूरः समेष्यति ॥ १६
न तु त्वामर्जुनः शक्तः कुण्डलाभ्यां समन्वितम् ।
विजेतुं युधि यद्यस्य स्वयमिन्द्रः शरो भवेत् ॥१७
तस्मान्न देये शक्राय त्वयैते कुण्डले शुभे ।
संग्रामे यदि निर्जेतुं कर्ण कामयसेऽर्जुनम् ॥ १८

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि द्व्यधिकत्रिशततमोऽध्यायः ॥ ३०२ ॥

त्र्यधिकत्रिशततमोऽध्यायः ॥ ३०३ ॥

कर्णेन सूर्यंप्रति सानुनयं शक्राय कवचकुण्डलदानेऽभ्यनुज्ञाप्रार्थना ॥ १ ॥ सूर्येण कर्णप्रति शक्राच्छक्तिग्रहणचोदना-पूर्वकं कुण्डलादिदानाभ्यनुज्ञानम् ॥ २ ॥

कर्ण उवाच ।
भगवन्तमहं भक्तो यथा मां वेत्थ गोपते ।
तथा परमतिग्मांशो नास्त्यदेयं कथंचन ॥ १
न मे दारा न मे पुत्रा न चात्मा सुहृदो न च ।
तथेष्टा वै सदा भक्त्या यथा त्वं गोपते मम ॥ २
इष्टानां च महात्मानो भक्तानां च न संशयः ।

जीवतां पुत्रादीनां कार्यं प्रयोजनं परिष्वङ्गादिजं सुखं पित्रादिः कुरुते लभते ॥ ४ ॥ मां मम ॥ ८ ॥ विशाखयोः विशाखानक्षत्रस्य द्वे भास्वरे तारे तयोर्मध्ये गतः पूर्णचन्द्रः ॥ १२ ॥ विहन्तुं शक्येति संबन्धः ॥ १४ ॥ द्व्यधिकत्रिशततमोऽध्यायः ॥ ३०२ ॥

कुर्वन्ति भक्तिमिष्टां च जानीषे त्वं च भास्कर ॥ ३
इष्टो भक्तश्च मे कर्णो न चान्यद्दैवतं दिवि ।
जानीत इति वै कृत्वा भगवानाह मद्धितम् ॥ ४
भूयश्च शिरसा याचे प्रसाद्य च पुनःपुनः ।
इति ब्रवीमि तिग्मांशो त्वं तु मे क्षन्तुमर्हसि ॥ ५
बिभेमि न तथा मृत्योर्यथा बिभ्येऽनृतादहम् ।
विशेषेण द्विजातीनां सर्वेषां सर्वदा सताम् ॥ ६
प्रदाने जीवितस्यापि न मेऽत्रास्ति विचारणा ।
यच्च मामात्थ देव त्वं पाण्डवं फल्गुनं प्रति ॥ ७
व्येतु संतापजं दुःखं तव भास्कर मानसम् ।
अर्जुनप्रतिमं चैव विजेष्यामि रणेऽर्जुनम् ॥ ८
तवापि विदितं देव ममाप्यस्त्रबलं महत् ।
जामदग्न्यादुपात्तं यत्तथा द्रोणान्महात्मनः ॥ ९
इदं त्वमनुजानीहि सुरश्रेष्ठ व्रतं मम ।
भिक्षते वज्रिणे दद्यामपि जीवितमात्मनः ॥ १०
सूर्य उवाच ।
यदि तात ददास्येते वज्रिणे कुण्डले शुभे ।
त्वमप्येनमथो ब्रूया विजयार्थं महाबल ॥ ११
नियमेन प्रदद्यास्त्वं कुण्डले वै शतक्रतोः ।
अवध्यो ह्यसि भूतानां कुण्डलाभ्यां समन्वितः ॥
अर्जुनेन विनाशं हि तव दानवसूदनः ।
प्रार्थयानो रणे वत्स कुण्डले ते जिहीर्षति ॥ १३
स त्वमप्येनमाराध्य सूनृताभिः पुनः पुनः ।
अभ्यर्थयेथा देवेशममोघार्थं पुरंदरम् ॥ १४
अमोघां देहि मे शक्तिममित्रविनिबर्हिणीम् ।
दास्यामि ते सहस्राक्ष कुण्डले वर्म चोत्तमम् ॥
इत्येव नियमेन त्वं दद्याः शक्राय कुण्डले ।
तया त्वं कर्ण संग्रामे हनिष्यसि रणे रिपून् ॥ १
नाहत्वा हि महाबाहो शत्रूनेति करं पुनः ।
सा शक्तिर्देवराजस्य शतशोऽथ सहस्रशः ॥ १
वैशंपायन उवाच ।
एवमुक्त्वा सहस्रांशुः सहसाऽन्तरधीयत ।
'कर्णस्तु बुबुधे राजन्स्वप्नान्ते प्रव्यथन्निव ॥ १
प्रतिबुद्धस्तु राधेयः स्वप्नं संचिन्त्य भारत ।
चकार निश्चयं राजञ्शक्त्यर्थं वदतांवर ॥ १
यदि मामिन्द्र आयाति कुण्डलार्थं परन्तप ।
शक्त्या तस्मै प्रदास्यामि कुण्डले वर्म चैव ह ॥ २
स कृत्वा प्रातरुत्थाय कार्याणि भरतर्षभ ।
ब्राह्मणान्वाचयित्वा च यथाकार्यमुपाक्रमत् ॥ २
विधिना राजशार्दूल मुहूर्तमजपत्तदा ।'
ततः सूर्याय जप्यान्ते कर्णः स्वप्नं न्यवेदयत् ॥ २
यथा दृष्टं यथातत्त्वं यथोक्तमुभयोर्निशि ।
तत्सर्वमानुपूर्व्येण शशंसास्मै वृषस्तदा ॥ २
तच्छ्रुत्वा भगवान्देवो भानुः स्वर्भानुसूदनः ।
उवाच तं तथेत्येव कर्णं सूर्यः स्मयन्निव ॥ २
ततस्तत्त्वमिति ज्ञात्वा राधेयः परवीरहा ।
शक्तिमेवाभिकाङ्क्षन्वै वासवं प्रत्यपालयत् ॥ २५

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि त्र्यधिकत्रिशततमोऽध्यायः ॥ ३०३ ॥

चतुस्त्रिंशदधिकत्रिशततमोऽध्यायः ॥ ३०४ ॥

स्वावासे दुर्वाससमावासयता कुन्तिभोजेन तत्परिचर्यायै कुन्त्या नियोजनम् ॥ १ ॥

जनमेजय उवाच ।
किं तद्गुह्यं न चाख्यातं कर्णायेहोष्णरश्मिना ।
कीदृशे कुण्डले ते च कवचं चैव कीदृशम् ॥ १
कुतश्च कवचं तस्य कुण्डले चैव सत्तम ।
एतदिच्छाम्यहं श्रोतुं तन्मे ब्रूहि तपोधन ॥ २
वैशंपायन उवाच ।
अहं राजन्ब्रवीम्येतत्तस्य गुह्यं विभावसोः ।
यादृशे कुण्डले ते च कवचं चैव यादृशम् ॥ ३

अस्मै सूर्याय । वृषः कर्णः ॥ २३ ॥ स्वर्भानुसूदनः राहुदमनः ॥ २४ ॥ त्र्यधिकत्रिशततमोऽध्यायः ॥ ३०३ ॥

कुन्तिभोजं पुरा राजन्ब्राह्मणः पर्युपस्थितः ।
तिग्मतेजा महान्प्रांशुः श्मश्रुदण्डजटाधरः ॥ ४
दर्शनीयोऽनवद्याङ्गस्तेजसा प्रज्वलन्निव ।
मधुपिङ्गो मधुरवाक्तपःस्वाध्यायभूषणः ॥ ५
स राजानं कुन्तिभोजमब्रवीत्सुमहातपाः ।
भिक्षामिच्छामि वै भोक्तुं तव गेहे विमत्सर ॥ ६
न मे व्यलीकं कर्तव्यं त्वया वा तव चानुगैः ।
एवं वत्स्यामि ते गेहे यदि ते रोचतेऽनघ ॥ ७
यथाकामं च गच्छेयमागच्छेयं तथैव च ।
शय्यासने च मे राजन्नापराध्येत कश्चन ॥ ८
तमब्रवीत्कुन्तिभोजः प्रीतियुक्तमिदं वचः ।
एवमस्तु परं चेति पुनश्चैनमथाब्रवीत् ॥ ९
मम कन्या महाप्राज्ञ पृथा नाम यशस्विनी ।
शीलवृत्तान्विता साध्वी नियताऽनवमानिनी १०
उपस्थास्यति सा त्वां वै पूजयाऽनवमत्य च ।
तस्याश्च शीलवृत्तेन तुष्टिं समुपयास्यसि ॥ ११
एवमुक्त्वा तु तं विप्रमभिपूज्य यथाविधि ।
उवाच कन्यामभ्येत्य पृथां पृथुललोचनाम् ॥१२
अयं वत्से महाभागो ब्राह्मणो वस्तुमिच्छति ।
मम गेहे मया चास्य तथेत्येवं प्रतिश्रुतम् ॥ १३
त्वयि वत्से परायत्तं ब्राह्मणस्याभिराधनम् ।
तन्मे वाक्यममिथ्या त्वं कर्तुमर्हसि कर्हिचित् १४
अयं तपस्वी भगवान्स्वाध्यायनियतो द्विजः ।
यद्यद्ब्रूयान्महातेजास्तत्तद्देयममत्सरात् ॥ १५
ब्राह्मणा हि परं तेजो ब्राह्मणा हि परं तपः ।
ब्राह्मणानां नमस्कारैः सूर्यो दिवि विराजते ॥१६
अमानयन्हि दाण्डक्यो वातापिश्च महासुरः ।
निहतो ब्रह्मदण्डेन तालजङ्घस्तथैव च ।
'विन्ध्याद्रिश्च समुद्रश्च नहुषश्च विहिंसितः ॥' १७
सोयं वत्से महाभार आहितस्त्वयि सांप्रतम् ।
त्वं सदा नियता कुर्या ब्राह्मणस्याभिराधनम् १८
जानामि प्रणिधानं ते बाल्यात्प्रभृति नन्दिनि ।
ब्राह्मणेष्विह सर्वेषु गुरुबन्धुषु चैव ह ॥ १९
तथा प्रेष्येषु सर्वेषु मित्रसंबन्धिमातृषु ।
मयि चैव यथावत्त्वं सर्वमावृत्य वर्तसे ॥ २०
न ह्यतुष्टो जनोऽस्तीह पुरे चान्तःपुरे च ते ।
सम्यग्वृत्त्याऽनवद्याङ्गि तव भृत्यजनेष्वपि ॥ २१
संदेष्टव्यां तु मन्ये त्वां द्विजातिं कोपनं प्रति ।
पृथे बालेति कृत्वा वै सुता चासि ममेति च २२
वृष्णीनां च कुले जाता शूरस्य दयिता सुता ।
दत्ता प्रीतिमता मह्यं पित्रा बाला पुरा स्वयम् २३
वसुदेवस्य भगिनी सुतानां प्रवरा मम ।
अग्र्यमग्रे प्रतिज्ञाय तेनासि दुहिता मम ॥ २४
तादृशे हि कुले जाता कुले मम विवर्धिता ।
सुखात्सुखमनुप्राप्ता ह्रदाद्ध्रदमिवापगा ॥ २५
दौष्कुलेया विशेषेण कथंचित्प्रग्रहं गताः ।
बालभावाद्विकुर्वन्ति प्रायशः प्रमदाः शुभे ॥ २६
पृथे राजकुले जन्म रूपं चापि तवाद्भुतम् ।
तेन तेनासि संपन्ना समुपेता च भामिनि ॥ २७
सा त्वं दर्पं परित्यज्य दम्भं मानं च भामिनि ।
आराध्य वरदं विप्रं श्रेयसा योक्ष्यसे पृथे ॥ २८
एवं प्राप्स्यसि कल्याणि कल्याणमनघे ध्रुवम् ।
कोपिते च द्विजश्रेष्ठे कृत्स्नं दह्येत मे कुलम् ॥ २९

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि चतुरधिकत्रिशततमोऽध्यायः ॥ ३०४ ॥

अनवमत्य अवमानमकृत्वा ॥ ११ ॥ वस्तुं वासं कर्तुम् ॥ १३ ॥ प्रणिधानं चित्तैकाग्र्यम् ॥ १९ ॥ आवृत्य व्याप्य ॥ २० ॥ अग्र्यं अग्रे देयं मया प्रथममपत्यं तुभ्यं देयमिति प्रतिज्ञातमित्यर्थः ॥ २४ ॥ ह्रदमिवागतेति झ. पाठः ॥ २५ ॥ दौष्कुलेयाः दुष्कुले जाताः । प्रग्रहं निर्बन्धं गताः प्राप्ताः विकुर्वन्ति दौष्ठ्यं कुर्वन्ति ॥ २६ ॥ चतुरधिकत्रिशततमोऽध्यायः ॥ ३०४ ॥

पञ्चाधिकत्रिशततमोऽध्यायः ॥ ३०५ ॥

कुन्त्या सावधानं परिचर्यया दुर्वाससः परितोषणम् ॥ १ ॥

कुन्त्युवाच ।
ब्राह्मणं यन्त्रिता राजन्नुपस्थास्यामि पूजया ।
यथाप्रतिज्ञं राजेन्द्र न च मिथ्या ब्रवीम्यहम् ॥ १
एष चैव स्वभावो मे पूजयेयं द्विजानिति ।
तव चैव प्रियं कार्यं श्रेयश्च परमं मम ॥ २
यद्येवैष्यति सायाह्ने यदि प्रातरथो निशि ।
यद्यर्धरात्रे भगवान्न मे कोपं करिष्यति ॥ ३
लाभो ममैष राजेन्द्र यद्वै पूजयितुं द्विजान् ।
आदेशे तव तिष्ठन्ती हितं कुर्यां नरोत्तम ॥ ४
विस्रब्धो भव राजेन्द्र न व्यलीकं द्विजोत्तमः ।
वसन्प्राप्स्यति ते गेहे सत्यमेतद्ब्रवीमि ते ॥ ५
यत्प्रियं च द्विजस्यास्य हितं चैव तवानघ ।
यतिष्यामि तथा राजन्व्येतु ते मानसो ज्वरः ॥ ६
ब्राह्मणा हि महाभागाः पूजिताः पृथिवीपते ।
तारणाय समर्थाः स्युर्विपरीते वधाय च ॥ ७
साऽहमेतद्विजानन्ती तोषयिष्ये द्विजोत्तमम् ।
न मत्कृते व्यथां राजन्प्राप्स्यसि द्विजसत्तमात् ॥ ८
अपराधेऽपि राजेन्द्र राज्ञामश्रेयसे द्विजाः ।
भवन्ति च्यवनो यद्वत्सुकन्यायाः कृते पुरा ॥ ९
नियमेन परेणाहमुपस्थास्ये द्विजोत्तमम् ।
यथा त्वया नरेन्द्रेदं भाषितं ब्राह्मणं प्रति ॥ १०
एवं ब्रुवन्तीं बहुशः परिष्वज्य समर्थ्य च ।
इतिचेति च कर्तव्यं राजा सर्वमथादिशत् ॥ ११
एवमेतत्त्वया भद्रे कर्तव्यमविशङ्कया ।
मद्धितार्थं तथाऽऽत्मार्थं कुलार्थं चाप्यनिन्दिते १२
एवमुक्त्वा तु तां कन्यां कुन्तिभोजो महायशाः ।
पृथां परिददौ तस्मै द्विजाय द्विजवत्सलः ॥ १३
इयं ब्रह्मन्मम सुता बाला सुखविवर्धिता ।
अपराध्येत यत्किंचिन्न कार्यं हृदि तत्त्वया ॥ १४
द्विजातयो महाभागा वृद्धबालतपस्विषु ।
भवन्त्यक्रोधनाः प्रायो ह्यपराद्धेषु नित्यदा ॥ १५
सुमहत्यपराधेऽपि क्षान्तिः कार्या द्विजातिभिः ।
यथाशक्ति यथोत्साहं पूजा ग्राह्या द्विजोत्तम ॥ १६
तथेति ब्राह्मणेनोक्ते स राजा प्रीतमानसः ।
हंसचन्द्रांशुसंकाशं गृहमस्मै न्यवेदयत् ॥ १७
तत्राग्निशरणे क्लृप्तमासनं तस्य भानुमत् ।
आहारादि च सर्वं तत्तथैव प्रत्यवेदयत् ॥ १८
निक्षिप्य राजपुत्री तु तन्द्रीं मानं तथैव च ।
आतस्थे परमं यत्नं ब्राह्मणस्याभिराधने ॥ १९
तत्र सा ब्राह्मणं गत्वा पृथा शौचपरा सती ।
विधिवत्परिचारार्हं देववत्पर्यतोषयत् ॥ २०

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि पञ्चाधिकत्रिशततमोऽध्यायः ॥ ३०५ ॥

षडधिकत्रिशततमोऽध्यायः ॥ ३०६ ॥

कुन्तीपरिचर्यासंतुष्टेन दुर्वाससा तांप्रति अभीप्सितार्थवरणचोदना ॥ १ ॥ तथा किंचिदप्यवृण्वन्त्यै तस्यै स्वयमेव सकलदेववशीकरणदक्षस्य मन्त्रस्योपदेशः ॥ २ ॥ ततस्तेन कुन्तिभोजामन्त्रणपूर्वकमन्तर्धानम् ॥ ३ ॥

वैशंपायन उवाच ।
सा तु कन्या महाराज ब्राह्मणं संशितव्रतम् ।
तोषयामास शुद्धेन मनसा संशितव्रता ॥ १
प्रातरेष्याम्यथेत्युक्त्वा कदाचिद्द्विजसत्तमः ।

यन्त्रिता नियमयुक्ता ॥ १ ॥ विस्रब्धो विश्वस्तः । व्यलीकमप्रियम् ॥ ५ ॥ अग्निशरणे अग्निगृहे ॥ १८ ॥ तन्द्रीं आलस्यम् ॥ १९ ॥ परिचारार्हं पूजार्हम् ॥ २० ॥ पञ्चाधिकत्रिशततमोऽध्यायः ॥ ३०५ ॥

तत आयाति राजेन्द्र सायं रात्रावथो पुनः ॥ २
तं च सर्वासु वेलासु भक्ष्यभोज्यप्रतिश्रयैः ।
पूजयामास सा कन्या वर्धमानैस्तु सर्वदा ॥ ३
अन्नादिसमुदाचारः शय्यासनकृतस्तथा ।
दिवसेदिवसे तस्य वर्धते न तु हीयते ॥ ४
निर्भर्त्सनापवादैश्च तथैवाप्रियया गिरा ।
ब्राह्मणस्य पृथा राजन्न चकाराप्रियं तदा ॥ ५
स्वप्नकाले पुनश्चैति न चैति बहुशो द्विजः ।
सुदुर्लभमपि ह्यन्नं दीयतामिति सोऽब्रवीत् ॥ ६
कृतमेव च तत्सर्वं यथा तस्मै न्यवेदयत् ।
शिष्यवत्पुत्रवच्चैव स्वसृवच्च सुसंयता ॥ ७
यथोपजोषं राजेन्द्र द्विजातिप्रवरस्य सा ।
प्रीतिमुत्पादयामास कन्यारत्नमनिन्दिता ॥ ८
तस्यास्तु शीलवृत्तेन तुतोष द्विजसत्तमः ।
अवधानेन भूयोऽस्याः परं यत्नमथाकरोत् ॥ ९
तां प्रभाते च सायं च पिता पप्रच्छ भारत ।
अपि तुष्यति ते पुत्रि ब्राह्मणः परिचर्यया ॥ १०
तं सा परममित्येव प्रत्युवाच यशस्विनी ।
ततः प्रीतिमवाप्याग्र्यां कुन्तिभोजो महामनाः॥ ११
ततः संवत्सरे पूर्णे यदाऽसौ जपतांवरः ।
नापश्यद्दुष्कृतं किंचित्पृथायाः सौहृदे रतः ॥ १२
ततः प्रीतमना भूत्वा स एनां ब्राह्मणोऽब्रवीत् ।
प्रीतोस्मि परमं भद्रे परिचारेण ते शुभे ॥ १३
वरान्वृणीष्व कल्याणि दुरापान्मानुषैरिह ।
यैस्त्वं सीमन्तिनीः सर्वा यशसाऽभिभविष्यसि १४
कुन्त्युवाच ।
कृतानि मम सर्वाणि यस्या मे वेदवित्तम ।
त्वं प्रसन्नः पिता चैव कृतं विप्र वरैर्मम ॥ १५
ब्राह्मण उवाच ।
यदि नेच्छसि मत्तस्त्वं वरं भद्रे शुचिस्मिते ।
इमं मन्त्रं गृहाण त्वमाह्वानाय दिवौकसाम् ॥ १६
यंयं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।
तेनतेन वशे भद्रे स्थातव्यं ते भविष्यति ॥ १७
अकामो वा सकामो वा स समेष्यति ते वशे ।
विबुधो मन्त्रसंभ्रान्तो वाक्यैर्भृत्य इवानतः ॥ १८
वैशंपायन उवाच ।
न शशाक द्वितीयं सा प्रत्याख्यातुमनिन्दिता ।
तं वै द्विजातिप्रवरं तदा शापभयान्नृप ॥ १९
ततस्तामनवद्याङ्गीं ग्राहयामास स द्विजः ।
मन्त्रग्रामं तदा राजन्नथर्वशिरसि श्रुतम् ॥ २०
तं प्रदाय तु राजेन्द्र कुन्तिभोजमुवाच ह ।
उषितोस्मि सुखं राजन्कन्यया परितोषितः ॥ २१
तव गेहे सुविहितः सदा सुप्रतिपूजितः ।
साधयिष्यामहे तावदित्युक्त्वाऽन्तरधीयत ॥ २२
स तु राजा द्विजं दृष्ट्वा तत्रैवान्तर्हितं तदा ।
बभूव विस्मयाविष्टः पृथां च समपूजयत् ॥ २३

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि षडधिकत्रिशततमोऽध्यायः ॥ ३०६ ॥

सप्ताधिकत्रिशततमोऽध्यायः ॥ ३०७ ॥

कदाचन ऋतुस्नातया सूर्यमवलोकयन्त्या कुन्त्या दुर्वाससा दत्तमन्त्रपरीक्षणाय तदाह्वानम् ॥ १ ॥ मन्त्रबलादुपागतेन रविणा स्वेन सङ्गमनङ्गीकुर्वन्त्याः कुन्त्या विभीषिकापूर्वकं सङ्गायानुनयनम् ॥ २ ॥

वैशंपायन उवाच ।
गते तस्मिन्द्विजश्रेष्ठे कस्मिंश्चित्कालपर्यये ।
चिन्तयामास सा कन्या मन्त्रग्रामबलाबलम् ॥ १
अयं वै कीदृशस्तेन मम दत्तो महात्मना ।

प्रतिश्रयैः आश्रयैः शयनासनाद्यैः ॥ ३ ॥ अन्नादिना समुदाचारः समुपसर्पणम् ॥ ४ ॥ यथोपजोषं प्रियमनतिक्रम्य ॥ ८ ॥ शीलं शमादि । वृत्तं परिचर्या । अस्याः पृथायाः श्रेयोर्थं अवधानेन समाधिकाले यत्नमकरोत् । यत्नेन तस्याः

कल्याणं चिन्तितवानित्यर्थः ॥ ९ ॥ द्वितीयं द्वितीयवारम् । न शशाक द्विजातिं सा इति थ. ध. पाठः ॥ १९ ॥ विहितः विशेषेण हितस्तृप्तः ॥ २२ ॥ षडधिकत्रिशततमोऽध्यायः ॥ ३०६ ॥

मन्त्रग्रामो बलं तस्य ज्ञास्ये नातिचिरादिति ॥ २
एवं संचिन्तयन्ती सा ददर्शर्तुं यदृच्छया ।
व्रीडिता साऽभवद्बाला कन्याभावे रजस्वला ॥ ३
ततो हर्म्यतलस्था सा महार्हशयनोचिता ।
प्राच्यां दिशि समुद्यन्तं ददर्शादित्यमण्डलम् ॥ ४
तत्र बद्धमनोदृष्टिरभवत्सा सुमध्यमा ।
न चातप्यत रूपेण भानोः सन्ध्यागतस्य सा ॥५
तस्या दृष्टिरभूद्दिव्या साऽपश्यद्दिव्यदर्शनम् ।
आमुक्तकवचं देवं कुण्डलाभ्यां विभूषितम् ॥ ६
तस्याः कौतूहलं त्वासीन्मन्त्रं प्रति नराधिप ।
आह्वानमकरोत्साऽथ तस्य देवस्य भामिनी ॥ ७
प्राणानुपस्पृश्य तदा ह्याजुहाव दिवाकरम् ।
आजगाम ततो राजंस्त्वरमाणो दिवाकरः ॥ ८
मधुपिङ्गो महाबाहुः कम्बुग्रीवो हसन्निव ।
अङ्गदी बद्धमुकुटो दिशः प्रज्वालयन्निव ॥ ९
योगात्कृत्वा द्विधाऽऽत्मानमाजगाम ततप च ।
आबभाषे ततः कुन्तीं साम्ना परमवल्गुना ॥ १०
आगतोस्मि वशं भद्रे तव मन्त्रबलात्कृतः ।
किं करोमि वशो राज्ञि ब्रूहि कर्ता तदस्मि ते ११
कुन्त्युवाच ।
गम्यतां भगवंस्तत्र यत एवागतो ह्यसि ।
कौतूहलात्समाहूतः प्रसीद भगवन्निति ॥ १२
सूर्य उवाच ।
गमिष्येऽहं यथा मा त्वं ब्रवीषि तनुमध्यमे ।
न तु देवं समाहूय न्याय्यं प्रेषयितुं वृथा ॥ १३
तवाभिसन्धिः सुभगे सूर्यात्पुत्रो भवेदिति ।
वीर्येणाप्रतिमो लोके कवची कुण्डलीति च ॥ १४
सा त्वमात्मप्रदानं वै कुरुष्व गजगामिनि ।
उत्पत्स्यति हि पुत्रस्ते यथासंकल्पमङ्गने ।
अथ गच्छाम्यहं भद्रे त्वया संगम्य सुस्मिते ॥ १५
यदि त्वं वचनं नाद्य करिष्यसि मम प्रियम् ।
शप्स्ये कन्येऽन्यथा क्रुद्धो ब्राह्मणं पितरं च ते ॥ १
त्वत्कृते तान्प्रधक्ष्यामि सर्वानपि न संशयः ।
पितरं चैव ते मूढं यो न वेत्ति तवानयम् ॥ १
तस्य च ब्राह्मणस्याद्य योऽसौ मन्त्रमदात्तव ।
शीलवृत्तमविज्ञाय धास्यामि विनयं परम् ॥ १
एते हि विबुधाः सर्वे पुरंदरमुखा दिवि ।
त्वया प्रलब्धं पश्यन्ति स्मयन्त इव मां शुभे ॥१
पश्य चैनान्सुरगणान्दिव्यं चक्षुरिदं हि ते ।
पूर्वमेव मया दत्तं दृष्टवत्यसि येन माम् ॥ २
वैशंपायन उवाच ।
ततोऽपश्यत्रिदशात्राजपुत्री
सर्वानेव स्वेषु धिष्ण्येषु खस्थान् ।
प्रभावन्तं भानुमन्तं महान्तं
यथाऽऽदित्यं रोचमानांस्तथैव ॥ २
सा तान्दृष्ट्वा त्रिदशानेव बाला
सूर्यं देवी वचनं प्राह भीता ।
गच्छ त्वं वै गोपते स्वं विमानं
कन्याभावादुःख एवापचारः ॥ २
पिता माता गुरवश्चैव येऽन्ये
देहस्यास्य प्रभवन्ति प्रदाने ।
नाहं धर्मं लोपयिष्यामि लोके
स्त्रीणां वृत्तं पूज्यते देहरक्षा ॥ २
मया मन्त्रबलं ज्ञातुमाहूतस्त्वं विभावसो ।
बाल्याद्बालेति तत्कृत्वा क्षन्तुमर्हसि मे विभो ॥२
सूर्य उवाच ।
बालेति कृत्वाऽनुनयं तवाहं
ददानि नान्यानुनयं लभेत ।
आत्मप्रदानं कुरु कुन्तिकन्ये
शान्तिस्तवैवं हि भवेच्च भीरु ॥ २
न चापि गन्तुं युक्तं हि मया मिथ्याकृतेन वै ।
असमेत्य त्वया भीरु मन्त्राहूतेन भामिनि ॥ २६

ऋतुं रजः ॥ ३ ॥ प्राणान् इन्द्रियाणि चक्षुःश्रोत्रादीनि उपस्पृश्य । जलेन सम्यगाचम्येत्यर्थः ॥ ८ ॥ किं करोम्यवशो राज्ञि इति थ. ध. पाठः ॥ ११ ॥ यथाहं गमिष्ये तथा मा मां ब्रवीषि नतु तद्योग्यमित्याह नत्विति । वृथा प्रसादमप्राप्य ॥ १३ ॥ तवाभिसन्धिं सुभगे कुर्यां पुत्रः इति थ. ध. पाठः ॥ १४ ॥ ब्राह्मणं दुर्वाससम् ॥ १६ ॥ विनयं दण्डं धास्यामि धारयिष्यामि ॥ १८ ॥ अपचारोऽपराधः कृतः । व्रीडमानेव बालेति झ. पाठः ॥ २२ ॥ सप्ताधिकत्रिशततमोऽध्यायः ३०७

गमिष्याम्यनवद्याङ्गि लोके समवहास्यताम् ।
'गच्छेयमेव सुश्रोणि गतोऽहं वै निराकृतः ।'
सर्वेषां विबुधानां च वक्तव्यः स्यां तथा शुभे ॥२७
सा त्वं मया समागच्छ पुत्रं लप्स्यसि मादृशम् ।
विशिष्टा सर्वलोकेषु भविष्यसि न संशयः ॥ २८

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि सप्ताधिकत्रिशततमोऽध्यायः ॥ ३०७ ॥

अष्टाधिकत्रिशततमोऽध्यायः ॥ ३०८ ॥

कुन्त्या सङ्गमन्तरा दुश्शकानुनये भास्करे कृच्छ्रात्तदङ्गीकरणम् ॥ १ ॥ सूर्येण पुनः कन्यात्वलाभरूपवरदानपूर्वकं तस्यां गर्भाधानम् ॥ २ ॥

वैशंपायन उवाच ।
सा तु कन्या बहुविधं ब्रुवन्ती मधुरं वचः ।
अनुनेतुं सहस्रांशुं न शशाक मनस्विनी ॥ १
न शशाक यदा बाला प्रत्याख्यातुं तमोनुदम् ।
भीता शापात्ततो राजन्दध्यौ दीर्घमथान्तरम् ॥ २
अनागसः पितुः शापो ब्राह्मणस्य तथैव च ।
मन्निमित्तः कथं न स्यात्क्रुद्धादस्माद्विभावसोः ॥ ३
बालेनापि सता मोहाद्भृशं सापह्नवान्यपि ।
नाऽभ्यासादयितव्यानि तेजांसि च तपांसि च ॥४
साहमद्य भृशं भीता गृहीत्वा च करे भृशम् ।
कथं त्वकार्यं कुर्यां वै प्रदानं ह्यात्मनः स्वयम् ॥ ५
सा वै शापपरित्रस्ता बहु चिन्तयती हृदा ।
मोहेनाभिपरीताङ्गी स्मयमाना पुनःपुनः ॥ ६
तं देवमब्रवीद्भीता बन्धूनां राजसत्तम ।
व्रीडाविह्वलया वाचा शापत्रस्ता विशांपते ॥ ७
पिता मे ध्रियते देव माता चान्ये च बान्धवाः ।
न तेषु ध्रियमाणेषु विधिलोपो भवेदयम् ॥ ८
त्वया तु संगमो देव यदि स्याद्विधिवर्जितः ।
मन्निमित्तं कुलस्यास्य लोकेऽकीर्तिर्न संशयः ॥ ९
अथवा धर्ममेतं त्वं मन्यसे तपतांवर ।
ऋते प्रदानाद्बन्धुभ्यस्तव कामं करोम्यहम् ॥१०
आत्मप्रदानं दुर्धर्ष तव कृत्वा सती त्वहम् ।
त्वयि धर्मो यशश्चैव कीर्तिरायुश्च देहिनाम् ॥११
सूर्य उवाच ।
न ते पिता न ते माता गुरवो वा शुचिस्मिते ।
प्रभवन्ति प्रदाने ते भद्रं ते शृणु मे वचः ॥ १२
सर्वान्कामयते यस्मात्कनेर्धातोश्च भामिनि ।
तस्मात्कन्येह सुश्रोणी स्वतन्त्रा वरवर्णिनि ॥ १३
नाधर्मश्चरितः कश्चित्त्वया भवति भामिनि ।
अधर्मं कुत एवाहं वरेयं लोककाम्यया ॥ १४
अनावृताः स्त्रियः सर्वा नराश्च वरवर्णिनि ।
स्वभाव एष लोकानां विकारोऽन्य इति स्मृतः १५
सा मया सह संगम्य पुनः कन्या भविष्यसि ।
पुत्रश्च ते महाबाहुर्भविष्यति न संशयः ॥ १६
कुन्त्युवाच ।
यदि पुत्रो मम भवेत्त्वत्तः सर्वतमोनुद ।
कुण्डली कवची शूरो महाबाहुर्महाबलः ।
'अस्तु मे सङ्गमो देव अनेन समयेन ते ॥' १७
सूर्य उवाच ।
भविष्यति महाबाहुः कुण्डली दिव्यवर्मभृत् ।
उभयं चामृतमयं तस्य भद्रे भविष्यति ॥ १८

दध्यौ चिन्तितवती । अन्तरं कालम् ॥ २ ॥ बालेनाल्पवयसापि सता साधुना मोहाच्चित्तपारवश्यात् तेजांसि सूर्यादीनि तपांसि दुर्वासआदीनि नाभ्यासादयितव्यान्यत्यन्तं प्रत्यासत्तिविषयाणि न कर्तव्यानि ॥ ४ ॥ बन्धूनां बन्धुभ्य इत्यर्थः ॥ ७ ॥ ध्रियते जीवति ॥ ८ ॥ प्रभवन्ति स्वाम्यमर्हन्ति ॥ १२ ॥ कामयते सर्वानिति कन्येति कन्याशब्दनिर्वचनम् ॥ १३ ॥ तत्र हेतुः लोककाम्यया लोकप्रियया कामवत्तया ॥ १४ ॥ अन्यो विवाहनियमादिर्विकारः ॥ १५ ॥ अमृतमयं सहजं वर्म ॥ १८ ॥

कुन्त्युवाच ।
यद्येतदमृतादस्ति कुण्डले वर्म चोत्तमम् ।
मम पुत्रस्य यं वै त्वं मत्त उत्पादयिष्यसि॥ १९
अस्तु मे सङ्गमो देव यथोक्तं भगवंस्त्वया ।
त्वद्वीर्यरूपसत्त्वौजा धर्मयुक्तो भवेत्स च ॥ २०
सूर्य उवाच ।
अदित्या कुण्डले राज्ञि दत्ते मे मत्तकाशिनि ।
तस्मै दास्यामि वामोरु वर्म चैवेदमुत्तमम् ॥ २१
कुन्त्युवाच ।
परमं भगवन्नेवं सङ्गमिष्ये त्वया सह ।
यदि पुत्रो भवेदेवं यथा वदसि गोपते ॥ २२
वैशंपायन उवाच ।
तथेत्युक्त्वा तु तां कुन्तीमाविवेश विहंगमः ।
स्वर्भानुशत्रुर्योगात्मा नाभ्यां पस्पर्श चैव ताम् २३
ततः सा विह्वलेवासीत्कन्या सूर्यस्य तेजसा ।
पपात चाथ सा देवी शयने मूढचेतना ॥ २
सूर्य उवाच ।
साधयिष्यामि सुश्रोणि पुत्रं वै जनयिष्यसि ।
सर्वशस्त्रभृतांश्रेष्ठं कन्या चैव भविष्यसि ॥ २
वैशंपायन उवाच ।
ततः सा व्रीडिता बाला तदा सूर्यमथाब्रवीत्
एवमस्त्विति राजेन्द्र प्रस्थितं भूरिवर्चसम् ॥ २

इतिस्मोक्ता कुन्तिराजात्मजा सा
विवस्वन्तं याचमाना सलज्जा ।
तस्मिन्पुण्ये शयनीये पपात
मोहाविष्टा वेपमाना लतेव ॥ २
तिग्मांशुस्तां तेजसा मोहयित्वा
योगेनाविश्यात्मसंस्थां चकार ।
न चैवैनां दूषयामास भानुः
संज्ञां लेभे भूय एवाथ बाला ॥ २

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि अष्टाधिकत्रिशततमोऽध्यायः ॥ ३०८ ॥

नवाधिकत्रिशततमोऽध्यायः ॥ ३०९ ॥

कतिपयकालातिपाते कर्णस्य सहजकवचकुण्डलधारणेन कुन्त्यां जननम् ॥ १ ॥ कुन्त्या धात्र्यासह मन्त्रपूर्वकं जात मात्रस्य गर्भस्य मञ्जूषायां निक्षेपपूर्वकमश्वनद्यां विसर्जनम् ॥ २ ॥ सगर्भाया मञ्जूषायाः क्रमेण चर्मण्वतीयमुनाद्वार गङ्गायां प्लवनेन चम्पापुरीप्रवेशः ॥ ३ ॥

वैशंपायन उवाच ।
ततो गर्भः समभवत्पृथायाः पृथिवीपते ।
शुक्के दशोत्तरे पक्षे तारापतिरिवाम्बरे ॥ १
सा बान्धवभयाद्बाला गर्भं तं विनिगूहती ।
धारयामास सुश्रोणी न चैनां बुबुधे जनः ॥ २
न हि तां वेद नार्यन्या काचिद्धात्रेयिकामृते ।
कन्यापुरगतां बालां निपुणां परिरक्षणे ॥ ३
ततः कालेन सा गर्भं सुषुवे वरवर्णिनी ।
कन्यैव तस्य देवस्य प्रसादादमरप्रभम् ॥ ४
तथैवाबद्धकवचं कनकोज्ज्वलकुण्डलम् ।
हर्यक्षं वृषभस्कन्धं यथास्य पितरं तथा ॥ ५
जातमात्रं च तं गर्भं धात्र्या संमन्त्र्य भामिनी
'उत्स्रष्टुकामा तं गर्भं कारयामास भारत ।
मञ्जूषां शिल्पिभिस्तूर्णं सुनद्धां सुप्रतिष्ठिताम् ॥६
प्लवैर्बहुविधैर्बद्धां प्लवनार्थं जले नृप ।
अजिनैर्मृदुभिश्चैवं संस्तीर्णशयनां तथा ॥' ७
मञ्जूषायां समाधाय स्वास्तीर्णायां समन्ततः ।
मधूच्छिष्टस्थितायां तं सुखायां रुदती तथा ।

प्रस्थितं संगमायोपक्रान्तम् ॥ २६ ॥ आत्मसंस्थां वचनवशाम् । एनां न दूषयामास । कन्यात्वस्थापनेनेति शेषः ॥ २८ ॥ अष्टाधिकत्रिशततमोऽध्यायः ॥ ३०८ ॥

दशोत्तरे एकादशे शुक्के पक्षे प्रतिपदि चन्द्रइव बाल उद्भूतः । माघशुक्लप्रतिपदि कर्णनिषेकजन्मेत्यर्थः ॥ १ ॥ हर्यक्षं सिंह नेत्रम् ॥ ५ ॥ गर्भं प्रति संमन्त्र्येत्यध्याहारेणान्वयः ॥ ६ ॥ मधूच्छिष्टं सिक्थकम् । मयनमिति भाषायाम् । तेन स्थिताय सर्वतोलिप्तायां मञ्जूषायाम् । जलप्रवेशो न भवेदित्यर्थः ॥ ८ ॥

श्लक्ष्णायां सुपिधानायामश्वनद्यामवासृजत् ॥ ८
जानती चाप्यकर्तव्यं कन्याया गर्भधारणम् ।
पुत्रस्नेहेन सा राजन्करुणं पर्यदेवयत् ॥ ९
समुत्सृजन्ती मञ्जूषामश्वनद्यां तदा जले ।
उवाच रुदती कुन्ती यानि वाक्यानि तच्छृणु १०
स्वस्ति तेऽस्त्वान्तरिक्षेभ्यः पार्थिवेभ्यश्च पुत्रक ।
दिव्येभ्यश्चैव भूतेभ्यस्तथा तोयचराश्च ये ॥ ११
शिवास्ते सन्तु पन्थानो मा च ते परिपन्थिनः ।
आगताश्च तथा पुत्र भवन्त्वद्रोहचेतसः ॥ १२
पातु त्वां वरुणो राजा सलिले सलिलेश्वरः ।
अन्तरिक्षेऽन्तरिक्षस्थः पवनः सर्वगस्तथा ॥ १३
पिता त्वां पातु सर्वत्र तपनस्तपतांवरः ।
येन दत्तोसि मे पुत्र दिव्येन विधिना किल ॥ १४
आदित्या वसवो रुद्राः साध्या विश्वे च देवताः ।
मरुतश्च सहेन्द्रेण दिशश्च सदिगीश्वराः ॥ १५
रक्षन्तु त्वां सुराः सर्वे समेषु विषमेषु च ।
वेत्स्यामि त्वां विदेशेपि कवचेनाभिसूचितम् ॥ १६
धन्यस्ते पुत्र जनको देवो भानुर्विभावसुः ।
यस्त्वां द्रक्ष्यति दिव्येन चक्षुषा वाहिनीगतम् १७
धन्या सा प्रमदा या त्वां पुत्रत्वे कल्पयिष्यति ।
यस्यास्त्वं तृषितः पुत्र स्तनं पास्यसि देवज ॥ १८
कोनु स्वप्नस्तया दृष्टो या त्वामादित्यवर्चसम् ।
दिव्यवर्मसमायुक्तं दिव्यकुण्डलभूषितम् ॥ १९
पद्मायतविशालाक्षं पद्मताम्रदलोज्ज्वलम् ।
सुललाटं सुकेशान्तं पुत्रत्वे कल्पयिष्यति ॥ २०
धन्या द्रक्ष्यन्ति पुत्र त्वां भूमौ संसर्पमाणकम् ।
अव्यक्तकलवाक्यानि वदन्तं रेणुगुण्ठितम् ॥ २१
धन्या द्रक्ष्यन्ति पुत्र त्वां पुनर्यौवनगोचरम् ।
हिमवद्वनसंभूतं सिंहं केसरिणं यथा ॥ २२
एवं बहुविधं राजन्विलप्य करुणं पृथा ।
अवासृजत मञ्जूषामश्वनद्यां तदा जले ॥ २३
रुदती पुत्रशोकार्ता निशीथे कमलेक्षणा ।
धात्र्या सह पृथा राजन्पुत्रदर्शनलालसा ॥ २४
विसर्जयित्वा मञ्जूषां संबोधनभयात्पितुः ।
विवेश राजभवनं पुनः शोकातुरा ततः ॥ २५
मञ्जूषा त्वश्वनद्याः सा ययौ चर्मण्वतीं नदीम् ।
चर्मण्वत्याश्च यमुनां ततो गङ्गां जगाम ह ॥ २६
गङ्गायाः सूतविषयं चम्पामनुययौ पुरीम् ।
स मञ्जूषागतो गर्भस्तरङ्गैरुह्यमानकः ॥ २७
अमृतादुत्थितं दिव्यं तनुवर्म सकुण्डलम् ।
धारयामास तं गर्भं दैवं च विधिनिर्मितम् ॥ २८
एतद्गुह्यं महाराज सूर्यस्यासीन्महात्मनः ।
स सूर्यसंभवो गर्भः कुन्त्या गर्भेण धारितः ॥' २९

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि नवाधिकत्रिशततमोऽध्यायः ॥ ३०९ ॥

दशाधिकत्रिशततमोऽध्यायः ॥ ३१० ॥

स्नानाय भार्यया सह गङ्गां गतेनाधिरथनाम्ना सूतेन तत्रोत्प्लवमानायाः सगर्भमञ्जूषाया ग्रहणम् ॥ १ ॥ तथा मञ्जूषोद्घाटने दृष्टस्य गर्भस्य स्वपुत्रतया परिकल्पनेन नामकरणादिपूर्वकं प्रीत्या पोषणम् ॥ २ ॥ कर्णेन परशुरामादिभ्योऽस्त्रग्रहणपूर्वकं दुर्योधनेन सख्यकरणम् ॥ ३ ॥

वैशंपायन उवाच ।
एतस्मिन्नेव काले तु धृतराष्ट्रस्य वै सखा ।
सूतोऽधिरथ इत्येव सदारो जाह्नवीं ययौ ॥ १
तस्य भार्याऽभवद्राजन्रूपेणासदृशी भुवि ।
राधा नाम महाभागा न सा पुत्रमविन्दत ।
अपत्यार्थे परं यत्नमकरोच्च विशेषतः ॥ २

आगमाश्च तथा सन्तु दिव्येन विधिना तव इति थ. ध. पाठः । आगमाश्च तथा पान्तु इति क. पाठः ॥ १२ ॥ दैवं कर्तृ । गर्भं सकुण्डलं वर्म धारयामासेत्यन्वयः । गर्भं कवचकुण्डलधारकं चकारेत्यर्थः । विधिना ईश्वरेण निर्मितम् ॥ २८ ॥

नवाधिकत्रिशततमोऽध्यायः ॥ ३०९ ॥

सा ददर्शाथ मञ्जूषामुह्यमानां यदृच्छया ।
दत्तरक्षाप्रतिसरामन्वालम्भनशोभनाम् ॥ ३
ऊर्मीतरङ्गैर्जाह्नव्याः समानीतामुपह्वरम् ।
'विवर्तमानां बहुशः पुनःपुनरितस्ततः ॥ ४
ततः सा वायुना राजन्स्रोतसा च बलीयसा ।
उपानीतो यतः सूतः सभार्यो जलमाश्रितः॥' ५
सा तु कौतूहलात्प्राप्तां ग्राहयामास भामिनी ।
ततो निवेदयामास सूतस्याधिरथस्य वै ॥ ६
स तामुद्धृत्य मञ्जूषामुत्सार्य जलमन्तिकात् ।
यन्त्रैरुद्घाटयामास सोऽपश्यत्तत्र बालकम् ॥ ७
तरुणादित्यसंकाशं हेमवर्मधरं तथा ।
मृष्टकुण्डलयुक्तेन वदनेन विराजितम् ।
'परिम्लानमुखं बालं रुदन्तं क्षुधितं भृशम् ॥ ८
स तु तं परया लक्ष्म्या दृष्ट्वा युक्तं वरात्मजम् ।'
स सूतो भार्यया सार्धं विस्मयोत्फुल्ललोचनः ।
अङ्कमारोप्य तं बालं भार्यां वचनमब्रवीत् ॥ ९
इदमत्यद्भुतं भीरु यतो जातोस्मि भामिनि ।
दृष्टवान्देवगर्भोऽयं मन्येऽस्माकमुपागतः ॥ १०
अनपत्यस्य पुत्रोऽयं देवैर्दत्तो ध्रुवं मम ।
इत्युक्त्वा तं ददौ पुत्रं राधायै स महीपते ॥ ११
प्रतिजग्राह तं राधा विधिवद्दिव्यरूपिणम् ।
पुत्रं कमलगर्भाभं देवगर्भं श्रिया वृतम् ॥ १२
'स्तन्यं समस्रवच्चास्य दैवादित्यथ निश्चयः ।'
पुपोष चैनं विधिवद्ववृधे स च वीर्यवान् ।
ततःप्रभृति चाप्यन्ये प्राभवन्नौरसाः सुताः ॥ १३
नामकर्म च चक्रुस्ते कुण्डले तस्य दृश्यते ।
कर्ण इत्येव तं बालं दृष्ट्वा कर्ण सकुण्डलम् ॥' १४
वसुवर्मधरं दृष्ट्वा तं बालं हेमकुण्डलम् ।
नामास्य वसुषेणेति ततश्चक्रुर्द्विजातयः ॥ १५
एवं स सूतपुत्रत्वं जगामामितविक्रमः ।
वसुषेण इति ख्यातो वृष इत्येव च प्रभुः ॥ १६
सूतस्य ववृधेऽङ्गेषु ज्येष्ठः पुत्रः स वीर्यवान् ।
चारेण विदितश्चासीत्पृथया दिव्यवर्मभृत् ॥ १७
सूतस्त्वधिरथः पुत्रं विवृद्धं समयेन तम् ।
दृष्ट्वा प्रस्थापयामास पुरं वारणसाह्वयम् ॥ १८
तत्रोपसदनं चक्रे द्रोणस्येष्वस्त्रकर्मणि ।
सख्यं दुर्योधनेनैवमगमत्स च वीर्यवान् ॥ १९
द्रोणात्कृपाच्च रामाच्च सोऽस्त्रग्रामं चतुर्विधम् ।
लब्ध्वा लोकेऽभवत्ख्यातः परमेष्वासतां गतः २०
संधाय धार्तराष्ट्रेण पार्थानां विप्रिये रतः ।
योद्धुमाशंसते नित्यं फल्गुनेन महात्मना ॥ २१
सदा हि तस्य स्पर्धाऽऽसीदर्जुनेन विशांपते ।
अर्जुनस्य च कर्णेन यतो द्वन्द्वं बभूव ह ॥ २२
एतद्गुह्यं महाराज सूर्यस्यासीन्न संशयः ।
यः सूर्यसंभवः कर्णः कुर्यात्प्रतिकुले रतः ॥ २३
तं तु कुण्डलिनं दृष्ट्वा वर्मणा च समन्वितम् ।
अवध्यं समरे मत्वा पर्यतप्यद्युधिष्ठिरः ॥ २४
यदा च कर्णो राजेन्द्र भानुमन्तं दिवाकरम् ।
स्तौति मध्यंदिने प्राप्ते प्राञ्जलिः सलिलोत्थितः २५
तत्रैनमुपतिष्ठन्ति ब्राह्मणा धनहेतुना ।
नादेयं तस्य तत्काले किंचिदस्ति द्विजातिषु ॥ २६
तमिन्द्रो ब्राह्मणो भूत्वा भिक्षां देहीत्युपस्थितः ।
स्वागतं चेति राधेयस्तमथ प्रत्यभाषत ॥ २७

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि दशाधिकत्रिशततमोऽध्यायः ॥ ३१० ॥

दत्तो रक्षार्थं प्रतिसरो दूर्वाकङ्कणादिरूपो यस्यां ताम् । अन्वालम्भनं कुङ्कुमहस्तदानम् ॥ ३ ॥ उपह्वरं समीपम् ॥ ५ ॥ उत्सार्य परतो नीत्वा ॥ ७ ॥ वसुवर्म स्वर्णकवचम् ॥ १५ ॥ अङ्गेषु जनपदविशेषेषु ॥ १७ ॥ उपसदनं गुरूपसदनम् ॥ १९ ॥ परमेष्वासतां महाधनुर्धरताम् ॥ २० ॥ दशाधिकत्रिशततमोऽध्यायः ॥ ३१० ॥

एकादशाधिकत्रिशततमोऽध्यायः ॥ ३११ ॥

इन्द्रेण ब्राह्मणवेषधारणेन कर्णंप्रति कवचकुण्डलयाचनम् ॥ १ ॥ तस्येन्द्रत्वं जानता कर्णेन तस्माच्छक्तिग्रहणपूर्वकं तस्मै कवचकुण्डलदानम् ॥ २ ॥

वैशंपायन उवाच ।
देवराजमनुप्राप्तं ब्राह्मणच्छद्मनाऽऽवृतम् ।
दृष्ट्वा स्वागतमित्याह न बुबोधास्य मानसम् ॥ १
हिरण्यकण्ठीः प्रमदा ग्रामान्वा बहुगोकुलान् ।
किं ददानीति तं विप्रमुवाचाधिरथिस्ततः ॥ २
ब्राह्मण उवाच ।
हिरण्यकण्ठ्यः प्रमदा यच्चान्यत्प्रीतिवर्धनम् ।
नाहं दत्तमिहेच्छामि तदर्थिभ्यः प्रदीयताम् ॥ ३
यदेतत्सहजं वर्म कुण्डले च तवानघ ।
एतदुत्कृत्य मे देहि यदि सत्यव्रतो भवान् ॥ ४
एतदिच्छाम्यहं भिक्षां त्वया दत्तां परंतप ।
एष मे सर्वलाभानां लाभः परमको मतः ॥ ५
कर्ण उवाच ।
अवनिं प्रमदा गाश्च निर्वापं बहुवार्षिकम् ।
तत्ते विप्र प्रदास्यामि न तु वर्म सकुण्डलम् ॥ ६
वैशंपायन उवाच ।
एवं बहुविधैर्वाक्यैर्वार्यमाणः स तु द्विजः ।
कर्णेन भरतश्रेष्ठ नान्यं वरमयाचत ॥ ७
सान्त्वितश्च यथाशक्ति पूजितश्च यथाविधि ।
न चान्यं स द्विजश्रेष्ठः कामयामास वै वरम् ॥ ८
यदा नान्यं प्रवृणुते वरं वै द्विजसत्तमः ।
'विनाऽस्य सहजं वर्म कुण्डले च विशांपते ।'
तदैनमब्रवीद्भूयो राधेयः प्रहसन्निव ॥ ९
सहजं वर्म मे विप्र कुण्डले चामृतोद्भवे ।
तेनावध्योस्मि लोकेषु ततो नैतज्जहाम्यहम् ॥ १०
विशालं पृथिवीराज्यं क्षेमं निहतकण्टकम् ।
प्रतिगृह्णीष्व मत्तस्त्वं साधु ब्राह्मणपुङ्गव ॥ ११
कुण्डलाभ्यां विमुक्तोऽहं वर्मणा सहजेन च ।
दमनीयो भविष्यामि शत्रूणां द्विजसत्तम ॥ १२
वैशंपायन उवाच ।
यदन्यं न वरं वव्रे भगवान्पाकशासनः ।
ततः प्रहस्य कर्णस्तं पुनरित्यब्रवीद्वचः ॥ १३
विदितो देवदेवेश प्रागेवासि मम प्रभो ।
न तु न्याय्यं मया दातुं तव शक्र वृथा वरम् ॥ १४
त्वं हि देवेश्वरः साक्षात्त्वया देयो वरो मम ।
अन्येषां चैव भूतानामीश्वरो ह्यसि भूतकृत् ॥ १५
यदि दास्यामि ते देव कुण्डले कवचं तथा ।
वध्यतामुपयास्यामि त्वं च शक्रावहास्यताम् ॥ १६
तस्माद्विनिमयं कृत्वा कुण्डले वर्म चोत्तमम् ।
हरस्व शक्र कामं मे न दद्यामहमन्यथा ॥ १७
शक्र उवाच ।
विदितोऽहं रवेः पूर्वमायानेव तवान्तिकम् ।
तेन ते सर्वमाख्यातमेवमेतन्न संशयः ॥ १८
काममस्तु तथा तात तव कर्ण यथेच्छसि ।
वर्जयित्वा तु मे वज्रं प्रवृणीष्व यथेच्छसि ॥ १९
वैशंपायन उवाच ।
ततः कर्णः प्रहृष्टस्तु उपसंगम्य वासवम् ।
अमोघां शक्तिमभ्येत्य वव्रे सम्पूर्णमानसः ॥ २०
कर्ण उवाच ।
वर्मणा कुण्डलाभ्यां च शक्तिं मे देहि वासव ।
अमोघां शत्रुसङ्घानां घातिनीं पृतनामुखे ॥ २१
ततः सञ्चिन्त्य मनसा मुहूर्तमिव वासवः ।
शक्त्यर्थं पृथिवीपाल कर्णं वाक्यमथाब्रवीत् ॥ २२
कुण्डले मे प्रयच्छस्व वर्म चैव शरीरजम् ।
गृहाण कर्ण शक्तिं त्वमनेन समयेन च ॥ २३
अमोघा हन्ति शतशः शत्रून्मम करच्युता ।

यच्चान्यत्पादबन्धनम् इति ध. पाठः ॥ ३ ॥ अवनिं गृहार्थम् । निवापं न्युप्यते बीजमस्मिन्निति क्षेत्रम् । बहुवार्षिकं यावज्जीविकवृत्तिरूपम् ॥ ६ ॥ आयानेव आगच्छन्नेव ॥ १८ ॥

पुनश्च पाणिमभ्येति मम दैत्यान्विनिघ्नतः ॥२४
सेयं तव करप्राप्ता हत्वैकं रिपुमूर्जितम् ।
गर्जन्तं प्रतपन्तं च मामेवैष्यति सूतज ॥ २५
कर्ण उवाच ।
एकमेवाहमिच्छामि रिपुं हन्तुं महाहवे ।
गर्जन्तं प्रतपन्तं च यतो मम भयं भवेत् ॥ २६
इन्द्र उवाच ।
एकं हनिष्यसि रिपुं गर्जन्तं बलिनं रणे ।
त्वं तु यं प्रार्थयस्येकं रक्ष्यते स महात्मना ॥ २७
यमाहुर्वेदविद्वांसो वराहमपराजितम् ।
नारायणमचिन्त्यं च तेन कृष्णेन रक्ष्यते ॥ २८
कर्ण उवाच ।
'एवमेतद्यथाऽऽत्थ त्वं दानवानां निषूदन ।
वधिष्यामि रणे शत्रुं यो मे स्याता पुरस्सरः ॥'२९
एवमप्यस्तु भगवन्नेकवीरवधे मम ।
अमोघां देहि मे शक्तिं यथा हन्यां प्रतापिनम् ३०
उत्कृत्य तु प्रदास्यामि कुण्डले कवचं च ते ।
निकृत्तेषु तु गात्रेषु न मे बीभत्सता भवेत् ॥३१
इन्द्र उवाच ।
न ते बीभत्सता कर्ण भविष्यति कथञ्चन ।
व्रणश्चैव न गात्रेषु यस्त्वं नानृतमिच्छसि ॥ ३२
यादृशस्ते पितुर्वर्णस्तेजश्च वदतांवर ।
तादृशेनैव वर्णेन त्वं कर्ण भविता पुनः ॥ ३३
विद्यमानेषु शस्त्रेषु यद्यमोघामसंशये ।
प्रमत्तो मोक्ष्यसे चापि त्वय्येवैषा पतिष्यति ॥ ३४
कर्ण उवाच ।
संशयं परमं प्राप्य विमोक्ष्ये वासवीमिमाम् ।
यथा मामात्थ शक्र त्वं सत्यमेतद्ब्रवीमि ते ॥ ३५
वैशंपायन उवाच ।
ततः शक्तिं प्रज्वलितां प्रतिगृह्य विशांपते ।
शस्त्रं गृहीत्वा निशितं सर्वगात्राण्यकृन्तत ॥ ३६

ततो देवा मानवा दानवाश्च
निकृन्तन्तं कर्णमात्मानमेव ।
दृष्ट्वा सर्वे सिंहनादान्प्रणेदु-
र्न ह्यस्यासीन्मुखजो वै विकारः ॥ ३७
ततो दिव्या दुन्दुभयः प्रणेदुः
पपातोच्चैः पुष्पवर्षं च दिव्यम् ।
दृष्ट्वा कर्णं शस्त्रसंकृत्तगात्रं
मुहुश्चापि स्मयमानं नृवीरम् ॥ ३८
ततश्छित्त्वा कवचं दिव्यमङ्गा-
त्तथैवार्द्रं प्रददौ वासवाय ।
तथोत्कृत्य प्रददौ कुण्डले ते
कर्णात्तस्मात्कर्मणा तेन कर्णः ॥ ३९
'ततो देवो मुदितो वज्रपाणि-
र्दृष्ट्वा कर्णं शस्त्रनिकृत्तगात्रम् ।'
ततः शक्रः प्रहसन्वञ्चयित्वा
कर्णं लोके यशसा योजयित्वा ।
कृतं कार्यं पाण्डवानां हि मेने
ततः पश्चाद्दिवमेवोत्पपात ॥ ४०
श्रुत्वा कर्णं मुषितं धार्तराष्ट्रा
दीनाः सर्वे भग्नदर्पा इवासन् ।
तां चावस्थां गमितं सूतपुत्रं
श्रुत्वा पार्था जहृषुः काननस्थाः ॥ ४१
जनमेजय उवाच ।
क्वस्था वीराः पाण्डवास्ते बभूवुः
कुतश्चैते श्रुतवन्तः प्रियं तत् ।
किं वाऽकार्षुर्द्वादशेऽब्दे व्यतीते
तन्मे सर्वं भगवान्व्याकरोतु ॥ ४२
वैशंपायन उवाच ।
लब्ध्वा कृष्णां सैन्धवं द्रावयित्वा
विप्रैः सार्धं काम्यकादाश्रमात्ते ।
मार्कण्डेयाच्छ्रुतवन्तः पुराणं
देवर्षीणां चरितं विस्तरेण ॥ ४३

कृणाति हिनस्ति कृन्तति छिनत्ति वा अङ्गानीति कर्ण इत्यर्थः

॥ ३९ ॥ एकादशाधिकत्रिशततमोऽध्यायः ॥ ३११ ॥

'प्रत्याजग्मुः सरथाः सानुयात्राः
सर्वैः सार्धं सूतपौरोगवैस्ते ।
ततो ययुर्द्वैतवनं नृवीरा
निस्तीर्यैवं वनवासं समग्रम् ॥' ४४

॥ इति श्रीमन्महाभारते अरण्यपर्वणि कुण्डलाहरणपर्वणि एकादशाधिकत्रिशततमोऽध्यायः ॥ ३११ ॥

समाप्तं चेदं कुण्डलाहरणपर्व ॥ २० ॥

(अथारणेयपर्व ॥ २१ ॥)

द्वादशाधिकत्रिशततमोऽध्यायः ॥ ३१२ ॥

युधिष्ठिरादिभिः काम्यकवनात्पुनर्द्वैतवनंप्रत्यागमनम् ॥ १ ॥ तत्र केनचिन्मृगेण तरुसङ्घर्षवशात्स्वविषाणलग्नेन ब्राह्मणस्यारणिना सह पलायनम् ॥ २ ॥ ब्राह्मणप्रार्थनया तदानयनाय पाण्डवैस्तदनुधावनम् ॥ ३ ॥ ततस्तैः सुदूरं स्वापकर्षणपूर्वकमन्तर्हिते तस्मिन्श्रान्त्या वटमूले समुपवेशनम् ॥ ४ ॥

जनमेजय उवाच ।
एवं हृतायां भार्यायां प्राप्य क्लेशमनुत्तमम् ।
प्रतिपद्य ततः कृष्णां किमकुर्वत पाण्डवाः ॥ १
वैशंपायन उवाच ।
एवं हृतायां कृष्णायां प्राप्य क्लेशमनुत्तमम् ।
विहाय काम्यकं राजा सह भ्रातृभिरच्युतः ॥ २
पुनर्द्वैतवनं रम्यमाजगाम युधिष्ठिरः ।
स्वादुमूलफलं रम्यं विचित्रबहुपादपम् ॥ ३
अनुभुक्तफलाहाराः सर्व एव मिताशनाः ।
न्यवसन्पाण्डवास्तत्र कृष्णया सह भार्यया ॥ ४
वसन्द्वैतवने राजा कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ॥ ५
ब्राह्मणार्थे पराक्रान्ता धर्मात्मानो यतव्रताः ।
क्लेशमार्च्छन्त विपुलं सुखोदर्कं परंतपाः ॥ ६
तस्मिन्प्रतिवसन्तस्ते यत्प्रापुः कुरुसत्तमाः ।
वने क्लेशं सुखोदर्कं तत्प्रवक्ष्यामि ते शृणु ॥ ७
अरणीसहितं भाण्डं ब्राह्मणस्य तपस्विनः ।
मृगस्य घर्षमाणस्य विषाणे समसज्जत ॥ ८
तदादाय गतो राजंस्त्वरमाणो महामृगः ।
आश्रमान्तरितः शीघ्रं प्लवमानो महाजवः ॥ ९
ह्रियमाणं तु तं दृष्ट्वा स विप्रः कुरुसत्तम ।
त्वरितोऽभ्यागमत्तत्र अग्निहोत्रपरीप्सया ।
'तेषां तु वसतां तत्र पाण्डवानां महारथम् ॥' १०
अजातशत्रुमासीनं भ्रातृभिः सहितं वने ।
आगम्य ब्राह्मणस्तूर्णं संतप्तश्चेदमब्रवीत् ॥ ११
अरणीसहितं भाण्डं समासक्तं वनस्पतौ ।
मृगस्य घर्षमाणस्य विषाणे समसज्जत ॥ १२
तमादाय गतो राजंस्त्वरमाणो महामृगः ।
आश्रमात्त्वरितः शीघ्रं प्लवमानो महाजवः ॥ १३
तस्य गत्वा पदं राजन्नासाद्य च महामृगम् ।
अग्निहोत्रं न लुप्येत तदानयत पाण्डवाः ॥ १४
ब्राह्मणस्य वचः श्रुत्वा सन्तप्तोऽथ युधिष्ठिरः ।
धनुरादाय कौन्तेयः प्राद्रवद्भ्रातृभिः सह ॥ १५
सन्नद्धा धन्विनः सर्वे प्राद्रवन्नरपुङ्गवाः ।
ब्राह्मणार्थे यतन्तस्ते शीघ्रमन्वगमन्मृगम् ॥ १६
कर्णिनालीकनाराचानुत्सृजन्तो महारथाः ।
नाविध्यन्पाण्डवास्तत्र पश्यन्तो मृगमन्तिकात् १७
तेषां प्रयतमानानां नादृश्यत महामृगः ।
अपश्यन्तो मृगं श्रान्ता दुःखं प्राप्ता मनस्विनः॥१८

अरणीसहितं मन्थं इति झ. पाठः । अरणी उत्तराधरेऽग्निमथनकाष्ठे ताभ्यां सहितं मन्थं निर्मथनदण्डम् ॥ ८ ॥

आश्रमान्तरितः आश्रमदूरगतः ॥ ९ ॥ पदं मार्गे चिह्नं गत्वा प्राप्य । तेनैव पथा तदानयत ॥ १४ ॥

शीतलच्छायमागम्य न्यग्रोधं गहने वने ।
क्षुत्पिपासापरीताङ्गाः पाण्डवाः समुपाविशन् ॥१९
तेषां समुपविष्टानां नकुलो दुःखितस्तदा ।
अब्रवीद्भ्रातरं श्रेष्ठममर्षात्कुरुनन्दनम् ॥ २०
नास्मिन्कुले जातु ममज्ज धर्मो
न चालस्यादर्थलोपो बभूव ।
अनुत्तराः सर्वभूतेषु भूप
संप्राप्ताः स्मः संशयं किंनु राजन् ॥ २१

॥ इति श्रीमन्महाभारते अरण्यपर्वणि आरणेयपर्वणि द्वादशाधिकत्रिशततमोऽध्यायः ॥ ३१२ ॥

त्रयोदशाधिकत्रिशततमोऽध्यायः ॥ ३१३ ॥

पिपासितेषु पाण्डवेषु युधिष्ठिरनियोगाद्वृक्षाग्रमधिरूढेन नकुलेन नातिदूरे किंचित्सरोविलोकनम् ॥ १ ॥ पानीयानयनाय सरोगतेषु नकुलादिषु यक्षवचनावमत्या पानीयपानेन दीर्घनिद्राश्रवणादनागतेषु युधिष्ठिरेणापि तत्सरोगमनम् ॥२॥

युधिष्ठिर उवाच ।
नापदामस्ति मर्यादा न निमित्तं न कारणम् ।
धर्मस्तु विभजत्यर्थमुभयोः पुण्यपापयोः ॥ १
भीम उवाच ।
प्रातिकाम्यनयत्कृष्णां सभायां प्रेष्यवत्तदा ।
न मया निहतस्तत्र तेन प्राप्ताः स्म संशयम् ॥ २
अर्जुन उवाच ।
वाचस्तीक्ष्णास्थिभेदिन्यः सूतपुत्रेण भाषिताः ।
अतितीव्रा मया क्षान्तास्तेन प्राप्ताः स्म संशयं ॥३
सहदेव उवाच ।
शकुनिस्त्वां यदाऽजैषीदक्षद्यूतेन भारत ।
स मया न हतस्तत्र तेन प्राप्ताः स्म संशयम् ॥ ४
वैशंपायन उवाच ।
ततो युधिष्ठिरो राजा नकुलं वाक्यमब्रवीत् ।
आरुह्य वृक्षं माद्रेय निरीक्षस्व दिशो दश ॥ ५
पानीयमन्तिके पश्य वृक्षान्वाप्युदकाश्रयान् ।
एते हि भ्रातरः श्रान्तास्तव तात पिपासिताः ॥ ६
नकुलस्तु तथेत्युक्त्वा भ्रातुर्ज्येऽष्ठस्य शासनात् ।
तत उत्थाय मतिमाञ्शीघ्रमारुह्य पादपम् ।
अब्रवीद्भ्रातरं ज्येष्ठमभिवीक्ष्य समन्ततः ॥ ७
पश्यामि बहुलान्राजन्वृक्षानुदकसंश्रयान् ।
सारसानां च निर्ह्रादस्तत्रोदकमसंशयम् ॥ ८
ततोऽब्रवीत्सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः ।
गच्छ सौम्य ततः शीघ्रं तूर्णं पानीयमानय ॥ ९
नकुलस्तु तथेत्युक्त्वा भ्रातुर्ज्येष्ठस्य शासनात् ।
प्राद्रवद्यत्र पानीयं शीघ्रं चैवान्वपद्यत ॥ १०
स दृष्ट्वा विमलं तोयं सारसैः परिवारितम् ।
पातुकामस्ततो वाचमन्तरिक्षात्स शुश्रुवे ॥ ११
यक्ष उवाच ।
मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु माद्रेय ततः पिब हरस्व च ॥ १२
अनादृत्य तु तद्वाक्यं नकुलः सुपिपासितः ।
अपिबच्छीतलं तोयं पीत्वा च निपपात ह ॥ १३
चिरायमाणे नकुले कुन्तीपुत्रो युधिष्ठिरः ।
अब्रवीद्भ्रातरं वीरं सहदेवमरिंदमम् ॥ १४
भ्राता चिरायते तात सहदेव तवाग्रजः ।
तं चैवानय सोदर्यं पानीयं च त्वमानय ॥ १५
सहदेवस्तथेत्युक्त्वा तां दिशं प्रत्यपद्यत ।
ददर्श च हतं भूमौ भ्रातरं नकुलं तदा ॥ १६
भ्रातृशोकाभिसंतप्तस्तृषया च प्रपीडितः ।

धर्मो न ममज्ज धर्मलोपोऽर्थलोपश्च नाभूत् । आलस्यादित्युपचर्यते । त्वयि अनुत्तराः प्रतिवाक्यरहिताः सर्वभूतेषु कार्यार्थे उपस्थिते ओमित्येव वदामो नतु वाक्यान्तरमित्यर्थः । संशयं ब्राह्मणस्य कर्मलोपनिमित्तं दोषम् ॥ २१ ॥ द्वादशाधिकत्रिशततमोऽध्यायः ॥ ३१२ ॥

निमित्तं फलम् । धर्मः प्रारब्धरूपस्तु अर्थं फलं सुखदुःखरूपं विभजति ॥ १ ॥ प्रेष्यवत् प्रेष्यामिव ॥ २ ॥ साहसं जलपानरूपम् । परिग्रहो नियमः । यो मत्प्रश्नान्वदेत्स एवैतः पयः पिबेद्धरेद्वेति ॥ १२ ॥

अभिदुद्राव पानीयं ततो वागभ्यभाषत ॥ १७
मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा यथाकामं पिबस्व च हरस्व च ॥ १८
अनादृत्य तु तद्वाक्यं सहदेवः पिपासितः ।
अपिबच्छीतलं तोयं पीत्वा च निपपात ह ॥ १९
अथाब्रवीत्स विजयं कुन्तीपुत्रो युधिष्ठिरः ।
भ्रातरौ ते चिरगतौ बीभत्सो शत्रुकर्शन ॥ २०
तौ चैवानय भद्रं ते पानीयं च त्वमानय ।
त्वं हि नस्तात सर्वेषां दुःखितानामपाश्रयः ॥ २१
एवमुक्तो गुडाकेशः प्रगृह्य सशरं धनुः ।
आमुक्तखड्गो मेधावी तत्सरः प्रत्यपद्यत ॥ २२
यतः पुरुषशार्दूलौ पानीयहरणे गतौ ।
तौ ददर्श हतौ तत्र भ्रातरौ श्वेतवाहनः ॥ २३
'विगतासू नरव्याघ्रौ शयानौ वसुधातले ।'
प्रसुप्ताविव तौ दृष्ट्वा नरसिंहः सुदुःखितः ।
धनुरुद्यम्य कौन्तेयो व्यलोकयत तद्वनम् ॥ २४
नापश्यत्तत्र किंचित्स भूतमस्मिन्महावने ।
सव्यसाची पिपासार्तः पानीयं सोऽभ्यधावत ॥ २५
अभिधावंस्ततो वाचमन्तरिक्षात्स शुश्रुवे ।
यत्त्वमिच्छसि पानीयं नैतच्छक्यं बलात्त्वया ॥ २६
कौन्तेय यदि वै प्रश्नान्मयोक्तान्प्रतिवक्ष्यसि ।
ततः पास्यसि पानीयं हरिष्यसि च भारत ॥ २७
वारितस्त्वब्रवीत्पार्थो दृश्यमानो निवारय ।
यावद्बाणैर्विनिर्भिन्नः पुनर्नैवं वदिष्यसि ॥ २८
एवमुक्त्वा ततः पार्थः शरैरस्त्रानुमन्त्रितैः ।
प्रववर्ष दिशः कृत्स्नाः शब्दवेधं च दर्शयन् ।
कर्णिनालीकनाराचानुत्सृजन्भरतर्षभः ॥ २९
स त्वमोघानिषून्मुक्त्वा तृष्णयाऽभिप्रपीडितः ।
अनेकैरिषुसंघातैरन्तरिक्षे ववर्ष ह ॥ ३०

यक्ष उवाच ।

किं विघानेन ते पार्थ प्रश्नानुक्त्वा पयः पिब ।
अनुक्त्वा च पिबन्प्रश्नान्पीत्वैव नभविष्यसि ३१
स च मोघानिषून्दृष्ट्वा तृष्णया च प्रपीडितः ।
अवज्ञायैव तां वाचं पीत्वैव निपपात ह ॥ ३२
अथाब्रवीद्भीमसेनं कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च बीभत्सुश्च परंतप ॥ ३३
चिरंगतास्तोयहेतोर्न चागच्छन्ति भारत ।
तांश्चैवानय भद्रं ते पानीयं च त्वमानय ॥ ३४
भीमसेनस्तथेत्युक्त्वा तं देशं प्रत्यपद्यत ।
यत्र ते पुरुषव्याघ्रा भ्रातरोऽस्य निपातिताः ॥ ३५
तान्दृष्ट्वा दुःखितो भीमस्तृषया च प्रपीडितः ।
अमन्यत महाबाहुः कर्म तद्यक्षरक्षसाम् ॥ ३६
स चिन्तयामास तदा योद्धव्यं ध्रुवमद्य मे ।
पास्यामि तावत्पानीयमिति पार्थो वृकोदरः ॥ ३७
ततोऽभ्यधावत्पानीयं पिपासुः पुरुषर्षभः ॥ ३८

यक्ष उवाच ।

मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ॥ ३९
एवमुक्तस्तदा भीमो यक्षेणामिततेजसा ।
अनुक्त्वैव तु तान्प्रश्नान्पीत्वैव निपपात ह ॥ ४०
ततः कुन्तीसुतो राजा प्रचिन्त्य पुरुषर्षभः ।
'आत्मनाऽऽत्मानमन्विष्य विचारमकरोत्प्रभुः ४१
ततश्चिरगतान्भ्रातॄनथाऽऽज्ञाय युधिष्ठिरः ।
चिरायमाणान्बहुशः पुनःपुनरुवाचह ॥ ४२
किंस्विद्वनमिदं दग्धं किंस्विद्दृष्टो मृतो भवेत् ।
प्रहरन्तो महाभूतं शप्तास्तेनाथ तेऽपतन् ॥ ४३
न पश्यन्त्यथवा वीराः पानीयं यत्र ते गताः ।
अन्विच्छद्भिर्वने तोयं कालोऽयमतिपातितः ॥ ४४
किंनु तत्कारणं येन नायान्ति पुरुषर्षभाः ।
गच्छाम्येषां पदं द्रष्टुमिति कृत्वा युधिष्ठिरः ॥' ४५
समुत्थाय महाबुद्धिर्दह्यमानेन चेतसा ।
व्यपेतजननिर्घोषं प्रविवेश महावनम् ॥ ४६
रुरुभिश्च वराहैश्च पक्षिभिश्च निषेवितम् ।
नीलभास्वरवर्णैश्च पादपैरुपशोभितम् ॥ ४७
भ्रमरैरुपगीतं च पक्षिभिश्च समन्ततः ।
'मृदुशाड्वलसंकीर्णभूमिभागं मनोहरम् ॥' ४८

दृश्यमानो भूत्वेति शेषः ॥ २८ ॥

विधानेन यत्नेन । नभविष्यसि मरिष्यसि ॥ ३१ ॥

स गच्छन्कानने तस्मिन्हेममजालपरिष्कृतम् ।
ददर्श तत्सरः श्रीमान्विश्वकर्मकृतं यथा ॥ ४९
उपेतं नलिनीजालैः सिन्धुवारैः सवेतसैः ।
केतकैः करवीरैश्च पिप्पलैश्चैव संवृतम् ॥ ५०
'ततो धर्मसुतः श्रीमान्भ्रातृदर्शनलालसः ।'
श्रमार्तस्तदुपागम्य सरो दृष्ट्वाऽथ विस्मितः ॥ ५१

॥ इति श्रीमन्महाभारते अरण्यपर्वणि आरणेयपर्वणि त्रयोदशाधिकत्रिशततमोऽध्यायः ॥ ३१३ ॥

चतुर्दशाधिकत्रिशततमोऽध्यायः ॥ ३१४ ॥

युधिष्ठिरेण सरस्तीरशायिनां भ्रातृणामवलोकनेन सकरुणं परिदेवनपूर्वकं पानीयपानाय प्रयतनम् ॥ १ ॥ तथा यक्षेण स्वीयप्रश्नानामुत्तरदानमन्तरा जलपानस्य दुश्शकत्वकथनेन तत्प्रतिषेधने तेषां समुचितोत्तरदानम् ॥ २ ॥ ततस्तुष्टेन यक्षेण भीमादीनां चतुर्णामुज्जीवनम् ॥ ३ ॥

वैशंपायन उवाच ।
स ददर्श हतान्भ्रातॄँल्लोकपालानिव च्युतान् ।
युगान्ते समनुप्राप्ते शक्रवैश्रवणोपमान् ॥ १
विनिकीर्णधनुर्बाणं दृष्ट्वा निहतमर्जुनम् ।
भीमसेनं यमौ चैव निर्विचेष्टान्गतायुषः ॥ २
स दीर्घमुष्णं निःश्वस्य शोकबाष्पपरिप्लुतः ।
तान्दृष्ट्वा पतितान्भ्रातॄन्सर्वांश्चिन्तासमन्वितः ।
धर्मपुत्रो महाबाहुर्विललाप सुविस्तरम् ॥ ३
ननु त्वया महाबाहो प्रतिज्ञातं वृकोदर ।
सुयोधनस्य भेत्स्यामि गदया सक्थिनी रणे ॥ ४
व्यर्थं तदद्य मे सर्वं त्वयि वीरे निपातिते ।
महात्मनि महाबाहो कुरूणां कीर्तिवर्धने ॥ ५
मनुष्यसंभवा वाचो विधर्मिण्यः प्रतिश्रुताः ।
भवतां दिव्यवाचस्तु ता भवन्तु कथं मृषा ॥ ६
देवाश्चापि यदाऽवोचन्सूतके त्वां धनंजय ।
सहस्राक्षादनवरः कुन्ति पुत्रस्तवेति वै ॥ ७
उत्तरे पारियात्रे च जगुर्भूतानि सर्वशः ।
विप्रनष्टां श्रियं चैषामाहर्ता पुनरोजसा ॥ ८
नास्य जेता रणे कश्चिदजेता नैष कस्यचित् ।
सोयं मृत्युवशं यातः कथं जिष्णुर्महाबलः ॥ ९
अयं ममाशां संहत्य शेते भूमौ धनंजयः ।
आश्रित्य यं वयं नाथं दुःखान्येतानि सेहिम ॥ १०
रणे प्रगल्भौ वीरौ च सदा शत्रुनिबर्हणौ ।
कथं रिपुवशं यातौ कुन्तीपुत्रौ महाबलौ ।
यौ सर्वास्त्राप्रतिहतौ भीमसेनधनंजयौ ॥ ११
अश्मसारमयं नूनं हृदयं मम दुर्हृदः ।
यमौ यदेतौ दृष्ट्वाऽद्य पतितौ नावदीर्यते ॥ १२
शास्त्रज्ञा देशकालज्ञास्तपोयुक्ताः क्रियान्विताः ।
अकृत्वा सदृशं कर्म किं शेध्वं पुरुषर्षभाः ॥ १३
अविक्षतशरीराश्चाप्यप्रमृष्टशरासनाः ।
असंज्ञा भुवि संगम्य किं शेध्वमपराजिताः ॥ १४
सानूनिवाद्रेः संसुप्तान्दृष्ट्वा भ्रातॄन्महामतिः ।
सुखं प्रसुप्तान्प्रस्विन्नः खिन्नः कष्टां दशां गतः ॥ १५
एवमेवेदमित्युक्त्वा धर्मात्मा स नरेश्वरः ।
शोकसागरमध्यस्थो दध्यौ कारणमाकुलः ॥ १६
इतिकर्तव्यतां चेति देशकालविभागवित् ।
नाभिपेदे महाबाहुश्चिन्तयानो महामतिः ॥ १७
अथ संस्तभ्य धर्मात्मा तदाऽऽत्मानं तपःसुतः ।
एवं विलप्य बहुधा धर्मपुत्रो युधिष्ठिरः ।
बुद्ध्या विचिन्तयामास वीराः केन निपातिताः ॥ १८
नैषां शस्त्रप्रहारोस्ति पदं नेहास्ति कस्यचित् ।
भूतं महदिदं मन्ये भ्रातरो येन मे हताः ॥ १९

हेमजालानि हेमवर्णानि केसराणि तैः परिष्कृतं मण्डितम् ॥ ४९ ॥ सिन्धुवारैर्जलजविशेषैः ॥ ५० ॥ त्रयोदशाधिकत्रिशततमोऽध्यायः ॥ ३१३ ॥

विधर्मिण्योऽनृताः ॥ ६ ॥ न कस्यचिदजेताऽपितु सर्वस्यैव जेता ॥ ९ ॥ आशां राज्याशाम् । संहत्य विनाश्य ॥ १० ॥ दध्यौ कारणं मरणहेतुं विचारितवान् ॥ १६ ॥ तपःसुतः धर्मपुत्रः ॥ १८ ॥

एकाग्रं चिन्तयिष्यामि पीत्वा वेत्स्यामि वा जलम्
'भ्रातॄणां व्यसनं घोरं सममेव महात्मनाम् ॥'२०
स्यात्तु दुर्योधनेनेदमुपांशु परिकल्पितम् ।
गान्धारराजरचितं सततं जिह्मबुद्धिना ॥ २१
यस्य कार्यमकार्यं वा सममेव भवत्युत ।
कस्तस्य विश्वसेद्वीरो दुष्कृतेरकृतात्मनः ॥ २२
अथवा पुरुषैर्गूढैः प्रयोगोऽयं दुरात्मनः ।
भवेदिति महाबुद्धिर्बहुधा समचिन्तयत् ॥ २३
'आचार्यं किंनु वक्ष्यामि कृपं भीष्ममहं नु किम् ।
विदुरं किंनु वक्ष्यामि बृहस्पतिसमं नये ॥ २४
अम्बां च किंनु वक्ष्यामि सर्वदा दुःखभागिनीम् ।
दृष्ट्वा मां भ्रातृभिर्हीनं पृच्छन्तीं पुत्रगृद्धिनीम् ॥२५
यदा त्वं भ्रातृभिः सर्वैः शक्रतुल्यपराक्रमैः ।
सार्धं वनं गतो वीरैः कथमेकस्त्वमागतः॥' २६
कस्य किंनु विषेणेदमुदकं दूषितं यथा ।
मृतानामपि चैतेषां विकृतं नैव जायते ।
मुखवर्णाः प्रसन्ना मे भ्रातॄणामित्यचिन्तयत् २७
एकैकशश्चौघबलानिमान्पुरुषसत्तमान् ।
कोऽन्यः प्रतिसमासेत कालान्तकयमादृते ॥ २८
एतेन व्यवसायेन तत्तोयं व्यवगाढवान् ।
पातुकामश्च तत्तोयमन्तरिक्षात्स शुश्रुवे ॥ २९
यक्ष उवाच ।
अहं बकः शैवलमत्स्यभक्षो
नीता मया प्रेतवशं तवानुजाः ।
त्वं पञ्चमो भविता राजपुत्र
न चेत्प्रश्नान्पृच्छतो व्याकरोषि ॥ ३०
मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ॥३१
युधिष्ठिर उवाच ।
रुद्राणां वा वसूनां वा मरुतां वा प्रधानभाक् ।
पृच्छामि को भवान्देवो नैतच्छकुनिना कृतम् ॥३२
हिमवान्पारियात्रश्च विन्ध्यो मलय एव च ।
चत्वारः पर्वताः केन पातिता भुवि तेजसा ॥ ३३
त्वयाऽतीव महत्कर्म कृतं च बलिनांवर ।
'विनिघ्नता महेष्वासांश्चतुरोपि ममात्मजान् ॥'३४
यान्न देवा न गन्धर्वा नासुराश्च न राक्षसाः ।
विषहेरन्महायुद्धे कृतं ते तन्महाद्भुतम् ॥ ३५
न ते जानामि यत्कार्यं नाभिजानामि काङ्क्षितम् ।
कौतूहलं महज्जातं साध्वसं चागतं मम ॥ ३६
येनास्म्युद्विग्नहृदयः समुत्पन्नशिरोज्वरः ।
पृच्छामि भगवंस्तस्मात्को भवानिह तिष्ठति ॥३७
यक्ष उवाच ।
यक्षोऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः ।
मयैते निहताः सर्वे भ्रातरस्ते निवारिताः ॥ ३८
वैशंपायन उवाच ।
ततस्तामशिवां श्रुत्वा वाचं स परुषाक्षराम् ।
यक्षस्य ब्रुवतो राजन्नाकम्पत तदाऽऽस्थितः ॥३९
विरूपाक्षं महाकायं यक्षं तालसमुच्छ्रयम् ।
ज्वलनार्कप्रतीकाशमधृष्यं पर्वतोपमम् ॥ ४०
सेतुमाश्रित्य तिष्ठन्तं ददर्श भरतर्षभः ।
मेघगम्भीरनादेन तर्जयन्तं महास्वनम् ॥ ४१
'उवाच यक्षः कौन्तेयं भ्रातृशोकप्रपीडितम् ॥'४२
इमे ते भ्रातरो राजन्वार्यमाणा मयाऽसकृत् ।
बलात्तोयं जिहीर्षन्तस्ततो वै मृदिता मया ।
न पेयमुदकं राजन्प्राणानिह परीप्सता ॥ ४३
पार्थ मा साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ॥४४
युधिष्ठिर उवाच ।
न चाहं कामये यक्ष तव पूर्वपरिग्रहम् ॥ ४५
कामं नैतत्प्रशंसन्ति सन्तो हि पुरुषाः सदा ।
यदात्मना स्वमात्मानं प्रशंसेत्पुरुषर्षभ ।
यथाप्रज्ञं तु ते प्रश्नान्प्रतिवक्ष्यामि पृच्छ माम् ॥ ४६
यक्ष उवाच ।
किंस्विदादित्यमुन्नयति के च तस्याभितश्चराः ।

दुष्कृतेः पापकर्मणः ॥ २२ ॥ ओघबलान् महाप्रवाहवेगान् । प्रतिसमासेत प्रतियुध्येत् । कालेऽन्तं करोति यस्तादृशो यमः कालान्तकयमस्तस्मात् ॥ २८ ॥ प्रधानभाक् प्राधान्यभाक् ॥ ३२ ॥ अतीव ते महदितिपाठे ते तव ॥ ३४ ॥

कश्चैनमस्तं नयति कस्मिंश्च प्रतितिष्ठति ॥ ४७
युधिष्ठिर उवाच ।
ब्रह्मादित्यमुन्नयति देवास्तस्याभितश्चराः ।
धर्मश्चास्तं नयति च सत्ये च प्रतितिष्ठति ॥ ४८
यक्ष उवाच ।
केन स्विच्छ्रोत्रियो भवति केन स्विद्विन्दते महत् ।
केन स्विद्द्वितीयवान्भवति राजन्केन च बुद्धिमान्
युधिष्ठिर उवाच ।
श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत् ।
धृत्या द्वितीयवान्भवति बुद्धिमान्वृद्धसेवया ॥५०
यक्ष उवाच ।
किं ब्राह्मणानां देवत्वं कश्च धर्मः सतामिव ।
कश्चैषां मानुषो भावः किमेषामसतामिव ॥ ५१
युधिष्ठिर उवाच ।
स्वाध्याय एषां देवत्वं तप एषां सतामिव ।
मरणं मानुषो भावः परिवादोऽसतामिव ॥ ५२
यक्ष उवाच ।
किं क्षत्रियाणां देवत्वं कश्च धर्मः सतामिव ।
कश्चैषां मानुषो भावः किमेषामसतामिव ॥ ५३
युधिष्ठिर उवाच ।
इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव ।
भयं वै मानुषो भावः परित्यागोऽसतामिव॥५४
यक्ष उवाच ।
किमेकं यज्ञियं साम किमेकं यज्ञियं यजुः ।
का चैषां वृणुते यज्ञं कां यज्ञो नातिवर्तते ॥ ५५
युधिष्ठिर उवाच ।
प्राणो वै यज्ञियं साम मनो वै यज्ञियं यजुः ।
ऋगेका वृणुते यज्ञं तां यज्ञो नातिवर्तते ॥ ५६
यक्ष उवाच ।
किंस्विदावपतां श्रेष्ठं किंस्विन्निवपतां वरम् ।
किंस्वित्प्रतिष्ठमानानां किंस्वित्प्रसवतां वरम् ॥५७
युधिष्ठिर उवाच ।
वर्षमावपतां श्रेष्ठं बीजं निवपतां वरम् ।
गावः प्रतिष्ठमानानां पुत्रः प्रसवतां वरः ॥ ५८
यक्ष उवाच ।
इन्द्रियार्थाननुभवन्बुद्धिमाँल्लोकपूजितः ।
संमतः सर्वभूतानामुच्छ्वसन्को न जीवति ॥ ५९
युधिष्ठिर उवाच ।
देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ॥ ६०
यक्ष उवाच ।
किंस्विद्गुरुतरं भूमेः किंस्विदुच्चतरं च खात् ।
किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं तृणात् ६१
युधिष्ठिर उवाच ।
माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा ।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात् ॥६२
यक्ष उवाच ।
किंस्वित्सुप्तं न निमिषति किंस्विज्जातं न चेङ्गते ।
कस्यस्विद्धृदयं नास्ति कास्विद्वेगेन वर्धते ॥ ६३
युधिष्ठिर उवाच ।
मत्स्यः सुप्तो न निमिषत्यण्डं जातं न चेङ्गते ।
अश्मनो हृदयं नास्ति नदी वेगेन वर्धते ॥ ६४
यक्ष उवाच ।
किंस्वित्प्रवसतो मित्रं किंस्विन्मित्रं गृहे सतः ।
आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः ६५
युधिष्ठिर उवाच ।
विद्या प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः ॥ ६६
यक्ष उवाच ।
कोऽतिथिः सर्वभूतानां किं स्विद्धर्मं सनातनम् ।

वेदास्तस्याभितश्चरा इति अधर्मस्तमस्तं नयतीति क. च. ध. पाठः ॥ ४८ ॥ केन द्वितीयो भवतीति ध. पाठः ॥ ४९ ॥ परित्याग आर्तानामिति शेषः । दानमेषां सतामिवेति क. पाठः ॥ ५४ ॥ का चैका वृश्चत इति क. ध. पाठः ॥ ५५॥ वागेका वृश्चतेऽयज्ञमिति क. पाठः ॥ ५६ ॥ न निर्वपति न प्रयच्छति देवतादिभ्यः ॥ ६० ॥ उक्तसाधनाशक्तेन मातापित्रोः शुश्रूषा मनोनिरोधस्तृणवत्तुच्छायाश्चिन्तायास्त्यागश्च कर्तव्य इत्याह किंस्विद्गुर्विति । बहुतरं तृणामिति ध. पाठः । बहुतरी तृणादिति ध. पाठः ॥ ६२ ॥ किंस्विज्जातं नचोपति इति झ. पाठः ॥ ६४ ॥ सार्थः प्रवसतो मित्रमिति झ. पाठः ॥ ६६ ॥

अमृतं किंस्विद्राजेन्द्र किंस्वित्सर्वमिदं जगत् ॥ ६७
युधिष्ठिर उवाच ।
अतिथिः सर्वभूतानामग्निः सोमो गवामृतम् ।
सनातनोऽमृतो धर्मो वायुः सर्वमिदं जगत् ॥ ६८
यक्ष उवाच ।
किंस्विदेको विचरते जातः को जायते पुनः ।
किंस्विद्धिमस्य भैषज्यं किंस्विदावपनं महत् ॥ ६९
युधिष्ठिर उवाच ।
सूर्य एको विचरते चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भैषज्यं भूमिरावपनं महत् ॥ ७०
यक्ष उवाच ।
किंस्विदेकपदं धर्म्यं किंस्विदेकपदं यशः ।
किंस्विदेकपदं स्वर्ग्यं किंस्विदेकपदं सुखम् ॥ ७१
युधिष्ठिर उवाच ।
दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः ।
सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम् ॥ ७२
यक्ष उवाच ।
किंस्विदात्मा मनुष्यस्य किंस्विद्दैवकृतः सखा ।
उपजीवनं किंस्विदस्य किंस्विदस्य परायणम् ॥ ७३
युधिष्ठिर उवाच ।
पुत्र आत्मा मनुष्यस्य भार्या दैवकृतः सखा ।
उपजीवनं च पर्जन्यो दानमस्य परायणम् ॥ ७४
यक्ष उवाच ।
धन्यानामुत्तमं किंस्विद्धनानां स्यात्किमुत्तमम् ।
लाभानामुत्तमं किं स्यात्सुखानां स्यात्किमुत्तमं ७५
युधिष्ठिर उवाच ।
धन्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम् ।
लाभानां श्रेय आरोग्यं सुखानां तुष्टिरुत्तमा ॥ ७६
यक्ष उवाच ।
किंस्विद्धर्मपरं लोके कश्च धर्मः सदाफलः ।
किं नियम्य न शोचन्ति कैश्च सन्धिर्न जीर्यते ॥ ७७
युधिष्ठिर उवाच ।
आनृशंस्यं परं धर्मात्त्रेताधर्मः सदाफलः ।
मनो यम्य न शोचन्ति सन्धिः सद्भिर्न जीर्यते ७८
यक्ष उवाच ।
किंनु हित्वा प्रियो भवति किंनु हित्वा न शोचति ।
किंनु हित्वाऽर्थवान्भवति किंनु हित्वा सुखी भवेत्
युधिष्ठिर उवाच ।
मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति ।
कामं हित्वाऽर्थवान्भवति लोभं हित्वा सुखी भवेत्
यक्ष उवाच ।
किमर्थं ब्राह्मणे दानं किमर्थं नटनर्तके ।
किमर्थं चैव भृत्येषु किमर्थं चैव राजसु ॥ ८१
युधिष्ठिर उवाच ।
धर्मार्थं ब्राह्मणे दानं यशोर्थं नटनर्तके ।
भृत्येषु सङ्ग्रहार्थं च भयार्थं चैव राजसु ॥ ८२
यक्ष उवाच ।
केन स्विदावृतो लोकः केन स्विन्न प्रकाशते ।
केन त्यजति मित्राणि केन स्वर्गं न गच्छति ॥ ८३
युधिष्ठिर उवाच ।
अज्ञानेनावृतो लोकस्तमसा न प्रकाशते ।
लोभात्त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति ८४
यक्ष उवाच ।
मृतः कथं स्यात्पुरुषः कथं राष्ट्रं मृतं भवेत् ।
श्राद्धं मृतं कथं वा स्यात्कथं यज्ञो मृतो भवेत् ८५
युधिष्ठिर उवाच ।
मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम् ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥ ८६
यक्ष उवाच ।
का दिक्किमुदकं पार्थ किमन्नं किंच वै विषम् ।
श्राद्धस्य कालमाख्याहि ततः पिब हरस्व च ८७
युधिष्ठिर उवाच ।
सन्तो दिग्जलमाकाशं गौरन्नं ब्राह्मणं विषम् ।

एकपदं एकमेव पर्यवसानस्थानम् । दाक्ष्ये कृत्स्नो धर्मः पर्यवसित इत्यर्थः । एवमुत्तरत्र ॥ ७० ॥ प्रार्थनाविषं इति ज्ञ. पाठः ॥ ८७ ॥

श्राद्धस्य ब्राह्मणः कालः कथं वा यक्ष मन्यसे ८८
यक्ष उवाच ।
तपः किंलक्षणं प्रोक्तं को दमश्च प्रकीर्तितः ।
क्षमा च का परा प्रोक्ता का च ह्रीः परिकीर्तिता ॥
युधिष्ठिर उवाच ।
तपः स्वधर्मवर्तित्वं मनसो दमनं दमः ।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्तनम् ॥ ९०
यक्ष उवाच ।
किं ज्ञानं प्रोच्यते राजन्कः शमश्च प्रकीर्तितः ।
दया च का परा प्रोक्ता किं चार्जवमुदाहृतम् ९१
युधिष्ठिर उवाच ।
ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता ।
दया सर्वसुखैषित्वमार्जवं समचित्तता ॥ ९२
यक्ष उवाच ।
कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः ।
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः ९३
युधिष्ठिर उवाच ।
क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ॥ ९४
यक्ष उवाच ।
को मोहः प्रोच्यते राजन्कश्च मानः प्रकीर्तितः ।
किमालस्यं च विज्ञेयं कश्च शोकः प्रकीर्तितः ॥ ९५
युधिष्ठिर उवाच ।
मोहो हि धर्ममूढत्वं मानस्त्वात्माभिमानिता ।
धर्मनिष्क्रियताऽऽलस्यं शोकस्त्वज्ञानमुच्यते ॥९६
यक्ष उवाच ।
किं स्थैर्यमृषिभिः प्रोक्तं किं च धैर्यमुदाहृतम् ।
स्नानं च किं परं प्रोक्तं दानं च किमिहोच्यते ९७
युधिष्ठिर उवाच ।
स्वधर्मे स्थिरता स्थैर्यं धैर्यमिन्द्रियनिग्रहः ।
स्नानं मनोमलत्यागो दानं वै भूतरक्षणम् ॥ ९८
यक्ष उवाच ।
कः पण्डितः पुमाञ्ज्ञेयो नास्तिकः कश्च उच्यते ।
को मूर्खः कश्च कामः स्यात्को मत्सर इति स्मृतः ॥
युधिष्ठिर उवाच ।
धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते ।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ॥१००
यक्ष उवाच ।
कोऽहंकार इति प्रोक्तः कश्च दम्भः प्रकीर्तितः ।
किं तद्दैवं परं प्रोक्तं किं तत्पैशुन्यमुच्यते ॥ १०१
युधिष्ठिर उवाच ।
महाऽज्ञानमहंकारो दम्भो धर्मो ध्वजोच्छ्रयः ।
दैवं दानफलं प्रोक्तं पैशुन्यं परदूषणम् ॥ १०२
यक्ष उवाच ।
धर्मश्चार्थश्च कामश्च परस्परविरोधिनः ।
एषां नित्यविरुद्धानां कथमेकत्र संगमः ॥ १०३
युधिष्ठिर उवाच ।
यदा धर्मश्च भार्या च परस्परवशानुगौ ।
तदा धर्मार्थकामानां त्रयाणामपि संगमः ॥ १०४
यक्ष उवाच ।
अक्षयो नरकः केन प्राप्यते भरतर्षभ ।
एतन्मे पृच्छतः प्रश्नं तच्छीघ्रं वक्तुमर्हसि ॥ १०५
युधिष्ठिर उवाच ।
ब्राह्मणं स्वयमाहूय याचमानमकिंचनम् ।
पश्चान्नास्तीति यो ब्रूयात्सोक्षयं नरकं व्रजेत् ॥ १०६
वेदेषु धर्मशास्त्रेषु मिथ्या यो वै द्विजातिषु ।
देवेषु पितृधर्मेषु सोऽक्षयं नरकं व्रजेत् ॥ १०७
विद्यमाने धने लोभाद्दानभोगविवर्जितः ।
पश्चान्नास्तीति यो ब्रूयात्सोक्षयं नरकं व्रजेत् ॥१०८
यक्ष उवाच ।
राजन्कुलेन वृत्तेन स्वाध्यायेन श्रुतेन वा ।
ब्राह्मण्यं केन भवति प्रब्रूह्येतत्सुनिश्चितम् ॥ १०९
युधिष्ठिर उवाच ।
शृणु यक्ष कुलं तात न स्वाध्यायो न च श्रुतम् ।
कारणं हि द्विजत्वे च वृत्तमेव न संशयः ॥ ११०
वृत्तं यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः ।

अक्षीणवृत्तो न क्षीणो वृत्ततस्तु हतो हतः ॥ १११
पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्वे व्यसनिनो मूर्खा यः क्रियावान्स पण्डितः ॥
चतुर्वेदोऽपि दुर्वृत्तः स शूद्रादतिरिच्यते ।
योऽग्निहोत्रपरो दान्तः स ब्राह्मण इति स्मृतः ११३
यक्ष उवाच ।
प्रियवचनवादी किं लभते
विमृशितकार्यकरः किं लभते ।
बहुमित्रकरः किं लभते
धर्मे रतः किं लभते कथय ॥ ११४
युधिष्ठिर उवाच ।
प्रियवचनवादी प्रीयो भवति
विमृशितकार्यकरोऽधिकं जयति ।
बहुमित्रकरः सुखं वसते
यश्च धर्मरतः स गतिं लभते ॥ ११५
यक्ष उवाच ।
को मोदते किमाश्चर्यं कः पन्थाः का च वार्तिका।
वद मे चतुरः प्रश्नान्मृता जीवन्तु बान्धवाः११६
युधिष्ठिर उवाच ।
पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे ।
अनृणी चाप्रवासी च स वारिचर मोदते ॥ ११७
अहन्यहनि भूतानि गच्छन्तीह यमालयम् ।
शेषाः स्थावरमिच्छन्ति किमाश्चर्यमतः परम् ॥११८
तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥ ११९
पृथ्वी विभाण्डं गगनं पिधानं
सूर्याग्निना रात्रिदिवेन्धनेन ।
मासर्तुदर्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्ता ॥ १२०

यक्ष उवाच ।
व्याख्याता मे त्वया प्रश्ना यथातत्त्वं परंतप ।
पुरुषं त्विदानीं व्याख्याहि यश्च सर्वधनी नरः १२१
युधिष्ठिर उवाच ।
दिवं स्पृशति भूमिं च शब्दः पुण्येन कर्मणा ।
यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥१२२
तुल्ये प्रियाप्रिये यस्य सुखदुःखे तथैव च ।
अतीतानागते चोभे स वै पुरुष उच्यते ॥ १२३
'समत्वं यस्य सर्वेषु निस्पृहः शान्तमानसः ।
सुप्रसन्नः सदा योगी स वै सर्वधनी नरः ॥'१२४
यक्ष उवाच ।
व्याख्यातः पुरुषो राजन्यश्च सर्वधनी नरः ।
तस्मात्त्वमेकं भ्रातॄणां यमिच्छसि स जीवतु॥१२५
युधिष्ठिर उवाच ।
श्यामो य एष रक्ताक्षो बृहत्साल इवोत्थितः ।
व्यूढोरस्को महाबाहुर्नकुलो यक्ष जीवतु ॥ १२६
यक्ष उवाच ।
प्रियस्ते भीमसेनोऽयमर्जुनो वः परायणम् ।
त्वं कस्मान्नकुलं राजन्सापत्नं जीवमिच्छसि १२७
यस्य नागसहस्रेण दशसङ्ख्येन वै बलम् ।
तुल्यं तं भीममुत्सृज्य नकुलं जीवमिच्छसि १२८
तथैनं मनुजाः प्राहुर्भीमसेनं प्रियं तव ।
अथ केनानुभावेन सापत्नं जीवमिच्छसि ॥ १२९
यस्य बाहुबलं सर्वे पाण्डवाः समुपासते ।
अर्जुनं तमपाहाय नकुलं जीवमिच्छसि ॥ १३०
युधिष्ठिर उवाच ।
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मं न त्यजामि मा नो धर्मो हतोऽवधीत् ॥
आनृशंस्यं परो धर्मः परमार्थाच्च मे मतम् ।
आनृशंस्यं चिकीर्षामि नकुलो यक्ष जीवतु ॥१३२
धर्मशीलः सदा राजा इति मां मानवा विदुः ।

जीवं जीवन्तम् ॥ १२६ ॥ अनुभावेन नकुलगतसामर्थ्येन ॥ १२८ ॥ नः अस्मान्मावधीत् ॥ १३० ॥ आनृशंस्यं अवैषम्यम् । परमार्थात् सत्यात् ॥ १३१ ॥

स्वधर्मान्न चलिष्यामि नकुलो यक्ष जीवतु ॥ १३३
कुन्ती चैव तु माद्री च द्वे भार्ये तु पितुर्मम ।
उभे सपुत्रे स्यातां वै इति मे धीयते मतिः ॥ १३४
यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः ।
मातृभ्यां सममिच्छामि नकुलो यक्ष जीवतु ॥ १३५
यक्ष उवाच ।
यस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम् ।
तस्मात्ते भ्रातरः सर्वे जीवन्तु भरतर्षभ ॥ १३६

॥ इति श्रीमन्महाभारते अरण्यपर्वणि आरणेयपर्वणि चतुर्दशाधिकत्रिशततमोऽध्यायः ॥ ३१४ ॥

पञ्चदशाधिकत्रिशततमोऽध्यायः ॥ ३१५ ॥

यक्षेण युधिष्ठिरंप्रति स्वस्वरूपप्रकाशनपूर्वकमरणिहरणादेः शीलशोधनाय स्वकृतत्वकथनेन तदभिमतवरप्रदानम् ॥ १ ॥

वैशंपायन उवाच ।
ततस्ते यक्षवचनादुदतिष्ठन्त पाण्डवाः ।
क्षुत्पिपासे च सर्वेषां क्षणेन व्यपगच्छताम् ॥ १
युधिष्ठिर उवाच ।
सरस्येकेन पादेन तिष्ठन्तमपराजितम् ।
पृच्छामि को भवान्देवो न मे यक्षो मतो भवान् ॥ २
वसूनां वा भवानेको रुद्राणामथवा भवान् ।
अथवा मरुतां श्रेष्ठो वज्री वा त्रिदशेश्वरः ॥ ३
मम हि भ्रातर इमे सहस्रशतयोधिनः ।
तं योधं न प्रपश्यामि येन सर्वे निपातिताः ॥ ४
सुखं प्रति प्रबुद्धानामिन्द्रियाण्युपलक्षये ।
स भवान्सुहृदोस्माकमथवा नः पिता भवान् ॥ ५
यक्ष उवाच ।
अहं ते जनकस्तात धर्मो मृदुपराक्रम ।
त्वां दिदृक्षुरनुप्राप्तो विद्धि मां भरतर्षभ ॥ ६
यशः सत्यं दमः शौचमार्जवं ह्रीरचापलम् ।
दानं तपो ब्रह्मचर्यमित्येतास्तनवो मम ॥ ७
अहिंसा समता शान्तिस्तपः शौचममत्सरः ।
द्वाराण्येतानि मे विद्धि प्रियो ह्यसि सुतो मम ॥ ८
दिष्ट्या पञ्चसु रक्तोसि दिष्ट्या ते षट्पदी जिता ।
द्वे पूर्वे मध्यमे द्वे च द्वे शान्ते सांपरायिके ॥ ९
धर्मोऽहमिति भद्रं ते जिज्ञासुस्त्वामिहागतः ।
आनृशंस्येन तुष्टोसि वरं दास्यामि तेऽनघ ॥ १०
वरं वृणीष्व राजेन्द्र दाता ह्यस्मि तवानघ ।
ये हि मे पुरुषा भक्ता न तेषामस्ति दुर्गतिः ॥ ११
युधिष्ठिर उवाच ।
अरणी तु हृता यस्य मृगेण वदतांवर ।
तस्याग्नयो न लुप्येरन्प्रथमोऽस्तु वरो मम ॥ १२
धर्म उवाच ।
आरणेयमिदं तस्य ब्राह्मणस्य हृतं मया ।
मृगवेषेण कौन्तेय जिज्ञासार्थं तवानघ ॥ १३
वैशंपायन उवाच ।
ददानीत्येव भगवानुत्तरं प्रत्यपद्यत ।
अन्यं वरय भद्रं ते वरं त्वममरोपम ॥ १४
युधिष्ठिर उवाच ।
वर्षाणि द्वादशारण्ये त्रयोदशमुपस्थितम् ।
तत्र नो नाभिजानीयुर्वसतो मनुजाः क्वचित् १५

धीयते निश्चिनुते ॥ १३३ ॥ यस्मात्ते पार्थ धर्माच्च इति थ. ध. पाठः ॥ १३५ ॥ चतुर्दशाधिकत्रिशततमोऽध्यायः ॥ ३१४ ॥

सुहृदः सुहृत् । छान्दसमदन्तत्वम् ॥ ५ ॥ पञ्चस्वात्मदर्शनसाधनेषु शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वेति श्रुत्युक्तेषु शमादिषु । दिष्ट्या पूर्वपुण्यवशाद्रक्तोसि तस्य फलं च षट्पदीजयः। पद्यन्ते प्राप्नुवन्ति देहिनमिति पदानि षडूर्मयो योशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीति श्रुत्युक्ताः । तेषां षण्णां पदानां समाहारः षट्पदी सा त्वया जिता । तेषु पदेषु द्वे पदे पूर्वे जातमात्रस्य ह्यशनायापिपासे प्रथमं भवतः। द्वे मध्ये शोकमोहौ । शोक इष्टवियोगजश्चित्तस्य संतापः। मोहोऽतिपापेन कार्याकार्यप्रतिसंधानशून्यत्वम् । एते मध्ये मध्यमे वयसि प्राप्नुतः । सांपरायिके जरामृत्यू उत्तरे वयस्युपतिष्ठतः । संपरायः परलोकस्तं प्रति नेतुमुदिते सांपरायिके ॥ ९ ॥ अरण्ये गतानीति शेषः । नोऽस्मान् ॥ १५ ॥

वैशंपायन उवाच ।
ददानीत्येव भगवानुत्तरं प्रत्यपद्यत ।
भूयश्चाश्वासयामास कौन्तेयं सत्यविक्रमम् ॥ १६
यद्यपि स्वेन रूपेण चरिष्यथ महीमिमाम् ।
न वो विज्ञास्यते कश्चित्त्रिषु लोकेषु भारत ॥ १७
वर्षं त्रयोदशमिदं मत्प्रसादात्कुरूद्वहाः ।
विराटनगरे गूढा अविज्ञाताश्चरिष्यथ ॥ १८
यद्वः संकल्पितं रूपं मनसा यस्य यादृशम् ।
तादृशं तादृशं सर्वे छन्दतो धारयिष्यथ ॥ १९
अरणीसहितं भाण्डं ब्राह्मणाय प्रयच्छत ।
जिज्ञासार्थं मया ह्येतदाहृतं मृगरूपिणा ॥ २०
प्रवृणीष्वापरं सौम्य वरमिष्टं ददानि ते ।
न तृप्यामि नरश्रेष्ठ प्रयच्छन्वै वरांस्तथा ॥ २१
तृतीयं गृह्यतां पुत्र वरमप्रतिमं महत् ।
त्वं हि मत्प्रभवो राजन्विदुरश्च ममांशजः ॥ २२
युधिष्ठिर उवाच ।
देवदेवो मया दृष्टो भवान्साक्षात्सनातनः ।
यं ददासि वरं तुष्टस्तं ग्रहीष्याम्यहं पितः ॥ २३
जयेयं लोभमोहौ च क्रोधं चाहं सदा विभो ।
दाने तपसि सत्ये च मनो मे सततं भवेत् ॥ २४
धर्म उवाच ।
उपपन्नो गुणैरेतैः स्वभावेनासि पाण्डव ।
भवान्धर्मः पुनश्चैव यथोक्तं ते भविष्यति ॥ २५
वैशंपायन उवाच ।
इत्युक्त्वान्तर्दधे धर्मो भगवाँल्लोकभावनः ।
समेताः पाण्डवाश्चैव सुखसुप्ता मनस्विनः ॥ २६
उपेत्य चाश्रमं वीराः सर्व एव गतक्लमाः ।
आरणेयं ददुस्तस्मै ब्राह्मणाय तपस्विने ॥ २७
इदं समुत्थानसमागतं मह-
त्पितुश्च पुत्रस्य च कीर्तिवर्धनम् ।
पठन्नरः स्याद्विजितेन्द्रियो वशी
सपुत्रपौत्रः शतवर्षभाग्भवेत् ॥ २८
न चाप्यधर्मे न सुहृद्विभेदने
परस्वहारे परदारमर्शने ।
कदर्यभावे न रमेन्मनः सदा
नृणां सदाख्यानमिदं विजानताम् ॥ २९

॥ इति श्रीमन्महाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां अरण्यपर्वणि आरणेयपर्वणि पञ्चदशाधिक-त्रिशततमोऽध्यायः ॥ ३१५ ॥

आरणेयपर्व समाप्तम् ॥ २१ ॥ समाप्तमिदमरण्यपर्व च ॥ ३ ॥

अतःपरं विराटपर्व भविष्यति ।
तस्यायमाद्यः श्लोकः ।
जनमेजय उवाच ।
कथं विराटनगरे मम पूर्वपितामहाः ।
अज्ञातवासमुषिता दुर्योधनभयार्दिताः ॥ १

छन्दत इच्छातः ॥ १९ ॥ आरणेयमरणीसंपुटम् ॥ २७ ॥ समुत्थानसमागतं भीमादीनां समुत्थानं च धर्मराजेन सह समागतं संमेलनं चेति समाहारः । पितुर्धर्मस्य । पुत्रस्य युधिष्ठिरस्य । चात् समागतमिति समासैकदेशभूतमप्यनुवर्तते ॥ २८ ॥ कदर्यभावे कार्पण्ये । सदाख्यानं शुभाख्यानम् ॥ २९ ॥ पञ्चदशाधिकत्रिशततमोऽध्यायः ॥ ३१५ ॥

इदं वनपर्व कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च मुंबय्यां
निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३० सन १९०९.

SRIMANMAHABHARATAM

A NEW EDITION

MAINLY BASED ON

THE SOUTH INDIAN TEXTS,

With footnotes and Readings.

VIRÂTPARVA IV.

EDITED BY

T. R. KRISHNACHARYA & T. R. VYASACHARYA,

Proprietors, Madhva Vilâs Book Depot, Kumbakonam.

Printed by B. R. Ghanekar for the proprietors,

at Tukaram Javaji "Nirnaya-sagar" Press,

BOMBAY.

1909.

॥ श्रीः ॥

श्रीमन्महाभारतम् ।

सटिप्पणम् ।

विराटपर्व ४.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण च

अनेकेषां विदुषां साहाय्येन दाक्षिणात्यबहुकोशानुसारेण

संशोध्य

मुंबापुर्यां

जावजी दादाजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८३० कीलकनामसंवत्सरे ।


विराटपर्व.
विराटराजः
भीमसेनः
कीचकः
उत्तरा विवाहः

श्रीः ।

श्रीमन्महाभारतम् ।

विराटपर्व ४ ।

(अथ पाण्डवप्रवेशपर्व ॥ १ ॥)

प्रथमोऽध्यायः ॥ १ ॥

युधिष्ठिरेण ब्राह्मणाय मृगापहृतारणिभाण्डप्रत्यर्पणम् ॥ १ ॥ धौम्येन ब्राह्मणमध्ये दुर्योधनापनयादिकथनेन शोचतो युधिष्ठिरस्य दुःखानुभवविषये देवादिनिदर्शनप्रदर्शनेन परिसान्त्वनम् ॥ २ ॥ पाण्डवैः स्वसहचरब्राह्मणाभ्यनुज्ञानसंपादनेन तद्विसर्जनपूर्वकं धौम्येनसह मन्त्राय क्वचिदुपवेशनम् ॥ ३ ॥

*॥ श्रीवेदव्यासाय नमः ॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १

जनमेजय उवाच ।
कथं विराटनगरे मम पूर्वपितामहाः ।
अज्ञातवासमुषिता दुर्योधनभयार्दिताः ॥ १
पतिव्रता महाभागा सततं सुखभागिनी ।
द्रौपदी सा कथं ब्रह्मन्नज्ञाता दुःखिताऽवसत् ॥ २
ते च ब्राह्मणमुख्याश्च सूतपौरोगवैः सह ।
अज्ञातवासमुषिताः कथं च परिचारकाः ॥ ३

वैशंपायन उवाच ।
यथा विराटनगरे तव पूर्वपितामहाः ।
अज्ञातवासमुषितास्तावद्वक्ष्यामि तच्छृणु ॥ ४
तथा स तान्वराँल्लब्ध्वा धर्मराजो युधिष्ठिरः ।
गत्वाऽऽश्रमं ब्राह्मणेभ्य आचख्यौ वृत्तमात्मनः ॥ ५
कथयित्वा च तत्सर्वं ब्राह्मणेभ्यो युधिष्ठिरः ।
अरणीसहितं भाण्डं ब्राह्मणाय न्यवेदयत् ॥ ६
ततो युधिष्ठिरो राजा कुन्तीपुत्रो दृढव्रतः ।
समाहूयानुजान्सर्वानिति होवाच भारत ॥ ७
द्वादशेमानि वर्षाणि राष्ट्राद्विप्रोषिता वयम् ।
छद्मना हृतराज्याश्च निस्वाश्च बहुशः कृताः ॥ ८
उषिताश्च वने वासं यथा द्वादश वत्सरान् ।
अज्ञातचर्यां वत्स्यामश्छन्ना वर्षं त्रयोदशम् ॥ ९

वैशंपायन उवाच ।
धर्मेण तेऽभ्यनुज्ञाताः पाण्डवाः सत्यविक्रमाः ।
अज्ञातवासं वत्स्यन्तश्छन्ना वर्षं त्रयोदशम् ॥ १०
उपोपविश्य विद्वांसः स्नातकाः संशितव्रताः ।
ये तत्र ब्राह्मणा आसन्वनवाससहायिनः ।
ये च भक्ता वसन्ति स्म वनवासे तपस्विनः ॥ ११
तानब्रुवन्महात्मानो हृष्टाः प्राञ्जलयः स्थिताः ।
अभ्यनुज्ञापयिष्यन्तस्तान्प्रवासे धृतव्रताः ॥ १२
विदितं भवतां सर्वं धार्तराष्ट्रैर्यथा वयम् ।
छद्मना हृतराज्याश्च निस्वाश्च बहुशः कृताः ॥ १३
उषिताश्च वने वासं यथा द्वादशवत्सरान् ।
भवद्भिरेव सहिता वन्याहारा द्विजोत्तमाः ॥ १४
अज्ञातवाससमयं शेषं वर्षं त्रयोदशम् ।

* अयमध्यायो झ. पुस्तके वनपर्वान्तिमाध्यायतया वर्तते ।

तद्वत्स्यामो वयं छन्नास्तदनुज्ञातुमर्हथ ॥ १५
सुयोधनश्च दुष्टात्मा कर्णश्च सहसौबलः ।
जानन्तो विषमं कुर्युरस्मास्वत्यन्तवैरिणः ॥ १६
युक्तचाराश्च यत्ताश्च दाये स्वस्य जनस्य च ।
दुरात्मनां हि कस्तेषां विश्वासं गन्तुमर्हति ॥ १७
अपि नस्तद्भवेद्भूयो यद्वयं ब्राह्मणैः सह ।
समस्तेषु च राष्ट्रेषु स्वराज्यस्था भवेम हि ॥ १८
इत्युक्त्वा दुःखशोकार्तः शुचिर्धर्मसुतस्तदा ।
संमूर्च्छितोऽभवद्राजा सास्रकण्ठो युधिष्ठिरः ॥१९
तमथाश्वासयन्सर्वे ब्राह्मणा भ्रातृभिः सह ॥ २०
प्रबुध्य दुःखमोहार्तो धौम्यं धर्मभृतांवरम् ।
प्रावेक्षत तदा राजा साश्रुकण्ठो युधिष्ठिरः ॥२१
अथ धौम्योऽब्रवीद्वाक्यं महार्थं नृपतिं तदा ।
आश्वासयंस्तं स नृपं भ्रातृंश्च ब्राह्मणैः सह ॥ २२
राजन्विद्वान्भवान्दान्तः सत्यसन्धो जितेन्द्रियः ।
नैवंविधाः प्रमुह्यन्ति धीराः कस्यांचिदापदि ॥ २३
देवैरप्यापदः प्राप्ताश्छन्नैश्च बहुभिस्तदा ।
तत्रतत्र सपत्नानां निग्रहार्थं महात्मभिः ॥ २४
दितिपुत्रैर्हृते राज्ये देवराजः सुदुःखितः ।
ब्रह्माणं तोषयिष्यंश्च ब्रह्मरूपं विधाय च ॥ २५
इन्द्रेण निषधं प्राप्य गिरिप्रस्थाह्वये पुरे ।
छन्नेनोष्य कृतं कर्म द्विषतां बलनिग्रहे ॥ २६
प्रसादाद्ब्रह्मणो राजन्दितेः पुत्रान्महाबलान् ।
निर्जित्य तरसा शत्रून्पुनर्लोकाञ्जुगोप च ॥ २७
विष्णुनाऽश्मगिरिं प्राप्य तदा दित्यां निवत्स्यता ।
गर्भे वधार्थं दैत्यानामज्ञातेनोषितं चिरम् ॥ २८
प्रोष्य वामनरूपेण च्छन्नेन ब्रह्मचारिणा ।
बलेर्यथा हृतं राज्यं विक्रमैस्तच्च ते श्रुतम् ॥ २९
और्वेण वसता छन्नमूरौ ब्रह्मर्षिणा तदा ।
यत्कृतं तात लोकेषु तच्च सर्वं श्रुतं त्वया ॥ ३०
प्रच्छन्नेनापि सर्वत्र हरिणा वृत्रनिग्रहे ।
वज्रं प्रविश्य शक्रस्य यत्कृतं तच्च ते श्रुतम् ॥ ३१
हुताशनेन यच्चापः प्रविश्य च्छन्नमूषितम् ।
विबुधानां हि यत्कर्म कृतं तच्चापि ते श्रुतम् ॥ ३२
यथा विवस्वता तात छन्नेनोत्तमतेजसा ।
निर्दग्धाः शत्रवः सर्वे वसता गवि वर्पशः ॥ ३३
विष्णुना वसता चात्र गृहे दशरथस्य वै ।
दशग्रीवो हतश्छन्नं संयुगे भीमकर्मणा ॥ ३४
एवमेते महात्मानः प्रच्छन्नास्तत्रतत्र हि ।
अजयञ्छात्रवान्युद्धे तथा त्वमपि जेष्यसि ॥३५
वैशंपायन उवाच ।
इति धौम्येन धर्मज्ञो वाक्यैः स परिहर्षितः ।
शान्तबुद्धिः पुनर्भूत्वा व्यष्टम्भत युधिष्ठिरः ॥३६
अथाब्रवीन्महाबाहुर्भीमसेनो महाबलः ।
राजानं बलिनां श्रेष्ठो गिरा संपरिहर्षयन् ॥ ३७
अवेक्षय महाराज तव गाण्डीवधन्वना ।
धर्मार्थपरया बुद्ध्या न किंचित्साहसं कृतम् ॥ ३८
सहदेवो मया नित्यं नकुलश्च निवारितौ ।
शक्तौ विध्वंसने तेषां शत्रुघ्नौ भीमविक्रमौ ॥ ३९
न वयं वर्त्म हास्यामो यस्मिन्योक्ष्यति नो भवान् ।
तद्विधत्तां भवान्सर्वं क्षिप्रं जेष्यामहे परान् ॥ ४०
इत्युक्तो भीमसेनेन धर्मराजो युधिष्ठिरः ।
सुखोपविष्टो विद्वद्भिस्तापसैः संशितव्रतैः ॥ ४१
ये तद्भक्त्याऽभवंस्तस्मिन्वनवासे तपस्विनः ।
तानब्रवीन्महाप्राज्ञः शिष्टात्राजा कृताञ्जलिः ।
अभ्यनुज्ञापयिष्यन्वै तस्मिन्वासे धृतव्रतः ॥ ४२
विदितं भवतां सर्वं धार्तराष्ट्रैर्यथा वयम् ।
संमन्त्र्याहृतराज्याश्च निस्स्वाश्च बहुशः कृताः ।
उषिताः स्मो वने कृच्छ्रं तथा वर्षाणि द्वादश ॥४३
अज्ञातचर्यासमयं शेषं वर्षं त्रयोदशम् ।
तद्वत्स्यामः क्वचिच्छन्नास्तदनुज्ञातुमर्हथ ॥ ४४
इत्युक्ता धर्मराजेन ब्राह्मणाः परमाशिषः ।
प्रयुज्यापृच्छ्य भरतान्यथास्वं प्रययुर्गृहान् ॥ ४५
सर्वे वेदविदो मुख्या यतयो मुनयस्तदा ।
आशीरुक्त्वा यथान्यायं पुनर्दर्शनकाङ्क्षिणः ॥४६
ते तु भृत्याश्च दूताश्च शिल्पिनः परिचारकाः ।
अनुज्ञाप्य यथान्यायं पुनर्दर्शनकाङ्क्षिणः ॥ ४७

सह धौम्येन विद्वांसस्तथा ते पञ्च पाण्डवाः ।
उत्थाय प्रययुर्वीराः कृष्णामादाय भारत ॥ ४८
क्रोशमात्रमतिक्रम्य तस्माद्वासान्निमित्ततः ।
श्वोभूते मनुजव्याघ्राश्छन्नवासार्थमुद्यताः ॥ ४९
पृथक् शास्त्रविदः सर्वे सर्वे मन्त्रविशारदाः ।
सन्धिविग्रहतत्वज्ञा मन्त्राय समुपाविशन् ॥ ५०

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

युधिष्ठिरेण भ्रातृभिः सह मन्त्रणेन विराटनगरे निवासनिर्धारणम् ॥१॥ तथा स्वस्य यतिवेषपरिग्रहेण विराटसभास्तारीभवनकथनम् ॥ २ ॥

वैशंपायन उवाच ।
निवृत्तवनवासास्ते सत्यसन्धा मनस्विनः ।
अकुर्वत पुनर्मन्त्रं सह धौम्येन पाण्डवाः ॥ १
अथाब्रवीद्धर्मराजः कुन्तीपुत्रो युधिष्ठिरः ।
भ्रातॄन्कृष्णां च संप्रेक्ष्य धौम्यं च कुरुनन्दनः॥ २
द्वादशेमानि वर्षाणि राज्याद्विप्रोषिता वयम् ।
त्रयोदशोऽयं संप्राप्तः कृच्छ्रात्परमदुर्वसः ।
स साधु कौन्तेय इतो वासमर्जुन रोचय ॥ ३
त्रयोदशमिदं प्राप्तं क्वनु वत्स्यामहेऽर्जुन ।
अबुद्धा धार्तराष्ट्रैश्च समग्राः सह कृष्णया ॥ ४
अर्जुन उवाच ।
तस्यैव वरदानेन धर्मस्य मनुजाधिप ।
अज्ञाता विचरिष्यामो नराणां भरतर्षभ ॥ ५
यानि राष्ट्राणि वासाय कीर्तयिष्यामि कानिचित् ।
रमणीयानि गुप्तानि तेषां किंचित्तु रोचय ॥ ६
रम्या जनपदाः सन्ति बहवस्त्वभितः कुरून् ।
पाञ्चालाश्चैव मत्स्याश्च साल्ववैदेहबाह्लिकाः ।
दशार्णाः शूरसेनाश्च कलिङ्गा मागधा अपि ॥ ७
विराटनगरं चापि श्रूयते शत्रुसूदन ।
रमणीयं जनाकीर्णं सुभिक्षं स्फीतमेव च ॥ ८
नानाराष्ट्राणि चान्यानि श्रूयन्ते सुबहूनि च ।
यत्र ते रोचते राजंस्तत्र गच्छामहे वयम् ॥ ९
कतमस्मिञ्जनपदे महाराज निवत्स्यसि ।
मा विषादे मनः कार्यं राज्यभ्रंश इति क्वचित् १०
युधिष्ठिर उवाच ।
एवमेतन्महाबाहो यथा स भगवान्प्रभुः ।
अब्रवीत्सर्वभूतेशस्तथैतन्न तदन्यथा ॥ ११
अवश्यं त्वेव वासार्थं रमणीयं शिवं सुखम् ।
संमन्त्र्य सहितैः सर्वैर्द्रष्टव्यमकुतोभयम् ॥ १२
मात्स्यो विराटो बलवानभिरक्तोथ पाण्डवान् ।
धर्मशीलो वदान्यश्च वृद्धः सत्स्वपि संमतः ॥ १३
गुणवाँल्लोकविख्यातो दृढभक्तिर्जितेन्द्रियः ।
तत्र मे रोचते पार्थ मत्स्यराजान्तिकेऽनघ ॥ १४
विराटनगरे तात मासान्द्वादशसंमितान् ।
कुर्वन्तस्तस्य कर्माणि वसामो यदि रोचते ॥ १५
यानियानि च कर्माणि तस्य शक्ष्यामहे वयम् ।
कर्तुं यो यत्स तत्कर्म ब्रवीतु कुरुनन्दन ॥ १६
अर्जुन उवाच ।
नरदेव कथं कर्म तस्य राष्ट्रे करिष्यसि ।
मनुजेन्द्र विराटस्य रंस्यसे केन कर्मणा ॥ १७
अक्लिष्टवेषधारी च धार्मिको ह्यनसूयकः ।
न तवाभ्युचितं कर्म नृशंसं नापि कैतवम् ॥ १८
सत्यवागसि याज्ञीको लोभक्रोधविवर्जितः ।
मृदुर्वदान्यो ह्रीमांश्च धार्मिकः सत्यविक्रमः ॥१९
स राजंस्तपसा क्लिष्टः कथं तस्य करिष्यसि ।
न दुःखमुचितं किंचिद्राजन्पापमतेर्यथा ।
स इमामापदं प्राप्य कथं घोरां तरिष्यसि ॥२०
वैशंपायन उवाच ।
अर्जुनेनैवमुक्तस्तु प्रत्युवाच युधिष्ठिरः ।
शृणु त्वं यत्करिष्यामि कर्म वै कुरुनन्दन ॥२१
विराटं समनुप्राप्य राजानं मात्स्यनन्दनम् ।
सभास्तारो भविष्यामि विराटस्येति मे मतिः २२

कङ्को नाम ब्रुवाणोऽहं मताक्षः साधुदेविता ।
वैडूर्यान्काञ्चनान्दान्तान्स्फाटिकाञ्राजतानपि२३
कृष्णाक्षाँल्लोहिताक्षांश्च निवप्स्यामि मनोरमान् ।
अरिष्टान्राजगोलिङ्गान्दर्शनीयान्सुवर्चसः ॥ २४
लोहिताश्चाश्मगर्भाश्च सन्ति तात धनानि मे ।
दर्शनीयाः सभानन्दाः कुशलैः साधुनिष्ठिताः२५
अप्येतान्पाणिना स्पृष्ट्वा संप्रहृष्यन्ति मानवाः२६
तान्विकीर्य समे देशे रमणीये विपांसुले ।
देविष्यामि यथाकामं स विहारो भविष्यति ॥२७
कङ्को नाम्ना परिव्राट् च विराटस्य सभासदः ।
ज्योतिषे शकुनज्ञाने निमित्ते चाक्षकौशले ।
ब्राह्मे वेदे मयाऽधीते वेदाङ्गेषु च सर्वशः ॥ २८
धर्मकामार्थमोक्षेषु नीतिशास्त्रेषु पारगः ।
पृष्टोऽहं कथयिष्यामि राज्ञः प्रियतमं वचः ॥२९
आसं युधिष्ठिरस्याहं पुरा प्राणसमः सखा ।
इति वक्ष्यामि राजानं यदि मामनुयोक्ष्यते ॥ ३०
विराटनगरे छन्न एवं युक्तः सदा वसे ।
इत्येवं मे प्रतिज्ञातं विचरिष्याम्यहं यथा ॥ ३१

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

भीमेन युधिष्ठिरंप्रति स्वस्य सूदवेषपरिग्रहेण विराटभवने निवासकथनम् ॥ १ ॥ अर्जुनेन युधिष्ठिरंप्रति स्वेन नपुंसकवेषपरिग्रहेण राजकन्यानाटनादिकथनम् ॥ २ ॥

वैशंपायन उवाच ।
एवं निर्दिश्य चात्मानं निश्वसन्नुष्णमार्तिजम् ।
विमुञ्चन्नश्रु नेत्राभ्यां भीमसेनमुवाच ह ॥ १
भीमसेन कथं कर्म मात्स्यराष्ट्रे करिष्यसि ।
हत्वा क्रोधवशांस्तत्र पर्वते गन्धमादने ॥ २
यक्षान्क्रोधाभिताम्राक्षान्राक्षसांश्चापि पौरुषात् ।
प्रादाः पाञ्चालकन्यायै पद्मानि सुबहून्यपि ॥ ३
बकं राक्षसराजानं भीषणं पुरुषादकम् ।
जघ्निवानसि कौन्तेय ब्राह्मणार्थमरिन्दम ।
क्षेमा चाभयसंवीता सैकचक्रा त्वया कृता ॥ ४
हिडिम्बं च महावीर्यं किर्मीरं चैव राक्षसम् ।
त्वया हत्वा महाबाहो वनं निष्कण्टकं कृतम् ॥५
आपदं चापि संप्राप्ता द्रौपदी चारुहासिनी ।
जटासुरवधं कृत्वा वयं च परिमोक्षिताः ॥ ६
मत्स्यराजान्तिके तात वीर्यपूर्णोऽत्यमर्षणः ।
वृकोदर विराटस्य बलीयान्दुर्बलीयसः ।
समीपे नगरे तस्य वत्स्यसे केन कर्मणा ॥ ७
भीम उवाच ।
सूदोऽहं वललो नाम्ना सूपकारो नराधिप ।
उपस्थास्यामि राजानं विराटमिति रोचये ॥ ८
रसान्नानाविधांश्चापि स्वादूंश्च मधुरांस्तथा ।
सूपांश्चापि करिष्यामि कुशलोस्मि महानसे ॥ ९
कृतपूर्वाणि यान्यस्य व्यञ्जनानि सुशिक्षितैः ।
तान्यप्यभिभविष्यामि प्रीतिं संजनयन्नहम् ॥ १०
पूर्वमप्राशितांस्तेन कर्ता रसगुणान्वितान् ।
स्वादु व्यञ्जनमास्वाद्य मात्स्यः प्रीतो भविष्यति ॥
आहरिष्यामि दारूणां पाटितानां शतंशतम् ।
राजा कर्माणि मे दृष्ट्वा न मां परिभविष्यति १२
ये च तस्य महामल्लाः समरेष्वपराजिताः ।
कृतप्रतापा बहुशो राज्ञः प्रत्यायिता बले ॥ १३
रङ्गोपजीविनः सर्वे परेषां च भयावहाः ।
तानहं निहनिष्यामि रतिं राज्ञः प्रवर्तयन् ॥ १४
न च तान्युध्यमानोऽहं नयिष्ये यमसादनम् ।
तथा तान्निहनिष्यामि जीविष्यन्ति यथाऽऽतुराः॥
वृषो वा महिषो वापि नागो वा षाष्टिहायनः ।
सिंहो व्याघ्रो ग्रहीतव्यो भविष्यति न संशयः ॥
तान्सर्वान्दुर्ग्रहानन्यैराशीविषविषोपमान् ।
बलादहं ग्रहीष्यामि मत्स्यराजस्य पश्यतः ॥ १७
आरालिका वा सूदा वा येऽस्य युक्ता महानसे ।
तानहं प्रीणयिष्यामि मनुष्यान्स्वेन कर्मणा ॥१८

आरालिको गोविकर्ता सूपकर्ता नियोधकः ।
आसं युधिष्ठिरस्याहमिति वक्ष्यामि मानवान् १९
आत्मानमात्मना रक्षंश्चरिष्यामि विशांपते ।
इत्येवं च प्रतिज्ञातं विचरिष्याम्यहं यथा ।
विराटनगरे च्छन्नो विराटस्य समीपतः ॥ २०
युधिष्ठिर उवाच ।
अग्निर्ब्राह्मणरूपेण प्रच्छन्नोऽन्नमयाचत ।
महाशनं ब्राह्मणं मां प्रभुश्चार्जुन खाण्डवे ॥ २१
संशुश्रुवे च धर्मात्मा यस्तमर्थं चकार ह ।
तस्मै ब्राह्मणरूपाय हुताशाय महायशाः ।
विजित्यैकरथेनेन्द्रं हत्वा पन्नगराक्षसान् ॥ २२
यस्तु देवान्मनुष्यांश्च सर्वानेकरथोऽजयत् ।
स भीमधन्वा श्वेताश्वः पाण्डवः किं करिष्यति॥
आशीविषसमस्पर्शो नागानामिव वासुकिः ।
दृष्टीविष इवाहीनामग्निस्तेजस्विनामिव ॥ २४
समुद्र इव सिन्धूनां शैलानां हिमवानिव ।
महेन्द्र इव देवानां दानवानां बलिर्यथा ॥ २५
सुप्रतीको गजेन्द्राणां युग्यानां तुरगो यथा ।
कुबेर इव यक्षाणां मृगाणां केसरी यथा ॥ २६
राक्षसानां दशग्रीवो दैत्यानामिव शम्बरः ।
रुद्राणामिव कापाली विष्णुर्बलवतामिव ॥ २७
रोषामर्षसमायुक्तो भुजङ्गानां च तक्षकः ।
वायुवेगबलोद्धूतो गरुडः पततामिव ॥ २८
तपतामिव चादित्यः प्रजानां ब्राह्मणो यथा ।
ह्रदानामिव पातालं पर्जन्यो नर्दतामिव ॥ २९
आयुधानां वरो वज्रः ककुद्मांश्च गवां वरः ।
धृतराष्ट्रश्च नागानां हस्तिष्वैरावतो यथा ॥ ३०
पुत्रः प्रियाणामधिको भार्या च सुहृदां वरा ।
गिरीणां प्रवरो मेरुर्देवानां मधुसूदनः ।
ग्रहाणां प्रवरश्चन्द्रः सरसां मानसो यथा ॥ ३१
यथैतानि विशिष्टानि स्वस्यां जात्यां वृकोदर ।
एवं युवा गुडाकेशः श्रेष्ठः सर्वधनुष्मताम् ॥ ३२
सोयमिन्द्रादनवमो वासुदेवाच्च भारत ।
उषित्वा पञ्च वर्षाणि सहस्राक्षस्य वेश्मनि ।
ब्रह्मचारी व्रते युक्तः सर्वशस्त्रभृतांवरः ॥ ३३
अवाप चास्त्रमस्त्रज्ञः सर्वज्ञः सर्वसंमतः ।
क्षिप्रं चाशु विचित्रं च ध्रुवं च वदतां वरः ॥३४
अनुज्ञातः सुरेन्द्रेण पुनः प्रत्यागतो महीम् ।
धार्तराष्ट्रविनाशाय पाण्डवानां जयाय च ॥ ३५
यं मन्ये द्वादशं रुद्रमादित्यानां त्रयोदशम् ।
वसूनां नवमं मन्ये गिरीणामष्टमः स्मृतः ॥ ३६
यस्य दीर्घौ समौ बाहू ज्याघातेन किणीकृतौ ।
दक्षिणश्चैव सव्यश्च बाहू अनडुहो यथा ॥ ३७
तलाङ्गुलित्राभ्युचितौ नागराजकरोपमौ ।
पीनौ परिघसङ्काशौ मृदुताम्रतलौ शुभौ ॥ ३८
श्यामो युवा गुडाकेशो दर्शनीयश्च पाण्डवः ।
गाण्डीवधन्वा श्वेताश्वः किरीटी वानरध्वजः ३९
किंरूपधारी किंकर्मा किंचेष्टः किंपरायणः ।
बीभत्सुर्भीमधन्वा च किं करिष्यति चार्जुनः ।
कुन्तीपुत्रो विराटस्य रमते केन कर्मणा ॥ ४०
अर्जुन उवाच ।
इमौ किणीकृतौ बाहू ज्याघाततलपीडनात् ।
नित्यं कञ्चुकसंछन्नौ नान्यथा गोप्तुमुत्सहे ॥ ४१
किं तु कार्यवशादेतदाचरिष्यामि कुत्सितम्॥४२
बाहू मे भरतश्रेष्ठ महालाञ्छनलक्षितौ ।
ज्याघातेन महान्तौ मे गूहितुं नान्यथोत्सहे ४३
उभौ कम्बू प्रतीमुच्य कुण्डले परिपातुके ।
वेणीकृतशिरा भूत्वा भविष्यामि बृहन्नला॥४४
पठन्नाख्यायिकां नाम स्त्रीभावेन पुनः पुनः ।
प्रजानां समुदाचारं बहुनर्मकृतं वदन् ।
रमयिष्यामि राजानमन्यं चान्तःपुरे जनम् ॥४५
नृत्तं गीतं च वादित्रं दिव्यं च विविधं तथा ।
शिक्षयिष्याम्यहं राजन्विराटनगरे स्त्रियः ॥ ४६
स्त्रीभावसमुदाचारान्नृत्तगीतकथाश्रयैः ।
छादयिष्यामि राजेन्द्र माययाऽऽत्मानमात्मना॥
युधिष्ठिरस्य गेहेऽस्मिन्द्रौपद्याः परिचारिका ।
उषिताऽस्मीति वक्ष्यामि धर्मराजस्य संमता॥४८

उर्वश्याश्चापि शापेन प्राप्तोस्मि नृप षण्डताम् ।
शक्रप्रसादान्मुक्तोऽहं वर्षादूर्ध्वं त्रयोदशात् ।
इत्येतन्मे प्रतिज्ञातं विचरिष्याम्यहं यथा ॥ ४९
एतेन विधिना छन्नः कृतकेन यथा नलः ।
विहरिष्यामि राजेन्द्र विराटस्य पुरे सुखम् ॥५०

युधिष्ठिर उवाच ।
वासुदेवसमो लोके यशसा विक्रमेण च ।
सोयं राज्ये विराटस्य भवने भरतर्षभः ॥ ५१
मेरुः प्रच्छादित इव वसन्वज्रेण मुष्टिना ।
आख्याता षण्डकोसीति प्रतिज्ञातं हि पातकं ५२

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ॥ ४ ॥

युधिष्ठिरंप्रति नकुलेन विराटनगरे अश्वपालकतया स्वस्य निवासकथनम् ॥ २ ॥ सहदेवेन गोपालकतया स्वस्य निवासकथनम् ॥ २ ॥ द्रौपद्या सैरन्ध्रीभावेन स्वस्य निवासकथनम् ॥ ३ ॥

वैशंपायन उवाच ।
इत्येवमुक्त्वा पुरुषप्रवीर-
स्तथार्जुनो धर्मभृतां वरिष्ठः ।
वाक्यं तथासौ विरराम भूयो
नृपोऽपरं भ्रातरमाबभाषे ॥ १
किंकर्मा किंसमाचारो नकुलोयं भविष्यति ।
सुकुमारश्च शूरश्च दर्शनीयः सुखोचितः ॥ २
अदुःखार्हश्च बालश्च लालितश्चापि नित्यशः ।
सोयमार्तश्च शान्तश्च किं नु रोचयतात्विह ॥ ३
किं त्वं नकुल कुर्वाणस्तस्य तात चरिष्यसि ।
कर्म तत्त्वं समाचक्ष्व राज्ये तस्य महीपतेः ॥ ४
नकुल उवाच ।
अश्वाध्यक्षो भविष्यामि विराटस्येति मे मतिः ।
दामग्रन्थीति नाम्नाऽहं कर्मैतत्सुप्रियं मम ॥ ५
दामग्रन्थी परिज्ञातः कुशलो दामकर्मणि ।
न मां परिभविष्यन्ति जना जात्विह कर्हिचित्॥
कुशलोस्म्यश्वशिक्षायां तथैवाश्वचिकित्सने ।
प्रियाश्च सततं मेऽश्वाः कुरुराज यथा तव ॥ ७
न मां परिभविष्यन्ति किशोरा वडवास्तथा ।
न दुष्टाश्च भविष्यन्ति पृष्ठे धुरि च मद्गताः ॥ ८
द्रक्ष्यन्ति ये च मां केचिद्विराटनगरे जनाः ।
तेभ्य एवं प्रवक्ष्यामि विहरिष्याम्यहं यथा ॥ ९
पाण्डवेन ह्यहं तात अश्वेष्वधिकृतः पुरा ।
इति तस्य पुरे छन्नश्चरिष्यामि महीपते ।
इत्येतद्वः प्रतिज्ञातं विहरिष्याम्यहं यथा ॥ १०
वैशंपायन उवाच ।
नकुलेनैवमुक्तस्तु धर्मराजोऽब्रवीद्वचः ।
बृहस्पतिसमो बुद्ध्या नयेनोशनसा समः ॥ ११
मन्त्रैर्नानाविधैर्नीतः पथ्येषु परिनिष्ठितः ।
सुप्रणीतः सुमार्गस्थो राजतन्त्रमवाप यः ॥ १२
न चास्य स्खलितं किंचिद्ददृशुस्तद्विदो जनाः ।
सुनीतिज्ञश्च शूरश्च सर्वमन्त्रविशारदः ॥ १३
अधिको मातुरस्माकं कुन्त्याः प्रियतमः सदा ।
सहदेव कथं कर्म तस्य राज्ञः करिष्यसि ।
किं वा त्वं तात कुर्वाणः प्रच्छन्नो विचरिष्यसि १४
सहदेव उवाच ।
गोसङ्ख्याता भविष्यामि विराटस्येति रोचये ।
प्रतिभोक्ता च दोग्धा च सङ्ख्यानकुशलो गवाम्।
तन्त्रीपालेति मे नाम स्वयं प्रोक्तं भविष्यति॥ १५
अरोगा बहुलाः पुष्टाः क्षीरवत्यो बहुप्रजाः ।
निष्पन्नसत्त्वाः सुभृता ह्यपेतज्वरकिल्बिषाः॥ १६
नष्टचोरभया नित्यं व्याधिव्याघ्रविवर्जिताः ।
गावः सुसहिता राजन्निरुद्विग्ना निरामयाः ॥१७
भविष्यन्ति मया गुप्ता विराटनगरे तदा ।
निपुणत्वं चरिष्यामि प्रीतिरत्र परा हि मे ॥ १८
अहं हि भवता गोषु प्रहितः सततं पुरा ।
तत्र मे कौशलं सर्वमनुबद्धं विशांपते ॥ १९
लक्षणं चरितं चैव गवां यच्चापि मङ्गलम् ।

सत्सर्वं मे सुविदितमन्यच्चापि विशांपते ॥ २०
वृषभानपि जानामि राजन्पूजितलक्षणान् ।
येषां मूत्रमुपाघ्राय अपि वन्ध्या प्रसूयते ॥ २१
सोऽहमेवं चरिष्यामि प्रीतिरत्र परा हि मे ।
विराटनगरे गूढो रंस्येऽहं तेन कर्मणा ॥ २२
तोषयिष्ये च राजानं मा भूच्चिन्ता तवानघ ।
न च मां वेत्स्यति परस्तत्ते रोचतु पार्थिव ।
इत्येतद्वः प्रतिज्ञातं विचरिष्याम्यहं यथा ॥ २३
युधिष्ठिर उवाच ।
केनात्र कर्मणा कृष्णा द्रौपदी विचरिष्यति ।
न हि किंचिद्विजानाति कर्म कर्तुं यथा स्त्रियः २४
माल्यगन्धानलङ्कारान्वस्त्राणि विविधानि च ।
एतान्येवाभिजानाति यथाजाता च भामिनी २५
पतिव्रता महाभागा कथं नु विचरिष्यति ।
इयं तु नः प्रिया भार्या प्राणेभ्योपि गरीयसी ॥ २६
मातेव परिपाल्या च पूज्या ज्येष्ठा स्वसेव च ।
सुकुमारी सुशीला च राजपुत्री यशस्विनी ।
कथं वत्स्यति कल्याणी विराटनगरे सती ॥ २७
द्रौपद्युवाच ।
अहं वत्स्यामि राजेन्द्र निर्वृतो भव पार्थिव ।
यथा ते मत्कृते शोको न भवेन्नृपते शृणु ।
यथा तु मां न जानन्ति यत्करिष्याम्यहं प्रभो ॥२८
छन्ना वत्स्याम्यहं यन्मां न विजानन्ति केचन ।
वृत्तं तच्च समाख्यास्ये शर्म तेस्तु विशांपते ॥२९
सैरन्ध्रीजातिसंपन्ना नाम्नाऽहं व्रतचारिणी ।
भविष्यामि महाराज विराटस्येति मे मतिः ॥ ३०
सैरन्ध्र्यो रक्षिताः स्त्रीणां भुजिष्याः सन्ति भारत ।
एकपत्न्यः स्त्रियश्चैता इति लोकस्य निश्चयः ॥ ३१
साऽहं ब्रुवाणा सैरन्ध्री कुशला केशकर्मणि ।
प्रमदाहरिका लोके पुरुषाणां प्रवासिनाम् ॥ ३२
युधिष्ठिरस्य वै गेहे द्रौपद्याः परिचारिका ।
उषिताऽस्मीति वक्ष्यामि पृष्टा राज्ञा च भारत ।
आत्मगुप्ता चरिष्यामि यन्मां त्वं परिपृच्छसि ॥३३
नाहं तत्र भविष्यामि दुर्भरा राजवेश्मनि ।
कृत्वा चैव सदा रक्षां व्रतेनैव नराधिप ॥ ३४
सुदेष्णां प्रत्युपस्थास्ये राजभार्यां यशस्विनीम् ।
सा रक्षिष्यति मां प्राप्तां मा ते भूद्दुःखमीदृशम् ॥३५
अथ गुप्ता चरिष्यामि युष्माभिस्तत्र तस्थुषी ।
इत्येवं वः प्रतिज्ञातं विहरिष्याम्यहं यथा ॥ ३६
युधिष्ठिर उवाच ।
यथा नो दुर्हृदः पापा भवन्ति सुखिनः पुनः ।
कुर्यास्तथा त्वं कल्याणि लक्षयेयुर्न ते जनाः ॥ ३७
कल्याणं भाषसे कृष्णे यथा कौलेयकी तथा ।
न पापमभिजानासि साध्वी साधुव्रते स्थिता ॥३८

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ॥ ५ ॥

पाण्डवैरिन्द्रसेनादीन्प्रति द्वारकादिगमनचोदना ॥ १ ॥ पाण्डवान्प्रति धौम्येन राजगृहवासप्रकारानुशासनम् ॥ २ ॥

युधिष्ठिर उवाच ।
कर्माण्युक्तानि युष्माभिर्यानि तानि चरिष्यथ ।
मम चापि यथा बुद्धिरुचिता हि विनिश्चयात् १
पुरोहितोऽयमस्माकमग्निहोत्राणि रक्षतु ।
सूतपौरोगवैः सार्धं द्रुपदस्य निवेशने ॥ २
इन्द्रसेनमुखाश्चेमे रथानादाय केवलान् ।
यान्तु द्वारवतीं शीघ्रमिति मे वर्तते मतिः ॥ ३
इमाश्च नार्यो द्रौपद्याः सर्वाश्च परिचारिकाः ।
पाञ्चालानेव गच्छन्तु सूतपौरोगवैः सह ॥ ४
सर्वैरपि च वक्तव्यं न प्राज्ञायन्त पाण्डवाः ।
अर्धरात्रे महात्मानो भिक्षादान्ब्राह्मणानपि ।
गता ह्यस्मानपाहाय सर्वे द्वैतवनादिति ॥ ५

प्रमदाहरिका वियुक्तजनभार्याश्वासनपरा ॥ ३२ ॥

कौलेयकी कुलीना ॥ ३८ ॥ चतुर्थोऽध्यायः ॥ ४ ॥

वैशंपायन उवाच ।
एवं तेऽन्योन्यमामन्त्र्य कर्माण्युक्त्वा पृथक्पृथक् ।
धौम्यमामन्त्रयामासुः स च तान्मन्त्रमब्रवीत् ॥ ६
तानन्वशात्स धर्मात्मा सर्वधर्मविशेषवित् ।
धौम्यः पुरोहितो राजन्पाण्डवान्पुरुषर्षभान् ॥ ७
धौम्य उवाच ।
विदितं वै यथा सर्वं लोके वृत्तमिदं नृप ।
विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः ॥ ८
अतोऽहमभिवक्ष्यामि हेतुमात्रं निबोधत ।
हन्तेमां राजवसतिं राजपुत्रा ब्रवीमि वः ।
यथा राजकुलं प्राप्य चरन्प्रोष्य न रिष्यति ॥ ९
दुर्वासमेव कौरव्य जातेन कुरुवेश्मनि ।
अमानितेन मानार्हं गूढेन परिवत्सरम् ॥ १०
दिष्टद्वारो लभेद्द्रष्टुं राजस्वेषु न विश्वसेत् ।
न चानुशिष्याद्राजानमपृच्छन्तं कदाचन ॥ ११
तूष्णीं त्वेनमुपासीत काले समभिपूजयेत् ॥ १२
असूयन्ति हि राजानो जनाननृतवादिनः ।
तथैव चावमन्यन्ते मन्त्रिणं वादिनं मृषा ॥ १३
विदिते चास्य कुर्वीत कार्याणि सुलघून्यपि ।
एवं विचरतो राज्ञि न क्षतिर्जायते क्वचित् ॥ १४
पाण्डवाग्निरयं लोके सर्वशस्त्रमयो महान् ।
भर्ता गोप्ता च भूतानां राजा पुरुषविग्रहः ॥ १५
सर्वात्मना वर्तमानं यथा दोषो न संस्पृशेत् ।
राजानमुपतिष्ठन्तं तस्य वृत्तं निबोधत ॥ १६
क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ।
नावमन्येत मेधावी कृशानपि कदाचन ॥ १७
एतत्त्रयं च पुरुषं निर्दहेदवमानितम् ।
राजा तस्माद्बुधैर्नित्यं पूजनीयः प्रयत्नतः ॥ १८
नातिवर्तेत मर्यादां पुरुषो राजसंमतः ।
व्यवहारं पुनर्लोके मर्यादां पण्डिता विदुः ॥ १९
न हि पुत्रं न नप्तारं न भ्रातरमरिन्दम ।
समतिक्रान्तमर्यादं पूजयन्ति नराधिपाः ॥ २०
गच्छन्नपि परां भूतिं भूमिपालनियोजितः ।
जात्यन्ध इव मन्येत मर्यादामनुचिन्तयन् ॥ २१
धृष्टो द्वारं सदा पश्यन्न च राजसु विश्वसेत् ।
तदेवासनमन्विच्छेद्यत्र नाभिलषेत्परः ॥ २२
यत्रोपविष्टः संकल्पं नोपहन्याद्बलीयसः ।
तदासनं राजकुले ईप्सेत पुरुषो वसन् ॥ २३
यथैनं यत्र चासीनं शङ्कयेद्दुष्टचारिणम् ।
न तत्रोपविशेज्जातु यो राजवसतिं वसेत् ॥ २४
स्वभूमौ काममासीत तिष्ठेद्वा राजसन्निधौ ।
न त्वेवासनमन्यस्य प्रार्थयेत कदाचन ॥ २५
परासनगतं ह्येनं परस्य परिचारकाः ।
परिषद्यपकर्षेयुः परिहास्येत शत्रुभिः ॥ २६
नित्यं विप्रतिषिद्धं तत्पुरस्तादासनं मतम् ।
अर्थार्थे हि यदा भृत्यो राजानमुपतिष्ठते ॥ २७
दक्षिणं वाऽथ वामं वा भागमाश्रित्य पण्डितः ।
तिष्ठेद्विनीतवद्राजन्न पुरस्तान्न पृष्ठतः ।
रक्षिणामात्तशस्त्राणां पश्चात्स्थानं विधीयते ॥ २८
मातृगोत्रे स्वगोत्रे वा नाम्ना शीलेन वा पुनः ।
संग्रहार्थं मनुष्याणां नित्यमाभाषिता भवेत् ॥ २९
पूज्यमानोपि यो राज्ञा नरो न प्रतिपूजयेत् ।
नैनमाराधयेज्जातु शास्ता शिष्यानिवालसान् ॥ ३०
नास्य युग्यं न पर्यङ्कं नासनं न रथं तथा ।
आरोहेत्संमतोऽस्मीति यो राजवसतिं वसेत् ॥ ३१
यो वै गृहेभ्यः प्रवसन्क्रियमाणमनुस्मरन् ।
उत्थाने नित्यसंकल्पो निस्तन्द्रीः संयतात्मवान् ३२
परीतः क्षुत्पिपासाभ्यां विहाय परिदेवनम् ।
दुःखेन सुखमन्विच्छेद्यो राजवसतिं वसेत् ॥ ३३
अन्येषु प्रेष्यमाणेषु पुरस्ताद्वीर उत्पतेत् ।
करिष्याम्यहमित्येव यः स राजसु सिध्यति ॥ ३४
उष्णे वा यदि वा शीते रात्रौ वा यदि वा दिवा ।
आदिष्टो न विकल्पेत यः स राजसु सिद्ध्यति ॥ ३५
नैव प्राप्तोऽवमन्येत सदाऽमात्यो विशारदः ।
मानं प्राप्तो न हृष्येत न व्यथेच्च विमानितः ।
ऋजुर्मृदुः सत्यवादो यः स राजसु सिद्ध्यति ॥ ३६

पाण्डवाग्निरिति पाण्डवेति छेदः । राजा पुरुषविग्रहोऽग्निरित्यन्वयः ॥ १५ ॥

नैव लाभाद्धर्षमियान्न व्यथेच्च विमानितः ।
समः पूर्णतुलेव स्याद्यो राजवसतिं वसेत् ॥ ३७
अल्पेच्छो धृतिमान्राजञ्छायेवानुगतः सदा ।
दक्षः प्रदक्षिणो धीरः स राजवसतिं वसेत् ॥ ३८
इतिहासपुराणज्ञः कुशलः सत्कथासु च ।
वदान्यः सत्यवाक्चापि यो राजवसतिं वसेत् ॥ ३९
न मिथो भाषितं राज्ञो मनुष्येषु प्रकाशयेत् ।
यं चासूयन्ति राजानः पुरुषं नो वदेच्च तम् ॥ ४०
नैषां कर्मसु संयुक्तो धनं किंचिदुपस्पृशेत् ।
प्राप्नुयादाददानो वा बन्धं वा वधमेव वा ॥ ४१
तुल्योपस्थितयोः पश्य मम चान्यस्य चोभयोः ।
अन्यं पुष्णाति मद्धीनमिति धीरो न मुह्यति ॥ ४२
श्रेयांसं हि परित्यज्य वैद्यं कर्मणिकर्मणि ।
पापीयांसं प्रकुर्वीरञ्शीलमेषां तथाविधम् ॥ ४३
नैषां दारेषु कुर्वीत प्राज्ञो मैत्रीं कथंचन ।
रक्षणं तु न सेवेत यो राजवसतिं वसेत् ॥ ४४
यदा ह्यभिसमीक्षेत प्रेष्यं स्त्रीभिः समागतम् ।
बुद्धिः परिभवेत्तस्य राजा शङ्केत वा पुनः ॥ ४५
शङ्कितस्य पुनः स्त्रीषु कस्य भृत्यस्य भूमिपः ।
जीवितं साधु मन्येत प्रकृतिस्थो बलात्कृतः ॥ ४६
हर्षवस्तुषु चाप्यत्र वर्तमानेषु केषु चित् ।
नातिगाढं प्रहृष्येत तान्येवास्यानुपूजयेत् ॥ ४७
हर्षाद्धि मन्दः पुरुषः स्वैरं कुर्वीत वैकृतम् ।
तदस्यान्तःपुरे वृत्तमीक्षां कुर्वीत भूमिपः ॥ ४८
अन्तःपुरगतं ह्येनं स्त्रियः क्लीबाश्च सर्वतः ।
वर्तमानं यथावच्च कुत्सयेयुरसंशयम् ॥ ४९
तस्माद्गम्भीरमात्मानं कृत्वा हर्षं नियम्य च ।
नित्यमन्तःपुरे राज्ञो न वृत्तं कीर्तयेद्बहिः ॥ ५०
यथा हि सुमहामन्त्रो भिद्यमानो हरेत्सुखम् ।
एवमन्तःपुरे वृत्तं श्रूयमाणं बहिर्भवेत् ॥ ५१
या तु वृत्तिरबाह्यानां बाह्यानामपि केवलम् ।
उभयेषां समस्तानां शृणु राजोपजीविनाम् ॥ ५२
न स्त्रियो जातु मन्येत बाह्ये वाभ्यन्तरेऽपि वा ।
अनुजीविनां नरेन्द्रस्तु सृजेद्धि सुमहद्भयम् ॥ ५३
मत्वाऽस्य प्रियमात्मानं राजरत्नानि राजवत् ।
अराजा राजयोग्यानि नोपयुञ्जीत पण्डितः ॥ ५४
अराजानं हि रत्नानि राजकान्तानि राजवत् ।
भुञ्जानं तं नरं राजा न तितिक्षेत जीवितम् ॥ ५५
तस्माद्व्यक्तभोगेन भोक्तव्यं भूतिमिच्छता ।
तुल्यभोगं हि राजा तु भृत्यं कोपेन योजयेत् ॥ ५६
न चापल्येन संप्रीतिं राज्ञः कुर्वीत केनचित् ।
अधिक्षिप्तमनर्थं च द्वेष्यं च परिवर्जयेत् ॥ ५७
एतां हि सेवमानस्य नरसीमां चतुर्विधाम् ।
द्विधा विच्छिद्यते मूलं राजमूलोपसेविनः ॥ ५८
एतैस्तु विपरीता या नरसीमा नराधमैः ।
तथा कुर्वीत संसर्गं न विरोधं कथंचन ॥ ५९
बन्धुभिश्च नरेन्द्रस्य बलवद्भिश्च मानवैः ।
साधु मन्येत संसर्गं न विरोधं कथंचन ॥ ६०
ताभ्यां तु नरसीमाभ्यां विरुद्धस्याल्पतेजसः ।
प्रथमं छिद्यते मूलं द्वितीयं जायते भयम् ॥ ६१
उद्धतानां च यो वेषः कुहकानां च यो भवेत् ।
राजवेषं च विस्पष्टं सेवमानो न वर्धते ।
इतराभ्यां तु वेषाभ्यां परिहास्येत बान्धवैः ॥ ६२
अपुंभिश्चैव पुंभिश्च स्त्रीभिः स्त्रीदर्शिभिर्नरैः ।
शक्ये सति न संभाषां जातु कुर्वीत कर्हिचित् ॥ ६३
प्रतिसंभाषमाणो हि त्रिभिरेतैरचेतनः ।
श्येनः पेशीमिवादत्ते पुरुषो भूतिमात्मनः ॥ ६४
ये च राज्ञाऽभिसत्कारं लभेरन्कारणादिव ।
तैश्च सामन्तदूतैश्च न संसज्येत कर्हिचित् ॥ ६५
न चान्याचरितां भूमिमसंदिष्टो महीपतेः ।
उपसेवेत मेधावी यो राजवसतिं वसेत् ॥ ६६
न च संदर्शने राज्ञां प्रबन्धमभिसंजपेत् ।
अपि चैतद्दरिद्राणां व्यलीकस्थानमुत्तमम् ॥ ६७
अर्थकामा च या नारी राजानं स्यादुपस्थिता ।
अनुजीवी तथायुक्तां निध्यायन्दुष्यते च सः ॥ ६८
तस्मान्नारीं न निध्यायेत्तथायुक्तां विचक्षणः ।
तथा क्षुतं च वातं च निष्ठीवं चाचरेच्छनैः ॥ ६९
न नर्मसु हसेज्जातु मूढवृत्तिर्हि सा स्मृता ।

प्रथमं छिद्यते निद्रा इति थ. ध. पाठः ॥ ६१ ॥

स्मितं तु मृदुपूर्वेण दर्शयीत प्रसादजम् ॥ ७०
न चाक्षौ न भुजौ जातु न च वाक्यं समाक्षिपेत्।
न च तिर्यगवेक्षेत चक्षुर्भ्यां सम्यगाचरेत् ॥ ७१
भ्रुकुटिं च न कुर्वीत न चाङ्गुष्ठैर्लिखेन्महीम् ।
न च गाढं विजृम्भेत जातु राज्ञः समीपतः ॥७२
न प्रशंसेन्न चामूयेत्प्रियेषु च हितेषु च ।
स्तूयमानेषु वा तत्र दूष्यमानेषु वा पुनः ॥ ७३
अथ संदृश्यमानेषु प्रियेषु च हितेषु च ।
श्रूयमाणेषु वाक्येषु वर्णयेदमृतं यथा ॥ ७४
न राज्ञः प्रतिकूलानि सेवमानः सुखी भवेत् ।
पुत्रो वा यदि वा भ्राता यद्यप्यात्मसमो भवेत् ७५
अप्रमत्तो हि राजानं रञ्जयेच्छीलसंपदा ।
उत्थानेन तु मेधावी शौचेन विविधेन च ॥ ७६
स्नानं हि वस्त्रशुद्धिश्च शारीरं शौचमुच्यते ।
असक्तिः प्राकृतार्थेषु द्वितीयं शौचमुच्यते ॥ ७७
राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्नृपः ।
य एतैः स्तूयते शब्दैः कस्तं नार्चितुमर्हति ॥ ७८
तस्माद्भक्त्या च युक्तः सन्सत्यवादी जितेन्द्रियः
मेधावी धृतिमान्प्राज्ञः संश्रयीत महीपतिम् ॥७९
कृतज्ञं प्राज्ञमक्षुद्रं दृढभक्तिं जितेन्द्रियम् ।
वर्धमानं स्थितं स्थाने संश्रयीत महीपतिम् ॥ ८०
एष वः समुदाचारः समुद्दिष्टो यथाविधि ।
यथार्थान्संप्रपत्स्यन्ते पार्थ राजोपजीविनः ॥ ८१
संवत्सरमिमं तावदेवंशीला बुभूषथः ।
ततः स्वविषयं प्राप्य यथाकामं चरिष्यथ ॥ ८२
वैशंपायन उवाच ।
तं तथेत्यब्रुवन्पार्थाः पितृकल्पं यशस्विनम् ।
प्रहृष्टाश्चाभिवाद्यैनमुपातिष्ठन्परंतपाः ॥ ८३
तेषां प्रतिष्ठमानानां मन्त्रांश्च ब्राह्मणोऽजपत् ।
भवाय राज्यलाभाय वीर्याय विजयाय च ॥ ८४
ततोऽब्रवीदसौ विप्रो वाचमाशीः प्रयुज्य च ।
स्वद्रव्यप्रतिलाभाय शत्रूणां मर्दनाय च ॥ ८५
स्वस्ति वोऽस्तु शिवः पन्था द्रक्ष्यामि पुनरागतान् ।
इत्युक्ता हृष्टमनसो गुरुणा तेन धीमता ।
युधिष्ठिरमुखाः सर्वे गन्तुं समुपचक्रमुः ॥ ८६

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ॥ ६ ॥

पाण्डवैर्धौम्यविसर्जनपूर्वकं विराटनगरसमीपगमनम् ॥ १ ॥

वैशंपायन उवाच ।
तेऽग्निं प्रदक्षिणं कृत्वा ब्राह्मणं च पुरोहितम् ।
अभिवाद्य ततः सर्वे प्रस्थातुमुपचक्रमुः ॥ १
युधिष्ठिर उवाच ।
अनुशिष्टोस्मि भद्रं ते नैतद्वक्ताऽस्ति कश्चन ।
कुन्तीमृते मातरं नः पितरं च यशस्विनम् ॥ २
यदेवानन्तरं कार्यं तद्भवान्वक्तुमर्हति ।
तारणाय तु दुःखस्य प्रस्थानाय भवाय च ॥ ३
वैशंपायन उवाच ।
तेषां प्रतिष्ठमानानां धौम्यो मन्त्रानथाजपत् ।
सर्वविघ्नप्रशमनानर्थसिद्धिकरांस्तथा ।
ततः पावकमुज्वाल्य मन्त्रहव्यपुरस्कृतम् ॥ ४
याज्ञसेनीं पुरस्कृत्य सर्व एव महारथाः ।
प्राद्रवन्सह धौम्येन बद्धशस्त्रा वनाद्वनम् ॥ ५
ते वीरा बद्धनिस्त्रिंशा धनुर्बाणकलापिनः ।
अगच्छन्भीमधन्वानः काम्यकाद्यमुनां नदीम् ॥६
उत्तरेण दशार्णानां पाञ्चालान्दक्षिणेन तु ।
अन्तरेण यकृल्लोम्नः शूरसेनांश्च पाण्डवाः ॥ ७
ते तस्या दक्षिणं तीरमन्वगच्छन्पदातयः ।
ततः प्रत्यक्प्रयातास्ते संक्रामन्तो वनाद्वनम् ॥ ८
वसाना वनदुर्गेषु रमणीयेषु धन्विनः ।
पल्वलेषु च रम्येषु नदीनां संगमेषु च ॥ ९
द्रुमान्नानाविधाकारान्नानाविधलताकुलान् ।
कुसुमाढ्यान्मनःकान्ताञ्शुभगन्धान्मनोरमान् १०

पार्था निरीक्षमाणाश्च तान्द्रुमान्पुष्पशालिनः ।
जिघ्रन्तः पुष्पगन्धांश्च फलगन्धान्मनोरमान् ॥ ११
विध्यन्तो मृगजातानि महेष्वासा महाबलाः ।
उषित्वा द्वादशसमा वने परपुरंजयाः ।
लुब्धान्ब्रुवाणा मात्स्यस्य विषयं प्राविशंस्तदा १२
तत्र धौम्यं महेष्वासाः पाण्डवेया व्यसर्जयन् ।
अग्निहोत्रं परिचरन्सोऽबुद्धोऽवसदाश्रमे ॥ १३
ततस्तेषु प्रयातेषु पाण्डवेषु महात्मसु ।
इन्द्रसेनमुखाश्चैव यथोक्तं प्राप्य निर्वृताः ।
रथानश्वांश्च रक्षन्तः सुखमूषुः सुसंवृताः ॥ १४
ततो जनपदं प्राप्य कृष्णा राजानमब्रवीत् ॥ १५
पश्यैकपद्यो दृश्यन्ते क्षेत्रे गोष्ठं समाश्रिताः ।
वृक्षांश्चोपवनोपेतान्ग्रामाणां नगरस्य च ॥ १६
व्यक्तं दूरे विराटस्य राजधानी भविष्यति ।
वसामेहापरां रात्रिं बलवान्मे परिश्रमः ॥ १७
युधिष्ठिर उवाच ।
इमां कमलपत्राक्षीं द्रौपदीं माद्रिनन्दन ।
मुहूर्तं परिगृह्यैनां बाहुभ्यां नकुल व्रज ॥ १८
ततोऽदूरे विराटस्य नगरं भरतर्षभ ।
राजधान्यां निवत्स्यामः प्रमुक्तमिव नो वनम् १९
नकुल उवाच ।
पूर्वाह्णे मृगयां कृत्वा मया विद्धा मृगा वने ।
अटवी च मया दूरं धृता मृगवधेप्सुना ॥ २०
विषमा ह्यतिदुर्गा च वेगवत्परिधावता ।
सोहं घर्माभितप्तो वै नैनामादातुमुत्सहे ॥ २१
युधिष्ठिर उवाच ।
सहदेव त्वमादाय मुहूर्तं द्रौपदीं नय ।
राजधान्यां निवत्स्यामः सुमुक्तमिव नो वनम् ॥२२
सहदेव उवाच ।
अहमप्यस्मि तृषितः क्षुधया परिपीडितः ।
परिश्रान्तश्च भद्रं ते नैनामादातुमुत्सहे ॥ २३
युधिष्ठिर उवाच ।
एहि वीर विशालाक्ष वीरसिंह इवार्जुन ।
इमां कमलपत्राक्षीं द्रौपदीं द्रुपदात्मजाम् ॥ २४
परिगृह्य मुहूर्तं त्वं बाहुभ्यां कुशलं व्रज ।
राजधान्यां निवत्स्यामः प्रमुक्तमिव नो वनम् २५
वैशंपायन उवाच ।
गुरोर्वचनमाज्ञाय संप्रहृष्टो जितेन्द्रियः ।
बाहुभ्यां परिगृह्याथ राजपुत्रीमनिन्दिताम् ।
प्रवव्राज महाबाहुरर्जुनः प्रियदर्शनाम् ॥ २६
जटिलो वल्कलधरः शरतूणीधनुर्धरः ।
स्कन्धे कृत्वा वरारोहां बालामायतलोचनाम् ।
आनीय नगराभ्याशमवातारयदर्जुनः ॥ २७

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ॥ ७ ॥

पाण्डवैर्वनमध्ये श्मशानसंनिहिते शमीवृक्षे स्वायुधनिक्षेपः ॥ १ ॥ तथा स्वेषां साङ्केतिकनामकल्पनेन विराटनगरपरिसरगमनम् ॥ २ ॥

वैशंपायन उवाच ।
स राजधानीं संप्राप्य पार्थिवोऽर्जुनमब्रवीत् ।
इमानि पुरुषव्याघ्र आयुधानि परंतप ।
कस्मिन्न्यासयितव्यानि गुप्तिश्चैषां कथं भवेत् ॥ १
सायुधा हि वयं तात प्रवेक्ष्यामः पुरं यदि ।
समुद्वेगं जनस्यास्य करिष्यामो न संशयः ॥ २
गाण्डीवं हि नरव्याघ्र त्रिषु लोकेषु विश्रुतम् ।
कथं नाविष्कृताः स्यामो धार्तराष्ट्रस्य मारिष ॥ ३
यदीदं धनुरादाय चरेम सजने पुरे ।
क्षिप्रं नः प्रतिजानीयुर्मनुष्या नात्र संशयः ॥ ४

आत्मनः लुब्धान्मृगयून्ब्रुवाणाः सन्तः प्राविशन्नित्यन्वयः ॥ १२ ॥ षष्ठोऽध्यायः ॥ ६ ॥

एकस्मिन्नपि विज्ञाते समयं नो व्यतीत्य च ।
भूयो द्वादशवर्षाणि प्रविशेम वनं वयम् ॥ ५
तस्मात्सर्वाणि शस्त्राणि प्रच्छाद्यान्यत्र यत्र वा ।
प्रविशेम पुरश्रेष्ठं तथा सम्यक्कृतं भवेत् ॥ ६
वैशंपायन उवाच ।
अजातशत्रोर्वचनं श्रुत्वा चैव महायशाः ।
उवाच धर्मपुत्रं तमर्जुनः परवीरहा ॥ ७
इयं वने मनुष्येन्द्र महती दृश्यते शमी ।
भीमशाखा दुरारोहा श्मशानस्य समीपतः ॥ ८
उत्पथे चापि जातेयं मनुष्यैर्न निषेव्यते ।
विपुलाऽऽकीर्णशाखा च वायसैरुपसेविता ॥ ९
स्नेहानुबद्धां पश्यामि दुरारोहामिमां शमीम् ॥१०
समीपे च श्मशानस्य गृहं नास्य विशेषतः ।
समासज्यायुधान्यस्यां गच्छामो नगरं नृप॥ ११
न चास्यां चारयिष्यन्ति मनुष्याः पार्थ केचन॥
धनुर्भिः पुरुषं कृत्वा चर्मकेशास्थिसंवृतम् ।
उद्बन्धमिव कृत्वा च धनुर्ज्यापाशसंवृतम् ।
अस्यामायुधमासज्य गच्छाम नगरं वयम् ॥ १३
एवं परिहरिष्यन्ति मनुष्या वनचारिणः ।
अत्रैवं नावबुध्यन्ते मनुष्याः केचिदायुधम् ॥१४
वैशंपायन उवाच ।
एवमुक्त्वा स राजानं धर्मात्मानं धनञ्जयः ।
प्रचक्रमे निधानाय शस्त्राणां भरतर्षभ ॥ १५
तानि सर्वाणि संनह्य पञ्च पञ्चाचलोपमाः ।
आयुधानि कलापांश्च निस्त्रिंशानतुलप्रभान् ॥१६
ततो युधिष्ठिरो राजा सहदेवमुवाच ह ।
आरुह्येमां शमीं वीर निधत्स्वेहायुधानि नः ॥१७
इति संदिश्य तं पार्थः पुनरेव धनञ्जयम् ।
अब्रवीदायुधानीह निधातुं भरतर्षभः ॥ १८
वैशंपायन उवाच ।
येन देवान्मनुष्यांश्च पिशाचोरगराक्षसान् ।
निवातकवचांश्चापि पौलोमांश्च परंतपः ।
कालकेयांश्च दुर्धर्षान्सर्वांश्चैकरथोऽजयत् ॥ १९
स्फीताञ्जनपदांश्चान्यानजयत्कुरुनन्दनः ।
तदुदग्रं महाघोरं सपत्नगणसूदनम् ।
अपज्यमकरोत्पार्थो गाण्डीवं च भयंकरम् ॥ २०
येन वीरः कुरुक्षेत्रमभ्यरक्षत्परंतपः ।
जृम्भिते च धनुःश्रेष्ठे न्यासार्थं नृपसत्तमः ॥२१
धर्मपुत्रो महातेजाः सर्वलोकवशंकरम् ।
भुजङ्गभोगसदृशं मणिकाञ्चनभूषितम् ॥ २२
वित्रासनं दानवानां राक्षसानां च नित्यशः ।
धनूरत्नं महातेजा जृम्भयामास पाण्डवः ॥ २३
पाञ्चालान्येन संग्रामे भीमसेनोऽजयत्पुरा ।
प्रत्यषेधद्बहूनेकः सपत्नांश्चापि दिग्जये ॥ २४
निशम्य यस्य विष्फारं विद्रवन्ति रणे परे ।
पर्वतस्येव दीर्णस्य विस्फोटमशनेरिव ॥ २५
सैन्धवं येन राजानं जित्वा क्रुद्धः परामृशत् ।
येन क्रोधवशाञ्जघ्ने पर्वते गन्धमादने ॥ २६
दिव्यं सौगन्धिकं पुष्पं येनाजैषीत्स पाण्डवः ।
त्रिगर्तान्येन संग्रामे जित्वा त्रैगर्तमानयत् ॥ २७
इन्द्राशनिसमस्पर्शं वज्रहाटकभूषितम् ।
ज्यापाशं धनुषस्तस्य भीमसेनोऽवतारयत् ॥ २८
नकुलं पुनराहूय धर्मराजो युधिष्ठिरः ।
उवाच येन संग्रामे सर्वशत्रूञ्जिघांससि ॥ २९
सुराष्ट्राञ्जितवान्येन शार्ङ्गगाण्डीवसन्निभम् ।
सुवर्णविकृतं सारमिन्द्रायुधनिभं वरम् ॥ ३०
तवानुरूपं सुकृतं चापमेतदलङ्कृतम् ।
तद्ध्वंसयित्वा ज्यापाशं निधातुं धनुराहर ॥ ३१
वैशंपायन उवाच ।
अजयत्पश्चिमामाशां धनुषा येन पाण्डवः ।
माद्रीपुत्रो महाबाहुस्ताम्रास्यो मितभाषिता ॥३२
तस्य मौर्वीमपाकर्षच्छूरः संक्रन्दनो युधि ।
कुले नास्ति समो रूपे यस्येति नकुलः स्मृतः३३
सहदेवं च संप्रेक्ष्य पुनर्धर्मसुतोऽब्रवीत् ।
कलिङ्गान्दाक्षिणात्यांश्च मागधांश्चाजिशोभनः३४
येनैव शत्रून्समरे अधाक्षीररिमर्दन ।

गाण्डीवमभयंकरम् इति क. थ. ध. पाठः ॥ २० ॥

सप्तमोऽध्यायः ॥ ७ ॥

तत्स्रंसयित्वा ज्यापाशं निधातुं धनुराहर ॥ ३५
वैशंपायन उवाच ।
दक्षिणां दक्षिणाचारो दिशं येनाजयत्प्रभुः ।
अपज्यमकरोद्वीरः सहदेवस्तदायुधम् ॥ ३६
दीप्तान्खण्डांश्च सुदृढान्सुतीक्ष्णान्कनकत्सरून् ।
विविधान्क्षुरनाराचान्निस्त्रिंशांश्च शरानपि ।
आयुधानि कलापांश्च गदाश्च निदधुः सह ॥ ३७
अथाब्रवीद्धर्मराजः सहदेवं परन्तपः ।
आरुह्येमां शमीं वीर निधत्स्वेहायुधानि नः ॥ ३८
इदं गोमृगमभ्याशे गतसत्वमचेतनम् ।
एतदुत्कृत्य वै वीर धनूंषि परिवेष्टय ॥ ३९
एवमुक्तो महाबाहुः सहदेवो यथोक्तवत् ।
शमीमारुह्य त्वरितो धनूंषि परिवेष्टयत् ॥ ४०
शीतवातातपभयाद्वर्षत्राणाय दुर्जयः ।
तानि वीरो यथा जानन्निराबाधानि सर्वशः ।
पुनः पुनः सुसंवेष्ट्य कृत्वा सुकृतमावरम् ॥ ४१
यत्र चापश्यत स वै तिरोवर्षाणि वर्षति ।
तत्र तानि दृढैः पाशैः सुगाढं पर्यबन्धत ॥ ४२
ततः परमदूरस्थमुञ्छवृत्तिकलेवरम् ।
प्रायोपवेशनाच्छुष्कं स्नायुचर्मास्थिसंयुतम् ॥ ४३
तच्चानीय धनुर्मध्ये निबबन्धुश्च पाण्डवाः ।
उपायकुशलाः सर्वे प्रणदन्तः समब्रुवन् ॥ ४४
अस्य बद्धस्य दौर्गन्ध्यान्मनुष्या वनचारिणः ।
दूरात्परिहरिष्यन्ति सशवेयं शमी इति ॥ ४५
अथाब्रवीन्महाराजो धर्मात्मा स युधिष्ठिरः ।
रज्जुभिः सुकृतं प्राज्ञ विनिर्बध्नीहि पाण्डव ॥ ४६
यानि चात्र विशालानि रूढमूलानि मन्यसे ।
तेषामुपरि बध्नीहि इदं विप्रकलेवरम् ॥ ४७
वैशंपायन उवाच ।
तच्छ्रुत्वा सहदेवस्तु पर्यबध्नत तच्छवम् ॥ ४८
युधिष्ठिरः शुचिर्भूत्वा मनसाऽभिप्रणम्य च ।
ब्रह्माणमिन्द्रं वरदं कुबेरं वरुणानिलौ ॥ ४९
रुद्रं यमं च विष्णुं च सोमार्कौ धर्ममेव च ।
पृथिवीमन्तरिक्षं च दिशश्चोपदिशस्तथा ।
वसूंश्च मरुतश्चैव ज्वलनं चातितेजसम् ॥ ५०
दिवाचरा रात्रिचराणि वाऽपि
यानीह भूतान्यनुकीर्तितानि ।
तेभ्यो नमस्कृत्य च सुव्रतेभ्यः
प्रणम्य तेषां शरणं गतोऽहम् ॥ ५१
सर्वायुधानीह महाबलानि
न्यासं महादेवसमीपतो वै ।
न्यस्याम्यहं वायुसमीपतश्च
वनस्पतीनां च सपर्वतानाम् ॥ ५२
एष न्यासो मया दत्तः सोमसूर्यानिलान्तिके ।
मम पार्थस्य वा देयं पूर्णे वर्षे त्रयोदशे ॥ ५३
नेदं भीमे प्रदातव्यमयं क्रुद्धो वृकोदरः ।
आमर्षान्नित्यसंक्रुद्धो धृतराष्ट्रसुतान्प्रति ।
अपूर्णकाले प्रहरेत्क्रोधसंजातमत्सरः ॥ ५४
पुनः प्रवेशो नः स्यात्तु वनवासाय सर्वदा ।
समये परिपूर्णे तु धार्तराष्ट्रान्निहन्महे ॥ ५५
एष चार्थश्च धर्मश्च कामः कीर्तिरलं यशः ।
मदायत्तमिदं सर्वं जीवितं च न संशयः ॥ ५६
वैशंपायन उवाच ।
दैवतेभ्यो नमस्कृत्य शमीं कृत्वा प्रदक्षिणम् ।
नगरं गन्तुमायाताः सर्वे ते भ्रातरः सह ॥ ५७
आगोपालाविपालेभ्यः कर्षकेभ्यः परंतप ।
आजग्मुर्नगराभ्याशं दर्शयन्तः पुनःपुनः ॥ ५८
अशीतिशतवर्षेयं माताऽस्माकमिहान्तिके ।
बहुकालपरीणामा मृत्योस्तु वशमेयुषी ।
न चाग्निसंस्कारमियं प्रापिता कुलधर्मतः ॥ ५९
यः समासाद्यते कश्चित्तस्मिन्देशे यदृच्छया ।
तमेवमूचुर्धर्मज्ञाः कुलधर्मो न ईदृशः ॥ ६०
विश्रावयन्तस्ते हृष्टा दिशः सर्वा व्यनादयन् ।
स्वर्गतेयमिहास्माकं जननी शोकविह्वला ॥ ६१
वने विचरमाणानां लुब्धानां वनचारिणाम् ।
कुलधर्मोऽयमस्माकं पूर्वैराचरितः पुरा ॥ ६२
एवं ते सुकृतं कृत्वा समन्तादवघुष्य च ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रावुभावपि ॥ ६३

युधिष्ठिरश्च कृष्णा च राजपत्नी सुमध्यमा ।
ततो यथासमाज्ञप्तं नगरं प्राविशंस्तदा ॥ ६४
मत्स्यराज्ञो विराटस्य समीपं वस्तुमञ्जसा ।
अज्ञातचर्या चरितुं वर्षं राष्ट्रे त्रयोदशम् ॥ ६५
अतश्छन्नानि नामानि चकारैषां युधिष्ठिरः ।
जयो जयेशो विजयो जयत्सेनो जयद्बलः ।
आपत्सु नामभिस्त्वेतैः समाह्वामः परस्परम् ६६
ततो यथाप्रतिज्ञाभिः प्राविशन्नगरं महत् ।
अज्ञातचर्यां वत्स्यन्तो राष्ट्रे वर्षं त्रयोदशम् ॥६७

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ॥ ८ ॥

विराटनगरं गच्छता युधिष्ठिरेण दुर्गायाः स्तवनम् ॥ १ ॥

[वैशंपायन* उवाच ।
विराटनगरं रम्यं गच्छमानो युधिष्ठिरः ।
अस्तुवन्मनसा देवीं दुर्गां त्रिभुवनेश्वरीम् ॥ १
यशोदागर्भसंभूतां नारायणवरप्रियाम् ।
नन्दगोपकुले जातां मङ्गल्यां कुलवर्धनीम् ॥ २
कंसविद्रावणकरीमसुराणां क्षयंकरीम् ।
शिलातटविनिक्षिप्तामाकाशं प्रति गामिनीम् ॥ ३
वासुदेवस्य भगिनीं दिव्यमाल्यविभूषिताम् ।
दिव्याम्बरधरां देवीं खड्गखेटकधारिणीम् ॥ ४
भारावतरणे पुण्ये ये स्मरन्ति सदा शिवाम् ।
तान्वै तारयते पापात्पङ्के गामिव दुर्बलाम् ॥ ५
स्तोतुं प्रचक्रमे भूयो विविधैः स्तोत्रसंभवैः ।
आमन्त्र्य दर्शनाकाङ्क्षी राजा देवीं सहानुजः ॥ ६
नमोस्तु वरदे कृष्णे कुमारि ब्रह्मचारिणि ।
बालार्कसदृशाकारे पूर्णचन्द्रनिभानने ॥ ७
चतुर्भुजे चतुर्वक्त्रे पीनश्रोणिपयोधरे ।
मयूरपिच्छवलये केयूराङ्गदधारिणि ॥ ८
भासि देवि यथा पद्मा नारायणपरिग्रहः ।
स्वरूपं ब्रह्मचर्यं च विशदं तव खेचरि ॥ ९
कृष्णच्छविसमा कृष्णा संकर्षणसमानना ।
बिभ्रती विपुलौ बाहू शक्रध्वजसमुच्छ्रयौ ॥ १०
पात्री च पङ्कजी घण्टी स्त्री विशुद्धा च या भुवि ।
पाशं धनुर्महाचक्रं विविधान्यायुधानि च ॥ ११
कुण्डलाभ्यां सुपूर्णाभ्यां कर्णाभ्यां च विभूषिता ।
चन्द्रविस्पर्धिना देवि मुखेन त्वं विराजसे ॥ १२
मुकुटेन विचित्रेण केशबन्धेन शोभिना ।
भुजङ्गाभोगवासेन श्रोणिसूत्रेण राजता ॥ १३
विभ्राजसे चाऽऽबद्धेन भोगेनेवेह मन्दरः ।
ध्वजेन शिखिपिच्छानामुच्छ्रितेन विराजसे ॥ १४
कौमारं व्रतमास्थाय त्रिदिवं पावितं त्वया ।
तेन त्वं स्तूयसे देवि त्रिदशैः पूज्यसेऽपि च ॥ १५
त्रैलोक्यरक्षणार्थाय महिषासुरनाशिनि ।
प्रसन्ना मे सुरश्रेष्ठे दयां कुरु शिवा भव ॥ १६
जया त्वं विजया चैव संग्रामे च जयप्रदा ।
ममापि विजयं देहि वरदा त्वं च सांप्रतम् ॥ १७
विन्ध्ये चैव नगश्रेष्ठे तव स्थानं हि शाश्वतम् ।
कालि कालि महाकालि शीधुमांसपशुप्रिये ॥ १८
कृतानुयात्रा भूतैस्त्वं वरदा कामचारिणी ।
भारावतारे ये च त्वां संसरिष्यन्ति मानवाः ॥ १९
प्रणमन्ति च ये त्वां हि प्रभाते तु नरा भुवि ।

शिलातटे कंसेनैव विनिक्षिप्ता सती आकाशं गता ताम् ॥ ३ ॥ स्तोत्रार्थमेव संभव उद्भवो येषां नाम्नां वरदे इत्यादीनां तैः । आमन्त्र्य संबोध्य ॥ ६ ॥ पद्मा लक्ष्मीः अतएव नारायणपरिग्रहो विष्णुकान्ता ॥ ९ ॥ कृष्णच्छविर्नीलमेघस्तेन समा अतएव कृष्णा । अष्टभुजामाह बिभ्रतीति । विपुलौ वराभयप्रदत्वेन ऊर्जितौ द्वौ बाहू ॥ १० ॥ तत एकः पात्री पात्रवान्पङ्कजी पङ्कजवान् घण्टी घण्टावान् पञ्चमः पाशं धनुर्महाचक्रं च बिभ्रतीति पूर्वेणान्वयः ॥ ११ ॥

* अयमध्यायो दाक्षिणात्यकोशेषु नोपलभ्यते झ. पुस्तकएव दृश्यते ।

न तेषां दुर्लभं किंचित्पुत्रतो धनतोपि वा ॥ २०
दुर्गात्तारयसे दुर्गे तत्त्वं दुर्गा स्मृता जनैः ।
कान्तारेष्ववसन्नानां मग्नानां च महार्णवे ।
दस्युभिर्वा निरुद्धानां त्वं गतिः परमा नृणाम् २१
जलप्रतरणे चैव कान्तारेष्वटवीषु च ।
ये स्मरन्ति महादेवि न च सीदन्ति ते नराः ॥२२
त्वं कीर्तिः श्रीर्धृतिः सिद्धिर्ह्रीर्विद्या संततिर्मतिः ।
संध्या रात्रिः प्रभा निद्रा ज्योत्स्ना कांतिःक्षमा दया
नृणां च बन्धनं मोहं पुत्रनाशं धनक्षयम् ।
व्याधिं मृत्युं भयं चैव पूजिता नाशयिष्यसि ॥२४
सोहं राज्यात्परिभ्रष्टः शरणं त्वां प्रपन्नवान् ।
प्रणतश्च यथा मूर्ध्ना तव देवि सुरेश्वरि ॥ २५
त्राहि मां पद्मपत्राक्षि सत्ये सत्या भवस्व नः ।
शरणं भव मे दुर्गे शरण्ये भक्तवत्सले ॥ २६
एवं स्तुता हि सा देवी दर्शयामास पाण्डवम् ।
उपगम्य तु राजानमिदं वचनमब्रवीत् ॥ २७
देव्युवाच ।
शृणु राजन्महाबाहो मदीयं वचनं प्रभो ।
भविष्यत्यचिरादेव संग्रामे विजयस्तव ॥ २८
मम प्रसादान्निर्जित्य हत्वा कौरववाहिनीम् ।
राज्यं निष्कण्टकं कृत्वा भोक्ष्यसे मेदिनीं पुनः २९
भ्रातृभिः सहितो राजन्प्रीतिं प्राप्स्यसि पुष्कलाम् ।
मत्प्रसादाच्च ते सौख्यमारोग्यं च भविष्यति ॥३०
ये च संकीर्तयिष्यन्ति लोके विगतकल्मषाः ।
तेषां तुष्टा प्रदास्यामि राज्यमायुर्वपुः सुतम् ॥ ३१
प्रवासे नगरे वाऽपि संग्रामे शत्रुसंकटे ।
अटव्यां दुर्गकान्तारे सागरे गहने गिरौ ॥ ३२
ये स्मरिष्यन्ति मां राजन्यथाऽहं भवता स्मृता ।
न तेषां दुर्लभं किंचिदस्मिँल्लोके भविष्यति ॥ ३३
इदं स्तोत्रवरं भक्त्या शृणुयाद्वा पठेत वा ।
तस्य सर्वाणि कार्याणि सिद्धिं यास्यन्ति पाण्डवाः ॥
मत्प्रसादाच्च वः सर्वान्विराटनगरे स्थितान् ।
न प्रज्ञास्यन्ति कुरवो नरा वा तन्निवासिनः ॥३५
इत्युक्त्वा वरदा देवी युधिष्ठिरमरिंदमम् ।
रक्षां कृत्वा च पाण्डूनां तत्रैवान्तरधीयत ॥] ३६

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ॥ ९ ॥

युधिष्ठिरेण यतिवेषपरिग्रहेण विराटसभाप्रवेशः ॥ १ ॥ प्रत्युत्थानादिना सत्कृतेन युधिष्ठिरेण विराटभवने निवासः ॥२॥

वैशंपायन उवाच ।

ततस्तु ते पुण्यजलां शिवां शुभां
महर्षिगन्धर्वनिषेवितोदकाम् ।
त्रिलोककान्तामवतीर्य जाह्नवी-
मृषींश्च देवांश्च पितॄनतर्पयन् ॥ १
वरप्रदानं ह्यनुचिन्त्य पार्थिवो
हुत्वाऽग्निहोत्रं कृतजप्यमङ्गलः ।
दिशं तथैन्द्रीमभितः प्रपेदिवा-
न्कृताञ्जलिर्धर्ममुपाह्वयच्छनैः ॥ २

युधिष्ठिर उवाच ।

वरप्रदानं मम दत्तवान्पिता
प्रसन्नचेता वरदः प्रजापतिः ।
जलार्थिनो मे तृषितस्य सोदरा
मया प्रयुक्ता विविशुर्जलाशयम् ॥ ३
निपातिता यक्षवरेण ते वने
महाहवे वज्रभृतेव दानवाः ।
मया च गत्वा वरदो हि तोषितो
विवक्षता प्रश्नसमुच्चयं गुरुः ॥ ४

जलप्रतरणे जलप्रतरणकाले कान्तारे दुर्गममार्गे ॥ २२ ॥ निष्कण्टकं शत्रुशून्यम् ॥ २९ ॥ संकीर्तयिष्यन्ति इदं स्तोत्र-मिति शेषः ॥ ३१ ॥ अष्टमोऽध्यायः ॥ ८ ॥

स मे प्रसन्नो भगवान्वरं ददौ
परिष्वजंश्चाह तथैव सौहृदात् ।
वृणीष्व यद्वाञ्छसि पाण्डुनन्दन
स्थितोऽन्तरिक्षे वरदोऽसि पश्य माम् ॥ ५
स वै मयोक्तो वरदः पिता प्रभुः
सदैव मे धर्मरता मतिर्भवेत् ।
इमे च जीवन्तु ममानुजाः प्रभो
वयं स्वरूपं च जयं तथाऽऽप्नुमः ॥ ६
क्षमा च कीर्तिश्च यथेप्सितं भवे-
द्व्रतं तु सत्यं च समाप्तिरेव च ।
वरो ममैषोस्तु यथाऽनुकीर्तितो
न तन्मृषा देववृषो यथाऽब्रवीत् ॥ ७
वैशंपायन उवाच ।
इत्येवमुक्त्वा धर्मात्मा धर्ममेवानुचिन्तयन् ।
तदैव तत्प्रसादेन रूपमेवाभवत्स्वयम् ॥ ८
स वै द्विजातिस्तरुणस्त्रिदण्डभृ-
त्कमण्डलूष्णीषधरो व्यजायत ।
सुरक्तमाञ्जिष्ठवराम्बरः शिखी
पवित्रपाणिर्ददृशे तदाऽद्भुतम् ॥ ९
तथैव तेषामपि धर्मचारिणां
यथोचितार्हाभरणाम्बरस्रजः ।
क्षणेन राजन्नभवन्महात्मनां
प्रशस्तधर्माग्र्यफलाभिकाङ्क्षिणाम् ॥ १०
नवेन रूपेण विशांपतिर्युत-
स्त्वथर्वरूपेण बभौ प्रतापवान् ।
निबद्धवैडूर्यसितान्सकाञ्चना-
न्नृपस्तथाऽक्षान्परिवेष्ट्य वाससः ॥ ११
ततो विराटं प्रथमं युधिष्ठिरो
ददर्श दूरात्सुसमृद्धतेजसम् ।
अनन्ततेजोज्वलितं हुताशनं
दुरासदं तीक्ष्णविषं यथोरगम् ॥ १२
सभासदं प्राञ्जलिभिर्जनैर्वृतं
विचित्रनानाविधशस्त्रपाणिभिः ।
उपायनौघैः प्रविशद्भिराचितं
द्विजैश्च शिक्षाक्षरमन्त्रधारिभिः ॥ १३
गजैरुदीर्णैं तुरगैश्च सङ्कुलं
मृगद्विपैः कुञ्जगणैः समावृतम् ।
सितोच्छ्रितोष्णीषनिरुद्धमूर्धजं
विचित्रवैडूर्यविकारकुण्डलम् ।
विराटमायाच्च युधिष्ठिरस्तदा
बृहस्पतिः शक्रमिव त्रिविष्टपे ॥ १४
तमाव्रजन्तं प्रसमीक्ष्य पाण्डवं
विराटराजो मुदितेन चक्षुषा ।
पप्रच्छ चैनं स नराधिपो मुहु-
र्द्विजाश्च ये चास्य सभासदस्तदा ॥ १५
विराट उवाच ।
को वा विजानाति पुराऽस्य दर्शनं
युवा सभां योऽयमुपैति मामिकाम् ।
रूपेण सारेण विराजयन्महीं
श्रिया ह्ययं वैश्रवणो द्विजो यथा ॥ १६
मृगेन्द्रराड्वारणयूथपोपमः
प्रभात्ययं काञ्चनपर्वतो यथा ।
विराजते पावकसूर्यसन्निभं
सचन्द्रनक्षत्र इवांशुमान्ग्रहः ॥ १७
न दृश्यतेऽस्यानुचरो न कुञ्जरो
न चोष्णरश्म्यावरणं समुच्छ्रितम् ।
न कुण्डलं नाङ्गदमस्य न स्रजो
विचित्रिताङ्गश्च रथश्चतुर्युजः ॥ १८
क्षात्रं च रूपं हि बिभर्त्ययं भृशं
गजेन्द्रशार्दूलमहर्षभोपमः ।
अभ्यागतोऽस्माननलंकृतोपि सन्
विरोचते भानुरिवाचिरोदितः ॥ १९
विभात्ययं क्षत्रिय एव सर्वथा
विराट इत्येवमुवाच तं प्रति ।
ससागरान्तामयमद्य मेदिनीं
प्रशासितुं चार्हति वासवोपमः ॥ २०
नाक्षत्रियो नूनमयं भविष्यति
मूर्धाभिषिक्तः प्रतिभाति मां प्रति ।

वयश्च रूपं च बलं तथाऽऽप्नुयुरिति थ. ध. पाठः ॥ ६ ॥

तुल्यं हि रूपं प्रतिदृश्यतेऽस्य
गजस्य सिंहस्य तथर्षभस्य ॥ २१
यमेष कामं परिमार्गते द्विजः
स चास्य सर्वः क्रियतामसंशयम् ।
प्रियं च मे दर्शनमीदृशे जने
द्विजेषु मुख्येषु तथाऽतिथिष्वपि ॥ २२
धनेषु रत्नेष्वथ गोषु वेश्मसु
प्रकामतो मे विचरत्ववारितः ॥ २३
वैशंपायन उवाच ।
एवं ब्रुवाणस्तमनन्ततेजसं
विराजमानं सहसोत्थितो नृपः ।
अन्येन रूपेण समीपमागतं
त्रिदण्डकुण्ड्यङ्कुशशिक्यपाणिनम् ॥ २४
समुत्थिता सा हि सभा सपार्थिवा
सविप्रराजन्यविशा सशूद्रका ।
सभागतं प्रेक्ष्य तपन्तमर्चिषां
विनिःसृतं राहुमुखाद्यथा रविम् ॥ २५
स तेन पूर्वं जयतां भवानिह
द्विजातिनोक्तोऽभिमुखः कृताञ्जलिः ।
जयं जयार्हेण समेत्य वर्धितो
विराटराजो ह्यभिवादयच्च तम् ॥ २६
तमब्रवीत्प्राञ्जलिरेष पार्थिवो
विराटराजो मधुराक्षरं वचः ।
प्राप्तः कुतस्त्वं भगवन्किमिच्छसि
क्व यास्यसे किं करवाणि ते द्विज ॥ २७
श्रुतं च शीलं च कुलं च शंस मे
गोत्रं तथा नाम च देशमेव ते ।
सत्यप्रतिज्ञा हि भवन्ति साधवो
विशेषतः प्रव्रजिता द्विजातयः ॥ २८
यथाऽनुरूपं प्रचरामि ते त्वहं
न चावमन्ता न तवाभिभाषितम् ।
अपूजिता ह्यग्निसमा द्विजातयः
कुलं दहेयुः सविषा इवोरगाः ॥ २९
सर्वां च भूमिं तव दातुमुत्सहे
सदण्डकोशां विसृजामि ते पुरम् ।
कस्यासि राज्ञो विषयादिहागतः
किं कर्म चात्राचरसि द्विजोत्तम ॥ ३०
वैशंपायन उवाच ।
एवं ब्रुवाणं तमुवाच पार्थिवं
युधिष्ठिरो धर्ममवेक्ष्य चासकृत् ।
सत्यं वचः को न्विह वक्तुमुत्सहे-
द्यथाप्रतिज्ञं तु शृणुष्व पार्थिव ॥ ३१
श्रुतं च शीलं च कुलं च कर्म च
शृणुष्व मे जन्म च देशमेव च ।
गुरूपदेशान्नियमाच्च मे व्रतं
कुलक्रमार्थं पितृभिर्नियोजितम् ॥ ३२
द्विजो व्रतेनास्मि न च स्वतः प्रभो
संमुण्डितः प्रव्रजितस्त्रिदण्डभृत् ।
इदं शरीरं मम पश्य मानुषं
समावृतं पञ्चभिरेव धातुभिः ॥ ३३
ममेह पञ्चेन्द्रियगात्रदर्शिनो
वदन्ति पञ्चैव पितॄन्यथा श्रुतिः ।
मनुष्यजातित्वमचिन्तयन्नहं
न चास्मि तुल्यः पितृभिः स्वभावतः॥३४
कङ्को हि नाम्ना विषयं तवागतो
व्रती द्विजातिः स्वकृतेन कर्मणा ।
द्यूतप्रसङ्गादधनोऽस्मि राज-
न्सत्यप्रतिज्ञा व्रतिनश्चरामः ॥ ३५
युधिष्ठिरस्यापि सखाऽभवं पुरा
गृहप्रवेशी च शरीरमेव च ।
गृहे च तस्योषितवानहं सुखं
राजाऽस्मि तस्य स्वपुरेऽभवं पुरा ॥ ३६
ममाज्ञया तत्र विचेरुरङ्गना
मम प्रियार्थं दमयन्ति वाजिनः ।
मया कृतं तस्य पुरे तु यत्पुरा
न तत्कदाचित्कृतवाञ्जनोऽन्यथा ॥ ३७

नवमोऽध्यायः ॥ ९ ॥

अन्येन रूपेण यतिवेषेण आगतं दृष्ट्वेति शेषः ॥ २४ ॥

सोहं पुरा तस्य वयस्समः सखा
चरामि सर्वां वसुधां सुदुःखितः ।
न तु प्रशान्तिं क्वचिदाप्तवानहं
व्रतोपदेशान्नियमेन भारिकः ॥ ३८
वैयाघ्रपद्योस्मि नरेन्द्र गोत्रत-
स्तदेव सौख्यं मृगयामहे वयम् ।
कृतज्ञभावेन मयाऽनुकीर्तितं
युधिष्ठिरस्यात्मसमस्य चेष्टितम् ॥ ३९
इमं हि मोक्षाश्रममास्थितस्य मे
युधिष्ठिरस्तुल्यगुणो भवानपि ।
न मेऽस्ति माता न पिता न बान्धवा
न मेऽस्ति रूपं न रतिर्न सन्ततिः ॥ ४०
सुखं च दुःखं च हि तुल्यमद्य मे
प्रियाप्रिये तुल्यगते गतागते ।
मुक्तोस्मि कामाच्च धनाच्च सांप्रतं
त्वदाश्रये वस्तुमिहाभ्युपागतः ॥ ४१
संवत्सरेणेह समाप्यते त्विदं
मम व्रतं दुष्करकर्मकारिणः ।
ततो भवन्तं परितोष्य कर्मभिः
पुनर्व्रजिष्ये च कुतूहलं यतः ॥ ४२
अक्षान्निवप्तुं कुशलोस्म्यहं सदा
पराजितः शकुनिरुतानि चिन्तयन् ।
मृगद्विजानां च रुतानि चिन्तय-
न्निराश्रयः प्रव्रजितोस्मि भिक्षुकः ॥ ४३

वैशंपायन उवाच ।

तेनैवमुक्ते वचने नराधिपः
कृताञ्जलिः प्रव्रजितं विलोक्य च ।
अथाब्रवीद्धृष्टमनाः शुभाक्षरं
मनोनुगं सर्वसभागतं वचः ॥ ४४
ददामि ते हन्त वरं यदीप्सितं
प्रशाधि मत्स्यान्यदि मन्यते भवान् ।
प्रिया हि धूर्ता मम चाक्षकोविदा-
स्त्वं चापि देवो मम राज्यमर्हसि ॥ ४५
समानयानासनवस्त्रभोजनं
प्रभूतमाल्याभरणानुलेपनम् ।
स सार्वभौमोपम सर्वदाऽर्हसि
प्रियं हि मन्ये तव नित्यदर्शनम् ॥ ४६
ये त्वाऽभिधावेयुरनर्थपीडिता
द्विजातिमुख्या यदि वेतरे जनाः ।
सर्वाणि कार्याण्यहमर्थितस्त्वया
तेषां करिष्यामि न मेऽत्र संशयः ॥ ४७
ममान्तिके यश्च तवाप्रियं चरे-
त्प्रवासये तं परिचिन्त्य मानवम् ।
यच्चापि किंचिद्वसु विद्यते मम
प्रभुर्भवांस्तस्य वशी वसेह च ॥ ४८

युधिष्ठिर उवाच ।

अतोऽभिलाषः परमो न विद्यते
न मे जितं किंचन धारये धनम् ।
न भोजनं किंचन संस्पृशेयं
हविष्यभोजी निशि च क्षितीशयः ॥४९
व्रतोपदेशात्समयो हि नैष्ठिको
न क्रोधितव्यं नरदेव कस्यचित् ।
एवंप्रतिज्ञस्य ममेह भूपते
निवासबुद्धिर्भविता तु नान्यथा ॥ ५०
एवं वरं मात्स्य वृणे प्रदापितं
कृती भविष्यामि वरेण तेऽनघ ॥ ५१

वैशंपायन उवाच ।

एवं तु राज्ञः प्रथमः समागमो
बभूव मात्स्यस्य युधिष्ठिरस्य च ।
विराटराजस्य हि तेन सङ्गमो
बभूव विष्णोरिव वज्रपाणिना ॥ ५२
तमासनस्थं प्रियरूपदर्शनं
निरीक्षमाणो न ततर्प भूमिपः ।
सभां च तां प्रज्वलयन्युधिष्ठिरः
श्रिया यथा शक्रइव त्रिविष्टपम् ॥ ५३

एवं स लब्ध्वा नृपतिः समागमं
विराटराजेन नरर्षभस्तदा ।
उवास वीरः परमार्चितः सुखी
न चास्य कश्चिच्चरितं बुबोध तत् ॥ ५४

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ॥ १० ॥

भीमेन सूदवेषपरिग्रहेण विराटसभाप्रवेशः ॥ १ ॥ विराटेन भीमस्य पाकाधिकारे नियोजनम् ॥ २ ॥

वैशंपायन उवाच ।
अथापरस्यां दिशि भीमदर्शनो
वृकोदरोऽदृश्यत सिंहविक्रमः ।
असिप्रवेके प्रतिमुच्य शाणिते
खजां च दर्वीं च करेण धारयन् ॥ १
त्वचं च गोचर्ममयीं सुमर्दितां
समुक्षितां पानकरागषाडवैः ।
किलासमालम्ब्य करेण चायसं
सशृङ्गिबेरार्द्रकभूस्तृणाङ्कुरम् ॥ २
गम्भीररूपः परमेण तेजसा
रविर्यथा लोकमिमं प्रकाशयन् ।
स कृष्णवासा गिरिराजसारवान्
स मत्स्यराजं समुपेत्य तस्थिवान् ॥ ३
सभागतो वारणयूथपोपम-
स्तमिस्रहा रात्रिमिवावभासयन् ।
सहस्रनेत्रावरजान्तकोपम-
स्त्रिलोकपालाधिपतिर्यथा हरिः ॥ ४
तमाव्रजन्तं गजयूथपोपमं
निरीक्षमाणो नवसूर्यवर्चसम् ।
भयात्समुद्विग्नविषण्णचेतनो
दिशश्च सर्वाः प्रसमीक्ष्य चासकृत् ॥ ५
तमेकवस्त्रं परसैन्यवारणं
सभाऽविदूरान्नृपतिर्नृपात्मजम् ।
समीक्ष्य वैक्लव्यमुपेयिवाञ्शनै-
र्जनाश्च भीताः परिसर्पिरे भृशम् ॥ ६
अथाब्रवीन्मात्स्यपतिः सभागतान्
भृशातुरोष्णं परिनिश्वसन्निव ।
कोऽयं युवा वारणराजसन्निभः
सभामभिप्रैति हि मामिकामिमाम् ॥ ७
को वा विजानाति पुराऽस्य दर्शनं
मृगेन्द्रशार्दूलगतिं हि मामकः ।
व्यूढान्तरांसो मृगराडिवोत्कटो
य एष दिव्यः पुरुषः प्रकाशते ॥ ८
राजश्रिया ह्येष विभाति राजव-
द्विरोचते रुक्मगिरिप्रभोपमः ।
नाक्षत्रियो नूनमयं भविष्यति
सहस्रनेत्रप्रतिमस्तथा ह्यसौ ॥ ९
रूपेण यश्चाप्रतिमो ह्ययं महा-
न्महीमिमां शक्र इवाभिपालयेत् ।
नाभूमिपोऽयं हि मतिर्ममेति च
च्युतः समृद्ध्या नभसीव नाहुषः ॥ १०
वैशंपायन उवाच ।
वितर्कमाणस्य च तस्य पाण्डवः
सभामतिक्रम्य वृकोदरोऽब्रवीत् ।
जयेति राजानमभिप्रमोदय-
न्सुखेन सभ्यं च सभागतं जनम् ॥ ११
ततो नृपं वाक्यमुवाच पाण्डवो
यथाऽनुपूर्व्यात्क्रमयान्वितोत्तरम् ।
त्वां जीवितुं शत्रुहन्नागतोऽहं
त्वमेव लोके परमो हि संश्रयः ॥ १२
नरेन्द्र शूद्रोस्मि चतुर्थवर्णभा-
ग्गुरूपदेशात्परिचारकर्मकृत् ।
जानामि सूपांश्च रसांश्च संस्कृता-
न्मांसान्यपूपांश्च पचामि शोभनान् ।

राजोपचारांश्च बहूनिति ध. पाठः ॥ १३ ॥

रागप्रकाराश्च बहून्फलाश्रया-
न्महानसे मे न समोस्ति सूपकृत् ॥ १३

वैशंपायन उवाच ।

तमब्रवीन्मत्स्यपतिः प्रहृष्टव-
त्प्रियं प्रगल्भं मधुरं विनीतवत् ।
न शूद्रतां कांचन लक्षयामि ते
कुबेरचन्द्रेन्द्रदिवाकरप्रभ ॥ १४
हुताशनाशीविषतुल्यतेजसो
न कर्म ते योग्यमिदं महानसे ।
न सूपकारो भवितुं त्वमर्हसि
सुपर्णगन्धर्वमहोरगोपम ॥ १५
अनीककर्णाग्रधरो ध्वजी रथी
भवाद्य मे वारणवाहिनीपतिः ।
न नीचकर्मा भवितुं त्वमर्हसि
प्रशासितुं भूमिमिमां त्वमर्हसि ॥ १६

भीम उवाच ।

चतुर्थवर्णोस्म्यहमुग्रशासन
न वै वृणे त्वामहमीदृशं पदम् ।
जात्याऽस्मि शूद्रो बललेति नाम्ना
जिजीविषुस्त्वद्विषयं समागतः ॥ १७
युधिष्ठिरस्यास्मि महानसे पुरा
बभूव सर्वप्रभुरन्नपानदः ।
अथापि मामुत्सृजसे महीपते
व्रजाम्यहं यावदितो यथागतम् ॥ १८
त्वमन्नसंस्कारविधौ प्रशाधि मां
भवामि तेऽहं नरदेव सूपकृत् ।
बलेन तुल्यश्च न विद्यते मया
नियुद्धशीलोस्मि सदा हि पार्थिव ॥ १९
गजांश्च सिंहांश्च समेयिवानहं
सदा करिष्यामि तवानघ प्रियम् ।
न नीचकर्मा तव मादृशः प्रभो
बलस्य नेताऽप्यबलो भवेदिति ॥ २०
स्वकर्मतुष्टाश्च वयं नराधिप
प्रशाधि मां सूदपदे यदीच्छसि ।
ये सन्ति मल्ला बलवीर्यसंमता-
स्तानेव योत्स्यामि तवाभिहर्षयन् ॥ २१

वैशंपायन उवाच ।

तमेवमुक्ते वचने नराधिपः
प्रत्यब्रवीन्मत्स्यपतिः प्रहृष्टवत् ।
सोहं न मन्ये तव कर्म तत्समं
समुद्रनेमिं पृथिवीं त्वमर्हसि ॥ २२
त्रिलोकपालो हि यथा विराजसे
तथाऽद्य मे विष्णुरिवातिरोचसे ।
यथा तु कामस्तव तत्तथा कृतं
महानसे मे भव मे पुरस्कृतः ।
नराश्च मे तत्र मया सदाऽर्चिता
भवाद्य तेषामधिपो मया कृतः ॥ २३
तथा स भीमो विहितो महानसे
विराटराजस्य बभूव वै प्रियः ।
उवास राजन्न च तं पृथग्जनो
बुबोध तस्यानुचरश्च कश्चन ॥ २४

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः ॥ ११ ॥

अर्जुनेन षण्डवेषपरिग्रहेण विराटसभाप्रवेशः ॥ १ ॥ विराटेनार्जुनस्य कन्यानाटने नियोजनम् ॥ २ ॥

वैशंपायन उवाच ।

अथापरोऽदृश्यत वर्णवान्युवा
स्त्रीवेषधारी समलंकृतो भृशम् ।
प्रवालचित्रे प्रविमुच्य कुण्डले
उभे च कम्बू परिपातुके तथा ॥ १

अनीककण्ठाग्रसरोध्वजीति ध. पाठः ॥ १६ ॥

दशमोऽध्यायः ॥ १० ॥

कृष्णे च रक्ते च निबध्य वाससी
शरीरवाञ्शुक्रबृहस्पतिप्रभः ।
बहूंश्च दीर्घांश्च विकीर्य मूर्धजा-
न्महाभुजो मत्तगजेन्द्रविक्रमः ॥ २
क्लैब्येन वेषेण न भाति भाति च
ग्रहाभिपन्नो नभसीव चन्द्रमाः ।
गतेन चोर्वीं परिकम्पयंस्तदा
विराटमासाद्य सभासमीपतः ॥ ३
तं प्रेक्ष्य राजोपगतं सभातले
व्याजाप्रतिच्छन्नममित्रमर्दनम् ।
विराजमानं सुरराजवर्चसं
सुतं सुरेन्द्रस्य गजेन्द्रविक्रमम् ॥ ४
सर्वानपृच्छच्च समीपचारिणः
कुतोऽयमायाति न मे पुरा श्रुतः ।
न चैनमूचुर्विदितं नरास्तदा
सविस्मयं वाक्यमिदं नृपोऽब्रवीत् ॥ ५
विराट उवाच ।
गजेन्द्रलीलो मृगराजगामी
वृषेक्षणो देवसुतोग्रतेजाः ।
पीनांसबाहुः कनकावदातः
कोऽयं नरो मे नगरं प्रविष्टः ॥ ६
किमेष देवेन्द्रसुतः किमेष
ब्रह्मात्मजो वा किमयं स्वयंभूः ।
उमासुतो वैश्रवणात्मजो वा
प्रेक्ष्यैनमासीदिति मे वितर्कः ॥ ७
वैशंपायन उवाच ।
सभामतिक्रम्य स वासवोपमो
निरीक्षमाणो बहुभिः सभागतैः ।
स तत्र राजानममित्रहाऽब्रवी-
द्बृहन्नलाहं नरदेव नर्तकी ॥ ८
वेणीं प्रकुर्यां रुचिरे च कुण्डले
ग्रथे स्रजः प्रावरणानि संहरे ।
स्नानं चरेयं विमृजे च दर्पणं
विशेषकेष्वेव च कौशलं मम ॥ ९
क्लीबेषु बालेषु जनेषु नर्तने
शिक्षाप्रदानेषु च योग्यता मम ।
करोमि वेणीषु च पुष्पपूरकं
न मे स्त्रियः कर्मणि कौशलाधिकाः ॥ १०
इत्यर्जुनस्तं नरदेवमोजसा
विज्ञाप्य तस्थौ विधिनाऽऽत्मनः क्रियाम् ।
तमब्रवीत्प्रांशुमुदीक्ष्य विस्मितो
विराटराजोपसृतं महायशाः ॥ ११
नार्हस्तु वेषोऽयमनूर्जितस्ते
नापुंस्त्वमर्हं नरदेवसिंह ।
तवैव वेषः शुभवेषभूषणै-
र्विभूषितो भूतपतेरिव प्रभो ॥ १२
विभाति भानोरिव रश्मिमालिनो
घनावरुद्धे गगने घनैरिव ।
धनुर्हि मन्ये तव शोभयेद्भुजौ
तथाहि पीनावतिमात्रमायतौ ॥ १३
प्रगृह्य चापं त्वनुरूपमात्मनो
रक्षस्व देशं पुरमद्य सुस्थिरः ।
पुत्रेण तुल्यो भव मे बृहन्नले
वृद्धोस्मि वित्तं प्रतिपादयामि ते ॥ १४
त्वं रक्ष मे सर्वमिदं पुरं प्रभो
न पण्डतां कांचन लक्षयामि ते ।
प्रशाधि मत्स्यांस्तरसा विवर्धय-
न्ददामि राज्यं तव सत्यवागहम् ॥ १५
वैशंपायन उवाच ।
तस्याग्रतः स्वानि धनूंषि पार्थिवो
बहूनि दीर्घाणि च वर्णवन्ति च ।
ददौ स सज्यानि बलान्वितानि
जिज्ञासमानः किमयं करिष्यति ॥ १६
ततोऽर्जुनः क्लीबतरं वचोऽब्रवी-
न्न मे धनुर्धारितमीदृशं विभो ।
न चापि दृष्टं धनुरीदृशं कचि-
न्न मादृशाः सन्ति धनुर्धरा भुवि ॥ १७

नृत्यामि गायामि च वादयाम्यहं
प्रानर्तने कौशलनैपुणं मम ।
तदुत्तरायाः परिधत्स्व नर्तने
भवामि देव्या नरदेव नर्तकी ॥ १८

विराट उवाच ।

ददामि ते तं हि वरं बृहन्नले
सुतां हि मे नर्तय याश्च तादृशीः ।
ततो विराटः स्वयमाह्वयत्सुतां
नराधिपस्तां च सुमध्यसुन्दरीम् ॥ १९
उवाच चैनां मुदितेन चेतसा
बृहन्नला नाम सखी भवत्वियम् ।
सुगात्रि संप्रीतिसुबद्धसौहृदा
तवाङ्गने प्राणसमा च नित्यदा ॥ २०
प्रकामभक्ष्याभरणाम्बरा शुभा
चरत्वियं सर्वजनेष्ववारिता ।
न दुष्कुलानामियमाकृतिर्भवे-
न्न वृत्तभेदी भवतीदृशो जनः ॥ २१

वैशंपायन उवाच ।

संमन्त्र्य राजा विविधैः स्वमन्त्रिभिः
परीक्ष्य चैनं प्रमदाभिराशु वै ।
अपुंस्त्वमप्यस्य निशम्य च स्थिरं
ततः कुमारीपुरमुत्ससर्ज तम् ॥ २२
स शिक्षयामास च गीतवादनं
सुतां विराटस्य धनंजयः प्रभुः ।
सखीश्च तस्याः परिचारिकास्तथा
प्रियश्च तस्याः स बभूव पाण्डवः ॥ २३
तथा स तत्रैव धनंजयोऽवस-
त्प्रियाणि कुर्वन्सह ताभिरात्मवान् ।
तथा गतं तत्र न जज्ञिरे जना
बहिश्चरा वाऽप्यथवेतरे जनाः ॥ २४

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ॥ १२ ॥

नकुलेन विराटमेत्य स्वस्याश्वशास्त्रे कौशलाभिधानम् ॥ १ ॥ विराटेन नकुलस्याश्वपालने नियोजनम् ॥ २ ॥

वैशंपायन उवाच ।

अथापरोऽदृश्यत पाण्डवः प्रभु-
र्विराटराजे तुरगान्समीक्षति ।
तमापतन्तं ददृशुः पृथग्जनाः
प्रमुक्तमभ्रादिव चन्द्रमण्डलम् ॥ १
स वै हयानैक्षत तानितस्ततः
समीक्षमाणं च ददर्श मत्स्यराट् ।
दृष्ट्वा तथैनं स कुरूत्तमं तमः
पप्रच्छ तान्सर्वसभासदस्तदा ॥ २
को वा विजानाति पुराऽस्य दर्शनं
योऽयं युवाऽभ्येति हि मामिकां सभाम् ।
प्रियो हि मे दर्शनतोपि संमतो
ब्रवीतु कश्चिद्यदि दृष्टवानिमम् ॥ ३
अयं हयान्पश्यति मामकान्मुहु-
र्ध्रुवं हयज्ञो भविता विचक्षणः ।
प्रवेश्यतामेष समीपमाशु वै
विभाति वीरो हि यथाऽमरस्तथा ॥ ४
वितर्कयत्येव हि मत्स्यराजनि
त्वरन्कुरूणामृषभः सभामगात् ।
ततः प्रणम्योपनतः कुरूत्तमो
विराटराजानमुवाच पार्थिवम् ॥ ५
तवागतोऽहं पुरमद्य भूपते
जिजीविषुर्वेतनभोजनार्थिकः ।
तवाश्वबन्धः सुभृतो भवाम्यहं
कुरुष्व मामश्वपतिं यदीच्छसि ॥ ६

विराट उवाच ।

ददानि यानानि धनानि वेतनं
न चाश्वसूतो भवितुं त्वमर्हसि ।
कुतोसि कस्यासि कथं त्वमागतो
ब्रवीहि शिल्पं तव विद्यते च यत् ॥ ७

[न]कुल उवाच ।
[अ]श्वानां पाण्डुपुत्राणां ज्येष्ठो राजा युधिष्ठिरः ।
[ते]नाहमश्वेषु पुरा प्रकृतः शत्रुकर्शन ॥ ८
[अ]श्वानां प्रकृतिं वेद्मि विनयं चापि सर्वशः ।
[दु]ष्टानां प्रतिपत्तिं च कृत्स्नं चैव चिकित्सितम्॥९
न कातरं स्यान्मम वाजिवाहनं
न मेऽस्ति दुष्टा बडवा कुतो हयः ।
जानंस्तु मामाह स चापि पाण्डवो
युधिष्ठिरो ग्रन्थिकमेव नामतः ॥ १०
मातलिरिव देवपते-
र्दशरथनृपतेः सुमन्त्र इव यन्ता ।
सुमह इव जामदग्न्ये-
स्तथैव तव शिक्षयाम्यश्वान् ॥ ११
युधिष्ठिरस्य राजेन्द्र नरराजस्य शासनात् ।
शतसाहस्रकोटीनामश्वानामस्मि रक्षिता ॥ १२
विराट उवाच ।
यदस्ति किंचिन्मम वाजिवाहनं
तदस्तु सर्वं त्वदधीनमद्य वै ।
ये चापि केचिन्मम वाजियोधा-
स्त्वदाश्रयाः सारथयश्च सन्तु मे ॥ १३
इदं तवेष्टं विहितं सुरोपम
प्रब्रूहि यत्ते प्रसमीक्षितं वरम् ।
न तेऽनुरूपं हयकर्म दृश्यते
विभासि राजेव न कर्म वाजिनाम् ॥ १४
युधिष्ठिरस्यैव हि दर्शनेन मे
समं तवेदं प्रियदर्श दर्शनम् ।
कथं नु भृत्यैः स विनाकृतो वने
चरत्यनिन्द्यो रमते च पाण्डवः ॥ १५
वैशंपायन उवाच ।
तथा स गन्धर्ववरोपमो युवा
विराटराज्ञा मुदितेन पूजितः ।
न चैवमन्येऽपि विदुः कथंचन
प्रियाभिरामं विचरन्तमन्तरा ॥ १६

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ॥ १३ ॥

सहदेवेन गोपालवेषधारणेन विराटंप्रति गमनम् ॥ १ ॥ विराटेन सहदेवस्य गोपालने नियोजनम् ॥ २ ॥

वैशंपायन उवाच ।
अथापरोऽदृश्यत वै शशी यथा
हुतो हविर्भिर्हि यथाऽध्वरे शिखी ।
तथा समालक्ष्यत चारुदर्शनः
प्रकाशयन्सूर्य इवाचिरोदितः ॥ १
तमाव्रजन्तं सहदेवमग्रणी-
र्नृपो विराटो नचिरात्समैक्षत ।
प्रैक्षन्त तं तत्र पृथक्समागताः
सभागताः सर्वमनोहरप्रभम् ।
युवानमायान्तममित्रकर्शनं
प्रमुक्तमभ्रादिव चन्द्रमण्डलम् ॥ २
यष्ट्या प्रमाणान्वितया सुदर्शनं
दामानि पाशं च निबद्ध्य पृष्ठतः ।
मौर्वीं च तन्त्रीं महतीं सुसंहितां
बालैश्च तारैर्बहुभिः समावृताम् ॥ ३
स चापि राजानमुवाच वीर्यवा-
न्कुरुष्व मां पार्थिव गोष्ववस्थितम् ।
मया हि गुप्ताः पशवो भवन्तु ते
प्रसन्ननिद्राः प्रभवोस्मि वल्लवः ॥ ४
न श्वापदेभ्यो न च रोगतो भयं
न चापि दावान्न च तस्कराद्भयम् ।
पयःप्रभूता बहुला निरामया
भवन्ति गावः सुभृता नराधिप ॥ ५
निशम्य राजा सहदेवभाषितं
निरीक्ष्य माद्रीसुतमभ्यनन्दत् ।

उवाच हृष्टो मुदितेन चेतसा
न बल्लवत्वं त्वयि वीर लक्षये ॥ ६
धैर्याद्वपुः क्षात्रमिवेह ते दृढं
प्रकाशते कौरववंशजस्य वा ।
नापण्डितेयं तव दृश्यते तनु-
र्भवेह राज्ये मम मन्त्रधर्मभृत् ॥ ७
प्रशाधि मत्स्यान्सहराजकानिमा-
न्बृहस्पतिः शक्रयुतानिवामरान् ।
बलं च मे रक्ष सुवेष सर्वशो
गृहाण खड्गं प्रतिरूपमात्मः ॥ ८
अनीककर्णाग्रधरो बलस्य मे
प्रभुर्भवानस्तु गृहाण कार्मुकम् ॥ ९

वैशंपायन उवाच ।

विराटराज्ञाऽभिहितः कुरूत्तमः
प्रशस्य राजानमभिप्रणम्य च ।
उवाच मत्स्यप्रवरं महामतिः
शृणुष्व राजन्मम वाक्यमुत्तमम् ॥ १०
बालो ह्यहं जातिविशेषदूषितः
कुतोऽद्य मे नीतिषु युक्तमन्त्रता ।
स्वकर्मतुष्टाश्च वयं नराधिप
प्रशाधि मां गोपरिरक्षणेऽनघ ॥ ११
वैश्योस्मि नाम्नाऽहमरिष्टनेमि-
र्गोसङ्ख्य आसं कुरुपुङ्गवानाम् ।
वस्तुं त्वयीच्छामि विशांवरिष्ठ
तान्राजसिंहान्न हि वेद्मि पार्थान् ॥ १२
न जीवितुं शक्यमतोऽन्यकर्मणा
न च त्वदन्यो मम रोचते विभो ॥ १३

विराट उवाच ।

त्वं ब्राह्मणो वा यदि वाऽपि भूमिपः
समुद्रनेमीश्वररूपवानसि ।
आचक्ष्व तत्त्वं त्वममित्रकर्शन
न बल्लवत्वं त्वयि विद्यते समम् ॥ १४
कस्यासि राज्ञो विषयादिहागतः
किं चापि शिल्पं तव विद्यते कृतम् ।
कथं त्वमस्मासु निवत्स्यसे सदा
वदस्व किं चापि तवेह वेतनम् ॥ १५

सहदेव उवाच ।

पञ्चानां पाण्डुपुत्राणां ज्येष्ठो राजा युधिष्ठिरः ।
तस्याष्टौ शतसाहस्रं गवां वर्गाः शतंशतम् ॥१६
अपरे दशसाहस्रा द्विस्तावन्तस्तथा परे ।
तेषां गोसङ्ख्य आसं वै तन्त्रीपालेति मां विदुः१७
भूतं भव्यं भविष्यच्च यच्चान्यद्गोगतं क्वचित् ।
न मेऽस्त्यविदितं किंचित्समन्ताद्दशयोजनम्॥१८
गुणाः सुविदिता ह्यासन्मया तस्य महात्मनः ।
आसीच्च स मया तुष्टः कुरुराजो युधिष्ठिरः ॥ १९
अनेन गणिता गावो दुर्विज्ञेया महत्तराः ।
बहुक्षीरतरास्ता वै बह्व्यः सत्यः सपुत्रिकाः ॥२०
क्षिप्रं च गावो बहुला भवन्ति
न तासु रोगो भवतीह कश्चित् ।
तैस्तैरुपायैर्विदितं मयैत-
देतानि शिल्पानि मयि स्थितानि ॥ २१
ऋषभानपि जानामि राजन्पूजितलक्षणान् ।
येषां मूत्रमुपाघ्राय वन्ध्या अपि प्रसूयते ॥ २२

वैशंपायन उवाच ।

मत्स्याधिपो हर्षकलेन चेतसा
माद्रीसुतं पाण्डवमभ्यभाषत ।
नैवानुमन्ये तव कर्म कुत्सितं
महीं समग्रामभिपातुमर्हसि ॥ २३
अथ त्विदानीं तव रोचते विभो
यथेष्टतो गव्यमवेक्ष मामकम् ।
त्वदर्पणा मे पशवो भवन्तु वै
पशून्सपालान्भवते ददाम्यहम् ॥ २४
शतं सहस्राणि गवां हि सन्ति
वर्णस्ववर्णस्य पृथग्गणानाम् ।
ददामि तेऽहं वरमीप्सितं च य-
स्त्वदर्पणा मे पशवो भवन्त्विति ॥ २५

वैशंपायन उवाच ।
एवं विराटेन समेत्य पाण्डवो
लब्ध्वा च गोवल्लवतां यथेष्टतः ।
अज्ञातचर्यामवसन्महात्मा
यथा रविश्चास्तगिरिं प्रविष्टः ॥ २६
एवं विराटे न्यवसंश्च पाण्डवा
यथा प्रतिज्ञाभिरमोघविक्रमाः ।
अबुद्धचर्यां चरितुं यथातथं
समुद्रनेमीमभिशास्तुमुद्यताः ॥ २७

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः ॥ १४ ॥

द्रौपद्या सैरन्ध्रीवेषधारणेन सुदेष्णागृहे निवासः ॥ १ ॥

वैशंपायन उवाच ।
ततः कृष्णा सुकेशी सा दर्शनीया शुचिस्मिता ।
वेणीकेशान्समुत्क्षिप्य पीनवृत्तकुचा शुभा ।
जुगूहे दक्षिणे पार्श्वे मृदूनसितलोचना ॥ १
वासश्च परिधायैकं कृष्णा सुमलिनं महत् ।
कृत्वा वेषं च सैरन्ध्र्याः कृष्णा व्यचरदार्तवत् ॥ २
प्रविष्टा नगरं भीरुः सैरन्ध्रीवेषसंयुता ।
तां नराः परिधावन्तः स्त्रियश्च समुपाद्रवन् ॥ ३
अपृच्छंस्ते च तां दृष्ट्वा का त्वं किं च चिकीर्षसि ।
सा तानुवाच राजेन्द्र सैरन्ध्र्यहमुपागता ।
कर्म चेच्छामि वै कर्तुं तस्या या मां भरिष्यति ॥ ४
वैशंपायन उवाच ।
तस्या रूपेण वेषेण श्लक्ष्णया च गिरा तथा ।
न श्रद्दधानास्तां देवीमन्नहेतोरुपस्थिताम् ॥ ५
विराटस्य तु कैकेयी भार्या परमसंमता ।
आलोकयन्ती ददृशे प्रासादाद्द्रुपदात्मजाम् ॥ ६
सा समीक्ष्य तथारूपामनाथामेकवाससम् ।
स्त्रीभिश्च पुरुषैश्चापि सर्वतः परिवारिताम् ॥ ७
विराटभार्या तां देवी कारुण्याज्जातसंभ्रमा ।
अप्रेषयत्समीपस्थाः स्त्रियो वृद्धाश्च तत्पराः ॥ ८
अपनीय ततः सर्वा आनयध्वमिहैव ताम् ।
यदा दृष्टा मया साध्वी कम्पते मे मनस्तदा ।
तस्माच्छीघ्रमिहानाय्य दर्शयध्वं यदीच्छथ ॥ ९
तास्तथोक्ता उपागम्य द्रौपदीं परिसंगताः ।
आनीय सर्वथा त्वेनामब्रुवन्मधुराक्षरम् ॥ १०
भद्रे त्वां द्रष्टुमिच्छन्ती सुदेष्णा हर्म्यभूतले ।
त्वदर्थं प्रेषयच्चास्मान्द्रष्टुं तां त्वं यदीच्छसि ।
आयाह्यस्माभिरेवाद्य रक्ष्यमाणा यथेष्टतः ॥ ११
तच्छ्रुत्वा द्रौपदी तासां वचनं वाक्यकोविदा ।
ईप्सितार्थातिलाभेन हृष्टाऽऽयाता गृहोत्तमम् १२
राजवेश्म ह्युपाक्रम्य यत्राग्र्यमहिषी स्थिता ।
सुदेष्णामगमत्कृष्णा राजभार्यां यशस्विनीम् ॥ १३
कृष्णान्केशान्मृदून्दीर्घान्समुद्ग्रथ्यासितेक्षणा ।
कुञ्चिताग्रांस्तु सूक्ष्माग्रान्दर्शनीयान्निबध्य च ।
जुगूहे दक्षिणे पार्श्वे मृदूनायतलोचना ॥ १४
सा प्रविश्य विराटस्य द्रौपद्यन्तःपुरं शुभा ।
ह्रीनिषेवान्विता बाला कम्पमाना लतेव सा ॥ १५
अभिगम्य च सुश्रोणी सर्वलक्षणसंयुता ।
ददर्शावस्थितां हैमे पीठे रत्नपरिच्छदे ॥ १६
रक्तसूक्ष्माम्बरधरां मेघे सौदामिनीमिव ।
नानावर्णविचित्रां च सर्वाभरणभूषिताम् ॥ १७
सुभ्रूं सुकेशीं सुश्रोणीं कुब्जवामनमध्यगाम् ।
बहुपुष्पोपकीर्णायां भूम्यां वेदिमिवाध्वरे ॥ १८
सुदेष्णां राजमहिषीं सर्वालंकारभूषिताम् ।
श्रीमतीं राजपुत्रीणां शतेन परिवारिताम् ॥ १९
ताः सर्वा द्रौपदीं दृष्ट्वा सन्तप्ताः परमाङ्गनाः ।

समुत्क्षिप्य वल्गिताग्रानिन्दितानिति ख. थ. ध. पाठः

परितश्चोपतस्थुस्ताः सहसोत्थाय चासनात् ॥२०
निरीक्षमाणाः सर्वास्ताः शचीं देवीमिवागताम् ।
गूढगुल्फां वरारोहां कृष्णां ताम्रायतेक्षणाम् ।
अतिसर्वानवद्याङ्गीं नतगात्रीं सुमध्यमाम् ॥ २१
न ह्रस्वां नातिमहतीं जातां बहुतृणे वने ।
ऋश्यरोहीमिवानिन्द्यां सुकेशीं मृगलोचनाम् ॥२२
तां मृगीमिव वित्रस्तां यूथभ्रष्टामिव द्विपाम् ।
लक्ष्मीमिव विशालाक्षीं विद्यामिव यशस्विनीम्२३
रोहिणीमिव ताराणां दीप्तामग्निशिखामिव ।
पार्वतीमिव रुद्राणीं वेलामिव महोदधेः ॥ २४
सुलभामिव नागीनां मृगीणामिव किन्नरीम् ।
गङ्गामिव विशुद्धाङ्गीं शारदीमिव शर्वरीम् ॥ २५
तामचिन्त्यतमां लोके इलामिव यशस्विनीम् ।
सावित्रीमिव दुर्धर्षां ब्राह्मया लक्ष्म्या समन्वितां२६
सीतामिव सतीं शुद्धामरुन्धतीमिव प्रियाम् ।
सुदेष्णा पर्यपृच्छत्तां विस्मयोत्फुल्ललोचना ॥ २७
का त्वं सर्वानवद्याङ्गि कुतोसि त्वमिहागता ।
कस्य वा त्वं विशालाक्षि किं वा ते करवाण्यहम् २८
गूढगुल्फा समानोरुस्त्रिगम्भीरा षडुन्नता ।
स्निग्धा पञ्चसु रक्तेषु हंसगद्गदभाषिणी ॥ २९
शुकेशी सुस्वरा श्यामा पीनश्रोणीपयोधरा ।
अरालपक्ष्मनयना बिम्बोष्ठी तनुमध्यमा ॥ ३०
कम्बुग्रीवा गूढसिरा पूर्णचन्द्रनिभानना ।
दानवी किन्नरी वा त्वं गन्धर्वी वनदेवता ॥ ३१
अप्सरा वाऽसि नागी वा तारा वा त्वं विलासिनी।
अलम्बुसा मिश्रकेशी पुण्डरीकाऽथ मालिनी ॥३२
तेनतेनैव संपन्ना काश्मीरीव तुरंगमा ।
इन्द्राणी त्वथ रुद्राणी स्वधा वाऽप्यथवा रतिः॥३३
देवि देवेषु विख्याता ब्रूहि का त्वमिहागता ।
तव ह्यनुपमं रूपं भूषणैरपि वर्जितम् ॥ ३४
त्वां सृष्ट्वोपरतं मन्ये लोककर्तारमीश्वरम् ।
न तृप्यन्ति स्त्रियो दृष्ट्वा का न पुंसां रतिर्भवेत् ३५
प्रवालपुष्पस्तबकैराचिता वनदेवताः ।
त्वामेव हि निरीक्षन्ते विस्मिता रूपसंपदा ॥ ३६

अन्तःपुरगता नार्यो मृगाः पक्षिगणा नराः ।
सर्वे त्वामेव कल्याणि निरीक्षन्ते सुविस्मिताः ३७
न त्वादृशी काचन मे त्रिषु लोकेषु सुन्दरी ।
दृष्टपूर्वा श्रुता वाऽपि चक्षुषा विद्यते शुभा ॥ ३८
द्रौपद्युवाच ।
नास्मि देवी न गन्धर्वी न यक्षी न च किन्नरी ।
सैरन्ध्री नाम मे जातिर्वन्यमूलफलाशना ॥ ३९
पतीनां प्रेक्षमाणानां कस्मिंश्चित्कारणान्तरे ।
केशपाशे परामृष्टा साऽहं त्रस्ता वनं गता ॥ ४०
तत्र द्वादशवर्षाणि वन्यमूलफलाशना ।
चराम्यनिलया सुभ्रूः सा तवान्तिकमागता ॥४१
जानामि केशान्ग्रथितुं विचित्रान्ग्रथितुं मणीन् ।
मल्लिकोत्पलपद्मानां जानामि ग्रथितुं स्रजः ॥४२
सिन्धुवारकजातीनां रचयाम्यवतंसकान् ।
पत्रं मृगाङ्कमगरुं पिषे च हरिचन्दनम् ।
ग्रथयिष्यामि चित्राश्च स्रजः परमशोभनाः ॥ ४३
आराधयं सत्यभामां कृष्णस्य महिषीं प्रियाम् ।
कृष्णां च भार्यां पार्थानां नारीणामुत्तमां तथा ४४
तथाऽस्मि सुभ्रुवा चाहमिष्टलाभेन तोषिता ।
मालिनी चेति मे नाम स्वयं देवी चकार ह ।
कृष्णा कमलपत्राक्षी सा मे प्राणसमा सखी ॥४५
न चाहं चिरमिच्छामि क्वचिद्वस्तुं शुभानने ।
व्रतं किलैतदस्माकं कुलधर्मोऽयमीदृशः ॥ ४६
योऽस्माकं तु हरेद्द्रव्यं देशं वसनमेव वा ।
न क्रोधद्व्यं किलास्माभिरसद्गुरुरमर्षणः ॥ ४७
साऽहं वनानि दुर्गाणि तीर्थानि च सरांसि च ।
शैलांश्च विविधान्रम्यान्सरितश्च समुद्रगाः ॥ ४८
भर्तृशोकपरीताङ्गी भर्तृसब्रह्मचारिणी ।
विचरामि महीं दुर्गां यत्र सायंनिवेशना ॥ ४९
वीरपत्नी यदा देवी चरमाणेषु भर्तृषु ।
साऽहं विवत्सा विधिना गन्धमादनपर्वतात् ।
शृणोमि तव सौशील्यं भर्तुर्मधुरभाषिणि ॥ ५०
माहात्म्यं च ततः श्रुत्वा ब्राह्मणानां समीपतः ।
त्वामुपस्थातुमिच्छामि ततश्चाहमिहागता ॥ ५१

गुरवो मम धर्मश्च वायुः शक्रस्तथाऽश्विनौ ।
तेषां प्रसादाच्च न मां कश्चिद्धर्षयते पुमान् ॥ ५२
वैशंपायन उवाच ।
एवमुक्त्वा सुदेष्णां तां कृताञ्जलिपुटा स्थिता ।
साऽब्रवीद्विस्मयाविष्टा द्रौपदीं योषितां वराम् ॥ ५३
न भेरयमहं भद्रे संशयो मम विद्यते ।
राजा त्वयं हि त्वां दृष्ट्वा मतिं पापां करिष्यति ५४
साऽहं त्वां न क्षमां मन्ये वसन्तीमिह वेश्मनि ।
एष दोषोस्ति सुश्रोणि कथं वा भीरु मन्यसे ॥ ५५
स्थिता राजकुले नार्यो याश्चेमा मम वेश्मनि ।
त्वामेवैकां निरीक्षन्ते विस्मयाद्वरवर्णिनि ॥ ५६
वृक्षांश्चोपस्थितान्पश्य य इमे मम वेश्मनि ।
विनमन्ते हि त्वां दृष्ट्वा पुमांसं कं न लोभयेः ॥ ५७
बिभर्षि परमं रूपमतिमानुषमद्भुतम् ।
तिर्यग्योनिगताश्चापि निरीक्षन्ते सविस्मयाः ।
तव रूपमनिन्द्याङ्गि किं पुनर्मानवा भुवि ॥ ५८
राजा विराटः सुश्रोणि दृष्ट्वा ते परमं वपुः ।
मां विहाय वरारोहे त्वां गच्छेत्सर्वचेतसा ॥ ५९
यं हि त्वमनवद्याङ्गी नरमायतलोचने ।
सुप्रसन्ना हि वीक्षेथाः स कामवशगो भवेत् ॥ ६०
सुस्नाताऽलंकृता हि त्वं यमीक्षेथा हि मानुषम् ।
ग्लानिर्न तस्य दुःखं वा न तन्द्रिर्न पराजयः ॥ ६१
न शोको न च सन्तापो न क्रोधो नानृतं वदे ।
यं त्वं सर्वानवद्याङ्गि भजेथाः समलंकृता ॥ ६२
न व्याधिर्न जरा तस्य न तृष्णा न क्षुधा भवेत् ।
यस्य त्वं वशगा सुभ्रु भवेरङ्कगता सती ॥ ६३
पश्चात्त्वमपि संप्राप्तं यं च त्वं परिषस्वजेः ।
बाहुभ्यामनुरूपाभ्यां स जीवेदिति मे मतिः ॥ ६४
यस्य हि त्वं भवेर्भार्या यं च हृष्टा परिष्वजेः ।
अतिजीवेत्स सर्वेषु देवेष्विव पुरन्दरः ॥ ६५
अध्यारोहेद्यथा वृक्षं यथा वाऽऽरुह्य तक्षति ।
राजवेश्मनि वामोरु ननु स्यास्त्वं तथा मम ॥ ६६
यथा कर्कटकी गर्भमाधत्ते मृत्युमात्मनः ।
तथाविधमहं मन्ये तव सुभ्रु समागमम् ॥ ६७
अनुमानये त्वां सैरन्ध्रि नावमन्ये कथंचन ।
भर्तृशीलभयाद्भद्रे तव वासं न रोचये ॥ ६८
सैरन्ध्र्युवाच ।
नाहं शक्या विराटेन यद्वा चान्येन केनचित् ।
देवगन्धर्वयक्षैर्वा द्रष्टुं दुष्टेन चेतसा ॥ ६९
गन्धर्वाः पालयन्ते मां सुकुलाः पञ्च सुव्रताः ।
पुत्रा देवादिदेवानां सूर्यपावकवर्चसः ॥ ७०
यश्च दुःशीलवान्मर्त्यो मां स्पृशेद्दुष्टचेतसा ।
स तामेव निशां शीघ्रं शयीत मुसलैर्हतः ॥ ७१
यस्यापि हि शतं पूर्णं बान्धवानां भवेदपि ।
सहस्रं वा विशालाक्षि कोटिर्वापि सहस्रिका ।
दुष्टचित्तश्च मां ब्रूयान्न स जीवेत्तवाग्रतः ॥ ७२
न तस्य त्रिदशा देवा नासुरा न च पन्नगाः ।
तेभ्यो गन्धर्वराजेभ्यस्त्राणं कुर्युरसंशयम् ॥ ७३
सुदेष्णे विश्वस त्वं मां स्वजने बान्धवेऽपि वा ।
नाहं शक्या नरैर्द्रष्टुं न च मे वृत्तमीदृशम् ॥ ७४
यो मे न दद्यादुच्छिष्टं न च पादौ प्रधावयेत् ।
प्रीयेरंस्तेन वासेन गन्धर्वाः पतयो मम ॥ ७५
यो हि मां पुरुषो गृद्ध्येद्यथाऽन्याः प्राकृतस्त्रियः ।
तामेव स इमां रात्रिं प्रविशेदपरां तनुम् ॥ ७६
न चाप्यहं चालयितुं शक्या केनचिदङ्गने ।
दुःखशीलाश्च गन्धर्वास्त इमे बलिनः प्रियाः ।
एवं निवसमानायां मयि मा ते भयं हि भूत् ॥ ७७
वैशंपायन उवाच ।
एवमुक्ता तु सैरन्ध्र्या सुदेष्णा वाक्यमब्रवीत् ।
वसेह मयि कल्याणि यदि ते वृत्तमीदृशम् ॥ ७८
कश्च ते दातुमुच्छिष्टं पुमानर्हति भामिनि ।
प्रसारयेच्च कः पादौ लक्ष्मीं दृष्ट्वैव बुद्धिमान् ॥ ७९
एवमाचारसंपन्ना एवं देवपरायणा ।
रक्ष्या त्वमसि भूतानां सावित्रीव द्विजन्मनाम् ८०
देवता इव कल्याणि पूजिता वरवर्णिनी ।
वस भद्रे मयि प्रीता प्रीतिर्हि मयि वर्तते ।
सर्वकामैः प्रमुदिता निरुद्विग्नमनाः सुखम् ॥ ८१

वैशंपायन उवाच ।
सुदेष्णयैवमुक्ता सा संप्रीता चारुहासिनी ।
निर्विशङ्का विराटस्य विवेशान्तःपुरं सुखम् ॥ ८२
याज्ञसेनी सुदेष्णां तु शुश्रूषन्ती विशांपते ।
अवसत्परिचारार्हा सुदुःखं जनमेजय ॥ ८३
एवं विराटे न्यवसंस्तु पाण्डवाः
कृष्णा तथाऽन्तःपुरमेत्य शोभना ।
अज्ञातचर्या प्रतिरुद्धमानसा
यथाऽग्नयो भस्मनि गूढतेजसः ॥ ८४

॥ इति श्रीमन्महाभारते विराटपर्वणि पाण्डवप्रवेशपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥

समाप्तं च पाण्डवप्रवेशपर्व ॥ १ ॥

(अथ समयपालनपर्व ॥ २ ॥)

पञ्चदशोऽध्यायः ॥ १५ ॥

पाण्डवैः स्वस्वव्यापारैर्विराटपरितोषणम् ॥ १ ॥ भीमेन शङ्करोत्सवे महामल्लमारणम् ॥ २ ॥

जनमेजय उवाच ।
एवं विराटनगरे वसन्तः सत्यविक्रमाः ।
अत ऊर्ध्वं नरव्याघ्राः किमकुर्वत पाण्डवाः ॥ १
वैशंपायन उवाच ।
एवं ते न्यवसंस्तत्र प्रच्छन्नाः कुरुनन्दनाः ।
आराधयन्तो राजानं यदकुर्वत तच्छृणु ॥ २
युधिष्ठिरः सभास्तारः सभ्यानामभवत्प्रियः ।
तथैव च विराटस्य सपुत्रस्य विशांपते ॥ ३
स ह्यक्षहृदयज्ञस्तान्क्रीडयामास पाण्डवः ।
अक्षवद्धान्यथाकामं सूत्रबद्धानिव द्विजान् ॥ ४
अज्ञातं च विराटस्य विजित्य वसु धर्मराट् ।
भ्रातृभ्यः पुरुषव्याघ्रो यथेष्टं संप्रयच्छति ॥ ५
भीमसेनोपि मांसानि भक्ष्याणि विविधानि च ।
अतिसृष्टानि मत्स्येन विक्रीणन्निव भ्रातृषु ॥ ६
वासांसि परिजीर्णानि लब्धान्यन्तःपुरेऽर्जुनः ।
विक्रीणन्निव सर्वेभ्यः पाण्डवेभ्यः प्रयच्छति ॥ ७
नकुलोपि धनं लब्ध्वा कृते कर्मणि वाजिनाम् ।
तुष्टे तस्मिन्नरपतौ पाण्डवेभ्यः प्रयच्छति ॥ ८
सहदेवोपि गोपानां वेषमास्थाय पाण्डवः ।
दधि क्षीरं घृतं चैव पाण्डवेभ्यः प्रयच्छति ॥ ९
कृष्णा तु सर्वान्भ्रातॄंस्तान्निरीक्षन्ती तपस्विनी ।
यथा पुनरविज्ञाता तथा चरति भामिनी ॥ १०
एवं संभावयन्तस्ते तदाऽन्योन्यं महारथाः ।
विराटनगरे चेरुः पुनर्गर्भधृता इव ॥ ११
साशङ्का धार्तराष्ट्रस्य भयात्पाण्डुसुतास्तदा ।
प्रेक्षमाणास्तदा कृष्णामूषुश्छन्ना नराधिप ॥ १२
अथ मासे चतुर्थे तु शङ्करस्य महोत्सवः ।
आसीत्समृद्धो मत्स्येषु पुरुषाणां सुसंमतः ॥ १३
तत्र मल्लाः समापेतुर्दिग्भ्यो राजन्सहस्रशः ॥ १४
महाकाया महावीर्याः कालकेया इवासुराः ।
वीर्योन्मत्ता बलोदग्रा राज्ञा समभिपूजिताः ॥ १५
सिंहस्कन्धकटिग्रीवाः स्ववदाता मनस्विनः ।
असकृल्लब्धलक्षास्ते रङ्गे पार्थिवसन्निधौ ॥ १६
तेषामेको महानासीत्सर्वमल्लानथाह्वयत् ।
व्यावल्गमानो ददृशे गर्जितोद्धतिभिः स्थितः १७
वित्रस्तमनसः सर्वे मल्लास्ते हतचेतसः ।
अवाङ्मुखाश्च भीताश्च मल्लाश्चान्ये विचेतसः ॥ १८
व्यसुत्वमपरे चैव वाञ्छन्ति प्रतिविह्वलाः ।
गां प्रवेष्टुमथेच्छन्ति खं गन्तुमिव चोत्थिताः॥१९
त्रस्ताः शान्ता विषण्णाङ्गा निःशब्दं विह्वलेक्षणाः।
विराटराजमल्लास्ते भग्नदर्पा हतप्रभाः ॥ २०
मल्लेन्द्रनिहताः सर्वे न किंचित्प्रवदन्ति ते ।

मल्ल उद्वीक्ष्य तान्मल्लांस्त्रस्तान्वाक्यमुवाच ह ॥ २१
आगतं मल्लराजं मां कृत्स्ने पृथिविमण्डले ।
सिंहव्याघ्रगणैः सार्धं क्रीडन्तं विद्धि भूपते ॥ २२
मल्लेन्द्रस्य वचः श्रुत्वा बलदर्पसमन्वितम् ।
विराटो वीक्ष्य तान्मल्लांस्त्रस्तान्वाक्यमुवाच ह ॥ २३
अनेन सह मल्लेन को योद्धुं शक्तिमान्नरः ॥ २४
इत्युक्तास्ते विराटेन सर्वे मल्ला विशांपते ।
तूष्णीमासंस्ततो राजा क्रोधाविष्ट उवाच ह ॥ २५
ग्रामांश्च वेतनान्येषां मल्लानां हारयाम्यहम् ।
ततो युधिष्ठिरोऽब्रवीच्छ्रुत्वा मात्स्यपतेर्वचः ॥ २६
अस्ति मल्लो महाराज मया दृष्टो युधिष्ठिरे ।
अनेन सह मल्लेन योद्धुं शक्नोति भूपते ॥ २७
योसौ मल्लो मया दृष्टः पूर्वं यौधिष्ठिरे पुरे ।
सोयं मल्लो वसत्येष राजंस्तव महानसे ॥ २८
वैशंपायन उवाच ।
युधिष्ठिरवचः श्रुत्वा व्यक्तमाहेति पार्थिवः ।
सोप्यथाहूयतां क्षिप्रं योद्धुं मल्लेन संप्रति ॥ २९
भीमसेनो विराटेन आहूतश्चोदितस्तथा ।
योद्धुं ततोऽब्रवीद्वाक्यं योद्धुं शक्नोमि भूपते ३०
नरेन्द्र ते प्रभावेन श्रिया शक्त्या च शासनात् ।
अनेन सह मल्लेन योद्धुं राजेन्द्र शक्नुयाम् ॥ ३१
युधिष्ठिरकृतं ज्ञात्वा श्रिया तव विशांपते ।
महादेवस्य भक्त्या च तं मल्लं पातयाम्यहम् ॥ ३२
वैशंपायन उवाच ।
चोदितो भीमसेनस्तु मल्लमाहूय मण्डले ।
योद्धुं व्यवस्थितो वीरो रेणुं संमृज्य हस्तयोः ।
मत्तो गज इवान्यं तु योद्धुं समुपचक्रमे ॥ ३३
अथ सूदेन तं मल्लं योधयामास मत्स्यराट् ॥ ३४
नोद्यमानस्तदा भीमो दुःखेनेवाकरोन्मतिम् ।
न हि शक्नोम्यशक्तोपि प्रत्याख्यातुं नराधिपं ३५
ततः स पुरुषव्याघ्रः शार्दूलशिथिलं चरन् ।
प्रविवेश महारङ्गं विराटमभिहर्षयन् ॥ ३६
बबन्ध कक्षां कौन्तेयस्ततः संहर्षयञ्जनम् ।
ततस्तु वृत्रसङ्काशं भीमो मल्लं समाह्वयत् ॥ ३७
जीमूतं नाम तं तत्र मल्लप्रख्यातविक्रमम् ।
कक्षे मल्लं गृहीत्वाऽथ ननाद बहु सिंहवत् ॥ ३८
तावुभौ सुमहोत्साहावुभौ भीमपराक्रमौ ।
मत्ताविव महाकायौ वारणौ षष्ठिहायनौ ॥ ३९
ततस्तौ नरशार्दूलौ बाहुयुद्धं समीयतुः ।
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ॥ ४०
उभौ परमसंहृष्टौ बलेनातिबलावुभौ ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ ॥ ४१
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा ॥ ४२
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्स्वनैः ।
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ॥ ४३
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः ॥ ४४
तद्युद्धमभवद्धोरमशस्त्रं बाहुतेजसा ।
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ॥ ४५
अरज्यत जनः सर्वः सोत्कुष्टनिनदोत्थितः ।
बलिनोः संयुगे राजन्वृत्रवासवयोरिव ॥ ४६
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ।
आकर्षतुरथान्योन्यं जानुभिश्चापि जघ्नतुः ॥ ४७
ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ।
बाहुभिः समसज्जेतामायसैः परिघैरिव ॥ ४८
उत्पपाताथ वेगेन मल्लं कक्षे गृहीतवान् ।
पार्श्वे निगृह्य हस्तेन पातयामास मल्लकम् ॥ ४९
चकर्ष दोर्भ्यामुत्पात्य भीमो मल्लममित्रहा ।
निनदं तमभिक्रोशञ्शार्दूल इव वारणम् ॥ ५०
समुद्यम्य महाबाहुर्भ्रामयामास वीर्यवान् ।
ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परम् ॥ ५१
भ्रामयित्वा शतगुणं गतसत्वमचेतनम् ।
प्रत्यपिंषन्महाबाहुर्मल्लं भुवि वृकोदरः ॥ ५२
तस्मिन्विनिहते वीरे जीमूते लोकविश्रुते ।

कृतप्रतिकृतादयो मल्लयुद्धविशेषाः ॥ ४२ ॥

पञ्चदशोऽध्यायः ॥ १५ ॥

विराटः परमं हर्षमगच्छद्बान्धवैः सह ॥ ५३
प्रहर्षात्प्रददौ वित्तं बहु राजा महामनाः ।
बल्लाय महारङ्गे यथा वैश्रवणस्तथा ॥ ५४
एवं स सुबहून्मल्लान्पुरुषांश्च महाबलान् ।
विनिघ्नन्मत्स्यराजस्य प्रीतिमाहरदुत्तमाम् ॥ ५५
यदाऽस्य तुल्यः पुरुषो न कश्चित्तत्र विद्यते ।
ततो व्याघ्रैश्च सिंहैश्च द्विरदैश्चाप्ययोधयत् ॥ ५६
विराटेन प्रदत्तानि चित्राणि विविधानि च ।
स्थितेभ्यः पुरुषेभ्यश्च दत्त्वा द्रव्याणि जग्मिवान् ॥
पुनरन्तःपुरगतः स्त्रीणां मध्ये वृकोदरः ।
योध्यते स विराटस्य गजैः सिंहैर्महाबलैः ॥ ५८
बीभत्सुरपि गीतेन नृत्तेनापि च पाण्डवः ।
विराटं तोषयामास सर्वाश्चान्तःपुरस्त्रियः ॥ ५९
अश्वैर्विनीतैर्जवनैस्तत्रतत्र समागतः ।
तोषयामास राजानं नकुलो नृपसत्तमम् ।
तस्मै प्रदेयं प्रायच्छत्प्रीतो राजा धनं बहु ॥ ६०
विनीतान्वृषभान्दृष्ट्वा सहदेवस्य चाभितः ।
धनं ददौ बहुविधं विराटः पुरुषर्षभः ॥ ६१
द्रौपदी प्रेक्ष्य तान्सर्वान्क्लिश्यमानान्महारथान् ।
नातिप्रीतमना राजन्निश्वासपरमाऽभवत् ॥ ६२
एवं ते न्यवसंस्तत्र प्रच्छन्नाः पुरुषर्षभाः ।
कर्माणि तस्य कुर्वाणा विराटनृपतेस्तदा ॥ ६३

॥ इति श्रीमन्महाभारते विराटपर्वणि समयपालनपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तं चेदं समयपालनपर्व ॥ २ ॥

(अथ कीचकवधपर्व ॥ ३ ॥)

षोडशोऽध्यायः ॥ १६ ॥

द्रौपद्या स्वात्मानं कामयमानस्य कीचकस्य परुषभाषणैः प्रत्याख्यानम् ॥ १ ॥

वैशंपायन उवाच ।
वसमानेषु पार्थेषु मत्स्यस्य नगरे तदा ।
महारथेषु च्छन्नेषु मासा दश समाययुः ॥ १
याज्ञसेनी सुदेष्णां तु शुश्रूषन्ती विशांपते ।
आवसत्परिचारार्हा सुदुःखं जनमेजय ॥ २
तथा चरन्ती पाञ्चाली सुदेष्णाया निवेशने ।
तां देवीं तोषयामास तथा चान्तःपुरस्त्रियः ॥ ३
तस्मिन्वर्षे गतप्राये कीचकस्तु महाबलः ।
सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम् ॥ ४
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव ।
कीचकः कामयामास कामबाणप्रपीडितः ॥ ५
स तु कामाग्निसंतप्तः सुदेष्णामभिगम्य वै ।
प्रहसन्निव सेनानीरिदं वचनमब्रवीत् ॥ ६
नेयं मया जातु पुरेह दृष्टा
राज्ञी विराटस्य निवेशने शुभा ।
रूपेण चोन्मादयतीव मां भृशं
गन्धेन जाता मदिरेव भामिनी ॥ ७
का देवरूपा हृदयंगमा शुभे
ह्याचक्ष्व मे कस्य कुतोत्र शोभने ।
चित्तं हि निर्मथ्य करोति मां वशे
न चान्यदत्रौषधमस्ति मे मतम् ॥ ८
अहो तवेयं परिचारिका शुभा
प्रत्यग्ररूपा प्रतिभाति मामियम् ।
अयुक्तरूपं हि करोति कर्म ते
प्रशास्तु मां यच्च ममास्ति किंचन ॥ ९
प्रभूतनागाश्वरथं महाजनं
समृद्धियुक्तं बहुपानभोजनम् ।
मनोहरं काञ्चनचित्रभूषणं
गृहं महच्छोभयतामियं मम ॥ १०
ततः सुदेष्णामनुमन्त्र्य कीचक-
स्ततः समभ्येत्य नराधिपात्मजाम् ।

उवाच कृष्णामभिसान्त्वयंस्तदा
मृगेन्द्रकन्यामिव जम्बुको वने ॥ ११
का त्वं कस्यासि कल्याणि कुतो वा त्वं वरानने ।
प्राप्ता विराटनगरं तत्त्वमाचक्ष्व शोभने ॥ १२
रूपमग्र्यं तथा कान्तिः सौकुमार्यमनुत्तमम् ।
कान्त्या विभाति वक्त्रं ते शशाङ्क इव निर्मलं १३
नेत्रे सुविपुले सुभ्रु पद्मपत्रनिभे शुभे ।
वाक्यं ते चारुसर्वाङ्गि परपुष्टरुतोपमम् ॥ १४
एवंरूपा मया नारी काचिदन्या महीतले ।
न दृष्टपूर्वा सुश्रोणि यादृशी त्वमनिन्दिते ॥ १५
लक्ष्मीः पद्मालया का त्वमथ भूतिः सुमध्यमे ।
ह्रीः श्रीः कीर्तिरथो कान्तिरासां का त्वं वरानने ॥
अतीव रूपिणी किं त्वमनङ्गाङ्गविहारिणी ।
अतीव भ्राजसे सुभ्रु प्रभेवेन्दोरनुत्तमा ॥ १७
अपि चेक्षणपक्ष्माणां स्मितज्योत्स्नोपमं शुभम् ।
दिव्यांशुरश्मिभिर्वृत्तं दिव्यकान्तिमनोरमम् ॥१८
निरीक्ष्य वक्त्रचन्द्रं ते लक्ष्म्याऽनुपमया युतम् ।
कृत्स्ने जगति को नेह कामस्य वशगो भवेत् ॥१९
हारालंकारयोग्यौ तु स्तनौ चोभौ सुशोभनौ ।
सुजातौ सहितौ लक्ष्म्या पीनौ वृत्तौ निरन्तरौ २०
कुड्मलाम्बुरुहाकारौ तव सुभ्रु पयोधरौ ।
कामप्रतोदाविव मां तुदतश्चारुहासिनि ॥ २१
वलीविभङ्गचतुरं स्तनभारविनामितम् ।
कराग्रसंमितं मध्यं तवेदं तनुमध्यमे ॥ २२
दृष्ट्वैव चारुजघनं सरित्पुलिनसंनिभम् ।
कामव्याधिरसाध्यो मामप्याक्रामति भामिनि २३
जज्वाल चाग्निमदनो दावाग्निरिव निर्दयः ।
त्वत्सङ्गमाभिसंकल्पविवृद्धो मां दहत्ययम् ॥ २४
आत्मप्रदानवर्षेण संगमाम्भोधरेण च ।
शमयस्व वरारोहे ज्वलन्तं मन्मथानलम् ॥ २५
मच्चित्तोन्मादनकरा मन्मथस्य शरोत्कराः ।
त्वत्सङ्गमाशानिशितास्तीव्राः शशिनिभानने ।
मह्यं विदार्य हृदयमिदं निर्दयवेगिताः ॥ २६
प्रविष्टा ह्यसितापाङ्गि प्रचण्डाश्चण्डदारुणाः ।
अत्युन्मादसमारम्भाः प्रीत्युन्मादकरा मम ।
आत्मप्रदानसंभोगैर्मामुद्धर्तुमिहार्हसि ॥ २७
चित्रमाल्याम्बरधरा सर्वाभरणभूषिता ।
कामं प्रकामं सेव त्वं मया सह विलासिनि ॥ २८
नार्हसीहासुखं वस्तुं सुखार्हा सुखवर्जिता ।
प्राप्नुह्यनुत्तमं सौख्यं मत्तस्त्वं मत्तगामिनि ॥ २९
स्वादून्यमृतकल्पानि पेयानि विविधानि च ।
पिबमाना मनोज्ञानि रममाणा यथासुखम् ॥ ३०
भोगोपचारान्विविधान्सौभाग्यं चाप्यनुत्तमम् ।
पानं पिब महाभागे भोगैश्चानुत्तमैः शुभैः ॥ ३१
इदं हि रूपं प्रथमं तवानघे
निरर्थकं केवलमद्य भामिनि ।
अधार्यमाणा स्रगिवोत्तमा शुभा
न शोभसे सुन्दरि शोभना सती ॥ ३२
त्यजामि दारान्मम ये पुरातना
भवन्तु दास्यस्तव चारुहासिनि ।
अहं च ते सुन्दरि दासवत्स्थितः
सदा भविष्ये वशगो वरानने ॥ ३३

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः ॥ १७ ॥

द्रौपद्या स्वात्मानं कामयमानस्य कीचकस्य परुषभाषणैः प्रत्याख्यानम् ॥ १ ॥

वैशंपायन उवाच ।
एवमुक्ताऽनवद्याङ्गी कीचकेन दुरात्मना ।

भूतिः ईश्वरी ऐश्वर्याभिमानिनी देवता ॥ १६ ॥ अनङ्गाङ्गविहारिणी रतिरित्यर्थः ॥ १७ ॥ ईक्षणपक्ष्माणां नेत्रपक्ष्मणां स्मितं ईषदुन्मीलनं तदेव ज्योत्स्नोपमं मनस आह्लादकरम् ॥१८॥ सुजातौ उन्नतौ । निरन्तरौ पृथुलात्संश्लिष्टौ ॥ २० ॥ कुड्मलेति मुकुलीभूतपद्माकारौ ॥ २१ ॥ अग्निमदनो मदनाग्निः ॥ २४ ॥ कामं स्मरम् । प्रकाममतिशयितम् ॥२८॥ षोडशोऽध्यायः॥१६॥

द्रौपदी तमुवाचेदं सैरन्ध्रीवेषधारिणी ॥ १
अप्रार्थनीयामिह मां सूतपुत्राभिमन्यसे ।
निहीनवर्णां सैरन्ध्रीं बीभत्सां केशकारिणीम् ॥२
परदाराऽस्मि भद्रं ते न युक्तं तव सांप्रतम् ।
दयिताः प्राणिनां दारा धर्मं समनुचिन्तय ॥ ३
परदारे न ते बुद्धिर्जातु कार्या कथंचन ।
विवर्जनं ह्यकार्याणामेतत्सुपुरुषव्रतम् ॥ ४
मिथ्याभिगृध्नो हि नरः पापात्मा मोहमास्थितः ।
अयशः प्राप्नुयाद्घोरं महद्वा प्राप्नुयाद्भयम् ॥ ५
वैशंपायन उवाच ।
एवमुक्तस्तु सैरन्ध्र्या कीचकः काममोहितः ।
जानन्नपि सुदुर्बुद्धिः परदाराभिमर्शने ॥ ६
दोषान्बहून्प्राणहरान्सर्वलोकविगर्हितान् ।
प्रोवाचेदं सुदुर्बुद्धिर्द्रौपदीमजितेन्द्रियः ॥ ७
नार्हस्येवं वरारोहे प्रत्याख्यातुं वरानने ।
मां मन्मथसमाविष्टं त्वत्कृते चारुहासिनि ॥ ८
प्रत्याख्याय च मां भीरु वशगं प्रियवादिनम् ।
नूनं त्वमसितापाङ्गि पश्चात्तापं करिष्यसि ॥ ९
अहं हि सुभ्रु राज्यस्य कृत्स्नस्यास्य सुमध्यमे ।
प्रभुर्वासयिता चैव वीर्ये चाप्रतिमः क्षितौ ॥ १०
पृथिव्यां मत्समो नास्ति कश्चिदन्यः पुमानिह ।
रूपयौवनसौभाग्यैर्भोगैश्चानुत्तमैः शुभैः ॥ ११
सर्वकामसमृद्धेषु भोगेष्वनुपमेष्विह ।
भोक्तव्येषु च कल्याणि कस्माद्दास्ये रता ह्यसि ॥
मया दत्तमिदं राज्यं स्वामिन्यसि शुभानने ।
भजस्व मां वरारोहे भुङ्क्ष्व भोगाननुत्तमान् ॥ १३
एवमुक्ता तु सा साध्वी कीचकेनाशुभं वचः ।
कीचकं प्रत्युवाचेदं गर्हयन्त्यस्य तद्वचः ॥ १४
सैरन्ध्र्युवाच ।
मा सूतपुत्र मुह्यस्व माऽद्य त्यक्ष्यस्व जीवितम् ।
जानीहि पञ्चभिर्घोरैर्नित्यं मामभिरक्षिताम् ॥ १५
न चाप्यहं त्वया लभ्या गन्धर्वाः पतयो मम ।
ते त्वां निहन्युः कुपिताः साध्वलं मा व्यनीनशः ॥
अशक्यरूपं पुरुषैरध्वानं गन्तुमिच्छसि ॥ १७
यथा निश्चेतनो बालः कूलस्थः कूलमुत्तरम् ।
तर्तुमिच्छति मन्दात्मा तथा त्वं कर्तुमिच्छसि ॥ १८

अन्तर्महीं वा यदि वोर्ध्वमुत्पतेः
समुद्रपारं यदि वा प्रधावसि ।
तथापि तेषां न विमोक्षमर्हसि
प्रमाथिनो देवसुता हि खेचराः ॥ १९
त्वं कालरात्रीमिव कश्चिदातुरः
किं मां दृढं प्रार्थयसेऽद्य कीचक ।
किं मातुरङ्के शयितो यथा शिशु-
श्चन्द्रं जिघृक्षुरिव मन्यसे हि माम् ॥ २०
तेषां प्रियां प्रार्थयतो न ते भुवि
गत्वा दिवं वा शरणं भविष्यति ।
न वर्तते कीचक ते दृशा शुभं
या तेन संजीवनमर्थयेत सा ॥ २१

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ॥ १८ ॥

कीचकेन सुदेष्णांप्रति द्रौपद्याः स्ववशीकरणप्रार्थना ॥ १ ॥ सुदेष्णया कीचके सुराहरणव्याजेन तद्गृहंप्रति द्रौपदीप्रेषणप्रतिज्ञानम् ॥ २ ॥ तथा बलात्कारेण द्रौपद्याः सुरानयनाय कीचकगृहंप्रति गमनचोदना ॥ ३ ॥

वैशंपायन उवाच ।
प्रत्याख्यातश्च पाञ्चाल्या कीचकः काममोहितः ।
प्रविश्य राजभवनं भगिन्या अग्रतः स्थितः ॥ १
सोभिवीक्ष्य सुकेशान्तां सुदेष्णां भगिनीं प्रियाम् ।

अभिमन्यसे कामयसे ॥२॥ मिथ्याभिगृध्रः वितथाभिनिवेशी। महद्भयं मृत्युम् ॥५॥ मन्यसे लिप्ससे शिशोश्चन्द्रवदहं तव दुर्लभास्मीति भावः ॥२०॥ या शुभं स्त्रीयं अर्थयेत कामयेत शुभेच्छारूपा तव नास्तीत्यर्थः । तेन च शुभेन परदारनिवृत्तिरूपेण कामितेन संजीवनं भवतीति शेषः । अन्यथा मरिष्यसीत्यर्थः ॥ २१ ॥ सप्तदशोऽध्यायः ॥ १७ ॥

अमर्यादेन कामेन घोरेणाभिपरिप्लुतः ॥ २
स तु मूर्ध्न्यञ्जलिं कृत्वा भगिन्याश्चरणावुभौ ।
संमोहाभिहतस्तूर्णं वातोद्धूत इवार्णवः ॥ ३
स प्रोवाच सुदुःखार्तो भगिनीं निश्वसन्मुहुः ।
अव्यक्तमृदुना साम्ना शुष्यता च पुनःपुनः ॥ ४
यथा सुदेष्णे सैरन्ध्या संगच्छेयं सकामया ।
तथा शीघ्रं कुरुष्वाद्य माऽहं प्राणान्प्रहासिषम् ॥ ५
यदीयमनवद्याङ्गी न मामद्यापि काङ्क्षते ।
चेतसाऽभिप्रसन्नेन गतोस्मि यमसादनम् ॥ ६
वैशंपायन उवाच ।
तमुवाच परिष्वज्य सुदेष्णा भ्रातरं प्रियम् ।
भ्रातुर्जीवितरक्षार्थं समाश्वास्यासितेक्षणा ॥ ७
शरणागतेयं सुश्रोणी मया दत्ताभया च सा ।
शुभाचारा च भद्रं ते नैनां वक्तुमिहोत्सहे ॥ ८
एषा हि शक्या नान्येन स्प्रष्टुं पापेन चेतसा ।
गन्धर्वाः किल पञ्चेमां रक्षन्ति रमयन्ति च ॥ ९
एवमेषा ममाचष्टे तथा प्रथमसंगमे ।
तथैव गजनासोरूः सत्यमाह ममान्तिके ।
ते हि क्रुद्धा महात्मानो नाशयेयुर्हि जीवितम् १०
राजा चैव समीक्ष्यैनां संमोहं गतवानिह ।
मया च सत्यवचनैरनुनीतो महीपतिः ॥ ११
सोप्येनामनिशं दृष्ट्वा मनसैवाभ्यनन्दत ।
भयाद्गन्धर्वमुख्यानां जीवितस्योपघातिनाम् ।
मनसाऽपि ततस्त्वेनां न चिन्तयति पार्थिवः ॥१२
ते हि क्रुद्धा महात्मानो गरुडानिलतेजसः ।
दहेयुरपि लोकांस्त्रीन्युगान्तेष्विव भास्करः ॥ १३
सैरन्ध्या ह्येतदाख्यातं मम तेषां महद्बलम् ।
तव चाहमिदं गुह्यं स्नेहाद्वक्ष्यामि बन्धुवत् ॥ १४
मा गमिष्यसि वै कृच्छ्रां गतिं परमदुर्गमाम् ।
बलिनस्ते रुजं कुर्युः कुलस्य च धनस्य च ॥ १५
तस्मान्नास्यां मनः कर्तुं यदि प्राणा प्रियास्तव ।
न चिन्तयेथा मागास्त्वं मत्प्रियं च यदीच्छसि १६
वैशंपायन उवाच ।
एवमुक्तस्तु दुष्टात्मा भगिनीं कीचकोऽब्रवीत् ।
गन्धर्वाणां शतं वाऽपि सहस्रमयुतानि वा ।
अहमेको वधिष्यामि गन्धर्वान्पञ्च किं पुनः ॥१७
न च त्वमभिजानीषे स्त्रीणां गुह्यमनुत्तमम् ।
पुत्रं वा किल पौत्रं वा भ्रातरं वा मनस्विनम् ॥१८
रहसीह नरं दृष्ट्वा नानागन्धविभूषितम् ।
योनिरुत्स्विद्यते स्त्रीणां सतीनामपि च श्रुतम् १९
मां निरीक्ष्यानुलिप्ताङ्गं सर्वाभरणभूषितम् ।
वशमेष्यति सैरन्ध्री मन्मथेनाभिपीडिता ।
सा त्वं दृष्ट्वा ब्रूहि चैनां मम चेज्जीवितं प्रियं २०
वैशंपायन उवाच ।
एवमुक्ता सुदेष्णा तु शोकेनाभिप्रपीडिता ।
अहो दुःखमहो कृच्छ्रमहो पापमिति स्म ह ॥ २१
प्रारुदद्भृशदुःखार्ता विपाकं तस्य वीक्ष्य सा ।
पातालेषु पतत्येष विलपन्वडवामुखे ॥ २२
त्वत्कृते विनशिष्यन्ति भ्रातरः सुहृदश्च मे ।
किंनु शक्यं मया कर्तुं यत्त्वमेवमभिप्लुतः ॥ २३
न च श्रेयोऽभिजानीषे काममेवानुवर्तसे ।
ध्रुवं गतायुस्त्वं पाप यदेवं काममोहितः ।
अकर्तव्ये हि मां पापे नियुनङ्क्षि नराधम ॥ २४
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः ।
एकस्तु कुरुते पापं स्वजातिस्तेन हन्यते ॥ २५
गतस्त्वं धर्मराजस्य विषयं नात्र संशयः ।
अदूषितमिदं सर्वं स्वजनं घातयिष्यसि ॥ २६
एतत्तु मे दुःखतरं येनाहं भ्रातृसौहृदात् ।
विदितार्था करिष्यामि तुष्टो भव कुलक्षये ॥ २७
गच्छ शीघ्रमितस्त्वं हि स्वमेव भवनं शुभम् ।
किंचित्कार्यं समुद्दिश्य सुरामन्नं च कारय ॥ २८
कृते चान्ने सुरायां च प्रेषयिष्यसि मे पुनः ।
तामहं प्रेषयिष्यामि मध्वन्नार्थं तवान्तिकम् ॥२९
ततः संप्रेषितामेनां विजने निरवग्रहाम् ।
सान्त्वयेथा यथान्यायं यदि साम सहिष्यति ॥३०
सद्यः कृतमिदं सर्वं शेषमत्रानुचिन्तय ॥ ३१
वैशंपायन उवाच ।
सुदेष्णयैवमुक्तस्तु कीचकः कालचोदितः ।

त्वरमाणः प्रचक्राम स्वगृहं राजवेश्मनः ॥ ३२
आगम्य च गृहं रम्यं सुरामन्नं चकार ह ।
अजैडकं च सुकृतं बहु चोच्चावचान्मृगान् ॥ ३३
भक्ष्यांश्च विविधाकारान्बहूंश्चोच्चावचांस्तदा ।
कारयामास कुशलैरन्नपानैः सुसंस्कृतम् ॥ ३४
त्वरावान्कालपाशेन कण्ठे बद्धः पशुर्यथा ।
नावबुध्यत मूढात्मा मरणं समुपस्थितम् ॥ ३५
आनीतायां सुरायां तु कृते चान्ने सुसंस्कृते ।
कीचकः पुनरागम्य सुदेष्णां वाक्यमब्रवीत् ॥ ३६
मधु मांसं च बहुधा भक्ष्याश्च बहुधा कृताः ।
सुदेष्णे ब्रूहि सैरन्ध्रीं यथा सा मे गृहं व्रजेत् ॥३७
केनचित्त्वद्य कार्येण त्वर शीघ्रं मम प्रियम् ।
अहं हि शरणं देवं प्रतिपद्ये वृषध्वजम् ।
समागमं मे सैरन्ध्र्या मरणं वा दिशेति वै ॥ ३८
वैशंपायन उवाच ।
सा तमाह विनिःश्वस्य प्रतिगच्छ स्वकं गृहम् ।
एषाऽहमपि सैरन्ध्रीं सुरार्थे तूर्णमादिशे ॥ ३९
एवमुक्तस्तु पापात्मा कीचकस्त्वरितः पुनः ।
स्वगृहं प्राविशत्तूर्णं सैरन्ध्रीगतमानसः ॥ ४०
कीचकं तु गतं ज्ञात्वा त्वरमाणं स्वकं गृहम् ।
सैरन्ध्रीं तत आहूय सुदेष्णा वाक्यमब्रवीत् ॥४१
गच्छ सैरन्ध्रि मत्प्रीत्यै कीचकस्य निवेशनम् ।
सुरामानय सुश्रोणि तृषिताऽहं विलासिनि ॥ ४२
वैशंपायन उवाच ।
सुदेष्णयैवमुक्ता सा निःश्वसन्ती नृपात्मजा ।
अब्रवीच्छोकसन्तप्ता नाहं तत्र व्रजामि वै ॥ ४३
सूतपुत्रो हि मां भद्रे कामात्मा चाभिमन्यते ।
न गच्छेयमहं तस्य राजपुत्रि निवेशनम् ।
त्वमेव भद्रे जानासि यथा स निरपत्रपः ॥ ४४
समयश्च कृतो भद्रे यथा प्रथमसंगमे ।
तथा निवसमानायां यथाऽहं नान्यचारिणी ॥४५
कीचकश्च सुकेशान्ते मूढो मदनगर्वितः ।
स मामिह गतां दृष्ट्वा व्यवस्यति निराकृतिम् ।
कथं नु वै तत्र गतां मर्षयेन्मामबान्धवाम् ॥४६
बह्व्यः सन्ति तव प्रेष्या राजपुत्रि वशानुगाः ।
अन्यां प्रेषय कैकेयि संरक्ष्याऽहमिह त्वया ॥ ४७
कीचकस्यालयं देवि न यामि भयकम्पिता ।
यद्यदन्यच्च मे कर्म करोमि च सुदुष्करम् ॥ ४८
एवमुक्ता तु पाञ्चाल्या दैवयोगेन कैकयी ।
तां विराटस्य महिषी क्रुद्धा भूयोऽन्वशासत ॥४९
कीचकं चैव गच्छ त्वं बलात्कारेण चोदिता ।
नास्ति मेऽन्या त्वया तुल्या सा त्वं शीघ्रतरं व्रज ॥
अवश्यं त्वेव गन्तव्यं किमर्थं मां विवक्षसि ।
शीघ्रं गच्छ त्वरस्वेति मत्प्रीतिवशमाचर ॥ ५१
न हीदृशो मम भ्राता किं त्वं समभिशङ्कसे ।
उक्त्वा चैनां बलाच्चैव विनियुज्य प्रभुत्वतः ॥५२
भाजनं प्रददौ चास्यै सपिधानं हिरण्मयम् ।
या सुजाता सुगन्धा च तामानय सुरामिति ५३
सा शङ्कमाना रुदती वेपन्ती द्रुपदात्मजा ।
दैवतेभ्यो नमस्कृत्वा श्वशुरेभ्यस्तथाऽब्रवीत् ॥५४
यथाऽहमन्यं पार्थेभ्यो नाभिजानामि मानवम् ।
तेन सत्येन मां दृष्ट्वा कीचको मा वशं नयेत् ॥ ५५
यथाऽहं पाण्डुपुत्रेभ्यः पञ्चभ्यो नान्यगामिनी ।
तेन सत्येन मां दृष्ट्वा कीचको मा वशं नयेत्५६

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः ॥ १९ ॥

कीचकगृहंप्रति प्रस्थितया द्रौपद्या तेन स्वस्यादूषणाय सूर्यादिदेवताप्रार्थना ॥ १ ॥ सूर्येण तद्रक्षणाय निगूढस्य रक्षसः प्रेषणम् ॥ २ ॥ कीचकेन द्रौपदींप्रति स्ववशीभवनयाचनम् ॥ ३ ॥ तथा तदनङ्गीकाररोषात्तस्याः पादेन ताडनम् ॥ ४ ॥ सूर्यदूतेन रक्षसा कीचकस्य भूमौ निपातनम् ॥ ५ ॥ युधिष्ठिरेण कीचकजिघांसोर्भीमस्य संकेतेन प्रतिषेधनम् ॥ ६ ॥

वैशंपायन उवाच ।
अकीर्तयत सुश्रोणी धर्मं शक्रं दिवाकरम् ।
मारुतं चाश्विनौ देवौ कुबेरं वरुणं यमम् ॥ १
रुद्रमग्निं भगं विष्णुं स्कन्दं पूषणमेव च ।

सावित्रीसहितं चापि ब्रह्माणं पर्यकीर्तयत् ॥ २
इत्येवं मृगशावाक्षी सुश्रोणी धर्मचारिणी ।
उपातिष्ठत सा सूर्यं मुहूर्तमबला तदा ॥ ३
तदस्यास्तनुमध्यायाः सर्वं सूर्योऽवबुद्धवान् ।
अन्तर्हितं ततस्तस्या रक्षो रक्षार्थमादिशत् ॥ ४
तच्चैनां नाजहात्तत्र सर्वावस्थास्वनिन्दिताम् ॥ ५
प्रतस्थे सा सुकेशान्ता त्वरमाणा पुनःपुनः ।
विलम्बमाना विवशा कीचकस्य निवेशनम् ॥ ६
तां मृगीमिव वित्रस्तां दृष्ट्वा कृष्णां समागताम् ।
उत्पपातासनात्तूर्णं नावं लब्ध्वेव पारगः ॥ ७
श्लक्ष्णं चोवाच वाक्यं स कीचकः काममूर्च्छितः ।
स्वागतं ते सुकेशान्ते सुव्युष्टा रजनी मम ॥ ८
स्वामिनी त्वमनुप्राप्ता चिरस्य भवनं शुभे ।
कुरुष्व च मयि प्रीतिं वशं चोपानयस्व माम् ॥९
प्रतिगृह्णीष्व मे भोगांस्त्वदर्थमुपकल्पितान् ।
सर्वरत्नमयीं मालां कुण्डले च हिरण्मये ॥ १०
वासांसि चन्दनं माल्यं धूपशुद्धां च वारुणीम् ।
प्रतिगृह्णीष्व भद्रं ते विहर त्वं यथेच्छसि ।
प्रीत्या मे कुरु पद्माक्षि प्रसादं प्रियदर्शने ॥ ११
स्वास्तीर्णमस्ति शयनं सितसूक्ष्मोत्तरच्छदम् ।
अत्रारुह्य मया सार्धं पिबेमां वरवारुणीम् ॥ १२
भजस्व मां विशालाक्षि भर्ता ते सदृशोस्म्यहम् ।
उपसर्प वरारोहे मेरुमर्कप्रभा यथा ॥ १३
वैशंपायन उवाच ।
स मूढः कीचकस्तत्र प्राप्तां राजीवलोचनाम् ।
अब्रवीद्द्रौपदीं दृष्ट्वा दुरात्मा ह्यात्मसंमतः ॥ १४
कीचकेनैवमुक्ता सा द्रौपदी वरवर्णिनी ।
अब्रवीत्तमनाचारं नेदृशं वक्तुमर्हसि ॥ १५
नाहं शक्या त्वया स्प्रष्टुं श्वपचेनेव ब्राह्मणी ।
गन्तुमिच्छसि दुर्बुद्धे गतिं दुर्गतरान्तराम् ॥ १६
यत्र गच्छन्ति बहवः परदाराभिमर्शकाः ।
नराः संभिन्नमर्यादाः कीटवच्चाशुभाश्रयाः ॥१७
अप्रैषीन्मां सुराहारीं सुदेष्णा त्वन्निवेशनम् ।
तस्यै नयिष्ये मदिरां भगिनी तृषिता तव ॥ १८
पिपासिता च कैकेयी तूर्णं मामादिशत्ततः ।
दीयतां मे सुरा शीघ्रं सूतपुत्र व्रजाम्यहम् ॥ १९
कीचक उवाच ।
अन्या भद्रे हरिष्यन्ति राजपुत्र्याः सुरामिमाम् ।
किं त्वं यास्यसि कल्याणि मदर्थं त्वमिहागता २०
वैशंपायन उवाच ।
इत्युक्त्वा दक्षिणे पाणौ सूतपुत्रः परामृशत् ।
सा गृहीता विधून्वन्ती भूमौ निक्षिप्य भाजनम् ।
सभां शरणमाधावद्यत्र राजा युधिष्ठिरः ॥ २१
तां कीचकः प्रधावन्तीं केशपक्षे परामृशत् ।
पातयित्वा तु तां भूमौ सूतपुत्रः पदाऽवधीत् २२
सभायां पश्यतो राज्ञो विराटस्य महात्मनः ।
ब्राह्मणानां च वृद्धानां क्षत्रियाणां च पश्यतां २३
तस्याः पादाभितप्ताया मुखाद्रुधिरमास्रवत् ॥२४
ततो दिवाकरेणाशु राक्षसः संनियोजितः ।
स कीचकमपोवाह वातवेगेन भारत ॥ २५
स पपात तदा भूमौ रक्षोबलसमीरितः ।
विघूर्णमानो निश्चेष्टश्छिन्नमूल इव द्रुमः ॥ २६
तां दृष्ट्वा तत्र ते सभ्या हाहाभूताः समन्ततः ।
न युक्तं सूतपुत्रेति कीचकेति च तेऽवदन् ।
किमियं वध्यते बाला कृपणा चाप्यबान्धवा २७
तस्यामासन्हि ते पार्थाः सभायां भ्रातरस्तथा ।
अमृष्यमाणाः कृष्णायाः कीचकेन पदा वधं २८
तां दृष्ट्वा भीमसेनस्य क्रोधादास्तमवर्तत ।
धूमोच्छ्वासः समभवन्नेत्रे चोच्छ्रितपक्ष्मणी ।
सस्वेदा भ्रुकुटी चोग्रा ललाटे समवर्तत ॥ २९
तस्य भीमो वधप्रेप्सुः कीचकस्य दुरात्मनः ।
दन्तैर्दन्तांस्तदा रोषान्निष्पिपेष महामनाः ॥ ३०
भूयः संचरितः क्रुद्धः सहसोत्थाय चासनात् ।
निरैक्षत द्रुमं दीर्घं राजानं चाप्यवैक्षत ॥ ३१
वधमाकाङ्क्षमाणं तं कीचकस्य दुरात्मनः ।
आकारेणैव भीमं स प्रत्यषेधद्युधिष्ठिरः ॥ ३२

कीटवच्च गुहाश्रया इति क. थ. पाठः ॥ १७ ॥

एकोनविंशोऽध्यायः ॥ १९ ॥

तस्य राजा शनैः संज्ञां कुन्तीपुत्रो युधिष्ठिरः ।
चकार भीमसेनस्य रोषाविष्टस्य धीमतः ॥ ३३
प्रत्याख्यानं तदा चाह कङ्को नाम युधिष्ठिरः ३४
सूद मा साहसं कार्षीः फलितोऽयं वनस्पतिः ।
नात्र शुष्काणि काष्ठानि सन्ति यानि च कानि च ॥
यदि ते दारुकृत्यं स्यान्निष्क्रम्य नगराद्बहिः ।
समूलं शातयेर्वृक्षं श्रमस्ते न भविष्यति ॥ ३६
यस्य चार्द्रस्य वृक्षस्य शीतच्छायां समाश्रयेत् ।
न तस्य पर्णं द्रुह्येत पूर्ववृत्तमनुस्मरन् ॥ ३७
न क्रोधकालसमयः सूद मा चापलं कृथाः ।
अपूर्णोऽयं द्विपक्षोनो नेदं बलवतां बहु ॥ ३८
अथाङ्गुष्ठेनावमृद्नादङ्गुष्ठं तत्र धर्मराट् ।
प्रबोधनभयाद्राज्ञो भीमं तं प्रत्यषेधयत् ॥ ३९
भीमसेनस्तु तद्वाक्यं श्रुत्वा परपुरञ्जयः ।
सहसोत्पतितं क्रोधं न्ययच्छद्धृतिमान्बलात् ।
इङ्गितज्ञः स तु भ्रातुस्तूष्णीमासीद्वृकोदरः ॥४०
भीमस्य च समारम्भं दृष्ट्वा राज्ञोऽस्य चेष्टितम् ।
द्रौपदी चाधिकं क्रोधात्प्रारुदत्सा पुनःपुनः ४१
कीचकेनानुगमनात्कृष्णा ताम्रायतेक्षणा ।
सभाद्वारमुपागम्य रुदन्ती वाक्यमब्रवीत् ॥ ४२
अवेक्षमाणा सुश्रोणी पतींस्तान्दीनचेतसः ।
आकारं परिरक्षन्ती प्रतिज्ञां धर्मसंयुताम् ।
दह्यमानेव रौद्रेण चक्षुषा द्रुपदात्मजा ॥ ४३
प्रजारक्षणशीलानां राज्ञां ह्यमिततेजसाम् ।
कार्याऽनुपालनं नित्यं धर्मे सत्ये च तिष्ठताम् ४४
स्वप्रजायां प्रजायां च विशेषं नाधिगच्छताम् ।
प्रियेष्वपि च वध्येषु समत्वं ये समाश्रिताः ॥४५
विवादेषु प्रवृत्तेषु समं कार्यानुदर्शिना ।
राज्ञा धर्मासनस्थेन जितौ लोकावुभावपि ॥ ४६
राजन्धर्मासनस्थो हि रक्ष मां त्वमनागसम् ॥४७
अहं त्वनपराध्यन्ती कीचकेन दुरात्मना ।
पश्यतस्ते महाराज हता पादेन दासिवत् ॥ ४८
त्वत्समक्षं नृपश्रेष्ठ निष्पिष्टा वसुधातले ।
अनागसं कृपार्हां मां स्त्रियं त्वं परिपालय ॥ ४९
रक्ष मां कीचकाद्भीतां धर्मं रक्ष नरेश्वर ।
मत्स्याधिप प्रजा रक्ष पिता पुत्रानिवौरसान् ५०
यस्त्वधर्मेण कार्याणि मोहात्मा कुरुते नृपः ।
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ॥ ५१
मत्स्यानां कुलजस्त्वं हि तेषां सत्यं परायणम् ।
त्वं किलैवंविधो जातः कुले धर्मपरायणे ॥ ५२
अतस्त्वाहमभिक्रन्दे शरणार्थं नराधिप ।
त्राहि मामद्य राजेन्द्र कीचकात्पापपूरुषात् ॥५३
अनाथामिह मां ज्ञात्वा कीचकः पुरुषाधमः ।
प्रहरत्येव नीचात्मा न तु धर्ममवेक्षते ॥ ५४
अकार्याणामनारम्भात्कार्याणामनुपालनात् ।
प्रजासु ये सुवृत्तास्ते स्वर्गमायान्ति भूमिपाः ५५
कार्याकार्यविशेषज्ञाः कामकारेण पार्थिवाः ।
प्रजासु किल्बिषं कृत्वा नरकं यान्त्यधोमुखाः ५६
नैव यज्ञैर्न वा दानैर्न गुरोरुपसेवनात् ।
प्राप्नुवन्ति तथा धर्मं यथा कार्यानुपालनात् ॥५७
अपि चेदं पुरा ब्रह्मा प्रोवाचेन्द्राय पृच्छते ।
द्वन्द्वं कार्यमकार्यं च लोके चासीत्परं यथा ॥५८
धर्माधर्मौ पुनर्द्वन्द्वं विनियुक्तमथापि वा ।
क्रियाणामक्रियाणां च प्रापणे पुण्यपापयोः ॥५९
प्रजायां सृज्यमानायां पुरा ह्येतदुदाहृतम् ।
एतद्वो मानुषाः सम्यक्कार्यं द्वन्द्वत्रयं भुवि ॥ ६०
अस्मिन्सुनीते दुर्नीते लभते कर्मजं फलम् ।
कल्याणकारी कल्याणं पापकारी च पापकम् ६१
तेन गच्छति संसर्गं स्वर्गाय नरकाय वा ।
सुकृतं दुष्कृतं वाऽपि कृत्वा मोहेन मानवः ।
पश्चात्तापेन तप्येत स्वबुद्ध्या मरणं गतः ॥ ६२
एवमुक्त्वा परं वाक्यं विससर्ज शतक्रतुम् ।
शक्रोप्यापृच्छ्य ब्रह्माणं देवराज्यमपालयत् ॥६३
यथोक्तं देवराजेन ब्रह्मणा परमेष्ठिना ।
तथा त्वमपि राजेन्द्र कार्याकार्ये स्थिरो भव ॥ ६४

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः ॥ २० ॥

विराटेन कीचकस्य दण्डाप्रयोगाद्रुष्टया द्रौपद्या तंप्रत्युपालम्भनम् ॥ १ ॥ युधिष्ठिरेण द्रौपद्याः सान्त्वनम् ॥ २ ॥ द्रौपद्याऽज्ञानादिव स्वशोकहेतुं पृच्छन्तीं सुदेष्णांप्रति गन्धर्वैः कीचकवधस्य भावित्वकथनम् ॥ ३ ॥

वैशंपायन उवाच ।
एवं विलपमानायां पाञ्चाल्यां मत्स्यपुङ्गवः ।
अशक्तः कीचकं तत्र शासितुं बलदर्पितम् ।
विराटराजः सूतं तु सान्त्वेनैव न्यवारयत् ॥ १
कीचकं मत्स्यराजेन कृतागसमनिन्दिता ।
नापराधानुरूपेण दण्डेन प्रतिपादितम् ॥ २
पाञ्चालराजस्य सुता दृष्ट्वा सुरसुतोपमा ।
धर्मज्ञा व्यवहाराणां कीचके कृतकिल्बिषे ।
पुनः प्रोवाच राजानं स्मरन्ती धर्ममुत्तमम् ॥ ३
संप्रेक्ष्य च वरारोहा सर्वांस्तत्र सभासदः ।
राजानुवर्तनपरान्कीचकं च कृतागसम् ।
विराटं चाह पाञ्चाली दुःखेनाविष्टचेतना ॥ ४
न राजन्राजवत्किंचित्समाचरसि कीचके ।
दस्यूनामिव ते धर्मो न सत्सु परिवर्तते ॥ ५
न कीचकः स्वधर्मस्थो न च मत्स्यः कथंचन ।
सभासदोऽप्यधर्मज्ञा य इमं पर्युपासते ॥ ६
न धर्मं कीचको वेत्ति राजभृत्यास्तथैव च ।
न राजा विनयं ब्रूते अमात्याश्च न जानते ॥ ७
नोपालभे त्वां नृपते विराटं नृपसंसदि ।
नाहमेतेन युक्ता वै हन्तुं मात्स्य तवान्तिके ॥ ८
सभासदस्तु पश्यन्तु कीचकं धर्मलङ्घिनम् ।
विराटनृपते पश्य मामनाथामनागसम् ॥ ९
न साम फलते दुष्टे दुष्टे दण्डः प्रयुज्यते ॥ १०
अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
स राजा न भवेल्लोके राजशब्दस्य भाजनम् ॥ ११
दीनान्धकृपणाशक्तपङ्गुकुब्जजडादिकान् ।
अनाथबालवृद्धांश्च पुरुषान्वा स्त्रियोऽपि वा ।
दुष्टचोराभिभूतांश्च पालयेदवनीपतिः ॥ १२
अनाथानां च नाथः स्यादपितॄणां पिता नृपः ।
माता भवेदमातॄणामगुरूणां गुरुर्भवेत् ।
अगतीनां गती राजा नृणां राजा परायणम् ॥ १३
विशेषतः परैर्दुष्टैः परामृष्टां नरोत्तमः ।
स्त्रियं साध्वीमनाथां च पालयेत्स्वसुतामिव ॥ १४
त्वद्गृहावसतिं राजन्नेतावत्कालपर्ययम् ।
अधिकां त्वत्सुतायाश्च पश्य मां कीचकाहतां १५
विराट उवाच ।
परोक्षं नाभिजानामि विग्रहं युवयोरहम् ।
अर्थतत्त्वमविज्ञाय किं स्यादकुशलं मम ॥ १६
द्रौपद्युवाच ।
येषां न वैरी स्वपिति पदा भूमिमुपस्पृशन् ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् १७
ये च दद्युर्न याचेयुर्ब्रह्मण्याः सत्यवादिनः ।
येषां दुन्दुभिनिर्घोषो ज्याघोषः श्रूयते भृशम् ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत् ॥१८
तेजस्विनस्तथा क्षान्ता बलवन्तश्च मानिनः ।
महेष्वासा रणे शूरा गर्विता मानतत्पराः ।
तेषां मां मानिनीं भार्यां सूतपुत्रः पदाऽवधीत् १९
सर्वलोकमिमं हन्युर्यदि क्रुद्धा महाबलाः ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत्२०
येषां नास्ति समः कश्चिद्वीर्ये सत्ये बले दमे ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत् ॥२१
येषां न सदृशः कश्चिद्धनाढ्यैर्भुवि मानवः ।
तेषां मां दयितां भार्यां सूतपुत्रः पदाऽवधीत् २२
तवाग्रतो विशेषेण प्रजानां च हितैषिणः ।
पश्यतो निहता राजंस्तेनेह जगतीपते ॥ २३
शरणं ये प्रपन्नानां भवन्ति शरणार्थिनाम् ।
चरन्ति लोके प्रच्छन्नाः क्व नु तेऽद्य महाबलाः २४
कथं ते सूतपुत्रेण वध्यमानां प्रियां सतीम् ।
मर्षयन्ति यथा क्लीबा बलवन्तोऽतितेजसः ॥ २५
क्व नु तेषाममर्षश्च वीर्यं तेषां च तद्बलम् ।
न परीप्सन्ति ये भार्यां वध्यमानां दुरात्मना २६
मयाऽपि शक्यं किं कर्तुं विराटे धर्मदूषणे ।

मां मर्षयति यः पश्यन्वध्यमानामनागसम् ॥ २७
धर्मो विद्धो ह्यधर्मेण सभां यत्रोपतिष्ठति ।
न चेद्विशल्यः क्रियते सर्वे विद्धाः सभासदः ॥२८
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥ २९
वैशंपायन उवाच ।
तस्यास्तत्कृपणं श्रुत्वा सैरन्ध्र्याः परिदेवितम् ।
ततः सभ्यास्तु ते सर्वे भूयः कृष्णामपूजयन् ।
साधुसाध्विति चाप्याहुः कीचकं चाप्यगर्हयन्३०
केचित्कृष्णां प्रशंसन्ति केचिन्निन्दन्ति कीचकम् ।
केचिन्निन्दन्ति राजानं केचिद्देवीं च तां नराः ३१
सभ्या ऊचुः ।
यस्येयं चारुसर्वाङ्गी भार्या स्यादायतेक्षणा ।
परो लाभश्च तस्य स्यान्न स शोचेत्कदाचन ॥ ३२
यस्या गात्रं शुभं पीनं मुखं जयति पङ्कजम् ।
गतिर्हंसं स्मितं कुन्दं सैषा नार्हति पद्वधम् ॥ ३३
द्वात्रिंशद्दशना यस्याः श्वेता मांसनिबन्धनाः ।
स्निग्धाश्च मृदवः केशाः सैषा नार्हति पद्वधम् ३४
पद्मं चक्रं ध्वजं शङ्खं प्रासादो मकरस्तथा ।
यस्याः पाणितले सन्ति सैषा नार्हति पद्वधम्॥३५
आवर्ताः खलु चत्वारः सर्वे चैव प्रदक्षिणाः ।
समं गात्रं शुभं स्निग्धं यस्या नार्हति पद्वधम्॥३६
अच्छिद्रहस्तपादा च अच्छिद्रदशना च या ।
कन्या कमलपत्राक्षी कथमर्हति पद्वधम् ॥ ३७
सेयं लक्षणसंपन्ना पूर्णचन्द्रनिभानना ।
सुरूपिणी सुवदना नेयं योग्या पदा वधम् ॥ ३८
देवदेवीव सुभगा शक्रदेवीव शोभना ।
अप्सरा इव सारूप्यान्नेयं योग्या पदा वधम् ३९
इति सापूजयंस्तत्र कृष्णां प्रेक्ष्य सभासदः ॥ ४०
सा विनिःश्वस्य सुश्रोणी भूमावन्तर्मुखी स्थिता ।
तूष्णीमासीत्तदा दृष्ट्वा विवक्षन्तं युधिष्ठिरम् ॥ ४१
युधिष्ठिरस्य कोपात्तु ललाटे स्वेद आस्रवत् ।
अब्रवीद्धर्मपुत्रोऽथ सैरन्ध्रीं महिषीं प्रियाम् ।
कृष्णां तत्र नृपाभ्याशे परिव्राजकरूपधृत् ॥ ४२
गच्छ सैरन्ध्रि मा भैस्त्वं सुदेष्णाया निवेशनम् ।
राजा ह्ययं धर्मशीलो विराटः परलोकभीः ।
यतस्त्वां न परित्राति सत्ये धर्मपथे स्थितः ॥ ४३
भर्तारमनुरुन्धन्त्यः क्लिश्यन्ते वीरपत्नयः ।
शुश्रूषया क्लिश्यमानाः पतिलोकं जयन्त्युत ॥ ४४
मन्ये न कालः क्रोधस्य पश्यन्ति पतयस्तव ।
तेन त्वां नाभिधावन्ति गन्धर्वाः सूर्यवर्चसः ४५
श्रूयन्तां ते सुकेशान्ते मोक्षधर्माश्रयाः कथाः ।
यथा धर्मः कुलस्त्रीणां दृष्टो धर्मानुरोधनात् ॥४६
नास्ति यज्ञः स्त्रियाः कश्चिन्न श्राद्धं नाप्युपोषणम् ।
या तु भर्तरि शुश्रूषा सा स्वर्गायाभिजायते ॥४७
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति॥४८
भीरु भर्तृभयात्पत्न्यो न क्रुध्यन्ति कदाचन ।
बहुभिश्च परिक्लेशैरवज्ञाताश्च शत्रुभिः ।
अनन्यभावाः शुद्धाश्च पुण्यलोकं जयन्त्युत ॥४९
न क्रोधकालं नियतं पश्यन्ति पतयस्तव ।
न क्रुद्धान्प्रतियायाद्धि पतींस्ते वृत्रहा अपि ।
तेन त्वां नाभिधावन्ति गन्धर्वाः कामरूपिणः ५०
यदि ते समयः कश्चित्कृतो ह्यायतलोचने ।
तं स्मरस्व क्षमाशीले क्षमा धर्मो ह्यनुत्तमः ॥ ५१
क्षमा धर्मः क्षमा सत्यं क्षमा दानं क्षमा तपः ।
क्षमावतामयं लोकः परलोकः क्षमावताम् ॥ ५२
त्र्यंशिनो द्वादशाङ्गस्य चतुर्विंशतिपर्वणः ।
कस्त्रिषष्टिशतारस्य मासोनस्याक्षमी भवेत् ॥ ५३
गच्छ सैरन्ध्रि गन्धर्वाः करिष्यन्ति तव प्रियम् ।
व्यपनेष्यन्ति ते दुःखं येन ते विप्रियं कृतम्॥५४
इत्येवमुक्ते तिष्ठन्तीं पुनरेवाह धर्मराट् ।
विघ्नं करोषि वै भद्रे दीव्यतां राजसंसदि ॥ ५५
तस्मात्त्वमपि सुश्रोणि शैलूषीव विभासि नः ।
एवमुक्ता तु सा भर्त्रा समुद्वीक्ष्याब्रवीदिदम् ५६
सत्यमुक्तं त्वया विद्वञ्शैलूषीं विद्धि मां पुनः ।
शैलूषकस्य तस्याहं येषां ज्येष्ठोऽक्षकोविदः ॥५७
एवमुक्त्वा वरारोहा परिमृज्याननं शुभम् ।

केशान्विमुक्तान्संयम्य रुधिरेण समुक्षितान् ॥ ५८
पांसुकुण्ठितसर्वाङ्गी गजराजवधूरिव ।
प्रतस्थे नागनासोरूर्भर्तुराज्ञाय शासनम् ॥ ५९
विमुक्ता मृगशावाक्षी निरन्तरपयोधरा ।
प्रभा नक्षत्रराजस्य कालमेघैरिवावृता ॥ ६०
यस्यार्थे पाण्डवेयास्तु त्यजेयुरपि जीवितम् ।
तां ते दृष्ट्वा तथा कृष्णां क्षमिणो धर्मचारिणः ।
समयं नातिवर्तन्ते वेलामिव महोदधिः ॥ ६१
सा प्रविश्य प्रवेपन्ती सुदेष्णाया निवेशनम् ।
रुदन्ती चारुसर्वाङ्गी तस्यास्तस्थावथाग्रतः ॥ ६२
तामुवाच विराटस्य महिषी शाठ्यमास्थिता ।
किमिदं पद्मसंकाशं सुदन्तोष्ठाक्षिनासिकम् ॥६३
रुदन्त्या अवमृष्टास्त्रं पूर्णेन्दुसमवर्चसम् ।
बिम्बोष्ठं कृष्णताराभ्यामत्यन्तरुचिरप्रभम् ।
नयनाभ्यामजिह्माभ्यां मुखं ते मुञ्चते जलम् ६४
कस्त्वाऽवधीद्वरारोहे कस्माद्रोदिषि शोभने ।
को विप्रयुज्यते दारैः सपुत्रैः सहबान्धवैः ॥ ६५
कस्याद्य राजा कुपितो वधमाज्ञापयिष्यति ।
ब्रूहि किं ते प्रियं कर्म कं त्यजे घातयामि वा ६६
वैशंपायन उवाच ।
तां निःश्वस्याब्रवीत्कृष्णा जानन्ती नाम पृच्छसि।
भ्रातुस्त्वं मामनुप्रेष्य किमेवं हि विकत्थसे ॥६७
कीचको माऽवधीत्तत्र सुराहारीमितोगताम् ।
सभायां पश्यतो राज्ञो यथा वै निर्जने वने ॥६८
सुदेष्णोवाच ।
घातयामि सुदन्तोष्ठि कीचकं यदि मन्यसे ।
भ्राता यद्येष मे व्यक्तं योऽतीतो धर्मचारिणीम् ।
यस्त्वां कामाभिभूतात्मा दुर्लभामवमन्यते ॥६९
द्रौपद्युवाच ।
अद्यैव तं हनिष्यन्ति येषामागस्करो हि सः ।
मन्येऽहमद्य वा श्वो वा परलोकं गमिष्यति ॥ ७०
भ्रातुः प्रयच्छ त्वरिता जीवच्छ्राद्धं त्वमद्य वै ।
सुहृष्टं कुरु वै चैनं नासून्मन्ये धरिष्यति ॥ ७१
तेषां हि मम भर्तॄणां पञ्चानां धर्मचारिणाम् ।
एको दुर्धर्षणोऽत्यर्थं बले चाप्रतिमो भुवि ॥ ७२
निर्मनुष्यमिमं लोकं कुर्यात्क्रुद्धो निशामिमाम् ।
न स संक्रुध्यते तावद्गन्धर्वः कामरूपधृत् ॥ ७३
नूनं ज्ञास्यति यावद्वै ममैतत्पादघातनम् ।
तत्क्षणात्कीचकः पापः सपुत्रभ्रातृबान्धवः ।
विनशिष्यति दुष्टात्मा यथा दुष्कृतकर्मकृत् ॥ ७४
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः ।
एकस्तु कुरुते पापं कालपाशवशं गतः ।
नीचेनात्मापराधेन कुलं तेन विनश्यति ॥ ७५
वैशंपायन उवाच ।
सुदेष्णामेवमुक्त्वा तु सैरन्ध्री दुःखमोहिता ।
कीचकस्य वधार्थाय व्रतदीक्षामुपागमत् ॥ ७६
अभ्यर्थिता च नारीभिर्मानिता च सुदेष्णया ।
न च स्नाति न चाश्नाति न पांसून्परिमार्जति ।
रुधिरक्लिन्नवदना बभूव मृदितेक्षणा ॥ ७७
तां तथा शोकसन्तप्तां दृष्ट्वा प्ररुदितां स्त्रियः ।
कीचकस्य वधं सर्वा मनोभिश्च शशंसिरे ॥ ७८

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः ॥ २१ ॥

वैशंपायनेन जनमेजयंप्रति कीचकोत्पत्तिप्रकारादिकथनम् ॥ १ ॥

जनमेजय उवाच ।
अहो दुःखतरं प्राप्ता कीचकेन पदा हता ।
पतिव्रता महाभागा द्रौपदी योषितांवरा ॥ १
दुःशलां स्मारयन्ती सा भर्तॄणां भगिनीं शुभाम् ।
नाशपतिसिन्धुराजं सा बलात्कारेण वाहिता ॥ २
किमर्थमिह संप्राप्ता कीचकेन दुरात्मना ।
नाशपत्तं महाभागा कृष्णा पादेन ताडिता ॥ ३
तेजोराशिरियं देवी धर्मज्ञा सत्यवादिनी ।

केशपाशे परामृष्टा मर्षयन्ती ह्यशक्तवत् ॥ ४
नैतत्कारणमल्पं हि श्रोतुकामोऽस्मि सत्तम ।
कृष्णायास्तु परिक्लेशान्मनो मे दूयते भृशम् ॥ ५
कस्य वंशे समुद्भूतः स च दुर्ललितो मुने ।
बलोन्मत्तः कथं चासीत्स्यालो मात्स्यस्य कीचकः ६
दृष्ट्वापि तां प्रियां भार्यां सूतपुत्रेण ताडिताम् ।
नैव चुक्षुभिरे वीराः किमकुर्वन्त तं प्रति ॥ ७
वैशंपायन उवाच ।
त्वदुक्तोऽयमनुप्रश्नः कुरूणां कीर्तिवर्धनः ।
एतत्सर्वं यथा वक्ष्ये विस्तरेणेह पार्थिव ॥ ८
ब्राह्मण्यां क्षत्रियाज्जातः सूतो भवति पार्थिव ।
प्रातिलोम्येन जातानां स ह्येको द्विज एव तु ॥ ९
रथकारमितीमं हि क्रियायुक्तं द्विजन्मनाम् ।
क्षत्रियादवरो वैश्याद्विशिष्ट इति चक्षते ॥ १०
सह सूतेन संबन्धः कृतः पूर्वं नराधिपैः ।
तेन तु प्रातिलोम्येन राजशब्दो न लभ्यते ॥ ११
तेषां तु सूतविषयः सूतानां नामतः कृतः ।
उपजीव्यं च यत्क्षेत्रं राजन्सूतेन वै पुरा ॥ १२
सूतानामधिपो राजा केकयो नाम विश्रुतः ।
राजकन्यासमुद्भूतः सारथ्येऽनुपमोऽभवत् ॥ १३
पुत्रास्तस्य कुरुश्रेष्ठ मालव्यां जज्ञिरे तदा ।
कीचका इति विख्याताः शतं षट् चैव भारत १४
तेषामासीद्बलश्रेष्ठः कीचकः सर्वजित्प्रभो ।
अग्रजो बलसंमत्तस्तेनासीत्सूतषट्शतम् ॥ १५
मालव्या एव कौरव्य तत्र ह्यवरजाऽभवत् ।
तस्यां केकयराज्ञस्तु सुदेष्णा दुहिताऽभवत् ॥ १६
तां विराटस्य मात्स्यस्य केकयः प्रददौ मुदा ।
सुरथायां मृतायां तु कौसल्यां श्वेतमातरि ॥ १७
श्वेते विनष्टे शङ्खे च गते मातुलवेश्मनि ।
सुदेष्णां महिषीं लब्ध्वा राजा दुःखमपानुदत् १८
उत्तरं चोत्तरां चैव विराटात्पृथिवीपते ।
सुदेष्णा सुषुवे देवी कैकेयी कुलवृद्धये ॥ १९
मातृष्वसृसुतां राजन्कीचकस्तामनिन्दिताम् ।
सदा परिचरन्प्रीत्या विराटे न्यवसत्सुखी ॥ २०
भ्रातरश्चास्य विक्रान्ताः सर्वे च तमनुव्रताः ।
विराटस्यैव संहृष्टा बलं कोशं त्ववर्धयन् ॥ २१
कालेया नाम ते दैत्याः प्रायशो भुवि विश्रुताः ।
जज्ञिरे कीचका राजन्बाणो ज्येष्ठस्तथाऽभवत् २२
स हि सर्वास्त्रसंपन्नो बलवान्भीमविक्रमः ।
कीचको नष्टमर्यादो बभूव भयदो नृणाम् ॥ २३
तं प्राप्य बलसंमत्तं विराटः पृथिवीपतिः ।
जिगाय सर्वांश्च रिपून्यथेन्द्रो दानवान्पुरा ॥ २४
मेखलांश्च त्रिगर्तांश्च दशार्णांश्च कशेरुकान् ।
मालवांश्चैव यवनान्सिलिन्दान्काशिकोसलान् २५
करदांश्च निषिद्धांश्च शिवान्मचुलकांस्तथा ।
पुलिन्दांश्च कलिङ्गांश्च तङ्कणान्परतङ्कणान् ॥ २६
अन्ये च बहवः शूरा नानाजनपदेश्वराः ।
कीचकेन रणे भग्ना विद्रवन्ति दिशो दश ॥ २७
तमेववीर्यसंपन्नं नागायुतसमं बले ।
विराटस्तत्र सेनायाश्चकार पतिमात्मनः ॥ २८
विराटभ्रातरश्चैव दश दाशरथेः समाः ।
ते चैनानन्ववर्तन्त कीचकान्बलवत्तरान् ॥ २९
एवंविधबलो भीमः कीचकस्ते च तद्विधाः ।
राज्ञः स्याला महात्मानो विराटस्य हितैषिणः ३०
एतत्ते कथितं सर्वं कीचकस्य पराक्रमम् ।
द्रौपदी न शशापैनं यस्मात्तद्वदतः शृणु ॥ ३१
रक्षन्ति हि तपः क्रोधादृषयो न शपन्ति च ।
जानन्ती तद्यथातत्त्वं द्रौपदी न शशाप तम् ॥३२
क्षमा धर्मः क्षमा दानं क्षमा यज्ञः क्षमा तपः ।
क्षमा सत्यं क्षमा शीलं क्षमा सर्वमिति श्रुतिः ३३
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
एतत्सर्वं विजानन्ती सा क्षमामन्वपद्यत ॥ ३४
भर्तॄणां मतमाज्ञाय क्षमिणां धर्मचारिणाम् ।
नाशपत्तं विशालाक्षी सती शक्ताऽपि भारत ३५
पाण्डवाश्चापि ते सर्वे द्रौपदीं प्रेक्ष्य दुःखिताम् ।
क्रोधाग्निनाऽप्यदह्यन्त तदा लज्जाव्यपेक्षया ॥३६

एकविंशोऽध्यायः ॥ २१ ॥

विनष्टे अदर्शनं गते ॥ १८ ॥

अथ भीमो महाबाहुः सूदयिष्यंस्तु कीचकम् ।
वारितो धर्मपुत्रेण वेलयेव महोदधिः ॥ ३७
संधार्य मनसा रोषं दिवारात्रं विनिश्वसन् ।
महानसे तदा कृच्छ्रात्सुष्वाप रजनीं च ताम् ३८

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ॥ २२ ॥

कीचकं जिघांसन्त्या द्रौपद्या रात्रौ महानसमेत्य स्वपतो भीमस्य प्रबोधनम् ॥ १ ॥ तथा कीचकमारणाभावे स्वप्राणविमोक्षणप्रतिज्ञानम् ॥ २ ॥ तथा युधिष्ठिरादीन्प्रति प्रत्येकं नामनिर्देशपूर्वकमनुशोचनम् ॥ ३ ॥

वैशंपायन उवाच ।
सा सूतपुत्राभिहता राजपुत्री सुदुःखिता ।
वधं कृष्णा परीप्सन्ती सूतपुत्रस्य भामिनी ॥ १
जगामावासमेवाथ तदा सा द्रुपदात्मजा ।
कृत्वा शौचं यथान्यायं कृष्णा सा तनुमध्यमा ॥२
गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा ।
चिन्तयामास रुदती तस्य दुःखस्य निर्णयम् ॥ ३
किं करोमि क्व गच्छामि कथं कार्यं भवेन्मम ।
इत्येवं चिन्तयित्वा सा भीमं तं मनसाऽगमत् ।
अन्यः कर्ता विना भीमान्न मेऽद्य मनसेप्सितम् ४
प्रादुर्भूते क्षणे रात्रौ विहाय शयनं स्वकम् ।
दुःखेन महता युक्ता मानसेन मनस्विनी ।
प्राद्रवन्नाथमिच्छन्ती तथा नाथवती सती ॥ ५
सा वै महानसं प्राप्य भीमसेनं शुचिस्मिता ।
उपासर्पत पाञ्चाली वासितेव महागजम् ॥ ६
सर्वश्वेतेव माहेयी वने वृद्धा त्रिहायणी ।
महर्षभं यथा सुप्तमर्थिनी वननिर्झरे ।
संप्रसुप्तं तथा सिंहं मृगराजवधूरिव ॥ ७
अभिप्रसार्य बाहुभ्यां पतिं सुप्तं समाश्लिषत् ।
सुजातं गोमतीतीरे सालं वल्लीव पुष्पिता ॥ ८
परिस्पृश्य च पाणिभ्यां पतिं सुप्तमबोधयत् ।
श्रीरिवान्या महोत्साहं सुप्तं विष्णुमिवार्णवे ।
क्षौमावदाते शयने शयानं वृषभेक्षणम् ॥ ९
यथा शची देवराजं रुद्राणी शंकरं यथा ।
ब्रह्माणमिव सावित्री देवसेना गुहं यथा ॥ १०
दिशागजसमाकारं गजं गजवधूरिव ।
भीमं प्राबोधयत्कान्ता लक्ष्मीर्दामोदरं यथा ॥ ११
वीणेव मधुरालापा स्वरं गान्धारमाश्रिता ।
अभ्यभाषत पाञ्चाली कौरवं पाण्डुनन्दनम् ॥ १२
उत्तिष्ठोत्तिष्ठ किं शेषे भीमसेन मृतो यथा ।
न मृतः स हि पापीयान्भार्यामालम्भ्य जीवति १३
तस्मिञ्जीवति पापिष्ठे सेनावाहे मम द्विषि ।
तत्कर्म कृतवत्यद्य कथं निद्रां निषेवसे ॥ १४
वैशंपायन उवाच ।
सुखसुप्तश्च तं शब्दं निशम्य स वृकोदरः ।
संवेदितः कुरुश्रेष्ठः तोत्रैरिव महागजः ॥ १५
स वै विहाय शयनं यस्मिन्सुप्तः प्रबोधितः ।
उदतिष्ठदमेयात्मा पर्यङ्के सोत्तरच्छदे ॥ १६
उपवेश्य च दुर्धर्षः पाञ्चालकुलवर्धनीम् ।
अथाब्रवीद्राजपुत्रीं कौरव्यो महिषीं प्रियाम् ॥१७
केनार्थेन च संप्राप्ता त्वरितेव ममान्तिकम् ।
न ते प्रकृतिमान्वर्णः कृशा त्वमभिलक्ष्यसे ॥१८
प्रकाशं यदि वा गुह्यं सर्वमाख्यातुमर्हसि ।
आचक्ष्व त्वमशेषेण सर्वं विद्यामहं यथा ॥ १९
सुखं वा यदि वा दुःखं शुभं वा यदि वाऽशुभम् ।
यद्यप्यसुकरं कर्म कृतमित्यवधारय ॥ २०
अहमेव हि ते कृष्णे विश्वास्यः सर्वकर्मसु ।
अहमापत्सु चापि त्वां मोक्षयामि पुनःपुनः २१
शीघ्रमुक्त्वा यथाकामं यत्ते कार्यं विवक्षितम् ।
गच्छ वै शयनायैव यावदन्यो न बुध्यते ॥ २२

सर्वश्वेता बकी इति नीलकण्ठः ॥ ७ ॥ यथा षष्ठी गुहं तथा इति ख. पाठः ॥ १० ॥ नामृतस्य हि पापीयान्भार्यामालभ्य जीवतीति झ. पाठः ॥ १३ ॥

वैशंपायन उवाच ।
सा लज्जमाना भीता च अधोमुखमुखी ततः ।
नोवाच किंचिद्वचनं बाष्पदूषितलोचना ॥ २३
अथाब्रवीद्भीमपराक्रमो बली
वृकोदरः पाण्डवमुख्यसंमतः ।
प्रब्रूहि किं ते करवाणि सुन्दरि
प्रियं प्रिये वारणमत्तगामिनि ॥ २४
द्रौपद्युवाच ।
अशोच्यता कुतस्तस्या यस्या भर्ता युधिष्ठिरः ।
जानन्सर्वाणि दुःखानि किं मां भीमानुपृच्छसि॥
यन्मां दासीप्रवादेन प्रातिकामी तदाऽनयत् ।
सभायां परिषन्मध्ये तन्मे मर्माणि कृन्तति ॥ २६
विकृष्टा हास्तिनपुरे सभायां राजसंसदि ।
दुःशासनेन केशान्ते परामृष्टा रजस्वला ॥ २७
क्षत्रियैस्तत्र कर्णाद्यैर्दृष्टा दुर्योधनेन च ।
श्वशुराभ्यां च भीष्मेण विदुरेण च धीमता ।
द्रोणेन च महाबाहो कृपेण च परंतप ॥ २८
साऽहं श्वशुरयोर्मध्ये भ्रातृमध्ये च पाण्डव ।
केशे गृहीत्वा च सभां नीता जीवति वै त्वयि २९
विप्रमुक्ता ततश्चाहं वने राज्याद्वनं गता ।
साऽहं वने दुर्वसतिं वसती त्वध्वकर्शिता ।
जटासुरपरिक्लेशात्प्राप्तापि सुमहद्भयम् ॥ ३०
पार्थिवस्य सुता नाम कानु जीवेत मादृशी ।
अनुभूय भृशं दुःखमन्यत्र द्रौपदीं प्रभो ॥ ३१
वनवासगता चाहं सैन्धवेन दुरात्मना ।
परामृष्टा द्वितीयं च सोढुमुत्सहते नु का ॥ ३२
पद्भ्यां पर्यचरं चाहं देशान्विषमसंस्थितान् ।
दुर्गान्श्वापदसंकीर्णांस्त्वयि जीवति पाण्डवे॥३३
ततोऽहं द्वादशे वर्षे वन्यमूलफलाशना ।
इदं पुरमनुप्राप्ता सुदेष्णापरिचारिका ।
परस्त्रियमुपातिष्ठे सत्यधर्मपरायणा ॥ ३४
गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम् ।
नित्यं पिषे विराटस्य त्वयि जीवति पाण्डव ३५
साऽहं बहूनि दुःखानि गणयामि न ते कृते॥३६
मत्स्यराजसमक्षं तु तस्य धूर्तस्य पश्यतः ।
कीचकेन पदा स्पृष्टा का नु जीवेत मादृशी॥३७
एवं बहुविधैर्दुःखैः क्लिश्यमाना च पाण्डव ।
न मां जानासि कौन्तेय किं फलं जीवितेन मे३८
द्रुपदस्य सुता चाहं धृष्टद्युम्नस्य चानुजा ।
अग्निकुण्डात्समुद्भूता नोर्व्यां जातु चराम्यहम् ३९
कीचकं चेन्न हन्यास्त्वं ग्रीवां बद्ध्वा जले प्रिये ।
विषमालोड्य पास्यामि प्रवेक्ष्याम्यथवाऽनलं॥४०
आत्मानं नाशयिष्यामि वृक्षमारुह्य वा पते ।
शस्त्रेणाङ्गं च भेत्स्यामि किं फलं जीवितेन मे ४१
योऽयं राज्ञो विराटस्य कीचको नाम भारत ।
सेनानीः पुरुषव्याघ्र स्यालः परमदुर्मतिः ॥ ४२
स मां सैरन्ध्रिवेषेण वसन्तीं राजवेश्मनि ।
नित्यमेवाह दुष्टात्मा भार्या मम भवेति वै ॥४३
तेनैवमुच्यमानाया वधार्हेणारिसूदन ।
कालेनेव फलं पक्वं हृदयं मे विदीर्यते ॥ ४४
शरणं भव कौन्तेय मा स्म गच्छे युधिष्ठिरम् ।
निरुद्योगं निरामर्षं निर्वीर्यमरिमर्दन ॥ ४५
मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम् ४६
विजानामि तवामर्षं बलं वीर्यं च पाण्डव ।
ततोऽहं परिदेवामि चाग्रतस्ते महाबल ॥ ४७
यथा यूथपतिर्मत्तः कुञ्जरः षाष्टिहायनः ।
भूमौ निपतितं बिल्वं पद्भ्यामाक्रम्य पीडयेत् ४८
तथैव च शिरस्तस्य निपात्य धरणीतले ।
वामेन पुरुषव्याघ्र मर्द पादेन पाण्डव ॥ ४९
स चेदुद्यन्तमादित्यं प्रातरुत्थाय पश्यति ।
कीचकः शर्वरीं व्युष्टां नाहं जीवितुमुत्सहे ॥ ५०
शापितोसि मम प्राणैः सुकृतेनार्जुनस्य च ।
युधिष्ठिरस्य पादाभ्यां यमयोर्जीवितेन च ।
कीचकस्य वधं नाद्य प्रतिजानासि भारत ॥ ५१
भ्रातरं च विगर्हस्व ज्येष्ठं दुर्द्यूतदेविनम् ।
यस्यास्मि कर्मणा प्राप्ता दुःखमेतदनन्तकम् ॥५२
येषां मुख्यतमो ज्येष्ठो भवेत्तु कुलपांसनः ।
भ्रातरं परमन्वीयुस्तेऽपि शालीनबुद्धयः ॥ ५३

को हि राज्यं परित्यज्य सपुत्रपशुबान्धवम् ।
प्रव्रजेत महारण्यमजिनैः परिवारितः ॥ ५४
यदि निष्कसहस्राणि यद्वाऽन्यत्सारवद्धनम् ।
सायं प्रातरदेविष्यदपि संवत्सरायुतम् ॥ ५५
रुक्मं हिरण्यं वासांसि यानं युग्यमजाविकम् ।
अश्वाश्वतरसङ्घाश्च न जातु क्षयमाव्रजेत् ॥ ५६
सोयं द्यूतप्रवादेन श्रियश्चैवावरोपितः ।
तूष्णीमास्ते यथा मूढः स्वानि कर्माणि चिन्तयन् ॥
पुरा दशसहस्राणि दन्तिनां वाजिनामपि ।
यं यान्तमनुयान्ति स्म सोयं द्यूतेन जीवति ॥ ५८
तत्र शतसहस्राणि स्त्रीणाममिततेजसाम् ।
उपासते स्म राजानमिन्द्रप्रस्थे युधिष्ठिरम् ॥ ५९
शतं दासीसहस्राणां यस्य नित्यं महानसे ।
पात्रहस्ता दिवारात्रमतिथीन्भोजयन्त्युत ॥ ६०
एष निष्कसहस्राणि दत्त्वा प्रातर्दिनेदिने ।
द्यूतजेन ह्यनर्थेन महता समुपावृतः ॥ ६१
एनं सुस्वरसंपन्ना बहवः सूतमागधाः ।
सुप्तं प्रातरुपातिष्ठन्सुमृष्टमणिकुण्डलाः ॥ ६२
[*सहस्रं वालखिल्यानां सहस्रमुदवासिनाम् ।
सहस्रमश्मकुट्टानां सहस्रं वायुभोजिनाम् ॥ ६३
सहस्रं मुनिपत्नीनां सहस्रं ब्रह्मचारिणाम् ।
सहस्रं मौनशीलानां सहस्रं गृहमेधिनाम् ॥ ६४
हंसाः परमहंसाश्च योगिनश्च द्विजातयः ।
कुटीरकाः परिव्राजो ये चान्ये वनचारिणः ॥६५
संविभक्तात्मकाश्चैव बहवश्चोर्ध्वरेतसः ।
चतुर्वेदविदो विप्राः शिक्षामीमांसपारगाः ।
क्रमपाठाश्च ये विप्राः सामाध्यायनिकाश्च ये॥]६६
सहस्रमृषयो यस्य नित्यमासन्सभासदः ।
तपःश्रुतोपसंपन्नाः सर्वकामैरुपास्थिताः ॥ ६७
अन्धान्वृद्धाननाथांस्तु सर्वराष्ट्रेषु दुःखितान् ।
बिभर्त्यन्नार्थिनो नित्यमानृशंस्याद्युधिष्ठिरः ॥ ६८
स एष निलयं प्राप्तो मत्स्यस्य परिचारकः ।
सभायां विनतो राज्ञः कङ्को नाम युधिष्ठिरः ६९
इन्द्रप्रस्थे निवसतः समये यस्य पार्थिवाः ।
आसन्बलिकराः सर्वे सोन्येभ्यो भृतिमिच्छति ७०
पार्थिवाः पृथिवीपाला यस्यासन्वशवर्तिनः ।
स वशे विवशो राज्ञां परेषामद्य वर्तते ॥ ७१
संप्राप्य पृथिवीं कृत्स्नां रश्मिवानिव तेजसा ।
सोद्य राज्ञो विराटस्य सभास्तारो युधिष्ठिरः ॥७२
यमुपासत राजानं सभायामृषिसत्तमाः ।
तमुपासीनमद्यान्यं पश्य पाण्डव पाण्डवम् ॥ ७३
अनवद्यं महाप्राज्ञं जीवितार्थेन संवृतम् ।
दृष्ट्वा कस्य न दुःखं स्याद्धर्मराजं युधिष्ठिरम् ॥७४
उपास्ते स्म सभायां यं कृत्स्नाऽपि च वसुन्धरा ।
तमुपासीनमद्यान्यं पश्य भारत भारतम् ॥ ७५
एवं बहुविधैर्दुःखैः पीड्यमानामनाथवत् ।
शोकसागरमध्यस्थां किं मां भीम न पश्यसि ॥७६
इदं तु मे दुःखतरं यत्त्वां वक्ष्यामि भारत ।
न मेऽभ्यसूया कर्तव्या दुःखादेतद्ब्रवीम्यहम् ७७
शार्दूलैर्महिषैर्नागैरगारे योत्स्यसे सदा ।
कैकेय्याः प्रेक्षमाणायास्तदा मे कश्मलोऽभवत् ॥
हसन्त्यन्तःपुरे नार्यो मम चेष्टां निरीक्ष्य च ॥७९
तत उत्थाय कैकेयी सर्वास्ताः प्रत्यभाषत ।
प्रेक्ष्य मामनवद्याङ्गीं कश्मलाभिहतामिव ॥ ८०
स्नेहात्संवासजादेव तदा वै चारुहासिनी ।
युध्यमानं महावीर्यमिमं समनुशोचति ॥ ८१
कल्याणरूपा सैरन्ध्री वललश्चापि सुन्दरः ।
स्त्रीणां चित्तं हि दुर्ज्ञेयं युक्तरूपौ हि मे मतौ ॥८२
सैरन्ध्री प्रियसंवासान्नित्यं करुणवादिनी ।
अस्मिन्राजकुले चैतौ तुल्यकालनिवासिनौ ॥ ८३
इति ब्रुवाणा वाक्यानि सा मां नित्यमजीजपत् ।
क्रुध्यन्तीं मां च संप्रेक्ष्य पर्यशङ्कत मां त्वयि ॥८४
तस्यां तथा ब्रुवन्त्यां तु भीमो भीमपराक्रमः ।
नोवाच किंचिद्वचनं संरम्भाद्रक्तलोचनः ॥ ८५

महारण्यमनुजैः परिवारितः इति ख. पाठः ॥ ५४ ॥

द्वाविंशोऽध्यायः ॥ २२ ॥

* इमे चत्वारः श्लोकाः ध. पुस्तकएव वर्तन्ते ॥

ज्ञात्वा तु रुषितं भीमं द्रौपदी पुनरब्रवीत् ।
शोके यौधिष्ठिरे मग्ना नाहं जीवितुमुत्सहे ॥ ८६
यस्तु देवान्मनुष्यांश्च सर्वानेकरथोऽजयत् ।
सोयं राज्ञो विराटस्य कन्यानां नर्तको युवा ।
आस्ते वेषप्रतिच्छन्नः कन्यानां परिचारकः ॥ ८७
योऽतर्पयदमेयात्मा खाण्डवे जातवेदसम् ।
सोऽन्तःपुरगतः पार्थः कूपेऽग्निरिव संवृतः ॥ ८८
यस्माद्भयममित्राणां सदैव पुरुषर्षभात् ।
स लोकपरिभूतेन वेषेणास्ते धनंजयः ॥ ८९
यस्य ज्यातलनिर्घोषात्समकम्पन्त शत्रवः ।
षण्डरूपं वहन्तं तं गीतं नृत्तावलम्बनम् ।
कुर्वन्तमर्जुनं दृष्ट्वा न मे स्वास्थ्यं मनो व्रजेत् ॥ ९०
स्त्रियो गीतस्वरात्तस्य मुदिताः पर्युपासते ॥ ९१
किरीटं सूर्यसंकाशं यस्य मूर्धन्यशोभत ।
वेणीविकृतकेशान्तः सोऽयमद्य धनंजयः ॥ ९२
यस्मिन्नस्त्राणि दिव्यानि समस्तानि महात्मनि ।
आधारः सर्वविद्यानां यो धारयति कुण्डले ॥ ९३
यं वै राजसहस्राणि तेजसाऽप्रतिमं भुवि ।
समरे नातिवर्तन्ते वेलामिव महोर्मयः ॥ ९४
सोयं राज्ञो विराटस्य कन्यानां नर्तको युवा ।
आस्ते वेषप्रतिच्छन्नः कन्यानां परिचारकः ॥ ९५
यस्य स रथनिर्घोषात्समकम्पत मेदिनी ।
सपर्वतवनाकाशा सहस्थावरजङ्गमा ॥ ९६
यस्मिञ्जाते महेष्वासे कुन्त्याः प्रीतिरवर्धत ।
न स शोचति मामद्य भीमसेन तवानुजः ॥ ९७
विभूषितमलंकारैः कुण्डलैः परिपातुकैः ।
कम्बुपाणिमथायान्तं दृष्ट्वा सीदति मे मनः ॥ ९८
वेणीविकृतकेशान्तं भीमधन्वानमर्जुनम् ।
कन्यापरिवृतं दृष्ट्वा शोकं गच्छति मे मनः ॥ ९९
यदा ह्येनं परिवृतं कन्याभिर्देवरूपिणम् ।
प्रच्छन्नमिव मातङ्गं परिपूर्णं करेणुभिः ॥ १००
मात्स्यं पार्थं च गायन्तं विराटं समुपस्थितम् ।
पश्यामि तूर्यमध्यस्थं दृष्ट्वा मुह्यति मे मनः ॥ १०१
नूनमार्या न जानाति कृच्छ्रं प्राप्तं धनंजयम् ।
अजातशत्रुं कौरव्यं मग्नं द्युर्द्यूतदेविनम् ॥ १०२
ऐन्द्रवारुणवायव्यब्रह्माग्नेयैः सवैष्णवैः ।
अग्नीन्संतर्पयन्पार्थः सर्वशत्रुनिबर्हणः ।
दिव्यैरस्त्रैरमेयात्मा सर्वांश्चैकरथोऽजयत् ॥ १०३
कौबेरं वैष्णवं शैवमस्त्राण्यन्यानि भारत ।
दर्शयन्नस्त्रवीर्यं च वासुदेवसहायवान् ॥ १०४
दिव्यं गान्धर्वमस्त्रं च वायव्यमथ वैष्णवम् ।
ब्राह्मं पाशुपतं चैव स्थूणाकर्णं च दर्शयन् ॥ १०५
पौलोमान्कालकेयांश्च इन्द्रशत्रून्महाबलान् ।
निवातकवचैः सार्धं घोरानेकरथोऽजयत् ।
सोन्तःपुरगतः पार्थः कूपेऽग्निरिव संवृतः ॥ १०६
यो वै महातपः कुर्वन्महाबलपराक्रमः ।
युद्धेन तोषयामास शंकरं शूलपाणिनम् ॥ १०७
कन्यापुरगतं दृष्ट्वा गोष्ठेष्विव महावृषम् ।
स्त्रीवेषविकृतं पार्थं कुन्तीं गच्छति मे मनः १०८
यः स्त्रीभिर्नित्यसंपन्नो रूपेणास्त्रेण मेधया ।
सोऽश्वबन्धो विराटस्य पश्य कालस्य पर्ययम् १०९
राजकन्याश्च वेश्याश्च विशां दुहितरश्च याः ।
सर्वाः सारयुता नार्यो दामग्रन्थिवशं गताः ।
प्रेष्यकर्मणि तं दृष्ट्वा शोचामि विलपामि च ॥
विराटमुपतिष्ठन्तं दर्शयन्तं च वाजिनम् ।
अभ्यकीर्यन्त बृन्दानि दामग्रन्थिमुदीक्षितुम् ।
विनयन्तं जवेनाश्वान्धर्मराजस्य पश्यतः ॥ १११
किंनु मां मन्यसे पार्थ सुखितेति परन्तप ।
तथा दृष्ट्वा यवीयांसं सहदेवं युधांपतिम् ॥ ११२
तं दृष्ट्वा गोषु गोसङ्ख्यं वत्सचर्मक्षितीशयम् ।
दुःखशोकपरीताङ्गी पाण्डुभूताऽस्मि पाण्डव ११३
सहदेवस्य वृत्तानि चिन्तयन्ती पुनःपुनः ।
न पश्यामि महाभाग सहदेवस्य दुःष्कृतम् ।
यस्मादेवंविधं क्लेशं प्राप्नुयात्सत्यविक्रमः ॥ ११४
दूयामि भरतश्रेष्ठ दृष्ट्वा ते भ्रातरं प्रियम् ।
गोषु गोवृषसंकाशं मात्स्येनापि निवेशितम् ११५
संरब्धतररक्ताक्षं गोपालानां पुरोगमम् ।
विराटमभिनन्दन्तं चित्ते मे भवति ज्वरः ॥ ११६

सहदेवं हि मे नित्यं वीरमार्या प्रशंसति ।
महाभिजनसंपन्नो नीतिमान्कुलवानपि ॥ ११७
हीनिषेवो ह्यनवमो धार्मिकश्च प्रियश्च मे ।
स तेऽरण्येषु वोढव्यः पाञ्चालि रजनीष्वपि ११८
सुकुमारश्च शूरश्च राजानं चाप्यनुव्रतः ।
ज्येष्ठापचायिनं वीरं स्वयं पाञ्चालि भोजयेः ११९
इत्युवाच हि मां कुन्ती रुदती पुत्रगृद्धिनी ।
प्रव्रजन्तं महारण्यं तं परिष्वज्य तिष्ठती ॥ १२०
तं दृष्ट्वा गोषु गोपालवेषमास्थाय धिष्ठितम् ।
सहदेवं युधांश्रेष्ठं किंनु जीवामि पाण्डव ॥१२१
एवं दुःखशताविष्टा युधिष्ठिरनिमित्ततः ॥ १२२
पुनः प्रतिविशिष्टानि दुःखानि शृणु भारत ।
वर्धन्ते मयि कौन्तेय वक्ष्याम्यन्यानि तानि वै॥
युष्मासु ध्रियमाणेषु दुःखानि विविधान्युत ।
शोषयन्ति शरीरं मे किंनु दुःखतरं ततः ॥१२४
एकभर्ता तु या नारी सा सुखेनैव वर्तते ।
पञ्च मे पतयः सन्ति मम दुःखमनन्तकम् ॥१२५

इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः ॥ २३ ॥

द्रौपद्या भीमंप्रति स्ववैभवानुस्मारणेन परिशोचनपूर्वकं कीचकहननचोदना ॥ १ ॥

द्रौपद्युवाच ।
अहं सैरन्ध्रिवेषेण वसन्ती राजवेश्मनि ।
वशगाऽस्मि सुदेष्णाया अक्षधूर्तस्य कारणात् ॥१
विक्रियां पश्य मे तीव्रां राजपुत्र्याः परन्तप ।
आसे कालमुपासीना सर्वदुःखसहा पुनः ॥ २
अनित्याः खलु मर्त्यानामर्थाश्च व्यसनानि च ।
इति मत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः ॥ ३
चक्रवत्परिवर्तन्ते ह्यर्थाश्च व्यसनानि च ।
इति कृत्वा प्रतीक्षामि भर्तॄणामुदयं पुनः ॥ ४
य एव हेतुर्भवति पुरुषस्य जयावहः ।
पराजये च हेतुः स इति च प्रतिपालये ॥ ५
दत्त्वा याचन्ति पुरुषा हत्वा हन्यन्त एव ते ।
पातयित्वा च पात्यन्ते परैरिति च मे श्रुतम् ॥६
न दैवस्यातिभारोस्ति न चैवास्यातिवर्तनम् ।
इति चाप्यागमं भूयो दैवस्य प्रतिपालये ॥ ७
स्थितं पूर्वं जलं यत्र न पुनस्तत्र तिष्ठति ।
इति पर्यायमिच्छन्ती प्रतीक्षाम्युदयं पुनः ॥ ८
दैवेन किल यस्यार्थः सुनीतोपि विपद्यते ।
सदा दैवागमे यत्नस्तेन कार्यो विजानता ॥ ९
किंनु मे वचनस्याद्य कथितस्य प्रयोजनम् ।
पृच्छ मां दुःखितामेनामपृष्टाऽपि ब्रवीमि ते १०
महिषी पाण्डुपुत्राणां दुहिता द्रुपदस्य च ।
इमामवस्थां संप्राप्ता मदन्या का जिजीविषेत् ॥११
कुरून्परिहरन्सर्वान्पाञ्चालानपि भारत ।
पाण्डवेयांश्च संप्राप्तो मम शोको ह्यरिन्दम ॥ १२
भ्रातृभिः श्वशुरैः पुत्रैर्बहुभिः परिवारिता ।
एवं समुदिता नारी कान्वेवं दुःखभागिनी ॥१३
नूनं बालतया धातुर्मया वै विप्रियं कृतम् ।
तस्य प्रभावाद्दुर्नीतं प्राप्ताऽस्मि भरतर्षभ ॥ १४
वर्णे विकारमपि मे पश्य पाण्डव यादृशम् ।
ईदृशो मे न तत्रासीद्दुःखे परमके पुरा ॥ १५
त्वमेव भीम जानीषे यन्मे पार्थ सुखं पुरा ।
साऽहं दासीत्वमापन्ना न शान्तिं मनसा लभे ॥
तद्दैविकमिदं मन्ये यत्र पार्थो धनञ्जयः ।
भीमधन्वा महारङ्गे चास्ते शान्त इवानलः ॥ १७
अशक्या वेदितुं पार्थ प्राणिनां वै गतिर्नरैः ।
विनिपातमिमं पश्य युष्माकमविचिन्तितम् ॥१८
यस्या मम मुखप्रेक्षा यूयमिन्द्रसमाः सदा ।

मानयित्वा च मान्यन्ते नरा दैवविपर्यये इति थ. पाठः ॥६॥

सा प्रेक्ष्य मुखमन्यासामवराणां वरा सती॥ १९
पश्य पाण्डव मेऽवस्थां यथा नार्हामि वै तथा ।
युष्मासु भ्रियमाणेषु पाञ्चालेषु च मानद ॥ २०
यस्याः सागरपर्यन्ता पृथिवी वशवर्तिनी ।
आसीत्साऽद्य सुदेष्णायाः पाञ्चाली वशवर्तिनी ॥
यस्याः पुरश्चरा ह्यासन्पृष्ठतश्चानुगामिनः ।
साहमद्य सुदेष्णायाः पुरः पश्चाच्च गामिनी ॥२२
इदं तु दुःखं कौन्तेय ममासह्यं निबोध तत् ।
या न जातु स्वयं पिंषे गात्रोद्वर्तनमात्मनः ।
अन्यत्र कुन्त्या भद्रं ते सा पिनष्म्यद्य चन्दनं २३
पश्य कौन्तेय पाणी मे नैवं वै भवतः पुरा ।
इत्यस्यै दर्शयामास किणवन्तौ करावुभौ ॥ २४
बिभेमि कुन्त्या या नाऽहं युष्माकं वा कदाचन ।
साऽद्याग्रतो विराटस्य भीता तिष्ठामि किंकरी २५
किंनु वक्ष्यति सम्राण्मां वर्णकः सुकृतो न वा ।
नान्यपिष्टं विराटस्य चन्दनं किल रोचते ॥ २६

वैशंपायन उवाच ।
सा कीर्तयन्ती दुःखानि भीमसेनस्य भामिनी ।
रुरोद शनकैः कृष्णा भीमस्योरस्समाश्रिता ॥२७
सा बाष्पकलया वाचा निश्वसन्ती पुनःपुनः ।
हृदयं भीमसेनस्य घटयन्तीदमब्रवीत् ॥ २८
नाल्पं कृतं मया भीम देवानां किल्बिषं पुरा ।
अभाग्या या तु जीवामि मर्तव्ये सति पाण्डव २९
कीचकं चेन्न हन्यास्त्वं स्वात्मानं नाशयाम्यहम् ।
विषमालोड्य पास्यामि प्रवेक्ष्याम्यथवाऽनलम् ।
अभाग्याऽहमपुण्याऽहं नित्यदुःखेऽत्र विक्लवा ॥
पापे निपतितायाश्च किं फलं जीवितेन मे ।
इत्यस्यै दर्शयामास किणबद्धौ करावुभौ ॥ ३१
ततस्तस्याः करौ पीनौ किणबद्धौ वृकोदरः ।
मुखमानीय वेपन्त्या रुरोद परवीरहा ॥ ३२
तौ गृहीत्वा च कौन्तेयो बाष्पमुत्सृज्य वीर्यवान् ।
ततः परमदुःखार्त इदं वचनमब्रवीत् ॥ ३३

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः ॥ २४ ॥

द्रौपदीभीमसंवादः ॥ १ ॥ द्रौपद्या भीमंप्रति हठात्कीचकसंहारचोदना ॥ २ ॥

वैशंपायन उवाच ।
आश्वासयंस्तां पाञ्चालीं भीमसेन उवाच ह ।
शृणु भद्रे वरारोहे क्रोधात्तत्र तु चिन्तितम् ॥ १
त्वां वै सभागतां दृष्ट्वा मात्स्यानां कदनं महत् ।
कर्तुकामेन भद्रं ते वृक्षश्चावेक्षितो मया ॥ २
तत्र मां धर्मराजस्तु कटाक्षेण न्यवारयत् ।
तज्ज्ञात्वाऽवाङ्मुखस्तूष्णीमास्थितोस्मि महानसं३
शृणुष्वान्यत्प्रतिज्ञातं यद्वदामीह भामिनि ।
धिगस्तु मे बाहुबलं गाण्डीवं फल्गुनस्य च ।
यत्ते रक्तौ पुरा भूत्वा पाणी कृतकिणाविमौ ॥४
तदद्य मां तु तपति यत्कृतं न मया पुरा ।
सभायां स विराटस्य करोमि कदनं महत् ॥ ५
तत्र मे कारणं भाति कौन्तेयो यत्प्रतीक्षते ।
तदहं तस्य विज्ञाय स्थितो धर्मस्य शासने ॥ ६

यच्च राज्यात्प्रच्यवनं कुरूणामवधश्च यः ।
सुयोधनस्य कर्णस्य शकुनेः सौबलस्य च ॥ ७
दुःशासनस्य पापस्य यन्मया न हृतं शिरः ।
तन्मां दहति कल्याणि हृदि शल्यमिवार्पितम् ८
अपि चान्यद्वरारोहे स्मरिष्यसि वचो मम ।
पुण्ये तीरे सरस्वत्या यत्प्रतिष्ठाम संगताः ।
तत्राहमब्रवं कृष्णे सर्वक्लेशाननुस्मरन् ॥ ९
न चाहमनुगच्छेयं धर्मराजं युधिष्ठिरम् ।
धनञ्जयं च पाञ्चालि माद्रिपुत्रौ च भ्रातरौ ।
कृत्वैतां च मतिं कृष्णे युधिष्ठिरमगर्हयम् ॥ १०
परुषं वचनं श्रुत्वा मम धर्मात्मजस्तदा ।
ह्रीमान्वाक्यमहीनार्थं ब्रुवन्राजा युधिष्ठिरः ।
सर्वानन्वनयद्भ्रातॄन्मुनेर्धौम्यस्य पश्यतः ॥ ११
मा रोदी राज्ञि लोकानां सर्वागमगुणान्विता ।

रक्षितव्यं सहास्माभिः सत्यमप्रतिमं भुवि ॥ १२
अनुनीतेषु चास्मासु अनुनीता त्वमप्यसि ।
मा धर्मं जहि सुश्रोणि क्रोधं जहि महामते॥१३
इमं तु समुपालम्भं त्वत्तो राजा युधिष्ठिरः ।
शृणुयाद्यदि कल्याणि कृत्स्नं जह्यात्स जीवितं १४
[illegible]नञ्जयो वा सुश्रोणि यमौ चापि सुमध्यमे ।
लोकान्तरगतेष्वेषु नाहं शक्ष्यामि जीवितुम्॥१५
धर्मं शृणु [illegible] त्ते वक्ष्यामि मानिनि ॥
[illegible] वां नैव पश्येयुग [illegible]
दुहिता [illegible] यदि ते श्रुता ।
[illegible] श्चुवाच ।
पतिर [illegible] रण्यनिवासिनम् ॥ १७
[illegible] दतन्नर्तनागाग [illegible]
वस[illegible] व महारण्ये रामस्य महिषी प्रिया ।
रावणेन हृता सीता राक्षसीभिश्च तर्जिता ।
सा क्लिश्यमाना सुश्रोणी राममेवान्वपद्यत ॥१८
लोपामुद्रा तथा भीरु भर्तारमृषिसत्तमम् ।
भगवन्तमगस्त्यं सा वनायैवान्वपद्यत ॥ १९
सुकन्या नाम शर्यातेर्भार्गवच्यवनं वने ।
वल्मीकभूतं साध्वी तमन्वपद्यत भामिनी ॥ २०
नालायनी चेन्द्रसेना रूपेणाप्रतिमा भुवि ।
पतिमन्वचरद्वृद्धं पुरा वर्षसहस्रिणम् ॥ २१
नलं राजानमेवाथ दमयन्ती वनान्तरे ।
अन्वगच्छत्पुरा कृष्णे तथा भर्तृस्त्वमन्वगाः॥२२
यथैताः कीर्तिता नार्यो रूपवत्यः पतिव्रताः ।
तथा त्वमपि कल्याणि सर्वैः समुदिता गुणैः २३
मा दीर्घं क्षम कालं त्वं त्रिंशद्रात्रमनिन्दिते ।
पूर्णे त्रयोदशे वर्षे राज्ञां राज्ञी भविष्यसि ॥ २४
सत्येन ते शपे चाहं भविता नान्यथेति च ॥२५
सर्वासां परमस्त्रीणां प्रामाण्यं कर्तुमर्हसि ।
सर्वेषां च नरेन्द्राणां मूर्ध्नि स्थास्यसि भामिनि २६
भर्तृभक्त्या च वृत्तेन भोगानाप्स्यसि दुर्लभान् ।
यातायां तु प्रतिज्ञायां महान्तं भोगमाप्नुयाः २७
गुरुभक्तिकृतं ज्ञात्वा राज्ञां मूर्ध्नि स्थिता भवेः २८
द्रौपद्युवाच ।
आर्तप्रलापा कौन्तेय न राजानमुपालभे ।
अपारयन्त्या दुःखानि कृतं बाष्पप्रमोचनम् ॥२९
इदं तु दुःखं कौन्तेय ममासह्यं निबोध तत्॥३०
योऽयं राज्ञो विराटस्य सूतपुत्रस्तु कीचकः ।
स्यालो नाम प्रवादेन भोजस्त्रैगर्तदेशजः ॥ ३१
त्यक्तधर्मो नृशंसश्च सर्वार्थेषु च वल्लभः ।
नित्यमेवाह दुष्टात्मा भार्या मे भव शोभने ।
अविनीतः सुदुष्टात्मा मामनाथेति चिन्तयन् ३२
किमुक्तेन व्यतीतेन भीमसेन महाबल ।
प्रत्युपस्थितकालस्य कार्यस्यानन्तरो भव ॥ ३३
ममेह भीम कैकेयी रूपाढ्यि भयशङ्किता ।
नित्यमुद्विजते राजा कथं नेयादिमामिति ॥ ३४
तस्या विदित्वा तं भावं स्वयं चानृतदर्शनः ।
कीचकोपि च दुष्टात्मा पुनः प्रार्थयते च मां ३५
तमहं कुपिता भीम पुनः कोपं नियम्य च ।
अब्रवं कामसंमूढमात्मानं रक्ष कीचक ॥ ३६
गन्धर्वाणामहं भार्या पञ्चानां महिषी प्रिया ।
ते त्वां निहन्युर्दुर्धर्षाः शूराः साहसकारिणः ३७
एवमुक्तस्तु दुष्टात्मा कीचकः प्रत्युवाच ह ।
नाहं बिभेमि सैरन्ध्रि गन्धर्वाणां शुचिस्मिते ३८
शतं सहस्रमपि वा गन्धर्वाणामहं रणे ।
समागतं हनिष्यामि त्वं भीरु कुरु मे क्षणम्॥३९
इत्युक्ता चाब्रवं सूतं कामातुरमहं पुनः ।
न त्वं प्रतिबलस्तेषां गन्धर्वाणां यशस्विनाम्॥४०
धर्मे स्थिताऽस्मि सततं कुलशीलसमन्विता ।
नेच्छामि किंचिद्वध्यं त्वां तस्माज्जीवसि कीचक ॥
एवमुक्तस्तु दुष्टात्मा प्रहस्य स्वनवत्ततः ।
न तिष्ठति स सन्मार्गे न च धर्मं बुभूषति ॥४२
पापात्मा पापकारी च कामराजवशानुगः ।
अविनीतश्च दुष्टात्मा प्रत्याख्यातः पुनःपुनः ४३
दर्शनेदर्शने हन्याद्यदि जह्यां च जीवितम् ।
धर्मे प्रयतमानानां महान्धर्मो नशिष्यति ॥ ४४
समयं रक्षमाणानां दारा वो न भवन्ति च ।

मा दीर्घं क्षम कालं त्वं मासमर्धं च संमितमिति झ. पाठः ॥ २४ ॥ प्राधान्यं कर्तुमर्हसि इति ख. पाठः ॥ २६ ॥

दुःखस्यान्तकरो भवेति ध. पाठः ॥ ३३ ॥ चतुर्विंशोऽध्यायः ॥ २४ ॥

भार्यायां रक्ष्यमाणायां प्रजा भवति रक्षिता ।
प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः॥४५
वदतां वर्णधर्मांश्च ब्राह्मणानां च मे श्रुतम् ।
क्षत्रियस्य सदा धर्मो नान्यो दस्युनिबर्हणात् ४६
पश्यतो धर्मराजस्य कीचको माऽन्वधावत ।
तवैव च समक्षं वै भीमसेन महाबल ॥ ४७
त्वया चाहं परित्राता भीम तस्माज्जटासुरात् ४८
जयद्रथं तथैव त्वमजैषीर्भ्रातृभिः सह ।
जहीममपि पापिष्ठं योयं मामवमन्यते ।
कीचको राजवाल्लभ्याच्छोककृन्मम भारत ॥४९
कीचकं कामसन्तप्तं भिन्धि कुम्भमिवाश्मनि ।
यो निमित्तमनर्थानां बहूनां मम भारत ॥ ५०
तं चेज्जीवन्तमादित्यः प्रातरभ्युदयिष्यति ।
विषमालोड्य पास्यामि मा कीचकवशंगमम्॥५१
श्रेयो हि मरणं मह्यं भीमसेन तवाग्रतः ।
इत्युक्त्वा प्रारुदत्कृष्णा भीमस्योरसि संश्रिता ५२
भीमश्च तां परिष्वज्य महत्सान्त्वं प्रयुज्य च ।
कीचकं मनसाऽगच्छत्सृक्किणी परिसंलिहन् ॥५३
आश्वासयित्वा बहुशो ह्यात्मानं नाशयामाम् ।
हेतुतत्वार्थसंयुक्तैर्वचोभिर्वेक्ष्यम्यथवाऽनल ५४
प्रमृज्य वदनं तस्याः पा[illegible]च विक्लव ।
उवाच चैनां दुःखार्तां भीमः क्रोधसमान्वितः५५

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः ॥ २५ ॥

द्रौपद्या भीमवचनात्कीचकंप्रति नर्तनशालाया उभयोः समागमे संकेतस्थानत्वनिर्धारणेन रात्रौ तत्रागमनचोदना ॥ १ ॥

भीम उवाच ।
तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
अद्यैनं सूदयिष्यामि कीचकं सह बान्धवैः ॥ १
अस्याः प्रदोषे शर्वर्याः कुरुष्वानेन संविदम् ।
दुःखं शोकं च निर्धूय याज्ञसेनि शुचिस्मिते॥२
यैषा नर्तनशालेह मत्स्यराजेन कारिता ।
दिवात्र कन्या नृत्यन्ति रात्रौ यान्ति तथा गृहं ॥३
तत्रास्ति शयनं भीरु दृढाङ्गं सुप्रतिष्ठितम् ।
तत्रैनं दर्शयिष्यामि पूर्वप्रेतान्पितामहान् ।
त्वद्दर्शनसमुत्थेन कामेनाकुलितेन्द्रियम् ॥ ४
संकेतं सूतपुत्रस्य कारयस्व शुभानने ।
यथा परे न पश्येयुः कुर्वन्तीं तेन संविदम् ॥ ५
तथा कुरुष्व कल्याणि यथा सन्निहितो भवेत् ।
तथा कुर्याश्च संकेतं सूतपुत्रस्य संवृतम् ॥ ६
आवयोः संगमं भीरु यथा मर्त्यो न बुध्यति ।
कीचकस्य विनाशाय तथा कुरु नृपात्मजे ॥ ७
वैशंपायन उवाच ।
तत्र तौ कथयित्वा तु बाष्पमुत्सृज्य दुःखितौ ।
रात्रिशेषं तमत्युग्रं धारयामासतुर्हृदि ॥ ८
भीमेन च प्रतिज्ञाते कीचकस्य वधे तदा ।
द्रौपदी च सुदेष्णायाः प्रविवेश पुनर्गृहम् ॥ ९
तस्यां रजन्यां व्युष्टायां प्रातरुत्थाय कीचकः ।
गत्वा राजकुलायैव द्रौपदीमिदमब्रवीत् ॥ १०
यत्त्वाऽहं पश्यतो राज्ञः पातयित्वा पदाऽहनम् ।
न कंचिल्लभसे नाथमभिपन्ना बलीयसा ॥ ११
प्रवादेन तु मात्स्यानामयं राजेति चोच्यते ।
अहमेव हि राजा वै मात्स्यानां वाहिनीपतिः १२
सा सुखं प्रतिपद्यस्व दासो भीरु भवामि ते ।
न ह्यहं त्वामृते भीरु चिरं जीवितुमुत्सहे ॥ १३
अहन्यहनि सुश्रोणि शतनिष्कं ददामि ते ।
दासीशतं च ते दद्यां दासानामपि चापरम्॥१४
रथांश्चाश्वतरीयुक्तानस्तु नौ भीरु संगमः ।
सुदासानां सहस्रं च महिषाणां सहस्रकम्॥ १५
अन्तःपुरसहस्रं च हेमकूटसहस्रकम् ।
तुभ्यं दास्यामि सर्वाणि राजार्हाण्यम्बराणि च१६
द्रौपद्युवाच ।
एतन्मे वचनं सत्यं प्रतिपद्यस्व कीचक ।
न ते सखा वा भ्राता वा जानीयात्संगमं मया १७

अनुप्रवादाद्भीताऽस्मि गन्धर्वाणां यशस्विनाम् ।
अनुबोधादनर्थः स्यादयशश्च महद्भवेत् ।
एतन्मे प्रतिजानीहि ततोऽहं वशगा तव ॥ १८
कीचक उवाच ।
एवमेतत्करिष्यामि यथा सुश्रोणि भाषसे ।
एकोऽहमागमिष्यामि शून्यमावसथं तव ॥ १९
समागमार्थं रम्भोरु त्वया मदनदर्पितः ।
यथा त्वां नैव पश्येयुर्गन्धर्वाः सूर्यवर्चसः ॥ २०
द्रौपद्युवाच ।
यदेतन्नर्तनागारं मात्स्यराजेन कारितम् ।
दिवात्र कन्या नृत्यन्ति रात्रौ यान्ति स्वकं गृहं २१
निशायां तत्र गच्छेथा गन्धर्वास्तन्न जानते ।
तत्र दोषः परिहृतो भविष्यति न संशयः ॥ २२
एकस्त्वं नर्तनागारं रात्रौ संकेतमाव्रज ।
तत्राहं भविता तुभ्यं वशगा नात्र संशयः ॥ २३
कीचक उवाच ।
तथा भद्रे करिष्यामि यथा त्वं भीरु वक्ष्यसि ।
एकः सन्नर्तनागारमागमिष्यामि भामिनि ।
समागमार्थं सुश्रोणि शपे च सुकृतेन मे ॥ २४
यथा त्वां नावबुध्यन्ति गन्धर्वा वरवर्णिनि ।
सत्यं ते प्रतिजानामि गन्धर्वेभ्यो न ते भयम् ।
अलंकरिष्याम्यद्याहं त्वत्समागमनाय वै ॥ २५
वासांसि च विचित्राणि मनोज्ञानि तवापि च ।
यथा मां न त्यजेथास्त्वं तथा रंस्ये त्वया सह २६
द्रौपद्युवाच ।
तथा चेदप्यहं सूत दर्शयिष्यामि ते सुखम् ।
यन्नानुभूतं भवता जन्मप्रभृति कीचक ॥ २७
वैशंपायन उवाच ।
तमर्थमपि जल्पन्त्या द्रौपद्याः कीचकस्य ह ।
क्षणमात्रं तदभवन्मासेनैव समं नृप ॥ २८
कीचकोऽथ गृहं गत्वा भृशं हर्षपरिप्लुतः ।
सैरन्ध्रीरूपिणीं मूढो मृत्युं तां नावबुद्धवान् ॥२९
गन्धाभरणमाल्येषु व्यासक्तः स विशेषतः ।
अलंचक्रे तदाऽऽत्मानं सत्वरः काममोहितः ३०

तस्य तत्कुर्वतः कर्म कालो दीर्घ इवाभवत् ।
अनुचिन्तयतश्चापि तामेवायतलोचनाम् ॥ ३१
आसीदभ्यधिका चापि श्रीः श्रियं प्रमुमुक्षतः ।
निर्वाणकाले दीपस्य वर्तीमिव दिधक्षतः ॥ ३२
कृतसंप्रत्ययस्तस्याः कीचकः काममोहितः ।
नाजानात्पतनं स्वस्य चिन्तयंस्तां शुभाननाम् ३३
ततस्तु द्रौपदी गत्वा भीमसेनं महानसे ।
उपातिष्ठत कल्याणी कौरव्यं पतिमन्तिकात् ३४
तमुवाच सुकेशान्ता कीचकस्य कृतो मया ।
सङ्गमो नर्तनागारे यथाऽवोचः परन्तप ॥ ३५
कालेन नियतं बद्धः कामेन च बलात्कृतः ।
शून्यं स नर्तनागारमागमिष्यति कीचकः ।
एको निशि महाबाहो कीचकं तं निषूदय ॥३६
तं सूतपुत्रं कौन्तेय कीचकं मददर्पितम् ।
गत्वा त्वं नर्तनागारं निर्जीवं कुरु पाण्डव ॥ ३७
गर्वितः सूतपुत्रोऽसौ गन्धर्वानवमन्यते ।
स त्वं प्रहरतांश्रेष्ठ नालं नाग इवोद्धर ॥ ३८
अस्रं दुःखाभिभूताया मम मार्जस्व भारत ।
बाहुवीर्यानुरूपं च दर्शयाद्य पराक्रमम् ।
आत्मनश्चैव भद्रं ते कुरु मानं कुलस्य च ॥ ३९
भीम उवाच ।
स्वागतं ते वरारोहे यन्मां वेदयसे प्रियम् ।
नह्यस्य कंचिदिच्छामि सहायं वरवर्णिनि ॥ ४०
सा मे प्रीतिस्त्वयाऽऽख्याता कीचकस्य समागमे ।
हत्वा हिडिम्बं या प्रीतिर्ममासीत्सा शुचिस्मिते ४१
सत्यं भ्रातॄंश्च पुत्रांश्च पुरस्कृत्य शपामि ते ।
कीचकं निहनिष्यामि वृत्रं देवपतिर्यथा ॥ ४२
प्रसह्य निहनिष्यामि केशवः केशिनं यथा ।
रहस्यं वा प्रकाशं वा मृदयिष्यामि कीचकम् ॥ ४३
अहं भद्रे हनिष्यामि कीचकं मदनान्वितम् ।
यस्त्वां कामाभिभूतात्मा दुर्लभामभिमन्यते ॥४४
अथ चेदवबुध्यन्ति सूतपुत्रं मया हतम् ।
निर्मनुष्यं करिष्यामि मत्स्यानामिदमालयम् ॥४५
मया हतांश्चेन्मात्स्यांस्तु धार्तराष्ट्रो विबुध्यति ।
दुर्योधनं ततो हत्वा सानुबन्धं सबान्धवम् ।

कुरूणामखिलं राज्यं प्रतिपत्स्यामि भामिनि ४६
नाहं शक्तोऽनुनयितुं कुन्तीपुत्रं युधिष्ठिरम् ।
कामं सत्यमुपासीत कुन्तीपुत्रो युधिष्ठिरः ।
काममन्ये ह्युपासन्तु विनीता धर्मचारिणः॥ ४७
त्वां तु दुःखमिदं प्राप्तां नाहं शक्नोम्युपेक्षितुम् ।
निर्वृता भव पाञ्चालि कीचकस्य वधात्पुनः ॥४८
द्रौपद्युवाच ।
कीचकस्य वधं भीम यदि जानन्ति नागराः ।
त्वया कृतं महाबाहो नाहं जीवितुमुत्सहे ॥ ४९
कथं सत्याच्च नापेयाद्राजाऽयं मत्कृते प्रभो ।
निशि गूढं तथा भीम कीचकं तं निपातय ॥५०
अनुबुद्धे हि कौन्तेयो धर्मराजो युधिष्ठिरः ।
पुनर्वनं व्रजेद्धीमाननुजैः परिवारितः ॥ ५१
कश्च धर्मपरं ज्येष्ठमतिवर्तेत भारत ।
भीम भीताऽसि संबोधात्साधु मा चापलं कृथाः ॥
यथा न कश्चिज्जानीते सूतपुत्रं त्वया हतम् ।
तथा कुरुष्व कौरव्य बलवन्नरिमर्दन ।
अदृश्यमानस्त्वं तस्य भिन्धि प्राणानरिन्दम ॥५३

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः ॥ २६ ॥

भीमेन कीचकागमनात्पूर्वमेव नर्तनागारमेत्य शय्यायां शयनम् ॥ १ ॥ पश्चात्समागतेन कीचकेन भीमंप्रति द्रौपदीबुद्ध्या संस्पर्शनपूर्वकं संभाषणम् ॥ २ ॥ भीमेन नियुद्धेन कीचकमारणम् ॥ ३ ॥ पश्चाद्द्रौपद्या समाह्वानादुपकीचकानां तत्र समागमनम् ॥ ४ ॥

भीम उवाच ।
तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
अदृश्यमानस्तस्याहं तमिस्रायां सकुण्डलम् ॥ १
नागो बिल्वमिवाक्रम्य पोथयिष्यामि तच्छिरः ।
अलभ्यामिच्छतस्तस्य कीचकस्य दुरात्मनः ॥ २
मया यदुक्तं पाञ्चालि धर्मराजसुतं प्रति ।
कोपादृते किमन्यत्तु नानुवर्तेत को नृपम् ॥ ३
वैशंपायन उवाच ।
एवमुक्त्वा महाबाहुस्तत्र पाण्डवनन्दनः ।
अर्धरात्रे तदोत्थाय सत्ववान्भीमविक्रमः ॥ ४
अवदातेन मृदुना पटेनाच्छादितस्तथा ।
द्रौपदीं पृष्ठतः कृत्वा यत्रासीन्नर्तनालयः ॥ ५
स भीमः प्रथमं गत्वा तमिस्रायामुपाविशत् ।
मृगं सिंह इवादृश्यः प्रत्याकाङ्क्षत्स कीचकम् ॥६
कीचकस्तु शिरःस्नातो निशायां समलंकृतः ।
सङ्केतमगमत्तूर्णं शून्यागारमपावृतम् ॥ ७
तदेव नर्तनागारं पाञ्चाली यदभाषत ।
तां मन्यमानः संकेते सैरन्ध्रीं काममोहितः ॥ ८
प्रविश्य नर्तनागारं ततस्तं पुरुषर्षभम् ।
पूर्वागतं भीमसेनं दृप्तमप्रतिमौजसम् ॥ ९
शयानं शयने तत्र मृत्युं मूढः परामृशत् ।
जाज्वल्यमानं कोपेन कृष्णाधर्षणजेन च ॥ १०
एकान्ते भीममासाद्य कीचकः कालचोदितः ।
हर्षोन्मथितचित्तात्मा स्मयमानोऽभ्यभाषत ॥११
प्रहितं ते मया भद्रे बहुवित्तं शुचिस्मिते ।
त्वयि तिष्ठतु तत्सर्वं यथाऽसि स्वयमागता ॥१२
अकस्मान्मां प्रशंसन्ति सदा गृहगताः स्त्रियः ।
बलवान्दर्शनीयश्च नान्यस्ते सदृशः पुमान् ॥ १३
अहं रूपेण संपन्नः स्नातो गुरुविभूषितः ।
नित्यमेव प्रियः स्त्रीणां सौभाग्यात्प्रियदर्शनः ।
रूपस्य तन्मया प्राप्तं फलं कमललोचने ॥ १४
भीम उवाच ।
दिष्ट्या त्वं दर्शनीयोसि दिष्ट्याऽऽत्मानं प्रशंससि ॥
त्वयाऽपीदृग्गुणा नारी रूपशीलसमन्विता ।
अदृष्टपूर्वा पश्य त्वं यतो जानासि सूतज ।
द्रक्ष्यसि त्वं मुहूर्तेन यथेयं स्त्री गुणान्विता ॥१६
उपरंस्यसि कामाच्च शीघ्रं त्वं स्प्रष्टुमर्हसि ।
ईदृशस्तु त्वया स्पर्शः स्पृष्टपूर्वो न कर्हिचित् ॥१७

स्पर्शं वेत्सि विदग्धस्त्वं कामधर्मविचक्षणः ।
स्त्रीणां प्रीतिकरो नान्यस्त्वत्समः पुरुषस्त्विह १८
वैशंपायन उवाच ।
इत्युक्त्वा तं महाबाहुर्भीमो भीमपराक्रमः ।
सहसोत्पत्य कौन्तेयः प्रहस्येदमुवाच ह ॥ १९
अद्य त्वां भगिनी पापं कृष्यमाणं मया भुवि ।
द्रक्ष्यतेऽद्रिप्रतीकाशं सिंहेनेव महागजम् ॥ २०
निराबाधा त्वयि हते सैरन्ध्री विचरिष्यति ।
सुखमेव चरिष्यन्ति सैरन्ध्र्याः पतयः सदा ॥ २१
ततो जग्राह केशेषु माल्यवत्सु सुगन्धिषु ॥ २२
गृहीत्वा कीचकं भीमो विरराज महाबलः ।
गृहीत्वा ग्रासकामस्तु सिंहः क्षुद्रमृगं यथा ॥२३
स केशेषु परामृष्टो बलेन बलिनां वरः ।
आक्षिप्य केशान्वेगेन बाह्वोर्जग्राह पाण्डवम्॥२४
बाहुयुद्धं तयोरासीत्क्रुद्धयोर्नरसिंहयोः ।
वसन्ते वासिताहेतोर्बलिनोर्नागयोरिव ॥ २५
कीचकानां तु मुख्यस्य नराणामुत्तमस्य च ।
वालिसुग्रीवयोर्भ्रात्रोः पुरेव कपिसिंहयोः ॥ २६
शार्दूलाविव गर्जन्तौ तार्क्ष्यनागाविवोद्यतौ ।
समयत्तौ समक्रोधौ पतितौ भीमकीचकौ ॥ २७
गजाविव मदोन्मत्तौ नदन्तौ पतितौ क्षितौ ।
वृषभाविव वल्मीकं मृद्नन्तौ समविक्रमौ ॥ २८
ईषदागलितं चापि क्रोधाचावाङ्मुखं स्थितम् ।
कीचको बलवान्भीमं जानुभ्यां पातयद्भुवि ॥२९
पातितो भीमसेनस्तु कीचकेन बलीयसा ।
उत्पपाताथ वेगेन दण्डाहत इवोरगः ॥ ३०
स्पर्धया च बलोन्मत्तौ तावुभौ भीमकीचकौ ।
निःशब्दं पर्यकर्षेतामन्योन्यस्य विनिर्जये ॥ ३१
ततस्तद्भवनश्रेष्ठं प्राकम्पत तदा भृशम् ।
तौ क्रोधवशमापन्नावन्योन्यमभिजघ्नतुः ॥ ३२
तलाभ्यां भीमसेनेन वक्षस्यभिहतो बली ।
कीचको रोषरक्ताक्षो न चचाल पदात्पदम्॥३३
मुहूर्तमशकत्सोढुं वेगं तस्य महात्मनः ।
कीचको भीमसेनेन पश्चात्पश्चादहीयत ॥ ३४
तं हीयमानं विज्ञाय भीमसेनो महाबलः ।
वक्षस्यानीय वेगेन प्रममाथ विचेतसम् ॥ ३५
क्रोधाविष्टो विनिश्वस्य पुनश्चैनं वृकोदरः ।
जग्राह जयतांश्रेष्ठः केशेष्वेव भृशं तदा ॥ ३६
गृहीत्वा कीचकं भीमो विरराज महाबलः ।
आमिषार्थे गृहीत्वैव शार्दूलो मृगयूथपम् ॥ ३७
पुनश्चातिबलस्तत्र कीचको बलदर्पितः ।
व्यायच्छन्नेव दुर्धर्षः पाण्डवेन तरस्विना ॥ ३८
मुष्टिना भीमसेनेन शिरस्यभिहतो भृशम् ।
कीचको वृत्तरक्ताक्षो गतासुरपतद्भुवि ॥ ३९
आस्ये पाणी च पादौ च शिरोग्रीवां सकुण्डलाम्
काये प्रवेशयामास मृदित्वाऽङ्गानि सर्वशः ॥४०
स तं मथितसर्वाङ्गं मांसपिण्डमथाकरोत् ॥ ४१
तत्राग्निं स्वयमुज्ज्वाल्य पाणिसंघर्षजं बली ।
कृष्णायै दर्शयामास भीमसेनो महाबलः ॥ ४२
उवाच च महातेजा द्रौपदीं योषितां वराम् ।
त्वयि कामुकमत्यन्तं पापिनं पारदारिकम् ।
पश्यैनमेहि पाञ्चालि कामुकोऽयं मया हतः॥४३
प्रार्थयन्ते सुकेशान्ते ये त्वां शीलसमन्विताम् ।
एवं स्वपन्ति ते भीरु शेतेऽयं कीचको यथा ।
यस्त्वामभ्यहनद्भद्रे पदा भूमौ निपात्य च ॥४४
एवमुक्त्वा महाबाहुर्गन्धर्वेण हतं तदा ।
विज्ञापनार्थमन्येषां विरराम महाहवम् ॥ ४५
तथा स कीचकं हत्वा गत्वा रोषस्य निष्कृतिम् ।
आमन्त्र्य द्रौपदीं पश्चात्क्षिप्रमायान्महानसम्॥४६
स्नात्वाऽनुलेपनं कृत्वा व्यापूर्य च मनोरथम् ।
सुखोपविष्टः शयने भीमो भीमपराक्रमः ॥ ४७
ततः कृष्णा यदा मेने गतं भीमं महानसम् ।
कीचकं घातयित्वा च द्रौपदी योषितां वरा ।
प्रहृष्टा गतसंत्रासा सभापालानुवाच ह ॥ ४८
कीचको निहतः शेते गन्धर्वैः पतिभिर्मम ।
परस्त्रीकामसंतप्तं समागच्छन्त पश्यत ॥ ४९
तच्छ्रुत्वा भाषितं तस्या नर्तनागाररक्षिणः ।
सहसैव समुत्तस्थुरुल्कामादाय सर्वशः ॥ ५०

तस्यास्तं निहतं श्रुत्वा कीचकस्य सहोदराः ।
ततो गत्वा तु तद्वेश्म कीचकं विनिपातितम् ।
गतासुं ददृशुर्भूमौ रुधिरेण समुक्षितम् ॥ ५१
पार्ष्णिपाणिशिरोहीनं दृष्ट्वा ते विस्मिताऽभवन् ॥
क्वास्य ग्रीवा क्व चरणौ क्व पाणी क्व शिरः क्व दृक् ।
इति स्म ते परीक्षन्ते गन्धर्वेण हतं तदा ॥ ५३
अमानुषं कृतं कर्म तं दृष्ट्वा विनिपातितम् ।
निरीक्षन्ते ततः सर्वे परं विस्मयमागताः ॥ ५४

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः ॥ २७ ॥

भ्रातृवधामर्षितैरुपकीचकैः पाञ्चाल्याः कीचकेन सह चरमविमानसमारोपणेन श्मशानप्रापणम् ॥ १ ॥ द्रौपदीसमाक्रन्दनिनदश्रवणात्पितृवनमुपागतवता भीमेनोपकीचकानां पञ्चाधिकशतस्य पञ्चताप्रापणम् ॥ २ ॥ भीमेन द्रौपद्याः पतिव्रतोपाख्यानकथनात्समाश्वासनेन स्वावासप्रेषणपूर्वकं महानसप्रवेशः ॥ ३ ॥

वैशंपायन उवाच ।
तत्काले तु समागम्य सर्वे तत्रास्य बान्धवाः ।
रुरुदुः कीचकं दृष्ट्वा परिवार्योपतस्थिरे ॥ १
सर्वे संहृष्टरोमाणः संत्रस्ताः प्रेक्ष्य कीचकम् ।
तथा संभुग्नसर्वाङ्गं कूर्मं स्थल इवोद्धृतम् ॥ २
पोथितं भीमसेनेन महेन्द्रेणेव दानवम् ।
कीचकं बलसंमत्तं दुर्धर्षं येन केन चित् ॥ ३
गन्धर्वेण हतं श्रुत्वा कीचकं पुरुषर्षभम् ।
संस्कारयितुमिच्छन्तो बहिर्नेतुं प्रचक्रमुः ॥ ४
अपश्यन्नथ ते कृष्णां सूतपुत्राः समागताः ।
अदूरादनवद्याङ्गीं स्तम्भमालिङ्ग्य तिष्ठतीम् ॥ ५
समागतेषु सूतेषु तानुवाचोपकीचकः ।
हसन्निव तदाऽमर्षान्निर्दहन्निव चक्षुषा ॥ ६
हन्यतां शीघ्रमसती यत्कृते कीचको हतः ।
अथवा नैव हन्तव्या दह्यतां कामिना सह ॥ ७
मृतस्यापि प्रियं कार्यं सूतपुत्रस्य सर्वथा ।
इयं हि दुष्टचरिता मम भ्रातुरमित्रिणी ॥ ८
यत्कृते मरणं प्राप्तो नेयं जीवितुमर्हति ।
सहेयं दह्यतां सूता आमन्त्र्य च जनाधिपम् ।
हतस्यापि हि गन्धर्वैः कीचकस्य प्रियं भवेत् ॥ ९
वैशंपायन उवाच ।
ततो विराटमासाद्य सूताः प्राञ्जलयोऽब्रुवन् ।
कीचकोऽयं हतः शेते गन्धर्वैः कामरूपिभिः ॥ १०
सैरन्ध्या घातितो रात्रौ तं दहेम सहानया ।
मानिताः स्मस्त्वया वीर तदनुज्ञातुमर्हसि ॥ ११
पराक्रमं तु सूतानां ज्ञात्वा राजाऽन्वमन्यत ।
सैरन्ध्र्याः सूतपुत्रेण सह दाहं नराधिपः ॥ १२
ततस्ते समनुज्ञाताः सर्वे तत्रास्य बान्धवाः ।
रुरुदुः कीचकं दृष्ट्वा परिवार्याभितः स्थिताः ॥ १३
आरोप्य कृष्णां सह कीचकेन
निबध्य केशेषु च पादयोश्च ।
ते चापि सूता वचनैरवोच-
न्नुद्दिश्य चैनामभिवीक्ष्य कृष्णाम् ॥ १४
यस्याः कृतेऽयं निहतो महात्मा
तस्माद्धि सा कीचकमार्गमेतु ।
अवार्यसत्वेन च कीचकेन
गतासुना सुन्दरी स्वर्गलोकम् ॥ १५
सा तेन कृष्णा शयने निबद्धा
यशस्विनी चैव मनस्विनी च ।
अनार्यसत्त्वेन महार्यसत्त्वा
गतासुना सा प्ररुरोद कृष्णा ।
विलम्बमाना विवशा हि दुष्टै-
स्तत्रैव पर्यङ्कवरे शुभाङ्गी ॥ १६
ह्रियमाणाऽथ सुश्रोणी सूतपुत्रैरनिन्दिता ।
प्राक्रोशन्नाथमिच्छन्ती कृष्णा नाथवती सती १७
मृतेन सह बद्धाङ्गी निराशा जीविते तदा ।
श्मशानाभिमुखं नीता करेणुरिव रौति सा ॥ १८

द्रौपद्युवाच ।
जयो जयेशो विजयो जयत्सेनो जयद्बलः ।
ते मे वाचं विजानन्तु सूतपुत्रा नयन्ति माम् १९
येषां दुन्दुभिनिर्घोषो ज्याघोषः श्रूयते महान् ।
ते मे वाचं विजानन्तु सूतपुत्रा नयन्ति माम् २०
येषां ज्यातलनिर्घोषो विस्फूर्जितमिवाशनेः ।
अश्रूयत महान्युद्धे भीमघोषस्तरस्विनाम् ॥ २१
रथघोषश्च बलवान्गन्धर्वाणां तरस्विनाम् ।
ते मे वाचं विजानन्तु सूतपुत्रा नयन्ति माम् २२
येषां वीर्यमतुल्यं तु शक्रस्येव बलं यशः ।
राजसिंहा इवाग्र्यास्ते मां जानन्तु सुदुःखितां २३
इत्यस्याः कृपणा वाचः कृष्णायाः परिदेविताः ।
श्रुत्वैवाभ्युत्थितो भीमः शयनादविचारयन्॥२४
भीम उवाच ।
अहं सैरन्ध्रि ते वाचः शृणोमि तव भाषिताः ।
तस्मात्ते सूतपुत्रेभ्यो न भयं जातु विद्यते ॥ २५
वैशंपायन उवाच ।
इत्युक्त्वा स महाबाहुर्विजजृम्भे जिघांसया॥२६
ततः स व्यायतं बद्ध्वा वस्त्रं विपरिवेष्ट्य च ।
अद्वारेणाभ्यवस्कन्द्य निर्जगाम बहिस्तदा ॥ २७
स लङ्घयित्वा प्राकारमारुह्य तरसा द्रुमम् ।
श्मशानाभिमुखः प्रायाद्यत्र ते कीचका गताः२८
स लङ्घयित्वा प्राकारं निःसृत्य च पुरोत्तमात् ।
जवेनोत्पतितो भीमः सूतानामग्रतस्तदा ॥ २९
चितासमीपं गत्वा स तत्रापश्यन्महाबलः ।
तालमात्रं महास्कन्धमूर्ध्वशुष्कं वनस्पतिम् ॥३०
तं नागवदुपक्रम्य बाहुभ्यां परिरभ्य च ।
वृक्षमुत्पाटयामास भीमो भीमपराक्रमः ॥ ३१
ततो वृक्षं दशव्यामं निष्पत्रमकरोत्तदा ॥ ३२
तं महाकायमुद्यम्य भ्रामयित्वा च वेगितः ।
प्रगृह्याभ्यपतत्सूतान्दण्डपाणिरिवान्तकः ॥ ३३
ऊरुवेगेन तस्याथ न्यग्रोधाश्वत्थकिंशुकाः ।
भूमौ निपतिता वृक्षाः संभग्नास्तत्र शेरते ॥ ३४
तं सिंहमिव संक्रुद्धं दृष्ट्वा गन्धर्वमागतम् ।
वित्रेसुश्च तदा सूता विषादभयपीडिताः ॥ ३५
तमन्तकमिव क्रुद्धं गन्धर्वभयशङ्किताः ।
दिधक्षन्तस्तथा ज्येष्ठं भ्रातरं चोपकीचकाः ।
परस्परमथोचुस्ते विषादभयमोहिताः ॥ ३६
गन्धर्वो बलवानेति क्रुद्ध उद्यम्य पादपम् ।
प्रबुद्धाः सुमहाभागा गन्धर्वाः सूर्यवर्चसः ।
सैरन्ध्री मुच्यतां शीघ्रं भयं नो महदागतम्॥३७
वैशंपायन उवाच ।
ते दृष्ट्वाऽथ समाविद्धं भीमसेनेन पादपम् ।
विमुच्य द्रौपदीं त्रस्ताः प्राद्रवन्नगरं प्रति ॥ ३८
द्रवतस्तांश्च संप्रेक्ष्य स वज्री दानवानिव ।
अथ भीमः समुत्पत्य द्रवतां पुरतोऽभवत् ॥ ३९
ते तं दृष्ट्वा भयोद्विग्ना निश्चेष्टाः समवस्थिताः ४०
दृष्ट्वा तान्शतसङ्ख्याकान्स वज्री दानवानिव ।
एकेनैव प्रहारेण दश सप्त च विंशतिम् ।
अष्टादश च पञ्चाशज्जघान स वृकोदरः ॥ ४१
शतं पञ्चाधिकं भीमः प्राहिणोद्यमसादनम् ।
वृक्षेणैकेन राजेन्द्र प्रभञ्जनसुतो बली ।
वायुवेगसमः श्रीमान्सर्वान्सूतानशेषतः ॥ ४२
तान्निहत्य महाबाहुर्भीमसेनो महाबलः ।
आश्वासयत्तदा कृष्णां प्रतिमुच्य च बन्धनात्४३
उवाच श्लक्ष्णया वाचा पाञ्चालीं भरतर्षभः ।
अश्रुपूर्णमुखीं भीतामुद्धरन्स वृकोदरः ॥ ४४
[मा खिद*स्त्वं याज्ञसेनि पातिव्रत्यव्रते स्थिता ।
पातिव्रत्ये स्थिता नारी व्रतं रक्षेत्सदाऽऽत्मनः ॥
पुरा स्त्री देवरातस्य पतिप्रीता शिरोमणिः ।
कदाचिद्भर्तृरूपेण रक्षसाऽपहृता सती ॥ ४६
कस्यचित्सरसस्तीरे तां निवेश्य स राक्षसः ।
तद्भर्तृरूपं संत्यज्य रक्षो भूत्वा सुदारुणम् ॥ ४७
साम्ना दानेन भेदेन सा यदा नान्वमन्यत ।
तदा तां पातयित्वा स मैथुनायोपचक्रमे ॥ ४८
ततः सा धैर्यमास्थाय विवरं न ददौ तदा ।

* इमे १० श्लोकाः ध. पुस्तकएव दृश्यन्ते ॥

ततः स खड्गमुत्कृष्य भीषयामास तां सतीम् ४९
साऽपि त्यक्तभया साध्वी प्राणत्यागे सुनिश्चिता ।
प्रतिज्ञामकरोत्कृष्णे पातिव्रत्यपरायणा ॥ ५०
आराधितो यदि मया भर्ता मे दैवतं महत् ।
कर्मणा मनसा वाचा गुरवस्तोषिता मया ।
तेन सत्येन योनिर्मे भवत्वद्य शिला दृढा ॥ ५१
एवं तया प्रतिज्ञाते तद्योनिः सा शिलाऽभवत् ।
अन्तरा नाभिजान्वोर्यत्तत्सर्वं च शिलाऽभवत्५२
ततः स खड्गमुद्धृत्य वेगेनास्याः शिरोऽहरत् ॥५३
जया नाम सखी साऽभूत्पार्वत्या नखमांसवत् ।
तस्मात्पतिव्रतायाश्च दुःखमल्पं सुखं बहु ॥] ५४
एवं ते भीरु वध्यन्ते ये त्वां हिंसन्ति मानवाः ।
गच्छ त्वं नगरं कृष्णे न भयं विद्यते तव ॥ ५५
अन्येन त्वं पथा शीघ्रं सुदेष्णाया निवेशनम् ।
अन्येनाहं गमिष्यामि विराटस्य महानसम् ।
यथा नौ नावबुध्येरन्नत्रावेवं व्यवस्थितौ ॥ ५६
वैशंपायन उवाच ।
साऽगच्छन्नगरं कृष्णा भीमेनाश्वासिता सती ५७
कृतकृत्या सुदेष्णाया भवनं शुभलक्षणा ।
शचीव नहुषे शप्ते प्रविवेश त्रिविष्टपम् ॥ ५८
भीमोऽप्यमितवीर्यस्तु बलवानरिमर्दनः ।
सर्वास्तान्कीचकांस्तत्र हत्वा धर्मात्मजानुजः ॥५९
निःशेषं कीचकान्हत्वा रामो रात्रिचरानिव ।
जितशत्रुरदीनात्मा प्रविवेश पुरं ततः ॥ ६०
पञ्चाधिकं शतं तत्र निहतं तेन भारत ।
महावनमिव छिन्नं शिश्ये विगलितद्रुमम् ॥ ६१
एवं ते निहता राजञ्शतं पञ्चोपकीचकाः ।
स च सेनापतिः सूत इत्येतत्सूतषट्शतम् ॥ ६२
न गन्धर्वभयात्किंचिद्वक्तुं कीचकबान्धवाः ।
अशक्नुवन्तस्तां तत्र भयादप्यभिवीक्षितुम् ॥ ६३
विराटनगरे चापि सर्वे मात्स्याः समागताः ।
काल्यं पञ्चशतं चैतानपश्यन्सारथीन्हतान् ॥ ६४
तद्दृष्ट्वा महदाश्चर्यं नरा नार्यश्च नागराः ।
विस्मयं परमं गत्वा नोचुः किंचन भारत ॥ ६५

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः ॥ २८ ॥

पौरैर्विराटंप्रति सानुजकीचकनिधननिवेदनपूर्वकं नगराद्द्रौपदीनिष्कासनप्रार्थना ॥ १ ॥ सुदेष्णया विराटनियोगाद्द्रौपदींप्रति स्वपुरान्निर्गमनचोदना ॥ २ ॥ तथा द्रौपद्या मासावधिस्ववासाभ्यनुज्ञानप्रार्थनायां तदङ्गीकरणम् ॥ ३ ॥

वैशंपायन उवाच ।
ते दृष्ट्वा निहतान्सूतान्भीमसेनेन भारत ।
पौराश्च सहिताः सर्वे राज्ञे गत्वा न्यवेदयन् ।
गन्धर्वेण हता राजन्सूतपुत्राः परश्शतम् ॥ १
यथा वज्रेण दीर्णं वै पर्वतस्य महच्छिरः ।
विनिकीर्णाः प्रदृश्यन्ते तथा सूता महीतले ॥ २
सैरन्ध्री चापि मुक्ता सा पुनरायाति ते गृहम् ।
सर्वं संशयितं राजन्नगरं ते भविष्यति ॥ ३
तथारूपा हि सैरन्ध्री गन्धर्वाश्च महाबलाः ।
पुंसामिष्टश्च विषयो मैथुनाय न संशयः ॥ ४
यथा सैरन्ध्रिदोषेण नेदं राजन्पुरं तव ।
विनाशमेति वै क्षिप्रं तथा साधु विधीयताम् ॥५
सर्वाङ्गसौष्ठवयुतां रूपलावण्यशालिनीम् ।
पश्यतामनिमेषेण चक्षुषा वनितां शुभाम् ।
मनसश्चक्षुषश्चैव प्रतिबन्धो न विद्यते ॥ ६
तस्मात्तां यः पुमान्दृष्ट्वा रूपेणाप्रतिमां भुवि ।
गच्छेत्कामवशं मूढो गन्धर्वैः स निहन्यते ॥ ७
निष्कासयैनां भवनात्पुराच्चैव विशेषतः ।

तां द्रौपदीमभिवीक्षितुमपि अशक्नुवन्तः कीचकबान्धवाः तांप्रति किंचिद्वक्तुं नाशक्नुवन्नित्यध्याहारेण योजना ॥ ६३ ॥ सप्तविंशोऽध्यायः ॥ २७ ॥

गन्धर्वैर्निहता राजन्निति ख. थ. ध. पाठः ॥ १ ॥ तथा नीतिर्विधीयतामिति ध. पाठः ॥ ५ ॥ अष्टाविंशोऽध्यायः ॥ २८ ॥

कालः प्रविश्य सैरन्ध्रीं पुरं नाशयते ध्रुवम् ॥ ८
वैशंपायन उवाच ।
तेषां तद्वचनं श्रुत्वा विराटो वाहिनीपतिः ।
अब्रवीत्क्रियतामेषां सूतानामपरक्रिया ॥ ९
एकस्मिन्नेव ते सर्वे सुसमिद्धे हुताशने ।
दह्यन्तां कीचकाः सर्वे सर्वगन्धैश्च सर्वशः॥ १०
इत्युक्त्वा परमोद्विग्नः प्रविश्यान्तःपुरं शुभम् ।
सुदेष्णां चाब्रवीद्राजा महिषीं जातसाध्वसः ११
सैरन्ध्रीमागतां ब्रूया ममैव वचनादिह ।
गच्छ सैरन्ध्रि भद्रं ते यथाकामं चराधुना ।
बिभेति राजा सैरन्ध्रि गन्धर्वेभ्यः पराभवात् १२
न हि तामुत्सहे वक्तुं स्वयं गन्धर्वरक्षिताम् ।
स्त्रियास्त्वदोषस्तां वक्तुमतस्त्वां प्रब्रवीम्यहम् १३
वैशंपायन उवाच ।
एकस्मिन्नेव ते सर्वे सुसमिद्धे हुताशने ।
अदहन्कीचकान्सर्वान्संस्कारैश्चैव सर्वशः ॥ १४
अथ मुक्ता भयात्कृष्णा सूतपुत्रान्निरस्य च ।
मोक्षिता भीमसेनेन जगाम नगरं प्रति ॥ १५
त्रासितेव मृगी बाला शार्दूलेन मनस्विनी ।
सा तु गात्राणि वासश्च प्रक्षाल्य प्रविवेश ह॥१६
तां दृष्ट्वा पुरुषा राजन्प्राद्रवन्त दिशो दश ।
गन्धर्वाणां भयत्रस्ताः केचिद्दृष्टिं न्यमीलयन् १७
प्रदुद्रुवुश्चाप्यपरे तथा जना
हस्तैश्च चक्षूंषि पिधाय मोहिताः ।
मा पश्यत स्मेति च तां ब्रुवन्त-
स्तथा जनाश्चुक्रुशुरार्तरूपाः ॥ १८
तामद्य यः पश्यति रूपशालिनीं
शयीत भग्नोऽत्र यथैव कीचकाः ।
इति ब्रुवन्तो भयविग्नचेतसो
भयेन गन्धर्वगतेन मोहिताः ॥ १९
ततो महानसद्वारे भीमसेनमवस्थितम् ।
ददर्श राजन्पाञ्चाली यथा मत्तं महाद्विपम् ॥२०
सोपहासं तु शनकैः संज्ञाभिरिदमब्रवीत् ।
नमो गन्धर्वराजाय येनास्मि परिमोक्षिता ॥ २१
कीचकेभ्यो विनिर्दोषामनाथां वसतीं गृहे ।
यो मां रक्षति सन्त्रस्तां गन्धर्वाय नमोस्तु ते २२
भीम उवाच ।
ये यस्या विचरन्तीह पुरुषा वशवर्तिनः ।
तेषां च वशगा नित्यं विचर त्वं यथेष्टतः॥ २३
ये पुरा विचरन्तीह पुरुषा वशवर्तिनः ।
तस्यास्ते वचनं श्रुत्वा ह्यनृणा विहरन्त्वितः॥२४
वैशंपायन उवाच ।
तयोस्तद्वचनं श्रुत्वा जज्ञिरे नेतरे जनाः ।
ततः पाञ्चालराजस्य सुता चापि जगाम ह ॥२५
ततः सा नर्तनागारे धनंजयमपश्यत ।
राज्ञः कन्या विराटस्य नर्तयन्तं महाभुजम् ॥२६
ततस्ता नर्तनागाराद्विनिष्क्रम्य सहार्जुनाः ।
कन्या ददृशुरायान्तीं कृष्णां क्लिष्टामनागसम् २७
कन्या ऊचुः ।
दिष्ट्या सैरन्ध्रि मुक्ताऽसि दिष्ट्याऽसि पुनरागता।
दिष्ट्या च निहताः सूता ये त्वां क्लिश्यन्त्यनागसम्
बृहन्नलोवाच ।
कथं सैरन्ध्रि मुक्ताऽसि कथं पापाश्च ते हताः।
इच्छामि ते कथां श्रोतुं कथयस्व यथातथम् २९
सैरन्ध्र्युवाच ।
बृहन्नले किंनु तव सैरन्ध्र्या कार्यमद्य वै ।
या त्वं रंस्यसि कल्याणि सदा कन्यापुरे सुखं ३०
न हि दुःखं समाप्नोषि सैरन्ध्री यदुपाश्नुते ।
सुखेन वर्तसे येह न तद्दुःखमवाप्यते ।
तेन मां दुःखितामेवं पृच्छसि प्रहसन्त्यपि ॥३१
बृहन्नलोवाच ।
बृहन्नलाऽपि कल्याणि दुःखमाप्नोत्यनन्तकम् ।
तिर्यग्योनिगतेवेयं न चैनामवबुध्यसे ॥ ३२
त्वया सहोषिता चास्मि त्वं च सर्वैः सहोषिता।
त्वत्तः कृच्छ्रतरं वासं वसेयमहमङ्गने ।
क्लिश्यन्त्यां त्वयि सुश्रोणि कोनु दुःखं न चिन्तयेत्
न तु केनचिदत्यन्तं कस्यचिद्धृदयं क्वचित् ।
वेदितुं शक्यते नूनं तेन मां नावबुध्यसे ॥ ३४

वैशंपायन उवाच ।
ततः सहैव कन्याभिर्द्रौपदी राजवेश्म तत् ।
प्रविवेश सुदेष्णायाः समीपमनसूयिनी ॥ ३५
तामब्रवीद्राजपत्नी विराटवचनादिदम् ।
सैरन्ध्रि गम्यतां शीघ्रं यत्र कामयसे गतिम् ।
राजा बिभेति सैरन्ध्रि गन्धर्वेभ्यः पराभवात् ॥३६
त्वं चापि तरुणी सुभ्रू रूपेणाप्रतिमा भुवि ।
चित्तानि च नृणां भद्रे रक्तानि स्पर्शजे सुखे॥३७
तस्मात्त्वत्तो भयं मह्यं राष्ट्रस्य नगरस्य च ।
गच्छाद्यैव यथेष्टं त्वं नगराद्यत्र रंस्यसे ॥ ३८
त्वन्निमित्तं शुभे मह्यं सर्वो बन्धुजनो हतः ।
नृशंसा खलु ते बुद्धिर्भ्रातृणां मे कृतो वधः ॥ ३९
तस्माद्गन्धर्वराजेभ्यो भयमद्य प्रवर्तते ।
यथेष्टं गच्छ सैरन्ध्रि स्वस्ति चेह यथा भवेत् ॥४०
वैशंपायन उवाच ।
सुदेष्णाया वचः श्रुत्वा सैरन्ध्री चेदमब्रवीत् ।
त्रयोदशाहमात्रं तु राजा क्षाम्यतु भामिनि ॥ ४१
कृतकृत्या भविष्यन्ति गन्धर्वास्ते न संशयः ।
ततो मामुपनेष्यन्ति करिष्यन्ति च ते प्रियम् ४२
ध्रुवं च श्रेयसा राजा योक्ष्यते सह बान्धवैः ।
राज्ञः कृतोपकाराश्च कृतज्ञाश्च सदा शुभे ।
साधवश्च बलोत्सिक्ताः कृतप्रतिकृतेप्सवः ॥ ४३
अर्थिनी मा ब्रवीत्येषा यद्वातद्वेति चिन्तय ।
भरस्व तदहर्मात्रं तत्ते श्रेयो भविष्यति ॥ ४४
वैशंपायन उवाच ।
तस्यास्तद्वचनं श्रुत्वा कैकेयी दुःखमोहिता ।
उवाच द्रौपदीमार्ता भ्रातृव्यसनकर्शिता ॥ ४५
वस भद्रे यथेष्टं त्वं त्वामहं शरणं गता ।
त्रायस्व मम भर्तारं पुत्रांश्चैव विशेषतः ॥ ४६
इत्युक्त्वा राजशार्दूल राज्ञे सर्वं न्यवेदयत् ।
त्रिंशद्रात्रिमिमां भीरुः कृतकृत्या निवासये ॥४७

॥ इति श्रीमन्महाभारते विराटपर्वणि कीचकवधपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥

समाप्तं च कीचकवधपर्व ॥ ३ ॥

(अथ गोग्रहणपर्व ॥ ४ ॥)

एकोनत्रिंशोऽध्यायः ॥ २९ ॥

पाण्डवान्वेषणाय क्रमेण विराटपुरमागतैश्चारैर्हास्तिनपुरमेत्य दुर्योधनंप्रति स्वेषां पाण्डवानवगतिनिवेदनपूर्वकं कीचकवधनिवेदनम् ॥ १ ॥

वैशंपायन उवाच ।
कीचके तु हते राजा विराटः परवीरहा ।
शोकमाहारयत्तीव्रं सामात्यः सपुरोहितः ॥ १
कीचकस्य वधं घोरं सानुजस्य विशांपते ।
अत्याहितं चिन्तयित्वा व्यस्मयन्त पृथग्जनाः ॥२
तस्मिन्पुरे जनपदे जजल्पुश्चापि सर्वशः ।
वीर्यवान्दयितो राज्ञो दर्पोत्सिक्तश्च कीचकः ॥३
सांपराये परिक्रुष्टो बलवान्दुर्जयो रणे ।
आसीत्प्रहर्ता शत्रूणां दारदर्शी च दुर्मतिः ।
स हतः किल गन्धर्वैः सैरन्ध्रीकारणान्निशि ॥ ४
इत्यजल्पन्महाराज कीचकस्य विनाशनम् ।
देशेदेशे मनुष्याश्च विस्मिताः कीचके हते ॥ ५
अथ वै धार्तराष्ट्रेण प्रयुक्ता ये बहिश्चराः ।
मृगयित्वा बहून्देशान्ग्रामांश्च नगराणि च ॥ ६
संविधाय यथाऽऽदिष्टं यथादेशं प्रदर्शकाः ।
कृतसंकेतनाः सर्वे न्यवर्तन्त पुरं ततः ॥ ७
आगम्य हास्तिनपुरं धार्तराष्ट्रमरिन्दमम् ।
तत्र दृष्ट्वा तु राजानं कौरव्यं धृतराष्ट्रजम् ॥ ८

द्रोणकर्णकृपैः सार्धं भीष्मेण च महात्मना ।
संगतं भ्रातृभिः सार्धं त्रिगर्तैश्च महारथैः ॥ ९
प्रणम्य शिरसा भूमौ वर्धयित्वा जयाशिषा ।
आसीनं सूर्यसंकाशे काञ्चने परमासने ॥ १०
उपास्यमानं सचिवैर्मरुद्भिरिव वासवम् ।
विद्वद्भिर्गायकैः सार्धं कविभिः स्तुतिपाठकैः॥११
अनेकैरपि राजन्यैः सेवितं सपरिच्छदैः ।
दुर्योधनं सभामध्ये आसीनमिदमब्रुवन् ॥ १२
कृतोऽस्माभिः परो यत्नस्तेषामन्वेषणे सदा ।
पाण्डवानां मनुष्येन्द्र तस्मिन्महति कानने ॥ १३
निर्जने व्यालसंकीर्णे नानाश्रमरसंकुले ।
लताप्रतानगहने नानागुल्मसमावृते ॥ १४
न च विद्मो गता येन पार्थाः सुदृढविक्रमाः ।
मार्गमाणाः पदन्यासमाश्रमेषु वनेषु च ॥ १५
गिरिकूटेषु तुङ्गेषु नानाजनपदेषु च ।
जनाकीर्णेषु देशेषु चत्वरेषु पुरेषु च ॥ १६
नरेन्द्र सहसा नष्टान्नैव विद्म च पाण्डवान् ।
अत्यन्तादर्शनान्नष्टा भद्रं तुभ्यं नरर्षभ ॥ १७
गिरीणां कूटकुञ्जेषु कन्दरोदरसानुषु ।
नदीप्रस्रवणेष्वेव ह्रदेषु च सरस्सु च ॥ १८
गह्वरेषु च दुर्गेषु ग्रामेषू पवनेषु च ।
दुर्विज्ञेया गतिस्तेषां मृग्यतेऽस्माभिरेव च ।
गजव्याघ्रसमीपेषु सिंहान्ते शरभान्तरे ॥ १९
वर्त्मन्यन्विच्छमानास्तु रथानां रथिसत्तम ।
कंचित्कालं मनुष्येन्द्र सूताननुगता वयम् ॥ २०
मृगयित्वा यथान्यायं विदितार्थाश्च तत्वतः ।
प्राप्ता द्वारवतीं सूता विना पार्थैः परंतप ॥ २१
न तत्र कृष्णा राजेन्द्र पाण्डवाश्च महाव्रताः ।
नरदेव यथोद्दिष्टं न च विद्मात्र पाण्डवान् ॥ २२
निर्वृतो भव नष्टास्ते स्वस्थो भव परंतप ।
सर्वथैव प्रनष्टास्ते नमस्ते भरतर्षभ ॥ २३
सर्वा च पृथिवी कृत्स्ना सशैलवनकानना ।
सराष्ट्रनगरग्रामा पत्तनैश्च समन्विता ।
अन्वेषिता च सर्वत्र न च पश्याम पाण्डवान् २४
पुनः शाधि मनुष्येन्द्र अत ऊर्ध्वं विशांपते ।
अन्वेषणे पाण्डवानां भूयः किं करवामहे ॥ २५
इमां च नः प्रियां वीर वाचं भद्रवतीं शृणु ॥ २६
येन त्रिगर्ता निहता बलेन बहुशो नृप ।
सूतेन राज्ञो मत्स्यस्य कीचकेन बलीयसा ।
स हतः पतितः शेते गन्धर्वैर्निशि भारत ॥ २७
स्यालो राज्ञो विराटस्य सेनापतिरुदारधीः ।
सुदेष्णायानुजः क्रूरः शूरो वीरो गतव्यथः ॥ २८
उत्साहवान्महावीर्यो नीतिमान्बलवानपि ।
युद्धज्ञो रिपुवीर्यघ्नः सिंहतुल्यपराक्रमः ॥ २९
प्रजारक्षणदक्षश्च शत्रुग्रहणशक्तिमान् ।
विजितारिर्महायुद्धे प्रचण्डो मानतत्परः ॥ ३०
नरनारीमनोह्लादी धीरो वाग्मी रणप्रियः ।
पुण्यकर्माऽर्थकामानां भाजनं मनुजोत्तमः ॥ ३१
स हतो निशि गन्धर्वैः स्त्रीनिमित्तं नराधिप ।
अमृष्यमाणो दुष्टात्मा निशीथे सह सोदरैः ।
सुहृदश्चास्य निहता योधाश्च प्रहरैर्हताः ॥ ३२
गन्धर्वाणां च महिषी काचिदस्ति नितम्बिनी ।
सैरन्ध्री नाम तां दृप्तो दुष्टात्माऽकामयद्बली ॥ ३३
इत्येवं श्रुतमस्माभिर्गन्धर्वैर्निहतो निशि ॥ ३४
बान्धवैर्बहुभिः सार्धं कीचको निहतो यतः ।
अद्यप्रभृति राजेन्द्र पाण्डवान्वेषणं प्रति ।
चारांश्च सर्वतश्चर्तुं प्रेषयेति मतिर्हि नः ॥ ३५
निहतो निशि गन्धर्वैर्दुष्टात्मा भ्रातृभिः सह ।
एतावच्छ्रुतमस्माभिर्भद्रं तेऽस्तु नराधिप ॥ ३६
प्रियमेतदुपश्रुत्य शत्रूणां च पराभवम् ।
कृतकृत्यश्च कौरव्य विधत्स्व यदनन्तरम् ॥ ३७

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः ॥ ३० ॥

दुर्योधनादिभिः पाण्डवान्वेषणाय समालोचनम् ॥ १ ॥

वैशंपायन उवाच ।
ततो दुर्योधनो राजा श्रुत्वा तेषां वचस्तदा ।
चिरमन्तर्मना भूत्वा इदमाह सभासदः ॥ १
अशक्यं खलु कार्यस्य गतिं ज्ञातुं हि तत्वतः ।
तस्मात्सर्वे परीक्षध्वं क्वनु स्युः पाण्डवा गताः ॥ २
अल्पावशिष्टः कालस्तु गतो भूयिष्ठ एव च ।
तेषामज्ञातचर्यायामस्मिन्वर्षे त्रयोदशे ॥ ३
अपि वर्षस्य शेषं ते ह्यतीयुरिह पाण्डवाः ।
निवृत्तसमयास्ते हि सत्यव्रतपरायणाः ॥ ४
क्षरन्त इव नागेन्द्राः सर्वे ह्याशीविषोपमाः ।
दुःखाद्भवेयुः संरब्धाः कौरवान्प्रति ते ध्रुवम् ॥ ५
विज्ञातव्या मनुष्येन्द्रास्तर्कया सुप्रणीतया ।
निपुणैश्चारपुरुषैः प्राज्ञैर्दक्षैः सुसंवृतैः ॥ ६
अज्ञातसमये ज्ञाताः कृच्छ्ररूपसमाश्रिताः ।
प्रविशेयुर्जितक्रोधास्तावदेव पुनर्वनम् ॥ ७
तस्मात्क्षिप्रं विचिन्वध्वं यथा चात्यन्तमव्ययम् ।
राज्यं निर्द्वन्द्वमव्यग्रं निःसपत्नं चिरं भवेत् ॥ ८
दुर्योधनेनैवमुक्ते वचनेऽतीव दुःखिना ।
ततः कर्णोऽब्रवीद्वाक्यं सत्यधर्मार्थसंयुतम् ॥ ९
एते पुनर्न गच्छन्तु अन्ये गच्छन्तु भारत ।
शीघ्रवृत्ता नरा योग्या निपुणाश्छन्नचारिणः ॥ १०
चरन्तु देशान्विविधान्स्फीताञ्जनपदाकुलान् ।
तत्र गोष्ठीषु रम्यासु सिद्धा ब्राह्मणरूपिणः ॥ ११
परिवाहेषु तीर्थेषु विविधेष्वाकरेषु च ।
अन्वेष्टव्या मनुष्येन्द्र पाण्डवाश्छन्नचारिणः ॥ १२
नदीकुञ्जेषु तीर्थेषु ग्रामेषु नगरेषु च ।
आश्रमेषु च रम्येषु पर्वतेषु गुहासु च ॥ १३
विज्ञातव्या मनुष्येन्द्र तर्कया सुविनीतया ।
विविधैस्तत्परैः सम्यङ्निपुणैस्तज्ज्ञसंमतैः ॥ १४
अथाग्रजानन्तरजो भ्रातुः प्रियहिते रतः ।
ज्येष्ठं दुःशासनस्तत्र भ्राता भ्रातरमब्रवीत् ॥ १५
येषु नः प्रत्ययो राजंश्चारेषु मनुजाधिप ।
ते यान्तु दत्तदेया वै भूयस्तान्परिमार्गितुम् ॥ १६
यदाह कर्णो राजेन्द्र सर्वमेतदवेक्ष्यताम् ।
यथोद्दिष्टं चराः सर्वे मृगयन्तु यतस्ततः ॥ १७
घ्राणैः पश्यन्ति पशवो वेदैरेव द्विजोत्तमाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ १८
यथोक्ताश्चारपुरुषा मृगयन्तु पुनःपुनः ।
एते चान्ये च बहवो देशांश्च नगराणि च ॥ १९
न हि तेषां गतिर्वासः प्रवृत्तिर्वोपलभ्यते ।
अत्यन्तं वा निगूढास्ते पारं वोर्मिमतो गताः ॥ २०
व्यालैर्वाऽपि महारण्ये भक्षिताः शूरमानिनः ।
द्वीपं वा परमं प्राप्ता गिरिदुर्गवनेष्वपि ॥ २१
हीनदर्पा निराशास्ते भक्षिता वाऽपि राक्षसैः ।
अथवा विषमं प्राप्य विनष्टाः शाश्वतीः समाः २२
तस्मान्मानसमव्यग्रं कृत्वाऽऽत्मानं नियम्य च ।
कुरु कार्यं महोत्साहं मन्यसे यन्नराधिप ॥ २३

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः ॥ ३१ ॥

द्रोणेन दुर्योधनंप्रति पाण्डवानां धार्मिकत्वादिगुणशालितया विनाशाभावनिर्धारणेन तदन्वेषणविधानम् ॥ १ ॥
भीष्मेण पाण्डवावासदेशस्य लक्षणाभिधानपूर्वकं तेषां दुर्ज्ञेयत्वस्यापि कथनेन तैः सह सन्धिविधानम् ॥ २ ॥

वैशंपायन उवाच ।
अथाऽब्रवीत्सभामध्ये द्रोणः सूक्ष्मार्थदर्शिवान् ।
न तादृशा विनश्यन्ति नापि यान्ति पराभवम् ॥ १
शूराश्च कृतविद्याश्च बुद्धिमन्तो जितेन्द्रियाः ।

धर्मज्ञाः सत्यसन्धाश्च युधिष्ठिरमनुव्रताः ॥ २
नीतिधर्मार्थतत्वज्ञं पितृवच्च समाहितम् ।
धर्मे स्थितं सत्यधृतिं ज्येष्ठं श्रेष्ठापचायिनम् ॥ ३
अनुव्रता महात्मानो भ्रातरो भ्रातरं प्रियम् ।
अजातशत्रुं श्रीमन्तं सर्वभ्रातॄननुव्रतम् ॥ ४
तेषां तथाविधेयानां निभृतानां महात्मनाम् ।
किमर्थं नीतिमान्प्राज्ञः श्रेयो नैषां करिष्यति ॥५
तस्माद्यत्नात्परीक्षध्वं न तावत्समयो गतः ।
न ते विनाशमृच्छेयुरिति मे नैष्ठिकी मतिः ॥ ६
चिन्त्यतां चैव यत्कार्यं तच्च क्षिप्रमकालिकम् ।
क्रियतां साधु संचिन्त्य वासश्चैषां प्रचिन्त्यतां॥७
यथा च पाण्डुपुत्राणां सर्वार्थेषु धृतात्मनाम् ।
प्रवृत्तिरुपलभ्येत तथा नीतिर्विधीयताम् ॥ ८
सर्वोपायैर्यतस्व त्वं यथा पश्यसि पाण्डवान् ।
दुर्ज्ञेयाः खलु शूरास्ते रक्ष्या नित्यं च दैवतैः ॥९
शुद्धात्मा मानवान्पार्थः सत्यवान्नीतिमाञ्शुचिः ।
तेजोराशिभिरापूर्णो दहेदपि च चक्षुषा ॥ १०
तस्माद्यत्नश्च क्रियतां भूयश्च मृगयामहे ।
ब्राह्मणैश्चारकैः सिद्धैस्तापसैर्निपुणैरपि ॥ ११
विविधैस्तत्परैः सम्यङ्गिर्भीकैस्तज्ज्ञसंमतैः ।
अन्वेष्टव्या मनुष्येन्द्र पाण्डवाश्छन्नचारिणः ॥ १२
ततः शान्तनवो धीमान्भारतानां पितामहः ।
श्रुतवान्देशकालज्ञो नीतिमांश्च महामतिः ॥ १३
तस्मिन्नुपरते वाक्ये आचार्यस्य महात्मनः ।
अनन्तरमुवाचेदं वाक्यं हेत्वर्थसंमितम् ॥ १४
युधिष्ठिरे समायुक्तां धर्मज्ञे धर्मसंहिताम् ।
पाण्डवे नित्यमव्यग्रां गिरं भीष्मः समाददे ॥१५
असत्सु दुर्लभां नित्यं सतां चाभिमतां सदा ।
भीष्मस्त्वभ्यवदत्तत्र गिरं साधुभिरर्चिताम् ॥१६
यथा नो ब्राह्मणोऽवादीदाचार्यः सर्वधर्मवित् ।
श्रुतवृत्तोपसंपन्ना नाशं नायान्ति पाण्डवाः ॥१७
सर्वलक्षणसंपन्नाः साधुवृत्तसमन्विताः ।
वृद्धानुशासने यत्ताः सत्यधर्मपरायणाः ॥ १८
समयं समयज्ञास्ते पालयन्तः शुभव्रताः ।
न विषीदन्ति ते पार्था उद्वहन्तः सतां धुरम् ॥१९
तपसा चैव गुप्तास्ते स्ववीर्येण च पाण्डवाः ।
न नाशमभिगच्छेयुरिति मे नैष्ठिकी मतिः ॥२०
क्षत्रधर्मरता नित्यं केशवानुगताः सदा ।
प्रवीरपुरुषास्ते वै महात्मानो महाबलाः ॥ २१
तत्र बुद्धिं प्रवक्ष्यामि पाण्डवान्वेषणे शृणु ।
न तु नीतिः सुनीतस्य शक्यते वेदितुं परैः ॥२२
यत्तु शक्यमिहास्माभिस्तान्वै संचिन्त्य पाण्डवान् ।
बुद्ध्या प्रणेतुं तत्तेऽहं प्रवक्ष्यामि निबोध तत् २३
न त्वियं साधु वक्तव्या तस्य नीतिः कथंचन ।
वृद्धानुशासने तात तिष्ठतः सत्यशीलिनः ॥ २४
अयुक्तं तु मया वक्तुं तुल्या मे कुरुपाण्डवाः ।
निवासं पाण्डुपुत्राणां संचिन्त्य च वदाम्यहम् ।
बहुना किं प्रलापेन यतो धर्मस्ततो जयः ॥ २५
अवश्यं तु नियुक्तेन सभामध्ये विवक्षता ।
यथार्हमिह वक्तव्यं सर्वथा धर्मलिप्सया ॥ २६
यत्र नाहं तथा मन्ये यथाऽन्ये मेनिरे जनाः ।
निवासं पाण्डुपुत्राणां शृणुष्व मनुजाधिप ॥ २७
[भ्रातृभिः सहितो वीरैः कृष्णया च महायशाः ।
किमर्थं स महाराजो नात्मश्रेयो भविष्यति ॥२८
पाण्डवो निकृतः पूर्वं यथावद्विदितं तव ।
क्लेशितश्च पुरे नित्यं राज्यकामैश्च सांप्रतम् ।
छन्नश्चरति तस्मात्स प्रकृत्या नीतिमान्नृपः ॥२९
वर्षमेकं सुसंच्छन्नमुष्य वासमनुत्तमम् ।
आयाति चोदये काले क्षिप्रं द्रक्ष्यसि पाण्डवं ३०
सोदरैः सहितं वीरं द्रौपद्या च परंतप ।
संविधत्स्व महाबाहो यथा नः स्यात्सुखोदयः॥३१
यस्मिन्स राजा वसति च्छन्नः सत्त्वभृतांवरः ।
भविष्यन्ति नरास्तत्र रागमोहविवर्जिताः ॥ ३२
नाधयो हि महाराज न व्याधिः क्षत्रियर्षभ] ।
पुरे जनपदे वाऽपि यत्र राजा युधिष्ठिरः ॥ ३३
दानशीलो वदान्यश्च निभृतो ह्रीनिषेवकः ।
प्रियवाक्सत्यवाक्शूरो धर्मशीलो जितेन्द्रियः ।
हृष्टः पुष्टः शुचिर्दक्षो यत्र राजा युधिष्ठिरः ॥ ३४

नासूयको न चापीर्ष्युर्नाभिमानी न मत्सरी ।
भविष्यति जनस्तत्र स्वयं धर्ममनुव्रतः ॥ ३५
ब्रह्मघोषाश्च भूयांसः पुण्यशब्दास्तथैव च ।
क्रतवश्च भविष्यन्ति भूयांसो भूरिदक्षिणाः ॥ ३६
सदा च तत्र पर्जन्यः सम्यग्वर्षी न संशयः ।
संपन्नसस्या च मही भविष्यति निरामया ॥ ३७
रसवन्ति च धान्यानि गुणवन्ति फलानि च ।
गन्धवन्ति च माल्यानि शुभशब्दा च भारती ॥
वायुश्च सुखसंस्पर्शो यत्र राजा युधिष्ठिरः ।
नीरोगास्तत्र विद्यन्ते वधबन्धा न सन्ति च ३९
न चोरा न च दण्डाश्च न च बाधा भवन्त्युत ।
नाशक्ता न च दुष्टाश्च यत्र राजा युधिष्ठिरः ४०
भयं च नाविशेत्तत्र निष्प्रतीपं च दर्शनम् ।
बहुक्षीरास्तथा गावः सुपुष्टाश्च सुदोहनाः ॥ ४१
पयांसि दधिसर्पींषि रसवन्ति हितानि च ।
सलिलानि प्रसन्नानि सर्वे भावाश्च शोभनाः ४२
गुणवन्ति च पानानि भोज्यानि विविधानि च ।
तत्र देशे भविष्यन्ति यत्र राजा युधिष्ठिरः ॥४३
रसाः स्पर्शाश्च गन्धाश्च शब्दाश्चापि गुणान्विताः ।
दृश्यानि च प्रसन्नानि यत्र राजा युधिष्ठिरः ४४
धर्माश्च तत्र सर्वैस्तु सेविताश्च द्विजातिभिः ।
स्वैःस्वैर्गुणैश्च संयुक्ता कस्मिन्वर्षे त्रयोदशे ।
देशे तस्मिन्भविष्यन्ति तत पाण्डवसंश्रिते ॥४५
संप्रीतिमाञ्जनस्तत्र संतुष्टः शुचिरव्ययः ।
देवतातिथिभूयांस्तु सर्वभूतानुरागवान् ॥ ४६
इष्टदानमहोत्साहा नित्यं धर्मपरायणाः ।
व्यक्तवाक्यास्ततस्तात शुभकल्याणमङ्गलाः ॥४७
शुभत्विषः शुभेच्छाश्च नित्यतुष्टाः श्रियाऽन्विताः ।
भविष्यन्ति जनास्तत्र यत्र राजा युधिष्ठिरः ॥ ४८
नित्योत्सवप्रमुदितो नित्यहृष्टः श्रिया वृतः ।
भविष्यति निवासोऽयं यत्र राजा युधिष्ठिरः ४९
धर्मज्ञः स तु दुर्ज्ञेयः सर्वज्ञैश्च द्विजातिभिः ।
किंपुनः प्राकृतैस्तात पार्थो विज्ञायते कचित् ॥५०
यस्मिन्सत्यं धृतिर्दानं परा शान्तिर्ध्रुवा क्षमा ।
ह्रीः श्रीः कीर्तिः परं तेज आनृशंस्यमथार्जवम् ५१
तस्मान्निवासः पार्थानां चिन्त्यतां यद्ब्रवीमि वः ।
गतिर्वा परमा तत्र नोत्सहे वक्तुमन्यथा ॥ ५२
एवमेतत्तु संचिन्त्य यत्कृत्यं साधु मन्यसे ।
तत्क्षिप्रं कुरु कौरव्य यद्येतच्छ्रद्दधासि मे ।
कुलस्य हि क्षमं तात यदहं प्रब्रवीमि ते ॥ ५३

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः ॥ ३२ ॥

दुर्योधनेन कीचकवधस्य भीमसेनकृतत्वसंभावनया पाण्डवानां तत्र स्थितिसंभावना ॥ १ ॥ तथा भीष्माद्यनुमत्या सुशर्मणो विराटनगरंप्रति प्रेषणम् ॥ २ ॥ सुशर्मणा विराटनगरमेत्य दक्षिणभागे गोग्रहम् ॥ ३ ॥

वैशंपायन उवाच ।
ततः शारद्वतो वाक्यमित्युवाच कृपस्तदा ।
युक्तं प्राप्तं च वृद्धेन पाण्डवान्प्रति भाषितम् ॥ १
धर्मार्थसहितं श्लक्ष्णं सर्वं सत्यं सहेतुकम् ।
तत्रानुरूपं भीष्मस्य ममापि वचनं शृणु ॥ २
तेषां चैव गतिस्तत्र निवासश्चानुचिन्त्यताम् ।
नीतिर्विधीयतां तत्र सांप्रतं या हिता भवेत् ॥ ३
नावज्ञेयो रिपुस्तात प्राकृतोऽपि बुभूषता ।
किं पुनः पाण्डवाः शूरा विद्वांसो बलिनस्तथा ४
तस्मात्सत्रं प्रविष्टेषु पाण्डवेषु महात्मसु ।
गूढभावेषु छन्नेषु काले चोदयमागते ॥ ५
स्वराष्ट्रे परराष्ट्रे च ज्ञातव्यं बलमात्मनः ।
उदयः पाण्डवानां च प्राप्तकालो न संशयः ॥ ६
निवृत्तसमयाः पार्था महात्मानो महाबलाः ।
महोत्साहा भविष्यन्ति पाण्डवा ह्यमितौजसः ॥७
तस्माद्बलं च कोशं च नीतिश्चापि विधीयताम् ।
यथा कालोदये प्राप्ते सम्यक् तैः संदधामहे ॥ ८
यत्र यन्मन्यसे श्रेयो बुध्यस्व बलमात्मनः ।

नियतं सर्वमित्रेषु बलवत्स्वबलेषु च ॥ ९
सारं फल्गु बलं ज्ञात्वा मध्यस्थं चापि भारत ।
स्वराष्ट्रपरराष्ट्रेषु ज्ञातव्यं बलमात्मनः ॥ १०
अप्रहृष्टं प्रहृष्टं वा संदधाम तथा परैः ।
साम्ना दानेन भेदेन दण्डेन बलिकर्मणा ॥ ११
न्यायेनाक्रम्य च परान्बलाच्चानम्य दुर्बलान् ।
सान्त्वयित्वा च मित्राणि बलं चाभाष्यतां सुखम्
स्वकोशबलसंवृद्धः सम्यक्सिद्धिमवाप्स्यसि ।
योत्स्यसे चापि बलिभिररिभिः प्रत्युपस्थितैः ।
अन्यैस्त्वं पाण्डवैर्वाऽपि हीनैः स्वबलवाहनैः १३
एवं सर्वं विनिश्चित्य व्यवहर्तासि न्यायतः ।
यथाकालं मनुष्येन्द्र चिरं सुखमवाप्स्यसि ॥ १४
भीष्मद्रोणकृपैरुक्ते कर्णदुःशासनादिभिः ।
ततो दुर्योधनो वाक्यं श्रुत्वा तेषां महात्मनाम् ।
मुहूर्तमनुसंचिन्त्य सचिवानिदमब्रवीत् ॥ १५
श्रुतमेतन्मया पूर्वं कथासु जनसंसदि ।
धीराणां शास्त्रविदुषां प्राज्ञानां मतिनिश्चये ।
कृतिनां सारफल्गुत्वे जानामि नयचक्षुषा ॥ १६
सत्वे बाहुबले धैर्ये प्राणे शारीरसंभवे ।
सांप्रतं मानुषे लोके सदैत्यनरराक्षसे ॥ १७
चत्वारस्तु नरव्याघ्रा बले शक्रोपमा भुवि ।
उत्तमाः प्राणिनां तेषां नास्ति कश्चिद्बले समः ।
समप्राणबला नित्यं संपूर्णबलपौरुषाः ॥ १८
बलदेवश्च भीमश्च मद्रराजश्च वीर्यवान् ।
चतुर्थः कीचकस्तेषां पञ्चमं नानुशुश्रुमः ॥ १९
अन्योन्यानन्तरबलाः परस्परजयैषिणः ।
बाहुयुद्धमभीप्सन्तो नित्यं संरब्धमानसाः ॥ २०
तेनाहमवगच्छामि प्रत्ययेन वृकोदरम् ।
मनस्यभिनिविष्टं मे व्यक्तं जीवन्ति पाण्डवाः २१
तत्राहं कीचकं मन्ये भीमसेनेन मारितम् ।
सैरन्ध्रीं द्रौपदीं मन्ये नात्र कार्या विचारणा ॥२२
शङ्के कृष्णानिमित्तं तु भीमसेनेन कीचकः ।
गन्धर्वव्यपदेशेन हतो निशि महाबलः ॥ २३
को हि शक्तः परो भीमात्कीचकं हन्तुमोजसा ।
शस्त्रं विना बाहुबलात्तथा सर्वाङ्गचूर्णने ॥ २४
मर्दितुं वा तथा तीव्रं चर्ममांसास्थिचूर्णनम् ।
रूपमन्यत्समास्थाय भीमस्यैतद्विचेष्टितम् ॥ २५
ध्रुवं कृष्णानिमित्तं तु भीमसेनेन सूतजाः ।
गन्धर्वव्यपदेशेन हता निशि न संशयः ॥ २६
पितामहेन ये चोक्ता देशस्य च जनस्य च ।
गुणास्ते मत्स्यराष्ट्रेषु बहुशोऽपि मया श्रुताः ॥२७
विराटनगरे मन्ये पाण्डवाश्छन्नचारिणः ।
निवसन्ति पुरे रम्ये तत्र यात्रा विधीयताम् ॥२८
मत्स्यराष्ट्रं गमिष्यामो ग्रहीष्यामश्च गोधनम् ।
गृहीते गोधने नूनं तेऽपि योत्स्यन्ति पाण्डवाः ॥
अपूर्णे समये चापि यदि पश्येम पाण्डवान् ।
द्वादशान्यानि वर्षाणि प्रवेक्ष्यन्ति पुनर्वनम् ॥३०
तस्मादन्यतरेणापि लाभोऽस्माकं भविष्यति ।
कोशवृद्धिरिहास्माकं शत्रूणां निधनं भवेत् ॥३१
कथं सुयोधनं गच्छेद्युधिष्ठिरभृतः पुरा ।
एतच्चापि वदत्येष मात्स्यः परिभवान्मयि ॥ ३२
तस्मात्कर्तव्यमेतद्वै तत्र यात्रा विधीयताम् ।
एतत्सुनीतं मन्येऽहं सर्वेषां यदि रोचते ॥ ३३
वैशंपायन उवाच ।
ततो राजा त्रिगर्तानां सुशर्मा रथयूथपः ।
पूर्वमाभाष्य कर्णेन तथा दुःशासनेन च ।
प्राप्तकालमिदं वाक्यमुवाच त्वरितो बली ॥ ३४
असकृन्निकृतः पूर्वं मात्स्यसाल्वेयकेकयैः ।
सूतेनैव च मात्स्यस्य कीचकेन पुनःपुनः ॥ ३५
बाधितो बन्धुभिः सार्धं बलाद्बलवता विभो ।
स कर्णमभिवीक्ष्याथ दुर्योधनमभाषत ॥ ३६
राष्ट्रं ममासकृद्राजन्राज्ञा मात्स्येन बाधितम् ॥३७
प्रणेता कीचकस्तस्य बलोत्सिक्तोऽभवत्पुरा ।
अमर्षी दुर्जयो जेता प्रख्यातबलपौरुषः ।
स हतस्तत्र गन्धर्वैः पापकर्मा नृशंसकृत् ॥ ३८
तस्मिन्विनिहते राजन्हीनदर्पो निराश्रयः ।

तस्मादनन्तरेणापि लाभोऽस्माकमिति थ॰ पाठः । तस्मात् गोग्रहणात् अनन्तरेण युद्धायागतपाण्डवदर्शनेन ॥ ३१ ॥

युधिष्ठिरभृतः युधिष्ठिरो भृतो येन विराटेनेति बहुव्रीहिः ॥३२॥

भविष्यति निरुत्साहो विराट इति मे मतिः ३९
तत्र यात्रा मम मता यदि ते रोचतेऽनघ।
कौरवाणां च सर्वेषां कर्णस्य च महात्मनः ॥४०
एतत्कार्यमहं मन्ये परमात्ययिकं महत्।
राष्ट्रं तस्याभियास्यामो धनधान्यसमाकुलम् ॥४१
आददामोऽस्य रत्नानि विविधानि वसूनि च।
ग्रामान्राष्ट्राणि वा तस्य हरिष्यामो विभागशः॥
अथवा गोसहस्राणि बहूनि शुभदर्शन।
विविधानि हरिष्यामः प्रतिपीड्य पुरं बलात् ४३
कौरवैः सह संगम्य त्रिगर्तैश्च विशांपते।
गास्तस्यापहरिष्यामः सह सर्वैर्महारथैः॥ ४४
सन्धिं वा तेन कृत्वा तु निबध्नीमोऽस्य पौरुषम्।
हत्वा चास्य चमूं कृत्स्नां वशमेवानयामहे॥४५
तं वशे न्यायतः कृत्वा सुखं वत्स्यामहे वयम्।
भवतां बलवृद्धिश्च भविष्यति न संशयः॥ ४६
वैशंपायन उवाच।
तच्छ्रुत्वा वचनं तस्य कर्णो राजानमब्रवीत् ॥४७
सूक्तं सुशर्मणा वाक्यं प्राप्तकालमिदं वचः।
तस्मात्क्षिप्रं विनिर्यामो योजयित्वा वरूथिनीं ४८
यदेतत्तेऽभिरुचितं मम चैतद्धि रोचते।
प्रविभज्य च सैन्यानि यथा वा मन्यते भवान्४९
प्रज्ञावान्कुलवृद्धश्च सर्वेषां नः पितामहः।
आचार्यश्च कृपो विद्वाञ्शकुनिश्चापि सौबलः ५०
मन्यन्ते ते यथा सर्वे तथा यात्रा विधीयताम्।
संमन्त्र्य चाशु गच्छामः साधनार्थं महीपते॥५१
किंतु नः पाण्डवैः कार्यं हीनार्थबलपौरुषैः।
अत्यन्तं हि प्रनष्टास्ते प्राप्ता वाऽपि यमक्षयम् ५२
तद्भवांश्चतुरङ्गेण बलेन महता वृतः।
विराटनगरं यातु सर्वसैन्येन भारत।
आदास्यामोऽथ गास्तस्य विविधानि वसूनि च५३
वैशंपायन उवाच।
ततो दुर्योधनो राजा वचः श्रुत्वा तु तस्य तत्।
वैकर्तनस्य कर्णस्य क्षिप्रमाज्ञापयत्स्वयम्।
शासने नित्ययुक्तं तु दुःशासनमनन्तरम्॥ ५४
दुर्योधन उवाच।
सह वृद्धैस्तु संमन्त्र्य क्षिप्रं योजय वाहिनीम्।
यथोद्देशं तु गच्छामः सहिताः सर्वकौरवैः॥ ५५
सुशर्मा तु यथोद्दिष्टं देशं यातु महारथः।
त्रिगर्तैः सहितः सर्वैः प्रख्यातबलपौरुषैः।
प्रागेव हि सुसंयत्तो विराटनगरं प्रति॥ ५६
जघन्यतो वयं तत्र यास्यामो दिवसान्तरे।
विषयं मत्स्यराजस्य सुसमृद्धं सुसंहितम्॥ ५७
सुशर्मणा गृहीते तु मत्स्यराजस्य गोधने।
विराटः सैन्यमादाय त्रिगर्तैः सह योत्स्यति॥५८
अपरं दिवसं गास्तु तत्र गृह्णन्तु कौरवाः।
गवार्थे पाण्डवास्तत्र योत्स्यन्ति कुरुभिः सह॥५९
तथा गत्वा यथोद्देशं विराटनगरान्तिके।
क्षिप्रं गोष्ठं समासाद्य गृह्णन्तु विपुलं धनम् ६०
गवां शतसहस्राणि श्रीमन्ति गुणवन्ति च।
वयमस्य निगृह्णीमो द्विधा कृत्वा च वाहिनीम् ६१
वैशंपायन उवाच।
ते स्म गत्वा यथोद्दिष्टं देशं मत्स्यमहीपतेः।
संनद्धा रथिनः सर्वे सपताका बलोत्कटाः।
प्रतिवैरं चिकीर्षन्तो गोषु गृद्धा महाबलाः॥६२
आदत्त गाः सुशर्माऽथ कृष्णपक्षस्य चाष्टमीम् ६३
अपरे दिवसे सर्वे राजन्संभूय कौरवाः।
नवम्यां ते न्यगृह्णन्त गोकुलानि सहस्रशः।
कौरवास्तु महावीर्या मत्स्यानां विषयान्तरे॥६४

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥

कृष्णपक्षस्य सप्तमीमिति अष्टम्यां तेऽन्यगृह्णन्तेति च. थ. पाठः ॥ ६३ ॥ विषयान्तरे उत्तरभागे ॥ ६४ ॥

द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

गोपैर्द्रुततरमाद्रुत्य विराटंप्रति सुशर्मणा गोग्रहणनिवेदनम् ॥ १ ॥ विराटादिभिर्युद्धाय निर्गमोद्यमः ॥ २ ॥ युधिष्ठिरेण विराटंप्रति स्वेषां युद्धकौशलनिवेदनेन भ्रातृभिः सह समराभियानम् ॥ ३ ॥

वैशंपायन उवाच ।
ततस्तेषां महाराज तत्रैवामिततेजसाम् ।
छद्मलिङ्गप्रविष्टानां पाण्डवानां महात्मनाम् ॥ १
व्यतीतः समयः सम्यग्विराटनगरे सताम् ।
कुर्वतां तस्य कर्माणि विराटस्य महीपतेः ॥ २
कीचके तु हते राजा विराटः परवीरहा ।
परां संभावनां चक्रे कुन्तीपुत्रे युधिष्ठिरे ॥ ३
ततस्त्रयोदशस्यान्ते तस्य वर्षस्य भारत ।
सुशर्मणा गृहीतं तु गोधनं तरसा बहु ॥ ४
ततः शब्दो महानासीद्रेणुश्च दिवमस्पृशत् ।
शङ्खदुन्दुभिघोषश्च भेरीणां च महास्वनः ।
गवाश्वरथनागानां निस्वनश्च पदातिनाम् ॥ ५
एवं तैस्त्वभिनिर्याय मत्स्यराजस्य गोधने ।
त्रिगर्तैर्गृह्यमाणे तु गोपालाः प्रत्यषेधयन् ॥ ६
अथ त्रिगर्ता बहवः परिगृह्य धनं बहु ।
परिक्षिप्य हयैः शीघ्रै रथव्रातैश्च भारत ।
गोपालान्प्रत्ययुध्यन्त रणे कृत्वा जये धृतिम् ॥ ७
ते हन्यमाना बहुभिः प्रासतोमरपाणिभिः ।
गोपाला गोकुले भक्त्या वारयामासुरोजसा ॥ ८
परश्वधैश्च मुसलैर्भिण्डिपालैश्च मुद्गरैः ।
गोपालाः कर्षणैश्चित्रैर्जघ्नुरश्वान्समन्ततः ॥ ९
ते हन्यमानाः संक्रुद्धास्त्रिगर्ता रथयोधिनः ।
विसृज्य शरवर्षाणि गोपानद्रावयन्बलात् ॥ १०
हन्यमानेषु गोपेषु विमुखेषु विशांपते ।
ततो युवानः संभीताः श्वसन्तो रेणुगुण्ठिताः ॥ ११
जवेन महता चैव गोपालाः पुरमाव्रजन् ।
विराटनगरं प्राप्य नरा राजानमब्रुवन् ॥ १२
सभायां राजशार्दूलमासीनं पाण्डवैः सह ।
शूरैः परिवृतं योधैः कुण्डलाङ्गदधारिभिः ॥ १३
सद्भिश्च पण्डितैः सार्धं मन्त्रिभिश्चापि संवृतम् ।
दृष्ट्वा शीघ्रं तु गोपाला विराटमिदमब्रुवन् ॥ १४
अस्मान्युधि विनिर्जित्य परिभूय सबान्धवान् ।
षष्टिं गवां सहस्राणि त्रिगर्ताः कालयन्ति ते ।
ता निवर्तय राजेन्द्र मा नेशुः पशवस्तव ॥ १५
वैशंपायन उवाच ।
श्रुत्वा तु वचनं तेषां गोपालानामरिंदमः ।
स राजा महतीं सेनां मात्स्यानां समवाहयत् ।
रथनागाश्वकलिलां पत्तिध्वजसमाकुलाम् ॥ १६
राजानो राजपुत्राश्च तनुत्राण्यथ भेजिरे ।
भानुमन्ति विचित्राणि सूपसेव्यानि भागशः ॥ १७
पृथक्काञ्चनसन्नाहान्रथेष्वश्वानयोजयन् ।
उत्कृष्य पाशान्मौर्वीणां शूराश्चापेष्वयोजयन् १८
दृढमायसगर्भं तु कवचं तप्तकाञ्चनम् ।
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहारयत् १९
सर्वभारसहं वर्म कल्याणपटलं दृढम् ।
शतानीकादवरजो मदिराक्षोऽभ्यहारयत् ॥ २०
उत्सेधे यस्य पद्मानि शतं सौगन्धिकानि च ।
मृष्टहाटकपर्यन्तं सूर्यदत्तोऽभ्यहारयत् ॥ २१
दृढमायसगर्भं च श्वेतं रुक्मपरिष्कृतम् ।
विराटस्य सुतो ज्येष्ठो वीरः शङ्खोऽभ्यहारयत् २२
शतसूर्यं शतावर्तं शतबिन्दु शताक्षिमत् ।
अभेद्यकल्पं मत्स्यानां राजा कवचमाहरत् ॥ २३
ततो नानातनुत्राणि स्वानिस्वानि महाबलाः ।
युयुत्सवोऽभ्यनह्यन्त देवकल्पाः प्रहारिणः ॥ २४
सोपस्करेषु शुभ्रेषु महत्सु च महारथाः ।
पृथक्काञ्चनसन्नाहान्रथेष्वश्वानयोजयन् ॥ २५
सूर्यचन्द्रप्रतीकाशे मणिहेमविभूषिते ।
महाप्रमाणं मत्स्यस्य ध्वजमुच्छ्रियते रथे ॥ २६
ध्वजान्बहुविधाकारान्सौवर्णान्हेममालिनः ।
यथास्वं क्षत्रियाः शूरा रथेषु समयोजयन् ॥ २७
रथेषु युज्यमानेषु कङ्को राजानमब्रवीत् ।
मया ह्यस्त्रं चतुर्वर्गमवाप्तमृषिसत्तमात् ॥ २८

दंशितो रथमास्थाय पदं निर्याम्यहं गवाम् ।
अयं च बलवाञ्छूरो वललो दृश्यतेऽनघ ॥ २९
गोसङ्ख्यमश्वबन्धं च संयोजय रथेषु वै ।
नैतेन जातु युध्येयुर्गवार्थमिति मे मतिः ॥ ३०
वैशंपायन उवाच ।
अथ मात्स्योऽब्रवीद्राजा शतानीकं जघन्यजम् ।
कङ्कश्च बललः सूदो दामग्रन्थिश्च वीर्यवान् ॥ ३१
तन्त्रिपालश्च गोसङ्ख्यो यथा ते पुरुषर्षभाः ।
शूराः सुवीराः पुरुषा नागराजवरोपमाः ।
युध्येयुरिति मे बुद्धिर्वर्तते नात्र संशयः ॥ ३२
एतेषामपि दीयन्तां रथा ध्वजपताकिनः ।
कवचानि विचित्राणि दृढानि च लघूनि च ३३
प्रतिमुञ्चन्तु गात्रेषु दीयन्तामायुधानि च ।
नेमे जातु न युध्येयुरिति मे धीयते मतिः ॥ ३४
वैशंपायन उवाच ।
तच्छ्रुत्वा नृपतेर्वाक्यं शीघ्रं त्वरितमानसः ।
शतानीकः स पार्थेभ्यो रथान्राजन्समादिशत् ३५
सहदेवाय राज्ञे च भीमाय नकुलाय च ।
तान्दृष्ट्वा सहसा सूता राजभक्तिपुरस्कृताः ॥ ३६
निर्दिष्टा नरदेवेन रथाञ्छीघ्रमयोजयन् ।
कवचानि विचित्राणि नवानि च दृढानि च ॥३७
विराटः प्रददौ यानि तेषामक्लिष्टकर्मणाम् ।
तान्यामुच्य शरीरेषु दंशितास्ते महारथाः ॥ ३८
तरस्विनश्छन्नरूपाः सर्वशस्त्रविशारदाः ।
रथान्हेमपरिष्कारान्समास्थाय महारथाः ।
पाण्डवा निर्ययुर्हृष्टा दंशिता राजसत्तम ॥ ३९
विराटमन्वयुः पश्चात्सहिताः कुरुपुङ्गवाः ।
चत्वारो भ्रातरः शूराः पाण्डवाः सत्यविक्रमाः॥
दीर्घाणां च दृढानां च धनुषां ते यथाबलम् ।
उत्कृष्य पाशान्मौर्वीणां वीराश्चापेष्वयोजयन् ४१
ततः सुवाससः सर्वे वीराश्चन्दनरूषिताः ।
चोदिता नरदेवेन क्षिप्रमश्वानचोदयन् ॥ ४२
ते हया हेमसंच्छन्ना बृहन्तः साधुवाहिनः ।
चोदिताः प्रत्यदृश्यन्त पत्रिणामिव पङ्क्तयः ॥४३
भीमरूपाश्च मातङ्गाः प्रभिन्नकरटामुखाः ।
स्वारूढा युद्धकुशलैर्महामात्राधिरोहिताः ॥ ४४
क्षरन्त इव जीमूताः सुदन्ताः षाष्टिहायनाः ।
राजानमन्वयुः पश्चात्क्रामन्त इव पर्वताः ॥ ४५
दृढायुधजनाकीर्णं रथाश्वगजसंकुलम् ।
तद्बलाग्रं विराटस्य शक्रस्येव तदा बभौ ॥ ४६
तं प्रयान्तं महाराज निनीषन्तं गवां पदम् ।
विशारदानां वैश्यानां प्रकृष्टानां तदा नृप ॥४७
विंशतिस्तु सहस्राणि नराणामनुयायिनाम् ।
अष्टौ रथसहस्राणि दश नागशतानि च ।
विंशच्चाश्वसहस्राणि मात्स्यानां त्वरितं ययुः ४८
तदनीकं विराटस्य शुशुभेऽतीव भारत ।
वसन्ते बहुपुष्पाढ्यं काननं चित्रितं यथा ॥ ४९

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

विराटसुशर्मसैन्ययोर्युद्धम् ॥ १ ॥ युधिष्ठिरादिनिहतानां परिसङ्ख्यानम् ॥ २ ॥ विराटसुशर्मणोर्युद्धम् ॥ ३ ॥

वैशंपायन उवाच ।
निर्याय नगराच्छूरा व्यूढानीकाः प्रहारिणः ।
त्रिगर्तानस्पृशन्मात्स्याः सूर्येऽस्तंगमिते सति ॥१
ते त्रिगर्ताश्च मात्स्याश्च व्यूढानीकाः प्रहारिणः ।
अन्योन्यमभिवर्तन्ते गोषु गृद्धा महाबलाः ॥ २
भीमाश्च मत्तमातङ्गास्तोमराङ्कुशचोदिताः ।
ग्रामणीयैः समारूढाः कुशलैर्हस्तिसादिभिः ॥ ३
तेषां समागमो घोरस्तुमुलो रोमहर्षणः ।
घ्नतां परस्परं राजन्यमराष्ट्रविवर्धनः ॥ ४
देवासुरसमो राजन्नासीत्सूर्येऽवलम्बति ।
पदातिरथनागेन्द्रहयारोहबलौघवान् ॥ ५
अन्योन्यमभ्यापततां निघ्नतां चेतरेतरम् ।

उदतिष्ठद्रजो भौमं न प्राज्ञायत किंचन ॥ ६
पक्षिणश्चापतन्भूमौ सैन्येन रजसा वृताः ।
इषुभिर्व्यतिसर्पद्भिरादित्योऽन्तरधीयत ॥ ७
खद्योतैरिव संयुक्तमन्तरिक्षमजायत ॥ ८
रुक्मपृष्ठानि चापानि विचेरुर्विद्युतो यथा ।
नर्दतां लोकवीराणां सव्यं दक्षिणमस्यताम् ॥ ९
रथा रथैः समाजग्मुः पत्तयश्च पदातिभिः ।
सादिनः सादिभिर्जग्मुर्गजैश्चापि महागजाः ॥१०
असिभिः पट्टसैश्चापि शक्तिभिस्तोमरैरपि ।
संरब्धाः समरे योधा निजघ्नुरितरेतरम् ॥ ११
निघ्नन्तः समरेऽन्योन्यं हृष्टाः परिघपाणयः ।
न शेकुरतिसंक्रुद्धाः शूराः कर्तुं पराङ्मुखम् ॥ १२
रक्ताधरोष्ठं सुनसं क्लृप्तश्मश्रु स्वलंकृतम् ।
अदृश्यत शिरश्छिन्नं रजोविध्वस्तकुण्डलम् ॥ १३
दृश्यन्ते तत्र गात्राणि वीरैश्छिन्नानि सर्वशः ।
सालस्कन्धनिकाशानि क्षत्रियाणां महामृधे ॥१४
नागभोगनिकाशैश्च बाहुभिश्चन्दनोक्षितैः ।
आकीर्णा वसुधा तत्र शिरोभिश्च सकुण्डलैः ॥१५
यथा वा वाससी श्लक्ष्णे महारजतरञ्जिते ।
बिभ्रती युवती श्यामा तद्वद्भाति वसुन्धरा ॥१६
उपाशाम्यद्रजो भौमं रुधिरेण प्रवर्षता ।
कश्मलं प्राविशद्घोरं निर्मर्यादमवर्तत ॥ १७
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः सहितस्तदा ।
व्यूहं कृत्वा विराटस्य अन्वयुध्यत पाण्डवः ॥१८
आत्मानं श्येनवत्कृत्वा तुण्डमासीद्युधिष्ठिरः ।
पक्षौ यमौ च भवतः पुच्छमासीद्वृकोदरः ॥ १९
सहस्रं न्यहनत्तत्र कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनस्तु संक्रुद्धः सर्वशस्त्रभृतांवरः ।
द्विसहस्रं रथान्वीरः परलोकं प्रवेशयत् ॥ २०
नकुलस्त्रिशतं जघ्ने सहदेवश्चतुःशतम् ।
शतानीकः शतं जघ्ने मदिराश्वश्चतुःशतम् ॥ २१
प्रहृष्टां महतीं सेनां त्रिगर्तानां महाबलौ ।
आर्च्छेतां बहुसंरब्धौ केशाकेशि रथारथि ॥ २२
लक्षयित्वा त्रिगर्तानां तौ प्रविष्टौ महाचमूम् ।
जग्मतुः सूर्यदत्तश्च वललश्चापि पृष्ठतः ॥ २३
शङ्खो विराटपुत्रश्च महेष्वासो महाबलः ।
विनिघ्नन्समरे शूरान्प्रविवेश महाचमूम् ॥ २४
विराटस्तत्र संग्रामे हत्वा पञ्चशतं रथान् ।
कुञ्जराणां शतं चैव सहस्रं वाजिनां तथा ॥ २५
चरन्स विविधान्मार्गान्रथेन रथिनांवरः ।
त्रिगर्तानां सुशर्माणमार्च्छद्रुक्मरथं रणे ॥ २६
तौ तु प्राहरतां तत्र महेष्वासौ महाबलौ ।
अन्योन्यमभिनिघ्नन्तौ गोषु गोवृषभाविव ॥ २७
राजसिंहौ सुसंरब्धौ विरेजतुरमर्षणौ ।
कृतास्त्रौ निशितैर्बाणैरसिशक्तिपरश्वधैः ॥ २८
ततो रथाभ्यां रथिनौ व्यतीयातां समन्ततः ।
शरान्ससृजतुः शीघ्रं तोयधारा घनाविव ॥ २९
अन्योन्यमभिसंरब्धौ दन्ताभ्यामिव कुञ्जरौ ।
कृतास्त्रौ निशितैर्बाणैर्दारयामासतू रणे ॥ ३०
मात्स्यो राजा सुशर्माणं विव्याध निशितैः शरैः ।
पञ्चभिः पञ्चभिर्बाणैर्विव्याध चतुरो हयान् ॥३१
द्वाभ्यां सूतं च विव्याध केतुं च त्रिभिराशुगैः ।
तथैव मात्स्यराजं तु सुशर्मा युद्धदुर्मदः ।
पञ्चाशद्भिः शितैर्बाणैर्विव्याध परमास्त्रवित् ॥३२
तयोर्बलानि राजेन्द्र समस्तानि महारणे ।
नाजानन्त तदाऽन्योन्यं प्रदोषे रजसा वृते ॥३३

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

सुशर्मणा युद्धे विराटस्य ग्रहणम् ॥ १ ॥ भीमेन युधिष्ठिरचोदनया विराटस्य मोचनपूर्वकं सुशर्मणो बन्धनम् ॥ २ ॥ युधिष्ठिरेण करुणया सुशर्मणो विमोक्षणम् ॥ ३ ॥

वैशंपायन उवाच ।
तमसाऽभिप्लुते लोके रजसा चैव भारत ।
व्यतिष्ठन्त मुहूर्तं ते व्यूढानीकाः प्रहारिणम् ॥ १
ततोऽन्धकारं प्रणुदन्नुदतिष्ठन्निशाकरः ।

कुर्वाणो विमलां रात्रिं दर्शयन्क्षत्रियात्रणे ॥ २
ततः प्रकाशमासाद्य पुनर्युद्धमवर्तत ।
घोररूपं तदा तेषामवेक्ष्य तु परस्परम् ॥ ३
तथैव तेषां तुमुलानि तानि
क्रुद्धानि चान्योन्यमभिद्रवन्ति ।
गदासिपट्टैश्च परश्वथैश्च
प्रासैश्च तीक्ष्णाग्रसुधौतधारैः ॥ ४
बलं तु मात्स्यस्य बलेन राजा
सर्वं त्रिगर्ताधिपतिः सुशर्मा ।
प्रमथ्य जित्वा च निपीड्य मत्स्या-
न्विराटमोजस्विनमभ्यधावत् ॥ ५
मत्ताविव वृषौ तौ तु गजाविव मदोद्धतौ ।
सिंहाविव गजग्राहौ शक्रवृत्राविवोद्धतौ ॥ ६
उभौ तुल्यबलोत्साहावुभौ तुल्यपराक्रमौ ।
उभौ तुल्यास्त्रविक्षेपावुभौ युद्धविशारदौ ॥ ७
तौ निहत्य पृथग्धुर्यानुभयोः पार्ष्णिसारथी ।
आस्तां तुल्यधनुर्ग्राहौ कृष्णकंसाविवोद्धतौ ॥ ८
ततः सुशर्मा त्रैगर्तः सह भ्रात्रा सुवर्मणा ।
अभ्यद्रवन्मत्स्यराजं रथव्रातेन सर्वशः ॥ ९
ततो रथाभ्यां प्रस्कन्द्य भ्रातरौ क्षत्रियर्षभौ ।
गदापाणी सुसंरब्धौ समभ्यद्रवतां जवात् ॥ १०
सुशर्मा परवीरघ्नो बलवान्वीर्यवान्गदी ।
विरथं मत्स्यराजानं जीवग्राहमथाग्रहीत् ॥ ११
तमुन्मथ्य सुशर्मा तु युवतीमिव कामुकः ।
स्यन्दनं स्वं समारोप्य प्रययौ भीमविक्रमः ॥१२
तस्मिन्गृहीते विरथे विराटे बलवत्तरे ।
बलं सर्वं विभग्नं तन्निरुत्साहं निराशकम् ॥ १३
प्राद्रवन्त भयान्मात्स्यास्त्रिगर्तैरर्दिता रणे ।
विदिक्षु दिक्षु सर्वासु पलायन्ति च यान्ति च१४
तेषु विद्राव्यमाणेषु कुन्तीपुत्रो युधिष्ठिरः ।
अभ्यभाषत धर्मात्मा भीमसेनमरिन्दमम् ॥ १५
मात्स्यराजस्त्रिगर्तेन परामृष्टः सुशर्मणा ।
तं मोक्षय महाबाहो मा गमद्विषतां वशम् ॥१६
भीमसेन महाबाहो गृहीतं तु सुशर्मणा ।
त्रायस्व मोचय क्षिप्रमस्मत्प्रीतिकरं नृपम् ॥ १७
उषिताः स्म सुखं सर्वे सर्वकामैः सुपूजिताः ।
भीमसेन त्वया कार्या तस्य वासस्य निष्कृतिः १८
वैशंपायन उवाच ।
तं तथावादिनं तत्र भीमसेनो महाबलः ।
अभ्यभाषत दुर्धर्षो रणमध्ये युधिष्ठिरम् ॥ १९
अहमेनं परित्रास्ये शासनात्तव पार्थिव ।
पश्येदं सुमहत्कर्म युध्यतो मम शत्रुभिः ॥ २०
स्वबाहुबलमाश्रित्य परेषामसमं रणे ।
एकान्तमाश्रितो राजंस्तिष्ठ त्वं भ्रातृभिः सह २१
अयं वृक्षो महाशाखो गिरिमात्रो वनस्पतिः ।
अहमेनं समारुज्य पोथयिष्यामि शात्रवान् ॥ २२
वैशंपायन उवाच ।
तं मत्तमिव मातङ्गं वीक्षमाणं वनस्पतिम् ।
अब्रवीद्भ्रातरं वीरं धर्मराजो युधिष्ठिरः ॥ २३
भीम मा साहसं कार्षीस्तिष्ठत्वेष वनस्पतिः ॥२४
मा त्वां वृक्षेण कर्माणि कुर्वन्तमतिमानुषम् ।
जनाः समवबुध्येरन्भीमोऽयमिति भारत ॥ २५
मा ग्रहीस्त्वमिमं वृक्षं सिंहनादं च मा नद ।
कर्मणा सिंहनादेन विज्ञास्यन्ति जना ध्रुवम् २६
इमं वृक्षं गृहीत्वा त्वं नेमां सेनामभिद्रव ।
वृक्षं च त्वां रुजन्तं वै विज्ञास्यति जनो ध्रुवं २७
अन्यदेवायुधं गृह्य प्रतिपद्यस्व मानुषम् ।
चापं वा यदि वा शक्तिं निस्त्रिंशं वा परश्वथम् २८
यदेव मानुषं भीम भवेदन्यैरलक्षितम् ।
तदेवायुधमादाय मोचयाशु महीपतिम् ॥ २९
यमौ च चक्ररक्षौ ते भवितारौ महाबलौ ।
व्यायच्छतस्ते समरे मत्स्यराजं परीप्सतः ॥ ३०
वैशंपायन उवाच ।
भ्रातुर्वचनमादाय भीमो वृक्षं विसृज्य च ।
चापमादाय संप्राप्तो रथमास्थाय पाण्डवः ॥ ३१
व्यमुञ्चच्छरवर्षाणि सतोय इव तोयदः ।

नन्दयन्क्षत्रियानिति थ. पाठः ॥ २ ॥

पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

तं भीमो भीमकर्माणं सुशर्माणमथाऽऽद्रवत् ३२
विराटमभिवीक्ष्यैनं तिष्ठतिष्ठेति चाब्रवत् ॥ ३३
सुशर्मा चिन्तयामास कालान्तकयमोपमम् ।
तिष्ठतिष्ठेति भाषन्तं पृष्ठतो रथपुङ्गवः ॥ ३४
पश्यतां सुमहत्कर्म महद्युद्धमुपस्थितम् ।
परावृत्तो धनुर्गृह्य सुशर्मा भ्रातृभिः सह ॥ ३५
निमेषान्तरमात्रेण भीमसेनेन ते रथाः ।
रथानां च गजानां च वाजिनां च ससादिनां ३६
सहस्रशतसंघाताः शूराणामुग्रधन्विनाम् ।
पातिता भीमसेनेन विराटस्य समीपतः ॥ ३७
पत्तयो निहतास्तेषां गदां गृह्य महात्मना ॥ ३८
तद्दृष्ट्वा तादृशं युद्धं सुशर्मा युद्धदुर्मदः ।
चिन्तयामास मनसा किं शेषं हि बलस्य मे ॥३९
अपरो दृश्यते सैन्ये पुरा मग्नो महाबले ।
आकर्णपूर्णेन तदा धनुषा प्रत्यदृश्यत ॥ ४०
सुशर्मा सायकांस्तीक्ष्णान्क्षिपते च पुनःपुनः ४१
ततः समस्तास्ते सर्वे तुरगानभ्यचोदयन् ।
दिव्यमस्त्रं विकुर्वाणास्त्रिगर्तान्प्रत्यमर्षणाः ॥ ४२
तान्निवृत्तरथान्दृष्ट्वा पाण्डवास्तां महाचमूम् ।
वैराटिः परमक्रुद्धो युयुधे परमाद्भुतम् ॥ ४३
त्रिगर्ताः समभिक्रम्य अयुध्यन्त जयैषिणः ।
तान्भीमसेनः संक्रुद्धः सर्वशस्त्रभृतांवरः ।
द्विसहस्ररथान्वीरः परलोकं प्रवेशयत् ॥ ४४
सहस्रं प्राहिणोद्राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलश्चापि सप्तैव शतानि प्राहिणोच्छरैः ॥ ४५
शतानि त्रीणि शूराणां सहदेवः प्रतापवान् ।
युधिष्ठिरसमादिष्टो निजघ्ने पुरुषर्षभः ॥ ४६
प्रविश्य महतीं सेनां त्रिगर्तानां महाबलः ।
क्षोभयन्सर्वभूतानि सिंहः क्षुद्रमृगानिव ॥ ४७
ततो युधिष्ठिरो राजा त्वरमाणो महाबलः ।
अभिद्रुत्य सुशर्माणं शरैरभ्यहनद्भृशम् ॥ ४८
सुशर्माऽपि सुसंक्रुद्धस्त्वरमाणो युधिष्ठिरम् ।
अविध्यद्दशभिर्बाणैश्चतुर्भिश्चतुरो हयान् ॥ ४९
ततो राजन्क्षिप्रकारी कुन्तीपुत्रो वृकोदरः ।
समासाद्य सुशर्माणमश्वांस्तस्य न्यपातयत् ॥ ५०
पृष्ठगोपौ च तस्याथ हत्वा परमसायकैः ।
अथास्य सारथिं क्रुद्धो रथोपस्थादपातयत् ॥ ५१
चक्ररक्षस्तु शूरश्च शोणाश्वो नाम नामतः ।
स भयाद्विरथं दृष्ट्वा त्रैगर्तं व्याजहात्तदा ॥ ५२
ततो विराटः प्रस्कन्द्य रथादथ सुशर्मणः ।
गदामस्य परामृश्य तमेवाभ्यहनद्बली ॥ ५३
स चचार गदापाणिर्वृद्धोऽपि तरुणो यथा ॥५४
भीमस्तु भीमसंकाशो रथात्प्रस्कन्द्य वीर्यवान् ।
उत्प्लुत्य गत्वा वेगेन तद्रथे विनिपत्य च ।
सुशर्मणः शिरोऽगृह्णात्पुनराश्वास्य युध्यतः ॥५५
अग्राद्गिरेर्विनिक्षिप्य सिंहः क्षुद्रमृगं यथा ।
ऊर्ध्वमुत्प्लुत्य मार्जार आखोर्यद्वच्छिरो रुषा ॥५६
समुद्यम्य तु रोषात्तं निष्पिपेष महीतले ।
यदा मूर्ध्नि महाबाहुः प्राहरद्विलपिष्यतः ॥ ५७
तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना ।
स मोहमगमद्राजा प्रहारवरपीडितः ॥ ५८
तस्मिन्वीरे गृहीते तु त्रिगर्तानां महारथे ।
अभज्यत बलं सर्वं त्रिगर्तानां भयातुरम् ॥ ५९
निवृत्य गास्ततः सर्वाः पाण्डुपुत्रा महारथाः ।
अवजित्य सुशर्माणं धनं चादाय सर्वशः ॥ ६०
स्वबाहुबलसंपन्ना ह्रीनिषेवा यतव्रताः ।
विराटस्य महात्मानः परिक्लेशविनाशनाः ।
स्थिताः समक्षं ते सर्वे त्वथ भीमोऽभ्यभाषत ६१
नायं पापसमाचारो मत्तो जीवितुमर्हति ।
किंतु शक्यं मया कर्तुं यद्राजा सततं घृणी ।
गले गृहीत्वा राजानमानीय विवशं वशम् ॥६२
तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः ।
रथमारोपयामास विसंज्ञं पांसुगुण्ठितम् ॥ ६३
अभ्येत्य रणमध्यस्थमभ्यगच्छद्युधिष्ठिरम् ।
दर्शयामास भीमस्तु सुशर्माणं नराधिपम् ॥ ६४
प्रोवाच पुरुषव्याघ्रो भीममाहवशोभिनम् ।
तं राजा प्राहसद्दृष्ट्वा मुच्यतां वै नराधमः ॥ ६५
एवमुक्तोऽब्रवीद्भीमः सुशर्माणं महाबलम् ।

जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ॥ ६६
दासोसीति त्वया वाच्यं संसत्सु च सभासु च।
एवं ते जीवितं दद्यामेष युद्धजितो विधिः ॥ ६७
तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः।
मुञ्चमुञ्चाधमाचारं प्रमाणं यदि ते वयम् ॥ ६८
दासभावं गतो ह्येष विराटस्य महीपतेः।
अदासो गच्छ मुक्तोसि मैवं कार्षीः कदाचन ॥६९
एवमुक्ते तु सव्रीडः सुशर्माऽसीदधोमुखः।
स मुक्तोऽभ्येत्य राजानमभिवाद्य प्रतस्थिवान् ७०
विसृज्य तु सुशर्माणं पाण्डवास्ते हतद्विषः।
स्वबाहुबलसंपन्ना ह्रीनिषेवा यतव्रताः।
संग्राममशिरसो मध्ये तां रात्रिं सुखिनोऽवसन् ७१

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः ॥ ३६ ॥

युधिष्ठिरचोदनया विराटप्रेषितैर्दूतैर्नगरमेत्य जयोद्घोषणम् ॥ १ ॥

वैशंपायन उवाच।
ततो विराटः कौन्तेयानतिमानुषविक्रमान्।
अर्चयामास वित्तेन मानेन च महारथान्।
वचसा चैव सान्त्वेन स्नेहेन च मुदाऽन्वितः ॥१
विराट उवाच।
यथैव मम रत्नानि युष्माकं तानि वै तथा।
कार्यं कुरुत तैः सर्वैर्यथाकामं यथासुखम् ॥ २
ददाम्यलंकृताः कन्या वसूनि विविधानि च।
मनसा चाप्यभिप्रेतं यद्वः शत्रुनिबर्हणाः ॥ ३
युष्माकं विक्रमादद्य मुक्तोऽहं स्वस्तिमानिह।
तस्माद्भवन्तो मत्स्यानामीश्वराः सर्व एव हि ॥ ४
वैशंपायन उवाच।
तं तथावादिनं तत्र कौरवेयाः पृथक्पृथक्।
ऊचुः प्रहृष्टमनसो युधिष्ठिरपुरोगमाः ॥ ५
प्रतिनन्दामहे वाचं सर्वथैव विशांपते।
एतावताऽद्य प्रीताःस्मो यत्त्वं मुक्तोसि शत्रुभिः ६
यत्त्वं मुक्तोसि शत्रुभ्यो ह्येतत्कार्यं हितं हि नः।
न किंचित्कार्यमस्माकं न धनं मृगयामहे ॥ ७
अथाब्रवीत्प्रीतमना मात्स्यराजो युधिष्ठिरम्।
निर्भरः प्रीतिपूरेण हर्षगद्गदया गिरा ॥ ८
पुनरेव महाबाहुर्विराटो राजसत्तमः।
एहि त्वामभिषेक्ष्यामि मत्स्यराजस्तु नो भवान् ९
मनसा चाप्यभिप्रेतं यत्ते शत्रुनिबर्हण।
तत्तेऽहं संप्रदास्यामि सर्वमर्हति नो भवान् ॥१०
रत्नानि गाः सुवर्णं च मणिमुक्तमथापि वा।
वैयाघ्रपद्य विप्रेन्द्र सर्वथैव नमोस्तु ते ॥ ११
त्वत्कृते ह्यद्य पश्यामि राज्यमात्मानमेव च।
यतश्च जातः संरम्भः स च शत्रुर्वशं गतः ॥१२
ततो युधिष्ठिरो मात्स्यं पुनरेवाब्रवीद्वचः।
प्रतिनन्दामि ते वाचं मनोज्ञां मात्स्य भाषितां १३
आनृशंस्यपरो नित्यं सुमुखः सततं भवान्।
पुनरेव विराटश्च राजा कङ्कमभाषत ॥ १४
अहो शूद्रस्य कर्माणि वललस्य द्विजोत्तम।
सोहं शूद्रेण संग्रामे वललेनाभिरक्षितः ॥ १५
त्वत्कृते सर्वमेवैतदुपपन्नं ममानघ।
वरं वृणीष्व भद्रं ते ब्रूहि किं करवाणि ते ॥ १६
ददामि ते महाप्रीत्या रत्नान्युच्चावचान्यहम्।
शयनासनयानानि कन्याश्च समलंकृताः ॥ १७
हस्त्यश्वरथसङ्घाश्च राष्ट्राणि विविधानि च।
एतानि च मम प्रीत्या प्रतिगृह्ण ममान्तिके ॥१८
वैशंपायन उवाच।
तं तथावादिनं तत्र कौरव्यः प्रत्यभाषत।
एषैव तु मम प्रीतिर्यत्त्वं मुक्तोसि शत्रुभिः ॥ १९
प्रतीतश्चेत्पुरं तुष्टः प्रविशाद्य परंतप।
दारैः पुत्रैश्च संश्लिष्य सा हि प्रीतिर्ममातुला २०
सुशर्माणं तु राजेन्द्र सभृत्यबलवाहनम्।

विसर्जय नरश्रेष्ठं वरमेतदहं वृणे ॥ २१
वैशंपायन उवाच ।
एवमुक्ते तु कङ्केन विराटो राजसत्तमः ।
प्रत्युवाच ततः कङ्कं सुशर्मा यातु चेष्टतः ॥ २२
कङ्क उवाच ।
गच्छन्तु दूतास्त्वरिता नगरं तव पार्थिव ।
सुहृदां प्रियमाख्यातुं घोषयन्तु च ते जयम् ॥ २३
ततस्तद्वचनान्मात्स्यो दूतान्राजा समादिशत् ।
आचक्षध्वं पुरं गत्वा संग्रामे विजयं मम ॥ २४
कुमार्यः समलंकृत्य पर्यागच्छन्तु मे पुरात् ।
वादित्राणि च सर्वाणि गणिकाश्च स्वलंकृताः ।
प्रत्यायान्तु च मे शीघ्रं नागराः सर्व एव ते ॥२५
एवमुक्तास्तथा दूता रात्रौ यात्वा तु केवलम् ।
ततोऽन्तरे चानुपिता दूताः शीघ्रानुयायिनः २६
नगरं प्राविशंस्ते वै सूर्ये सम्यगथोदिते ।
विराटनगरं प्राप्य शीघ्रं नान्दीमघोषयन् ।
पताकोच्छ्रयमाल्याढ्यं पुरमप्रतिमं यथा ॥ २७

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

दुर्योधनेन भीष्मद्रोणादिभिः सह विराटनगरमेत्य उत्तरभागे गवां ग्रहणम् ॥ १ ॥ गोपालेन केनचित्पुरमेत्योत्तरंप्रति कुरुभिर्गोग्रहणस्य निवेदनम् ॥ २ ॥

वैशंपायन उवाच ।
याते त्रिगर्तान्मात्स्ये तु पशूंस्तान्वै परीप्सति ।
दुर्योधनः सहामात्यैर्विराटपुरमभ्यगात् ॥ १
भीष्मद्रोणौ च कर्णश्च कृपश्च परमास्त्रवित् ।
द्रौणिश्च सौबलश्चैव तथा दुःशासनः शलः ॥ २
विविंशतिर्विकर्णश्च चित्रसेनश्च वीर्यवान् ।
दुःसहो दुर्मुखश्चैव एते चान्ये महारथाः ॥ ३
सर्वे मत्स्यानुपागम्य विराटस्य महीपतेः ।
गोपान्विद्राव्य तरसा गोधनं जह्रुरोजसा ॥ ४
गवां शतसहस्राणि कुरवः कालयन्ति च ।
महता रथवंशेन परिगृह्य समन्ततः ॥ ५
गोपालानां तु घोषेषु हन्यतां तैर्महारथैः ।
आरावः सुमहानासीत्संप्रहारे भयंकरे ॥ ६
गवाध्यक्षस्तु संत्रस्तो रथमास्थाय सत्वरः ।
जगाम नगरायैव परिक्रोशंस्तदाऽऽर्तवत् ॥ ७
स प्रविश्य पुरं राज्ञो नृपवेश्माभ्ययात्ततः ।
अवतीर्य रथात्तूर्णमाख्यातुं प्रविवेश ह ॥ ८
दृष्ट्वा भूमिंजयं नाम पुत्रं मात्स्यस्य मानिनम् ।
तस्मै च सर्वमाचष्ट राष्ट्रस्य पशुकर्षणम् ॥ ९
गवां शतसहस्राणि कुरवः कालयन्ति ते ।
प्रतिजेतुं समुत्तिष्ठ गोधनं राष्ट्रवर्धन ॥ १०
राजपुत्र हितप्रेप्सुः क्षिप्रं निर्याहि वै स्वयम् ।
त्वां हि मत्स्यो महीपालः शून्यपालमिहाकरोत् ११
त्वां वै परिषदो मध्ये श्लाघते स नराधिपः ।
पुत्रो ममानुरूपश्च शूरश्चेति कुलोद्वहः ॥ १२
इष्वस्त्रनिपुणो योधः सदा वीरश्च मे सुतः ।
समर्थः समरे योद्धुं कौरवैः सह तादृशैः ॥ १३
तस्य तत्सत्यमेवास्तु मनुष्येन्द्रस्य भाषितम् ।
जयश्च नियतो युद्धे कौरवाश्च ध्रुवं हताः ॥ १४
आवर्तय कुरूञ्जित्वा पशून्पशुपतिर्यथा ।
निर्दहैषामनीकानि भीमेन शरतेजसा ॥ १५
धनुश्च्युतै रुक्मपुङ्खैश्चित्रैः संनतपर्वभिः ।
द्विषतां भिन्ध्यनीकानि गजानामिव यूथपः ॥१६
पाशोपधानां ज्यातन्त्रीं चापदण्डां महास्वनाम् ।
शरवर्णां धनुर्वीणां शत्रुमध्ये प्रवादय ॥ १७
निर्याहि नगराच्छीघ्रं राजपुत्र किमास्यते ।

पाशोपधानां पाशौ मौर्वीप्रान्तद्वयगतौ तावेव उपधाने वीणायां तन्त्रीसंधानार्थं कीलविशेषौ यस्यां सा ताम् । शरवर्णा शरास्ततो निःसरन्तस्तएव वर्णाः शब्दवत्त्वसामान्यात्स्वरस्पर्शादयो यस्याम् ॥ १७ ॥ सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्वेताः काञ्चनसंनाहा रथे युज्यन्तु ते हयाः ।
ध्वजं च सिंहं सौवर्णमुच्छ्रयस्व तथा विभो ॥१८
रुक्मपुङ्खाः प्रसन्नाग्रा मुक्ता हस्तवता त्वया ।
छादयन्तु शराः सूर्यं राज्ञामायुर्निरोधकाः ॥ १९
रणे जित्वा कुरून्सर्वान्वज्रपाणिरिवासुरान् ।
यशो महदवाप्य त्वं प्रविशेदं पुरं पुनः ॥ २०
त्वं हि राष्ट्रस्य परमा गतिर्मात्स्यपतेः सुतः ।
गतिमन्तो भवन्त्वद्य सर्वे विषयवासिनः ॥ २१
यथा हि पाण्डुपुत्राणामर्जुनो जयतांवरः ।
एवमेव गतिर्नूनं भवान्विषयवासिनाम् ॥ २२

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

उत्तरे समुचितसारथेरभावेन खिद्यमाने अर्जुनेन द्रौपदींप्रति उत्तराय बृहन्नलायाः सारथ्यकौशलनिवेदनचोदना ॥ १ ॥ भ्रातृचोदितया उत्तरया बृहन्नलांप्रति उत्तररथसारथ्यकरणप्रार्थना ॥ २ ॥ उत्तरेण सारथीभूतेनार्जुनेन सह कुरून्प्रति रणायाभियानम् ॥ ३ ॥

वैशंपायन उवाच ।
महाजनसमक्षं तु स्त्रीणां मध्ये विशेषतः ।
गवाध्यक्षेण संप्रोक्तो विराटतनयस्तदा ॥ १
स्त्रीमध्य उक्तस्तेनासौ वाक्यं तेजःप्रवर्धनम् ।
अन्तःपुरे श्लाघमान इदं वचनमब्रवीत् ॥ २
उत्तर उवाच ।
अद्याहमनुगच्छेयं दृढधन्वा गवां पदम् ।
यदि मे सारथिः कश्चिद्भवेदश्वेषु कोविदः ॥ ३
तमेव नाधिगच्छामि यो मे यन्ता समो भवेत् ।
पश्यध्वं सारथिं शीघ्रं मम युक्तं प्रयास्यतः ॥ ४
अष्टाविंशतिरात्रं वा मासं वा नूनमन्ततः ।
यत्तदासीन्महायुद्धं तत्र मे सारथिर्हतः ॥ ५
यद्यहं त्वधिगच्छेयं यो मे यन्ता भवेद्युधि ।
त्वरावानद्य यास्यामि समुच्छ्रितमहाध्वजः ॥ ६
विगाह्य तत्परानीकं गजवाजिरथाकुलम् ।
शस्त्रप्रतापान्निर्वीर्यान्कुरूञ्जित्वाऽऽनये पशून् ॥ ७
दुर्योधनं विकर्णं च कर्णं वैकर्तनं कृपम् ।
द्रोणं च सह पुत्रेण महेष्वासान्समागतान् ॥ ८
विद्रावयित्वा संग्रामे दानवान्मघवानिव ।
अनेनैव मुहूर्तेन पुनः प्रत्यानये पशून् ॥ ९
शून्यमाज्ञाय कुरवः प्रयान्त्यादाय गोधनम् ।
किं न शक्यं च तैः कर्तुं यदहं तत्र नाभवम् ॥१०
पश्येयुरद्य मे वीर्यं कुरवस्ते समागताः ।
किंनु पार्थोऽर्जुनः साक्षादिति मंस्यन्ति मां परे ११
वैशंपायन उवाच ।
तस्य तद्वचनं श्रुत्वा स्त्रीषु चात्मप्रशंसनम् ।
नामर्षयत पाञ्चाली बीभत्सोः परिकीर्तनम् ॥१२
श्रुत्वा तदर्जुनो वाक्यमुत्तरेण प्रभाषितम् ।
अतीतसमये काले प्रियां भार्यामभाषत ॥ १३
द्रुपदस्य सुतां राज्ञः पाञ्चालीं रूपसंमताम् ।
सत्यार्जवगुणोपेतां भर्तुः प्रियहितैषिणीम् ।
उवाच रहसि प्रीतः कृष्णां सर्वार्थकोविदः ॥१४
उत्तरां ब्रूहि पाञ्चालि गत्वा क्षिप्रं शुचिस्मिते १५
इयं किल पुरा युद्धे खाण्डवे सव्यसाचिनः ।
सारथिः पाण्डुपुत्रस्य पार्थस्य तु बृहन्नला ।
महाञ्जयो भवेद्युद्धे सा चेद्यन्ता बृहन्नला ॥ १६
वैशंपायन उवाच ।
सा चोदिता तदा ह्येन ह्यर्जुनेन शुचिस्मिता ।
पाञ्चाली च तदाऽऽगम्य उत्तराया निवेशनम् १७
ज्ञात्वा तु समयान्मुक्तं चन्द्रं राहुमुखादिव ।
युधिष्ठिरं धर्मपरं सत्यार्जवपथे स्थितम् ॥ १८
अमर्षयन्ती तद्दुःखं कृष्णा कमललोचना ।
उत्तरामाह वचनं सखीमध्ये विलासिनीम् ॥ १९
योऽयं युवा वारणयूथपोपमो
बृहन्नलाऽसीति जनोऽभ्यभाषत ।

पुराऽपि पार्थस्य स सारथिस्तदा
धनुर्धराणां प्रवरस्य मन्ये ॥ २०
एतेन वा सारथिना तदाऽर्जुनः
सदेवगन्धर्वमहासुरोरगान् ।
सर्वाणि भूतान्यजयत्स वीर्यवा-
नतर्पयच्चापि हिरण्यरेतसम् ॥ २१
यदस्य संस्थामपि तस्य संयुगे
जानामि वीर्यं परवीरमध्यगम् ।
संगृह्य रश्मीनपि चास्य वीर्यवा-
नादाय चापं प्रययौ रथे स्थितः ॥ २२
न सर्वभूतानि न देवदानवा
न चापि सर्वे कुरवः समागताः ।
धनं हरेयुस्तव जातु धन्विनो
बृहन्नला तूत्तरसारथिर्यदि ॥ २३
धनुष्यनवमश्वासीत्तस्य शिष्यो महात्मनः ।
सुदृष्टपूर्वो हि मया चरन्त्या पाण्डवालये ॥ २४
स चानेन सहायेन खाण्डवं चादहत्पुरा ।
अर्जुनस्य तदाऽनेन संगृहीता हयोत्तमाः ॥ २५
तेन सारथिना पार्थः सर्वभूतानि सर्वशः ।
अजयत्खाण्डवप्रस्थे न हि यन्ताऽस्ति तादृशः॥२६
वैशंपायन उवाच ।
ततः सैरन्ध्रिसहिता उत्तरा भ्रातुरब्रवीत् ।
अभ्यर्थयैनां सारथ्ये वीर शीघ्रं बृहन्नलाम् ॥२७
शिक्षितैषा हि सारथ्ये नर्तने गीतवादिते ।
सैरन्ध्याह महाप्राज्ञा स्तुवन्ती वै बृहन्नलाम् ॥२८
उत्तर उवाच ।
सैरन्ध्रि जानासि मम व्रतं हि
क्लीबेन पुंसा न हि संवदाम्यहम् ।
सोहं न शक्ष्यामि बृहन्नलां शुभे
वक्तुं स्वयं यच्छ हयान्ममेति ॥ २९
सैरन्ध्र्युवाच ।
भयकाले तु संप्राप्ते न व्रतं नाव्रतं पुनः ।
यथा दुःखं प्रतरति कर्तुं युक्तं चरेद्बुधः ।
इति धर्मविदः प्राहुस्तस्माद्वाच्या बृहन्नला ॥ ३०
येयं कुमारी सुश्रोणी भगिनी ते यवीयसी ।
अस्यास्तु वचनं वीर करिष्यति न संशयः ॥ ३१
यदि ते सारथिः सा स्यात्कुरून्सर्वान्न संशयः ।
जित्वा गाश्च समादाय ध्रुवमागमनं भवेत् ॥३२
वैशंपायन उवाच ।
एवमुक्तः स सैरन्ध्र्या भगिनीं प्रत्यभाषत ।
गच्छ त्वमनवद्याङ्गि तामानय बृहन्नलाम् ॥ ३३
सा प्राद्रवत्काञ्चनमाल्यधारिणी
ज्येष्ठेन भ्रात्रा प्रहिता यशस्विनी ।
भ्रातुर्नियोगं तु निशम्य सुभ्रूः
शुभानना हाटकवज्रभूषिता ॥ ३४
सा वज्रमुक्तामणिहेमकुण्डला
मृदुक्रमा भ्रातृनियोगचोदिता ।
प्रदक्षिणावर्ततनुः शिखण्डिनी
पद्मानना पद्मदलायताक्षी ॥ ३५
तन्वी समाङ्गी मृदुमन्द्रलोचना
मात्स्यस्य राज्ञो दुहिता विलासिनी ।
सा नर्तनागारमरालपक्ष्मा
शतह्रदा मेघमिवान्वपद्यत ॥ ३६
सा नागनासोपमसंहितोरू-
रनिन्दिता वेदिविलग्नमध्या ।
आसाद्य तस्थौ वरमाल्यधारिणी
पार्थं शुभा नागवधूरिव द्विपम् ॥ ३७
तामागतामायतताम्रलोचना-
मवेक्ष्य पार्थः समयेऽभ्यभाषत ॥ ३८
किमागता काञ्चनमाल्यधारिणी
सुगात्रि किंचित्त्वरिताऽसि सुभ्रु ।
किं ते मुखं सुन्दरि न प्रसन्न-
माचक्ष्व शीघ्रं मम चारुहासिनि ॥ ३९
वैशंपायन उवाच ।
सा वज्रवैडूर्यविकारकुण्डला
विनिद्रपद्मोत्पलपत्रगन्धिनी ।

शिखण्डिनी मयूरपिच्छालंकारवती ॥ ३५ ॥

अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

प्रसन्नताराधिपसंनिभानना
पार्थं कुमारी वचनं बभाषे ॥ ४०

उत्तरोवाच ।

हरन्ति वित्तं कुरवः पितुर्मे
शतं सहस्राणि गवां बृहन्नले ।
सा भ्रातुरश्वान्मम संयमस्व
पुरा परे दूरतरं हरन्ति गाः ॥ ४१
सैरन्ध्रिराख्याति बृहन्नले त्वां
सुशिक्षिता संग्रहणे रथाश्वयोः ।
अहं मरिष्यामि न मेऽत्र संशयो
मया वृता तत्र न चेद्गमिष्यसि ॥ ४२

वैशंपायन उवाच ।

तथा नियुक्तो नरदेवकन्यया
नरोत्तमः प्रीतमना धनञ्जयः ।
उवाच पार्थः शुभमन्द्रया गिरा
शुभाननां शुक्लदतीं शुचिस्मिताम् ॥ ४३
गच्छामि यत्रेच्छसि चारुहासिनि
हुताशनं प्रज्वलितं विशामि वा ।
इच्छामि तेऽहं वरगात्रि जीवितं
करोमि किं ते प्रियमद्य सुन्दरि ।
न मत्कृते द्रक्ष्यसि तत्पुरं प्रिये
वैवस्वतं प्रेतपतेर्महाभयम् ॥ ४४

वैशंपायन उवाच ।

एतावदुक्त्वा कुरुवीरपुङ्गवो
विलासिनीं शुक्लदतीं शुचिस्मिताम् ।
बृहन्नलारूपविभूषिताननो
विराटपुत्रस्य समीपमाव्रजत् ॥ ४५
तथा व्रजन्तं वरभूषणैर्वृतं
महाप्रभं वारणयूथपोपमम् ।
गजेन्द्रबाहुं कमलायतेक्षणं
कवाटवक्षस्थलमुन्नतांसम् ॥ ४६
तमागतं पार्थममित्रकर्शनं
महाबलं नागमिव प्रमाथिनम् ।
वैराटिरामन्त्र्य ततो बृहन्नलां
गवां निनीषन्पदमुत्तरोऽब्रवीत् ॥ ४७

तमाव्रजन्तं त्वरितं प्रभिन्नमिव कुञ्जरम् ।
अन्वगच्छद्विशालाक्षी गजं गजवधूरिव ॥ ४८
दूरादेव तु संप्रेक्ष्य राजपुत्रोऽभ्यभाषत ।
त्वया सारथिना पार्थः खाण्डवेऽग्निमतर्पयत् ॥ ४९
पृथिवीं चाजयत्कृत्स्नां कुन्तीपुत्रो धनञ्जयः ।
सैरन्ध्री त्वां ममाचष्ट सा हि जानाति पाण्डवान् ॥
देवेन्द्रसारथिर्वीरो मातलिः ख्यातविक्रमः ।
सुमहो जामदग्नेश्च विष्णोर्यन्ता च दारुकः ॥ ५१
सुमन्त्रो वा दाशरथेः सूर्ययन्ता तथाऽरुणः ।
सर्वे सारथयः ख्याता न बृहन्नलया समाः ॥ ५२
इत्युक्तोऽहं च सैरन्ध्र्या तेन त्वामाह्वयामि वै ।
आहूता त्वं मया सार्धं योद्धुं याहि बृहन्नले ॥ ५३
दूराद्दूरतरं गावो भवन्ति कुरुभिर्हृताः ।
तथोक्ता प्रत्युवाचेदं राजपुत्रं बृहन्नला ॥ ५४
का शक्तिर्मम सारथ्यं कर्तुं संग्राममूर्धनि ।
नृत्तं वा यदि वा गीतं वादित्रं वा पृथग्विधम् ।
तत्करिष्यामि भद्रं ते सारथ्यं तु कुतो मम ॥ ५५

उत्तर उवाच ।

त्वं नर्तको वा यदि वाऽपि गायकः
क्षिप्रं तनुत्रं परिधत्स्व भानुमत् ।
अभीक्ष्णमाहुस्तव कर्म पौरुषं
स्त्रियः प्रशंसन्ति ममाद्य चान्तिके ॥ ५६

वैशंपायन उवाच ।

इत्येवमुक्त्वा नृपसूनुसत्तम-
स्तदा स्मयित्वाऽर्जुनमभ्यनन्दयत् ।
अथोत्तरः पारशवं शताक्षिम-
त्सुवर्णचित्रं परिगृह्य भानुमत् ॥ ५७
बृहन्नलायै प्रददौ स्वयं तदा
विराटपुत्रः परवीरघातिने ।
तदाज्ञया मात्स्यसुतस्य वीर्यवा-
नकर्तुकामेव समाददे तदा ॥ ५८

बृहन्नलोवाच ।

यद्यस्ति च रणे शौर्यं शक्यः स्याद्द्विषतां वधः ।
अहं त्वामभिगच्छामि यत्र त्वं यासि तत्र भो ॥ ५९

वैशंपायन उवाच ।
ततः स नर्मसंयुक्तमकरोत्पाण्डवो बहु ।
उत्तरायाः प्रमुखतः सर्वं जानन्नरिन्दमः ॥ ६०
तमाददानं प्रमदा जहासिरे
ह्यधोमुखं वीरवरोऽभ्यधारयत् ।
ततस्तिरश्चीनकृतं सपत्नहा
ह्यधोमुखं कवचमथाभ्यकर्षत ॥ ६१
सम्यक्प्रजानन्नपि सत्यविक्रमो
ह्यज्ञातवत्सर्वकुरुप्रवीरः ।
ऊर्ध्वं क्षिपन्वीरतरोऽभ्यधारय-
त्पुनश्च यन्ता कवचं धनञ्जयः ॥ ६२
एवंप्रकाराणि बहूनि कुर्वति
तस्मिन्कुमार्यः प्रमदा जहासिरे ।
तथापि कुर्वन्तममित्रकर्शनं
नैवोत्तरः पर्यभवद्धनञ्जयम् ॥ ६३
तं राजपुत्रः समनाहयत्स्वयं
जाम्बूनदान्तेन शुभेन वर्मणा ।
कृशानुतप्तप्रतिमेन भास्वता
जाज्वल्यमानेन सहस्ररश्मिना ॥ ६४
अथास्य शीघ्रं प्रसमीक्ष्य योजय-
द्रथे हयान्काञ्चनजालसंवृतान् ।
सुवर्णजालान्तरयोक्रभूषणं
सिंहं च सौवर्णमुपाश्रयद्रथे ॥ ६५
धनूंषि च विचित्राणि बाणांश्च रुचिरान्बहून् ।
आयुधानि च वै तत्र रथोपस्थे च स न्यसत् ६६
आरुह्य प्रययौ वीरः सबृहन्नलसारथिः ।
अथोत्तरा च कन्याश्च सख्यश्चैवाब्रुवंस्तदा ॥ ६७
बृहन्नले आनयेथा वासांसि रुचिराणि नः ।
पाञ्चालिकार्थं सूक्ष्माणि रत्नानि विविधानि च ।
विजित्य संग्रामगतान्भीष्मद्रोणमुखान्कुरून् ॥ ६८
अथ ता ब्रुवतीः कन्याः सहिताः कुरुनन्दनः ।
प्रत्युवाच हसन्पार्थो मेघदुन्दुभिनिस्वनः ॥ ६९
यद्युत्तरोऽयं संग्रामे विजेष्यति महारथान् ।
अथाहरिष्ये वासांसि सूक्ष्माण्याभरणानि च ७०
वैशंपायन उवाच ।
अथोत्तरो वर्म महाप्रभावं
सुवर्णवैडूर्यपरिष्कृतं शुभम् ।
आमुच्य वीरः प्रययौ रथोत्तमं
धनञ्जयं सारथिनं प्रगृह्य ॥ ७१
तमुत्तरं प्रेक्ष्य रथोत्तमे स्थितं
बृहन्नलां चैव महाजनस्तदा ।
स्त्रियश्च कन्याश्च द्विजाश्च सुव्रताः
प्रदक्षिणं मङ्गलिनोऽभ्यपूजयन् ॥ ७२
यदर्जुनस्यर्षभतुल्यगामिनः
पुराऽभवत्खाण्डवदाहमङ्गलम् ।
कुरून्समासाद्य रणे बृहन्नले
सहोत्तरेणास्तु तवाद्य मङ्गलम् ॥ ७३

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

उत्तरेण कुरुसेनावलोकनमात्रेण रथादवस्कन्द्य भयात्पलायनम् ॥ १ ॥ तमनुधाविनाऽर्जुनेन तस्य केशपाशे ग्रहणेन परिसान्त्वनपूर्वकं पुना रथारोपणम् ॥ २ ॥ तथा तेन सह गाण्डीवाद्यानयनाय शमींप्रति गमनम् ॥ ३ ॥

वैशंपायन उवाच ।
स राजधान्या निर्याय वैराटिरकुतोभयः ।
प्रयाहीत्यब्रवीत्सूतं यत्र ते कुरवो गताः ॥ १
समवेतान्कुरून्सर्वाञ्जिगीषूनवजित्य वै ।
गाश्चैताः क्षिप्रमादाय पुनरेष्याम्यहं पुरम् ॥ २
ततस्तांश्चोदयामास सदश्वान्पाण्डुनन्दनः ॥ ३
ते हया नरसिंहेन चोदिता वातरंहसः ।
आलिखन्त इवाकाशमूहुः काञ्चनमालिनः ॥ ४
नातिदूरमथो गत्वा मात्स्यपुत्रधनञ्जयौ ।
अवैक्षेतामवित्रस्तौ कुरूणां बलिनां बलम् ॥ ५

श्मशानमभितो गत्वा शूरौ ददृशतुः कुरून् ॥ ६
तदनीकं महत्तेषां विस्तृतं सागरोपमम् ।
सर्पमाणमिवाकाशे वनं बहुलपादपम् ॥ ७
ददृशे पार्थिवो रेणुर्जनितस्तेन सर्पता ।
दृष्टिप्रणाशो भूतानां दिवस्पृक्कुरुसत्तम ॥ ८
तदनीकमथो वीक्ष्य गजाश्वरथसंकुलम् ।
कर्णदुर्योधनकृपैर्गुप्तं शान्तनवेन च ।
द्रोणेन सह पुत्रेण महेष्वासेन धीमता ॥ ९
हृष्टरोमा भयोद्विग्नो निमील्य स्वदृशौ तदा ।
कम्पमानशरीरश्च पार्थं वैराटिरब्रवीत् ॥ १०
नोत्सहे कुरुभिर्योद्धुं रोमहर्षं हि पश्य मे ।
बहुप्रवीरमत्युग्रं देवैरपि दुरासदम् ।
प्रतियोद्धुं न शक्नोमि कुरुसैन्यं भयानकम् ॥ ११
नाशंसे भारतीं सेनां प्रवेष्टुं भीमकार्मुकाम् ।
देवैरपि सहेन्द्रेण न शक्यं किंपुनर्नरैः ॥ १२
रथनागाश्वकलिलं पत्तिध्वजसमाकुलम् ।
दृष्ट्वैव हि परानीकं मनः प्रव्यथतीव मे ॥ १३
यत्र द्रोणश्च भीष्मश्च कृपः कर्णो विविंशतिः ।
अश्वत्थामा विकर्णश्च सोमदत्तश्च बाह्लिकः ।
दुर्योधनस्तथा राजा वीरो दुर्मर्षणः परः ॥ १४
धृतिमन्तो महेष्वासाः सर्वे युद्धविशारदाः ।
मत्ता इव महानागा युक्तध्वजपताकिनः ॥ १५
नीतिमन्तो महेष्वासाः सर्वार्थकृतनिश्चयाः ।
ताञ्जेतुं समरे शूरान्दुर्बुद्धिरहमागतः ॥ १६
दृष्ट्वैव हि कुरून्सर्वान्व्यूढानीकान्प्रहारिणः ।
हृषितानि च रोमाणि कश्मलेनाहतं मनः ॥ १७
वैशंपायन उवाच ।
दृष्ट्वा तु महतीं सेनां कुरूणां दृढधन्विनाम् ।
परिदेवयते मन्दः सकाशे सव्यसाचिनः ॥ १८
त्रिगर्तान्मे पिता यातः शून्ये वै प्रणिधाय माम् ।
सर्वा सेनामुपादाय न मे सन्तीह सैनिकाः ॥ १९
अहमेको बहून्बालः कृतास्त्रानकृतश्रमः ।
प्रतियोद्धुं न शक्नोमि निवर्तय बृहन्नले ॥ २०
वैशंपायन उवाच ।
तं तथा वादिनं तत्र बीभत्सुः प्रत्यभाषत ।
संप्रहस्य पुनस्तं वै सर्वलोकमहारथः ॥ २१
भयेन दीनरूपोऽसि द्विषतां हर्षवर्धनः ।
न च तावत्कृतं किंचित्परैः कर्म रणाजिरे ॥ २२
स्वयमेव च मामात्थ नय मां कौरवान्प्रति ।
सोहं त्वां तत्र नेष्यामि यत्रैते बहुला ध्वजाः २३
मध्यमामिषगृध्नूनां कुरूणामाततायिनाम् ।
नेष्यामि त्वां महाबाहो मा त्वं हि विमना भव ।
समुद्रमिव गम्भीरं कुरुसैन्यमरिन्दम ॥ २४
स्त्रीसकाशे प्रतिज्ञाय पुरुषाणां हि शृण्वताम् ।
विकत्थमानो निर्यात्वा ब्रूषि किं नात्र युध्यसे २५
तथा स्त्रीषु प्रतिश्रुत्य पौरुषं पुरुषेषु च ।
रथमारुह्य निर्यात्वा किमर्थं नावबुध्यसे ॥ २६
न चेद्विजित्य गास्त्वं हि नगरं प्रतियास्यसि ।
प्रहसिष्यन्ति वीरास्त्वां नरा नार्यश्च संगताः २७
अहमप्यसि सैरन्ध्र्या स्तुतः सारथ्यकर्मणि ।
नाहं शक्नोम्यनिर्जित्य गाः प्रयातुं पुरं प्रति ॥२८
स्तोत्रेण चैव सैरन्ध्र्यास्तत्र वाक्येन चोदितः ।
कथं न युद्ध्येयमहं कुरूनेतान्स्थिरो भव ॥ २९
उत्तर उवाच ।
कामं हरन्तु मात्स्यानां भूयांसः कुरवो धनम् ।
प्रहसन्तु च मां नार्यो नरा वाऽपि बृहन्नले ॥३०
संग्रामेण न मे कार्यं गावो गच्छन्तु चापि मे ।
नगरं च प्रवेक्ष्यामि पश्यतस्ते बृहन्नले ॥ ३१
वैशंपायन उवाच ।
इत्युक्त्वा प्राद्रवद्भीतो रथात्प्रस्कन्द्य कुण्डली ।
त्यक्त्वा मानं सुसंत्रस्तो विसृज्य सशरं धनुः ३२
अर्जुन उवाच ।
नैष शूरैः स्मृतो धर्मः क्षत्रियस्य पलायनम् ।
श्रेयो हि मरणं युद्धे न भीतस्य पलायनम् ॥३३
वैशंपायन उवाच ।
एवमुक्त्वा तु कौरव्यः सोऽवप्लुत्य रथोत्तमात् ।
तमन्वधावद्धावन्तं राजपुत्रं धनञ्जयः ।
दीर्घां वेणीं विधून्वानः साधु रक्ते च वाससी ३४
विक्रमन्तं पदन्यासैर्नमयन्तं च भूतलम् ।

विधूय वेणीं धावन्तमजानन्तोऽर्जुनं तदा ।
सैनिकाः प्राहसन्केचिद्योषिद्रूपमवेक्ष्य तम् ॥३५
तं च शीघ्रं प्रधावन्तं संप्रेक्ष्य कुरवोऽब्रुवन् ।
कोऽयं धावत्यसङ्गेन पूर्वं मुक्त्वा रथोत्तमम् ॥३६
क एष वेषसंच्छन्नो भस्मनेव हुताशनः ।
किंचिदस्य यथा पुंसः किंचिदस्य यथा स्त्रियः ३७
इत्येवं सैनिकाः प्राहुर्द्रोणस्तानिदमब्रवीत् ।
आचार्यः कुरुपाण्डूनां मतो शुक्राङ्गिरोपमः ॥३८
किं विचारेण वः कार्यमेतेनानुस्मृतेन वा ।
धावन्तमनुधावंश्च निर्भयो भयविप्लुतम् ।
वेणीकलापं निर्धूय प्रविभाति नरर्षभः ॥ ३९
आकारमर्जुनस्येव क्लीबरूपं बिभर्ति च ।
रूपेण पार्थसदृशः स्त्रीवेषसमलंकृतः ॥ ४०
तदेवैतच्छिरोग्रीवं तौ बाहू परिघोपमौ ।
तत्तदेवास्य विक्रान्तं नायमन्यो धनञ्जयात् ॥४१
अमरेष्विव देवेन्द्रो मनुष्येषु धनञ्जयः ।
एकः कोऽस्मानुपायायादन्यो लोके धनञ्जयात्४२
द्रोणेन चैवमुक्तस्तु कर्णः प्रोवाच बुद्धिमान् ।
एकः पुत्रो विराटस्य शून्ये संनिहितः पुरे ॥ ४३
स एष किल निर्यातो बालभावान्न पौरुषात् ।
क्लीबं वै सारथिं कृत्वा निर्यातो नगराद्बहिः ४४
छन्नं सत्रेण वै नूनं जानीध्वं यान्तमर्जुनम् ।
ते हि नः प्रतिसंयातुं संग्रामे न हि शक्नुयुः ।
कथमेकतरस्तेषां समस्तान्योधयेत्कुरून् ॥ ४५
उत्तरः सारथिं कृत्वा निर्यातो नगराद्बहिः ।
स नो मन्ये ध्वजं दृष्ट्वा भीत एष पलायति ॥४६
कृप उवाच ।
नूनं तमेव धावन्तं जिघृक्षति धनञ्जयः ।
सारथिं ह्युत्तरं कृत्वा स्वयं योद्धुमिहेच्छति ॥४७
वैशंपायन उवाच ।
इति स्म कुरवः सर्वे विमृशन्तः पृथक्पृथक् ।
न च व्यवसितुं वीरा अर्जुनं शक्नुवन्ति ते ॥४८
दुर्योधन उवाचेदं सैनिकान्रथसत्तमान् ।

सत्रेण वेषान्तरेण ॥ ४५ ॥

अर्जुनो वासुदेवो वा रामः प्रद्युम्न एव वा ।
ते हि नः प्रतिसंयातुं संग्रामे न हि शक्नुयुः ४९
अन्यो वै क्लीबरूपेण यद्यागच्छेद्ध्रुवां पदम् ।
शस्त्रैस्तीक्ष्णैरर्पयित्वा पातयिष्यामि भूतले ।
कथमेकतरस्तेषां समस्तान्योधयेत्कुरून् ॥ ५०
वैशंपायन उवाच ।
छन्नं तथा तं वेषेण पाण्डवं प्रेक्ष्य सैनिकाः ।
अर्जुनेति च नेत्येव न व्यवस्यन्ति ते पुनः ।
इति स्म कुरवः सर्वे विमृशन्तः पुनःपुनः ॥ ५१
दृढवेधी महासत्त्वः शक्रतुल्यपराक्रमः ।
अद्यागच्छति चेद्योद्धुं सर्वं संशयितं बलम् ॥५२
न चाप्यन्यतरं तत्र व्यवस्यन्ति धनञ्जयात् ॥५३
उत्तरं तु प्रधावन्तमनुद्रुत्य धनञ्जयः ।
गत्वा शतपदं तूर्णं केशपक्षे परामृशत् ॥ ५४
मा मा गृहाण भद्रं ते दासोऽहं ते बृहन्नले ।
इति वादिनमेवाशु धावन्तं तरसाऽग्रहीत् ।
विराटपुत्रं बीभत्सुर्बलवानरिमर्दनः ॥ ५५
सोऽर्जुनेन परामृष्टः पर्यदेवयदार्तवत् ।
बहुलं कृपणं चैव वित्तं प्रावेदयद्बहु ॥ ५६
सुवर्णमणिमुक्तानां यद्यदिच्छसि दद्मि ते ।
हस्तिनोऽश्वान्रथान्गावः स्त्रियश्च समलङ्कृताः ॥५७
शातकुम्भस्य शुद्धस्य श्रेष्ठस्य रजतस्य च ।
ददामि शतनिष्कं ते मुञ्च मां त्वं बृहन्नले ॥५८
षष्टिं स्वलंकृताः कन्या ग्राममेकं ददामि ते ।
मुञ्च मां त्वं भृशं दीनं विह्वलं भयकम्पितम्५९
मणीनष्टौ च वैडूर्यान्हेमबद्धान्महाप्रभान् ।
हेमदण्डप्रतिच्छन्नं रथं युक्तं तु वाजिभिः ॥ ६०
मत्तांश्च दश मातङ्गान्मुञ्च मां त्वं बृहन्नले ।
गमिष्यामि पुरं षण्ड द्रष्टुं मातरमद्य ताम् ॥ ६१
एकोऽहमेव मे मातुः कुमारः किं ब्रुवे ततः ।
विधिरेवंविधे काले त्वद्वशं कुरुते हि माम् ॥ ६२
मात्स्यस्य पुत्रो बालोऽहं तेन चास्मि सुपोषितः ।
मातृपार्श्वशयानोऽहमस्पृष्टातपवायुमान् ॥ ६३
अदृष्टबालयुद्धोऽहं कुतस्ते कुरवः कुतः ।

मातृपार्श्वं गमिष्यामि मुञ्च मां त्वं बृहन्नले ॥६४
प्रलयार्णवसंकाशं दृश्यते कौरवं बलम् ॥ ६५
स्त्रीणां मध्येऽहमज्ञानाद्वीर्यशौर्याङ्कितां गिरम् ।
उक्तो यौवनगर्वेण को जेतुं शक्नुयात्कुरून् ।
अमुक्त्वा मां यदि नयेर्मरिष्यामि तवाग्रतः ॥६६
वैशंपायन उवाच ।
एवमादीनि वाक्यानि विलपन्तमचेतसम् ।
प्रसभं पुरुषव्याघ्रो रथस्यान्तिकमानयत् ॥ ६७
अथैनमब्रवीत्पार्थो भयार्तं नष्टचेतसम् ॥ ६८
अहं योत्स्यामि कौरव्यैर्हयान्संयच्छ मेति माम् ।
आददानः किमर्थं त्वं पलायनपरोऽभवः ॥ ६९
युध्यस्व कौरवैः सार्धं विजयस्ते भविष्यति ।
यस्य यन्तास्म्यहं युद्धे संयच्छामि हयोत्तमान् ।
राज्ञो वा राजपुत्रस्य तस्य युद्धे जयो ध्रुवम् ॥७०
सर्वथोत्तर युध्यस्व यन्त्रा सह मया कुरून् ।
जित्वा महीं यशः प्राप्य भोक्ष्यसे सकलामिमाम्
हतो वा प्राप्स्यसे स्वर्गं न श्रेयस्ते पलायनम् ७२
अद्य सर्वान्कुरूञ्जित्वा यथा जयमवाप्स्यसि ।
तथाऽहं प्रयतिष्येऽत्र सहायोऽत्र मतो ह्यहम् ॥७३
यदि नोत्सहसे योद्धुं शत्रुभिः शत्रुकर्शन ।
एहि मे त्वं हयान्यच्छ युध्यमानस्य शत्रुभिः ७४
प्रयाह्येतद्रथानीकं मद्बाहुपरिरक्षितः ।
अप्रधृष्यतमं घोरं गुप्तं घोरैर्महारथैः ।
मा भैस्त्वं राजपुत्राग्र्य क्षत्रियोसि परंतप ॥ ७५
अहं तैः कुरुभिर्योत्स्ये प्रत्यानेष्यामि ते पशून् ।
प्रविशैतद्रथानीकमप्रधृष्यं दुरासदम् ॥ ७६
यन्ता भव नरश्रेष्ठ योत्स्येऽहं कुरुभिः सह ।
शूरान्समरचण्डांश्च नयिष्ये यमसादनम् ॥ ७७
वैशंपायन उवाच ।
एवं ब्रुवाणो वैराटिं बीभत्सुरपराजितः ।
समाश्वास्य भयार्तं तमुत्तरं भरतर्षभः ॥ ७८
इतस्ततो विवेष्टन्तमकामं भयपीडितम् ।
रथमारोपयामास पार्थः परपुरंजयः ॥ ७९
तमारोप्य रथोपस्थे विलपन्तं धनञ्जयः ।
गाण्डीवं धनुरादातुमुपायात्तां शमीं प्रति ।
उत्तरं तं समाश्वास्य कृत्वा यन्तारमर्जुनः ॥ ८०

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः ॥ ४० ॥

उत्तरेणार्जुनचोदनया शमीमारुह्य धनुरादानम् ॥ १ ॥

वैशंपायन उवाच ।
तं दृष्ट्वा क्लीबरूपेण रथस्थं रथिपुङ्गवम् ।
शमीमभिमुखं यान्तं रथमारोप्य चोत्तरम् ॥ १
द्रोणभीष्मादयः शूराः कुरूणां रथिसत्तमाः ।
वित्रस्तमनसश्चासन्धनञ्जयकृताद्भयात् ॥ २
तानवेक्ष्य हतोत्साहानुत्पातानपि चाद्भुतान् ।
गुरुः शस्त्रभृतांश्रेष्ठो भारद्वाजोऽभ्यभाषत ॥ ३
खराश्च वाताः संयान्ति रूक्षाः परुषनिस्वनाः ।
भस्मवर्णप्रकाशेन तमसा संवृतं नभः ॥ ४
रूक्षवर्णाश्च जलदा दृश्यन्तेऽद्भुतदर्शनाः ।
निःसरन्ति च कोशेभ्यः शस्त्राणि विविधानि च५
शिवाश्च विनदन्त्येता दीप्तायां दिशि दारुणाः ।
हयाश्चाश्रूणि मुञ्चन्ति ध्वजाः कम्पन्त्यकम्पिताः६
यादृशान्यत्र दृश्यन्ते रूपाणि विविधानि च ।
यत्ता भवन्तस्तिष्ठन्तु युद्धं स्यात्समुपस्थितम् ॥ ७
रक्षध्वमपि राजानं व्यूहध्वं वाहिनीमपि ।
वैशसं च प्रतीक्षध्वं रक्षध्वं चापि गोधनम् ॥ ८
एष वीरो महेष्वासः सर्वशस्त्रभृतांवरः ।
आगतः क्लीबवेषेण पार्थो नास्त्यत्र संशयः ॥ ९
एतावदुक्त्वा वचनं भीष्ममालोक्य चाब्रवीत् १०

उक्तः उक्तवान् ॥ ६६ ॥ मेति मामिति मे इतीति च्छेदः ॥ ६९ ॥ एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

नदीज लङ्केशवनारिकेतु-
नगाह्वयो नाम नगारिसूनुः ।
गत्वा सुरेशः क्वचिदङ्गनेव
गुरुर्बभाषे वचनं तदानीम् ॥ ११

वैशंपायन उवाच ।

इत्युक्त्वा संज्ञया द्रोणस्तूष्णीमासीद्विशांपते ।
भारद्वाजवचः श्रुत्वा गाङ्गेयः संज्ञयाऽब्रवीत् ॥१२
अतीतं चक्रमस्माकं विषयान्तरमागताः ।
अतीतः समयश्चोक्त अस्माभिर्यः सभातले ।
न भयं शत्रुतः कार्यं शङ्कां त्यज नरर्षभ ॥ १३
देवव्रतेनैवमुक्ते वचने हितकारिणा ।
दुर्योधनमथालोक्य संज्ञया द्रोण अब्रवीत् ॥ १४
एष वीरो महेष्वासः सर्वशस्त्रभृतांवरः ।
आगतः क्लीबरूपेण पार्थो नास्त्यत्र संशयः ॥१५
एष पार्थो हि विक्रान्तः सव्यसाची परन्तपः ।
ये जेतारो महीपानाममुना कुरवो हताः ॥ १६
यस्मिञ्जाते मही कृत्स्ना निर्भरोच्छ्वासिताऽभवत् ।
येन मे दक्षिणा दत्ता बद्ध्वा द्रुपदमोजसा ॥ १७
विद्ध्वा वियद्गतं लक्ष्यं विनिर्जित्य च पार्थिवान् ।
निर्जिता येन पाञ्चाली पुरा येन स्वयंवरे ॥ १८
खाण्डवे येन संतृप्तो वह्निर्जित्वा सुरासुरान् ।
परिणीता सुभद्रा च येन निर्जित्य यादवान् १९
निर्जितो येन युद्धेन त्रिपुरारिः स्मरार्दनः ॥ २०
गत्वा त्रिविष्टपं येन जितेन्द्रा दानवा युधि ।
निवातकवचा राजन्दानवानां त्रिकोटयः ।
निर्जिताः कालकेयाश्च हिरण्यपुरवासिनः ॥ २१
येन त्वं मोचितो बद्धश्चित्रसेनेन तद्वने ॥ २२
येन गत्वोत्तरं मेरोरानिनाय महद्धनम् ।
याजितो धर्मसूनुश्च नृपान्सर्वान्विजित्य च ॥२३
यस्मिञ्शौर्यं च वीर्यं च तेजो धैर्यं पराक्रमः ।
औदार्यं चैव गाम्भीर्यं श्रीर्ह्रीर्धर्मो दयाऽऽर्जवम् ।
एवमादिगुणोपेतः सोयं पार्थो न संशयः ॥ २४
नाजित्वा विनिवर्तेत सर्वानपि मरुद्गणान् ॥ २५
क्लेशितश्च वने शूरो वासवेन च शिक्षितः ।
अमर्षवशमापन्नो योत्स्यते नात्र संशयः ।
न ह्यस्य प्रतियोद्धारमन्यं पश्यामि कौरव ॥ २६
महादेवोपि पार्थेन श्रूयते युद्धतोषितः ।
किरातवेषप्रच्छन्नो गिरौ हिमवति प्रभुः ॥ २७
इत्येवंवादिनं द्रोणं कर्णः क्रुद्धोऽभ्यभाषत ॥ २८
सदा भवान्फल्गुनस्य गुणानस्मासु कत्थसे ।
न चार्जुनः कलापूर्णो मम दुर्योधनस्य वा ॥ २९

दुर्योधन उवाच ।

यद्येष पार्थो राधेय कृतं कार्यं भवेन्मम ।
ज्ञाताः पुनश्चरिष्यन्ति द्वादशान्यांश्च वत्सरान् ३०
अथवा कश्चिदेवान्यः क्लीबरूपेण देवराट् ।
शरैरेनं सुनिशितैः पातयिष्यामि भूतले ॥ ३१

वैशंपायन उवाच ।

तस्मिन्वदति तां वाचं धार्तराष्ट्रे परन्तपे ।
भीष्मो द्रोणः कृपो द्रौणिः पौरुषं तदपूजयन् ३२
तां शमीमभिसंगम्य पार्थो वैराटिमब्रवीत् ।
सुखसंवर्धितं पित्रा समराणामकोविदम् ॥ ३३
एहि भूमिंजयारुह्य वैराटे महतीं शमीम् ।
समादिष्टो मया क्षिप्रं धनुर्गाण्डीवमानय ॥ ३४
नेमानीष्वासनानीह सोढुं शक्ष्यन्ति मे बलम् ।
नालं भारं गुरुं भेत्तुं कुञ्जरं वा प्रमर्दितुम् ॥ ३५
मम वा बाहुविक्षेपं शत्रूनिह विजेष्यतः ।
नेच्छामि तैरहं कर्तुं कर्म वैजयिकं त्विह ॥ ३६
अतिसूक्ष्माणि ह्रस्वानि सर्वाणि च मृदूनि च ।
आयुधानि महाबाहो तवैतानि महाबल ॥ ३७
तस्माद्भूमिंजयारुह्य शमीमेतां पलाशिनीम् ।
अस्यां हि पाण्डुपुत्राणां धनूंषि निहितान्युत ॥३८
युधिष्ठिरस्य भीमस्य बीभत्सोर्यमयोस्तथा ।

नगारिसूनुः । एषोऽङ्गनावेषधरः किरीटी जित्वाऽव यं नेष्यति चाद्य गा व इति झ. पाठः । हे नदीज गाङ्गेय भीष्म, लङ्केशस्य रावणस्य वनं तस्यारिर्नाशको हनूमान् स केतुर्ध्वजो यस्य सः लङ्केशवनारिकेतुः । नगो वृक्षस्तदाह्वयः वृक्षनामा । अर्जुन इत्यर्थः । शैलवृक्षौ नगावगावित्यमरः । नगारिरिन्द्रस्तस्य सूनुः । किरीटी तन्नामा यं जित्वा वः युष्माकं गाः धेनूः नेष्यति तं दुर्योधनं अव पालय ॥ ११ ॥

ध्वजाः शराश्च शूराणां दिव्यानि कवचानि च ॥
अत्रैव तु महावीर्यं धनुः पार्थस्य गाण्डिवम् ।
एकं शतसहस्रेण संमितं राष्ट्रवर्धनम् ॥ ४०
व्यायामसहमत्यर्थं तृणराजसमं महत् ।
सर्वायुधमहामात्रं सर्वारिक्षयकारकम् ॥ ४१
सुवर्णविकृतं दिव्यं श्लक्ष्णमायतमत्रणम् ।
अलं भारं गुरुं सोढुं वारुणं च सुदर्शनम् ॥ ४२
तादृशान्येव सर्वाणि बलवन्ति दृढानि च ।
युधिष्ठिरस्य भीमस्य बीभत्सोर्यमयोस्तथा ।
प्रथितानि विशिष्टानि दुर्दशानि भवन्त्युत ॥४३
उत्तर उवाच ।
शरीरमिह चासक्तं शम्यां शुष्कं पुरा किल ।
तदहं राजपुत्रः सन्स्पृशेयं पाणिना कथम् ॥ ४४
न मामेवंविधं कर्म कारयस्व बृहन्नले ।
कथं वा शक्यते कर्तुं बुद्ध्या त्वं मन्यसे कथं ४५
नैवंविधं मया युक्तमालब्धुं क्षत्रयोनिना ।
महता राजपुत्रेण मन्त्रयज्ञविदा सता ॥ ४६
स्पृष्टवन्तं शरीरं मां शववाहमिवाशुचिम् ।
कथं वा व्यवहार्यं वै कुर्वीथास्त्वं बृहन्नले ॥ ४७
वैशंपायन उवाच ।
तमुवाच ततः शूरः पार्थः परपुरंजयः ।
दायादं सर्वमत्स्यानां कुले जातं विशारदम् ॥४८
जानामि त्वां महाप्राज्ञ शुभं जात्या कुलेन च ।
कथं नु पापकं कर्म ब्रूयां त्वाऽहं परन्तप ॥ ४९
व्यवहार्यश्च राजेन्द्र शुद्धश्चैव भविष्यसि ।
धनूंष्येतानि मा भैस्त्वं शरीरं नात्र विद्यते ॥५०
दायादं मत्स्यराजस्य कुले जातं मनस्विनम् ।
कथं वा निन्दितं कर्म कारये त्वां नृपात्मज ५१
वैशंपायन उवाच ।
एवमुक्तः स पार्थेन रथात्प्रस्कन्द्य कुण्डली ।
आरुरोह शमीवृक्षं वैराटिरवशस्तदा ॥ ५२
तमन्वशासच्छत्रुघ्नो रथे तिष्ठन्धनञ्जयः ।
अवरोपय वृक्षाग्राद्धनूंष्येतानि माचिरम् ॥ ५३
सोपहृत्य महार्हाणि धनूंषि पृथुवक्षसाम् ।
परिवेष्टनपत्राणि विमुच्य समुपानयत् ॥ ५४
परिवेष्टनमेतेषां सर्वं मुञ्चस्व माचिरम् ।
तेषां संनहनीयानि परिमुच्य परन्तपः ।
अपश्यत्तत्र गाण्डीवं चतुर्भिरपरैः सह ॥ ५५
तेषां विमुच्यमानानां धनुषामर्कवर्चसाम् ।
विनिश्चेरुः प्रभा दिव्या ग्रहाणामुदयेष्विव ॥५६
स तेषां रूपमालोक्य भोगिनामिव जृम्भताम् ।
हृष्टरोमा भयोद्विग्नः प्रवेपिततनुस्तदा ॥ ५७
अर्जुनेन समाश्वस्तः किंचिद्धृष्टो नृपात्मजः ।
तेषां संदर्शनाभ्यासं स्पर्शाभ्यासं पुनःपुनः ॥५८
आमील्य पुनरुन्मील्य स्पृष्ट्वास्पृष्ट्वा चकार सः ।
सम्यग्घुष्टस्तदाऽऽश्वस्तः क्षणेन समपद्यत ॥ ५९
संस्पृश्य तानि चापानि भानुमन्ति बृहन्ति च ।
वैराटिरर्जुनं राजन्निदं वचनमब्रवीत् ॥ ६०

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

पाण्डवकार्मुकाद्यवलोकनविस्मितेनोत्तरकुमारेणार्जुनंप्रति तत्तदायुधवर्णनपूर्वकं तत्तत्स्वामिनां प्रश्नः ॥ १ ॥

उत्तर उवाच ।
सारथे किमिदं दिव्यं नागो वा यदि वा धनुः ।
सौवर्णान्यत्र पद्मानि शतपत्राणि भागशः ।
कुशाग्निप्रतितप्तानि भानुमन्ति बृहन्ति च ॥ १
बिन्दवश्चात्र सौवर्णा मणिप्रोताः समन्ततः ।
शशिसूर्यप्रभाः पृष्ठे भान्ति रुक्मपरिष्कृताः ॥ २
पुष्पाण्यत्र सुवर्णानि शतपत्राणि भागशः ।
विस्मापनीयरूपं च भीमं भीमप्रदर्शनम् ॥ ३
नीलोत्पलनिभं कस्य शातकुम्भपरिष्कृतम् ।
ऋषभा यस्य सौवर्णाः पृष्ठे तिष्ठन्ति शृङ्गिणः ॥ ४

आलब्धुं स्प्रष्टुम् ॥ ४६ ॥

चत्वारिंशोऽध्यायः ॥ ४० ॥

तालप्रमाणं कस्येदं मणिरुक्मविभूषितम् ।
हाटकस्य सुवर्णस्य यस्मिञ्शाखामृगा दश ॥ ५
दुरानमं महादीर्घं सुरूपं दुष्प्रधर्षणम् ।
कस्येदमीदृशं चित्रं धनुः सर्वे च दंशिताः ॥ ६
चन्द्रार्कविमलाभासः सुरूपाः सुप्रदर्शनाः ।
हंसाः पृष्ठं श्रिता यस्य कुशाग्निप्रतिमार्चिषः ।
शार्ङ्गगाण्डीवसदृशं कस्येदं सारथे धनुः ॥ ७
चतुर्थं काञ्चनवपुर्भाति विद्युद्वर्णोपमम् ।
नीलोत्पललिप्तमच्छिद्रं जातरूपमयं धनुः ।
मत्स्याश्चास्य हिरण्यस्य पृष्ठे तिष्ठन्ति दंशिताः॥८
शक्रचापोपमं दिव्यं कस्येदं सारथे धनुः ।
उच्छ्रितं फणिवद्दिव्यं सारवत्त्वाद्दुरानमम् ॥ ९
सहस्रगोधाः सौवर्णा द्वीपिनश्च चतुर्दश ।
बर्हिणश्चात्र सौवर्णाः शतचन्द्रार्कभूषिताः ।
जाम्बूनदविचित्राङ्गं कस्येदं पञ्चमं धनुः ॥ १०
कस्येमे क्षुरनाराचाः सहस्रं लोमवाहिनः ।
प्रक्षिप्तास्तीक्ष्णतुण्डाग्रा उपासङ्गे हिरण्मये ॥ ११
हारिद्रवर्णाः कस्येमे शिता पञ्चशतं शराः ।
आशीविषसमस्पर्शाः शिताश्चाजिह्मगा दृढाः ॥१२
विपाठाः पृथवः कस्य गृध्रपत्रार्धवाजिताः ।
वराहकर्णास्तीक्ष्णाग्राः कस्येमे रुचिराः शराः १३
वज्राशनिसमस्पर्शा वैश्वानरशिखार्चिषः ।
सुवर्णपुङ्खास्तीक्ष्णाग्राः कस्य सप्तशतं शराः॥ १४
कस्यायं सायको दीर्घो गव्ये कोशे च दंशितः ।
कस्य दण्डो दृढः श्लक्ष्णो रुचिरोऽयं प्रकाशते १५
वैयाघ्रकोशः कस्यायं दिव्यः शङ्खो महाप्रभः ।
कस्यार्थमसयश्चैते पञ्च शार्दूललक्षणाः ॥ १६
कस्यायं निर्मलः खड्गो द्वीपिचर्मनिवासितः ।
नीलोत्पलसवर्णोऽयं कस्य खड्गः पृथुर्महान् ॥१७
मृगेन्द्रचर्मावसितस्तीक्ष्णधारः सुनिर्मलः ।
ऋषभाजिनकोशस्तु कस्य खड्गो महानयम् ॥१८
यस्यापिधाने दृश्यन्ते सूर्याः पञ्च परिष्कृताः ।
कस्यायं विपुलः खड्गः शङ्खत्सरुमनोहरः ॥ १९
निहितः पार्षते कोशे तैलधौतः समाहितः ।
प्रमाणवर्णयुक्तश्च कस्य खड्गो महानयम् ।
एतेन प्रतिविद्धः सञ्जीवेत्कश्चिन्न कुञ्जरः ॥ २०
निर्दिशस्व यथामार्गं मया पृष्टा बृहन्नले ।
विस्मयो मे परो जातो दृष्ट्वा सर्वमिदं महत् ॥२१

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

अर्जुनेनोत्तरंप्रति युधिष्ठिराद्यायुधानां पृथक्पृथङ्निर्देशेन तत्तत्स्वामिकत्वकथनम् ॥ १ ॥

वैशंपायन उवाच ।
उत्तरेणैवमुक्तस्तु पार्थो वैराटिमब्रवीत् ।
मृद्वा प्रत्याययन्वाचा भीतं शङ्कावशं गतम् ॥ १
अर्जुन उवाच ।
यत्त्वया प्रथमं पृष्टं शत्रुसेनाङ्गमर्दनम् ।
पार्थस्येदं धनुर्दिव्यं गाण्डीवमिति विश्रुतम् ॥ २
अभेद्यमभयं श्रीमद्दिव्यमच्छेद्यमव्रणम् ।
सर्वायुधमहामात्रं शातकुम्भमयं धनुः ॥ ३
एतच्छतसहस्रेण संमितं राष्ट्रवर्धनम् ।
देवदानवगन्धर्वैः पूजितं शाश्वतीः समाः ॥ ४
येन देवासुरान्पार्थः सर्वान्विषहते रणे ।
एतद्वर्षसहस्रं तु ब्रह्मा पूर्वमधारयत् ॥ ५
उमापतिश्चतुःषष्टिं शक्रोऽशीतिं च पञ्च च ।
सोमः पञ्चसहस्राणि तथा च वरुणः शतम् ॥ ६
तस्माच्च वरुणादग्निः प्रेम्णा प्राहृत्य तच्छुभम् ।
अग्निना प्रातिभाव्येन दत्तं पार्थाय गाण्डिवम् ।
पञ्चषष्टिं च वर्षाणि कौन्तेयो धारयिष्यति ॥ ७
एवंवीर्यं महावेगमेतच्च धनुरुत्तमम् ।
नीलोत्पलसमं राज्ञः कौरव्यस्य महात्मनः ॥ ८
बिन्दवश्चात्र सौवर्णाः पृष्ठे साधुनियोजिताः ।

विश्रुतं भीमसेनस्य जातरूपग्रहं दृढम् ॥ ९
सहस्रगोधाः सौवर्णा द्वीपिनश्च चतुर्दश ।
ऋषभा यत्र सौवर्णाः पृष्ठे तिष्ठन्ति शृङ्गिणः ॥१०
येन भीमोऽजयत्कृत्स्नां दिशं प्राचीं परंतपः ।
पृष्ठे विभक्ताः शोभन्ते कुशाग्निप्रतिदीपिताः ११
पूजितं सुरमर्त्येषु प्रथितं धनुरुत्तमम् ।
तालप्रमाणं भीमस्य रत्नरुक्मविभूषितम् ॥ १२
दुरानमं महद्दीर्घं सुरूपं दुष्प्रधर्षणम् ।
बर्हिणश्चात्र सौवर्णाः शतचन्द्रकभूषणाः ॥ १३
नकुलस्य धनुस्त्वेतन्माद्रीपुत्रस्य धीमतः ।
एतेन सदृशं चित्रं धनुरेतद्यवीयसः ।
हारिद्रवर्णं राज्ञस्तु कौरव्यस्य महात्मनः ॥ १४
विपाठा भीमसेनस्य गिरीणामपि दारणाः ।
सुप्रभाः सुमहाकायास्तीक्ष्णाग्राः सुतरां दृढाः ।
भीमेन प्रहिता ह्येते वारणानां निवारणाः ॥ १५
सुवर्णदण्डरुचिराः कालदण्डोपमाः शुभाः ।
नकुलस्य शरा ह्येते वज्राशनिसमप्रभाः ॥ १६
यांश्च त्वं पृच्छसे दीप्तान्समधारान्समाहितान् ।
वराहकर्णास्तीक्ष्णाग्राः सहदेवस्य ते शराः ॥ १७
यस्त्वयं सायको दीर्घो गव्ये कोशे च दंशितः ।
पार्थस्यायं महाघोरः सर्वभारसहो महान् ॥ १८
यस्त्वयं निर्मलः खड्गो द्वीपिचर्मणि दंशितः ।
राज्ञो युधिष्ठिरस्यायं कुन्तीपुत्रस्य धीमतः ॥ १९
वैयाघ्रकोशो भीमस्य पञ्चशार्दूललक्षणः ।
वारणानां सुदृप्तानां शिक्षितः स्कन्धशातने ॥२०
नीलोत्पलसवर्णाभः खड्गः पार्थस्य धीमतः ।
मृगेन्द्रचर्मपिहितस्तीक्ष्णधारः सुनिर्मलः ॥ २१
दर्शनीयः सुतीक्ष्णाग्रः कुन्तीपुत्रस्य धीमतः ।
अर्जुनस्यैष निस्त्रिंशः परसैन्याग्रदूषणः ॥ २२
यस्त्वयं पार्षते कोशे निक्षिप्तो रुचिरत्सरुः ।
नकुलस्यैष निस्त्रिंशो वैश्वानरसमप्रभः ॥ २३
यस्त्वयं पिङ्गलः खड्गश्चित्रो मणिमयत्सरुः ।
सहदेवस्य खड्गोऽयं भारसाहोऽतिदंशितः ।
भीमस्यायं महादण्डः सर्वामित्रविनाशनः ॥ २४
वैशंपायन उवाच ।
भेदतो ह्यर्जुनस्तूर्णं कथयामास तत्त्वतः ।
आयुधानि कलापांश्च निस्त्रिंशांश्चातुलप्रभान् २५

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

अर्जुनेनोत्तरंप्रति स्वस्यार्जुनत्वकथनपूर्वकं कङ्कादीनां युधिष्ठिरादित्वकथनम् ॥ १ ॥ तत्प्रत्ययार्थं स्वनामदशककथनपूर्वकं तन्निर्वचनम् ॥ २ ॥

वैशंपायन उवाच ।
एतस्मिन्नन्तरे पार्थं न मूढात्मा व्यजानत ।
विराटपुत्रः प्रमुखे पप्रच्छ पुनरेव तम् ॥ १
सुवर्णरुचिराण्येषामायुधानि महात्मनाम् ।
रुचिराणि प्रकाशन्ते पार्थानामाशुकारिणाम् ॥ २
क्व नु ते पाण्डवाः शूराः संग्रामेष्वपराजिताः ।
येषामिमानि दीप्तानि श्रिया दीप्यन्ति भान्ति च
कस्मिन्वसन्ति देशे च धर्मज्ञा बन्धुवत्सलाः ।
क्व धर्मराजः कौन्तेयो धर्मपुत्रो युधिष्ठिरः ॥ ४
धर्मशीलश्च धर्मात्मा धर्मवान्धर्मवित्सुधीः ।
धर्माध्यक्षो धर्मपुत्रो धर्मज्ञो धर्ममूर्तिमान् ॥ ५
धर्मनिष्ठो धर्मकर्ता धर्मगोप्ता सुधर्मकृत् ।
सत्यार्जवक्षमाधारो घृणी धर्मपरायणः ॥ ६
भीमसेनार्जुनौ चापि सर्वे ते मातुला मम ।
नकुलः सहदेवो वा सर्वास्त्रकुशलौ रणे ॥ ७
सर्व एव महात्मानः सर्वामित्रविनाशनाः ।
राज्यमक्षैः पराजित्य नः श्रूयन्ते वनं गताः ॥८
द्रौपदी चापि पाञ्चाली स्त्रीरत्नमिति मे श्रुता ।
जिता चाक्षैस्तदा कृष्णा तानेवान्वगमद्वने ॥ ९
उत्सृज्य राज्यं धर्म्यं ते नः श्रूयन्ते वनं गताः ॥

पाण्डवान्यदि जानीषे क्व नु ते धर्मचारिणः ।
क्व नु वा निवसन्तीति सत्यं ब्रूहि बृहन्नले ॥ ११
किमर्थमागतान्यत्र शस्त्रास्त्राणि महात्मनाम् ।
कथं ज्ञातानि भवता तथा मे ब्रूहि शोभने ॥१२
वैशंपायन उवाच ।
ततः प्रहस्य बीभत्सुः कौन्तेयः श्वेतवाहनः ।
उवाच राजपुत्रं तमुत्तरं शृणु मे वचः ॥ १३
मा भैस्त्वं राजशार्दूल सर्वं ते वर्णयाम्यहम् ।
नात्र भेतव्यमद्यापि राजपुत्र यथातथा ॥ १४
वयं ते पाण्डवा नाम वनवासस्य पारगाः ।
अतीते द्वादशे वर्षे च्छन्नवासमिहोषिताः ।
तस्मादशङ्कितमनाः शृणुष्वावहितोत्तर ॥ १५
अहमस्म्यर्जुनो नाम कङ्को नाम युधिष्ठिरः ।
भीमसेनस्तु वललः पितुस्ते रसपाचकः ।
अश्वबन्धस्तु नकुलः सहदेवस्तु गोपतिः ॥ १६
सैरन्ध्रीं द्रौपदीं विद्धि यदर्थे कीचको हतः ।
भीमसेनेन दुर्वृत्तः सहभ्रातृभिराहवे ॥ १७
श्रुत्वैतद्वचनं जिष्णोर्विस्मयस्फारितेक्षणः ।
पश्यन्ननिमिषः पार्थं शनैर्वाचमुवाच ह ॥ १८
उत्तर उवाच ।
दश पार्थस्य नामानि श्रूयन्ते मे कथासु च ।
प्रब्रूयास्तानि यदि मे श्रद्दध्यां सर्वमेव ते ॥ १९
अर्जुन उवाच ।
अहं तर्हि तवाचक्षे दश नामानि तानि मे ।
वैराटे शृणु तानि त्वं यानि पूर्वं श्रुतानि ते ।
ईशानो विदधे देवस्त्रिदिवस्येश्वरो दिवि ॥ २०
अर्जुनः फल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः पार्थः सव्यसाची धनञ्जयः ।
एतानि मम नामानि स्थापितानि सुरोत्तमैः २१
उत्तर उवाच ।
गुणतो दश नामानि समवेतानि पाण्डवे ।
चरन्ति लोके ख्यातानि विदितानि ममानघ २२
केनासि विजयो नाम केनासि श्वेतवाहनः ।
सव्यसाची च केनासि जिष्णुर्बीभत्सुरेव च ॥२३
अर्जुनः फल्गुनः पार्थः किरीटी केन सारथे ।
धनञ्जयश्च केनासि शीघ्रं वद बृहन्नले ॥ २४
श्रुता मे तस्य वीरस्य केवला नामहेतवः ।
इतस्ततश्चलत्येतन्मनो मे चञ्चलं त्वयि ।
अर्जुनो वा भवान्नेति वद शीघ्रं बृहन्नले ॥ २५
अर्जुन उवाच ।
सर्वाञ्जित्वा जनपदान्धनं चाच्छिद्य सर्वशः ।
मध्ये धनस्य तिष्ठन्तं तन्मामाहुर्धनञ्जयम् ॥ २६
अभिप्रयामि संग्रामे यदाऽहं युद्धदुर्मदान् ।
अजित्वा न निवर्तेयं तेन वै विजयं विदुः ॥२७
श्वेताः काञ्चनसन्नाहा रथे युज्यन्ति मे हयाः ।
शत्रुभिर्युध्यमानस्य तेनाहं श्वेतवाहनः ॥ २८
किरीटं सूर्यसंकाशं भ्राजते मे शिरोगतम् ।
रणमध्ये रथस्थस्य सूर्यपावकसन्निभम् ॥ २९
अच्छेद्यं रुचिरं चित्रं जाम्बूनदपरिष्कृतम् ।
इन्द्रदत्तमनाहार्यं तेनाहुर्मां किरीटिनम् ॥ ३०
न कुर्यां कर्म बीभत्सं युध्यमानः कदाचन ।
तेन देवमनुष्येषु बीभत्सुरिति मां विदुः ॥ ३१
उभौ मे तुल्यकर्माणौ गाण्डीवस्य विकर्षणे ।
भुजौ मे भवतः सङ्ख्ये परसैन्यविनाशिनौ ।
तयोः सव्योऽधिकस्तस्मात्सव्यसाचीति मां विदुः॥
पृथिव्यां सागरान्तायां वर्णो मे दुर्लभः समः ।
शुद्धत्वाद्रूपवत्त्वाच्च तेन मामर्जुनं विदुः ॥ ३३
उत्तराभ्यां तु पूर्वाभ्यां फल्गुनीभ्यामहं दिवा ।
जातो हिमवतः पृष्ठे तेन मां फल्गुनं विदुः ॥३४
यो ममाङ्गे व्रणं कुर्याद्भ्रातुर्ज्येष्ठस्य पश्यतः ।
युधिष्ठिरस्य रुधिरं दर्शयेद्वा कदाचन ।
पराभवमहं तस्य कुले कुर्यां न संशयः ॥ ३५

बीभत्सुरिति भदि कल्याणे सुखे चेत्यस्य सनि रूपम् ॥ ३१ ॥ सव्येन वामेनापि हस्तेन सचितुं ज्याकर्षणादिक्रियायां संबद्धुं शीलमस्येति सव्यसाची ॥ ३२ ॥ अर्जुन इति ऋज गतिस्थानार्जनोपार्जनेष्विल्यत उनन्प्रत्यये भवति । दीप्तिमत्त्वात्समत्वात् शुद्धकर्मकरत्वाच्चार्जुन इत्यर्थः ॥ ३३ ॥ उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यामिति झ. पाठः । नक्षत्राभ्यां ताराभ्यां तत्र स्थिते चन्द्र इत्यर्थः ॥ ३४ ॥ त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

योत्स्यामि तैरहं सर्वैर्न मे तेभ्यः पराभवः ।
तेन देवमनुष्येषु जिष्णुर्नामास्मि विश्रुतः ॥ ३६
माता मम पृथा नाम तेन मां पार्थमब्रुवन् ॥३७
देवदानवगन्धर्वपिशाचोरगराक्षसान् ।
अहं पुरा रणे जित्वा खाण्डवेऽग्निमतर्पयम् ॥३८
हुताशनं तर्पयित्वा सहितः शार्ङ्गधन्वना ।
[त्रिविष्टपगतौ दृष्ट्वा पितामहमहेश्वरौ ॥ ३९
मूर्च्छया पतितं भूमावागतौ देवसत्तमौ ।
दृष्ट्वा तौ वरदौ देवौ संज्ञां लब्ध्वोत्थितः पुनः ४०
मूर्ध्ना हि प्रणतं भूमौ तौ देवौ वरदौ वरौ ।
कृष्णेत्येकादशं नाम प्रीत्या मे चक्रतुस्तदा ।
तुष्टौ च मम वीर्येण कर्मणा चाभिराधितौ ॥ ४१
सर्वदेवैः परिवृतौ भूयो मां स्वयमूचतुः ।
वरं तात वृणीष्वेति यं प्रार्थयसि पाण्डव ॥ ४२
ततोऽहमस्त्राण्यलभं दिव्यानि च दृढानि च ।
ब्राह्मं पाशुपतं चैव स्थूणाकर्णं च दुर्जयम् ।
ऐन्द्रं वारुणमाग्नेयं वायव्यमथ वैष्णवम् ॥ ४३
ततोऽहमजयं भूयो रथेनैन्द्रेण दुर्जयान् ।
मातलिं सारथिं कृत्वा निवातकवचान्रणे ।
अवध्यकवचान्देवैर्वरदृप्तान्महासुरान् ॥ ४४
तिस्रः कोटीर्दानवानां संयुगेष्वनिवर्तिनाम् ।
एको निर्जित्य संग्रामे भूयो देवानतोषयम् ॥४५
ततो मे भगवानिन्द्रः किरीटमददात्स्वयम् ।
देवाश्च शङ्खमददुः शत्रुसैन्यनिवारणम् ॥ ४६
अहं पारे समुद्रस्य हिरण्यपुरवासिनाम् ।
हत्वा षष्टिं सहस्राणि जयं संप्राप्तवान्रणे ॥ ४७
असंभ्रान्तो रथे तिष्ठन्सहस्रेषु शतेषु च ।
शत्रुमध्ये दुराधर्षो न मुह्यन्ति च मे दिशः ॥४८
अहं गन्धर्वराजेन ह्रियमाणं सुयोधनम् ।
भ्रातृभिः सहितं तात गन्धर्वैः समरे जितम् ।
चतुर्दश सहस्राणि हत्वा चैनममोचयम् ॥ ४९
एतानि मम नामानि योऽहन्यहनि कीर्तयेत् ।
तं न पश्यन्ति सत्त्वानि न तं निघ्नन्ति शत्रवः ५०
अद्य पश्य महाबाहो मम वीर्यं सुदुःसहम् ।
मा भैर्विगतसंत्रासः कुरूनेतान्समागतान् ॥ ५१
सुयोधनस्य मिषतः कर्णस्य च कृपस्य च ।
पितामहस्य भीष्मस्य द्रौणेर्द्रोणस्य च स्वयम् ।
सर्वानेव कुरूञ्जित्वा प्रत्यानेष्यामि ते पशून्]५२

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

उत्तरेण बृहन्नलाया अर्जुनत्वविज्ञानेन तंप्रत्यज्ञानमूलकभूतपूर्वस्वापराधक्षमापनम् ॥ १ ॥ अर्जुनेनोत्तरंप्रति स्वस्य क्लैब्यप्राप्तिहेतुकथनम् ॥ २ ॥ तथोत्तरस्य सारथीकरणपूर्वकं रथारोहणेन रणायाभियानम् ॥ ३ ॥

वैशंपायन उवाच ।
ततः पार्थं स वैराटिः प्राञ्जलिस्त्वभ्यवादयत् ।
अहं भूमिंजयो नाम प्रणतोस्मि धनंजय ॥ १
दिष्ट्या त्वां पार्थ पश्यामि स्वागतं ते धनंजय ।
लोहिताक्ष महाबाहो नागराजवरोपम ॥ २
यदज्ञानादवोचं त्वां प्रमादेन नरोत्तम ।
अकृत्वा हृदये सर्वं क्षन्तुमर्हसि तन्मम ॥ ३
यतस्त्वया कृतं पूर्वं चित्रं कर्म सुदुष्करम् ।
अतो भयं व्यपेतं मे प्रीतिश्च परमा त्वयि ॥ ४
दासोऽहं ते भविष्यामि पश्य मामनुकम्पया ॥५
या प्रतिज्ञा कृता पूर्वं तव सारथ्यकारणात् ।
सेयं प्रतिज्ञा पूर्णा मे हर्षश्चार्जुन जायते ॥ ६
देवेन्द्रतनयस्येह सारथिः स्यां महामृधे ।
इति पूर्वं कृताऽस्माभिः प्रतिज्ञा युद्धदुर्मद ॥ ७
प्रतिज्ञा मम संपूर्णा तव सारथ्यकारणात् ।
मनस्स्वास्थ्यं च मे जातं जातं भाग्यं च मे महत् ॥८

* कुण्डलितः पाठो ध. पुस्तक एव दृश्यते ।

आस्थाय विपुलं वीर रथं सारथिना मया ।
दुर्योधनं च जित्वाऽऽजौ निवर्तय पशून्मम ॥ ९
अर्जुन उवाच ।
प्रीतोस्मि राजपुत्राद्य न भयं विद्यते तव ।
सर्वान्नुदामि ते शत्रूनणे रणविशारद ॥ १०
स्वस्थो भव महान्युद्धे पश्य मां शत्रुभिः सह ।
युध्यमानं विमर्देऽस्मिन्कुर्वाणं भैरवं रवम् ॥ ११
गाण्डीवं देवदत्तं च शरान्कनकभूषणान् ।
एतान्सर्वानुपासङ्गान्क्षिप्रं बध्नीहि मे रथे ।
एकं चाहर निस्त्रिंशं जातरूपपरिष्कृतम् ॥ १२
अहं वै कुरुभिर्योत्स्ये मोक्षयिष्यामि ते पशून् ।
तोषयिष्यामि राजानं प्रवेक्ष्यामि पुरं पुनः ॥ १३
संकल्पागाधपरिघं बाहुप्राकारतोरणम् ।
त्रिदण्डतूणसंबाधं नैकध्वजसमाकुलम् ॥ १४
ज्याक्षेपनिनदारावं नेमीनिनददुन्दुभि ।
शरजालवितानाढ्यमास्वेडितमहास्वनम् ।
नगरं ते मया गुप्तं रथोपस्थं भविष्यति ॥ १५
अधिष्ठितो मया सङ्ख्ये रथो गाण्डीवधन्विना ।
अजय्यः शत्रुसैन्यानां वैराटे व्येतु ते भयम् ॥ १६
उत्तर उवाच ।
बहुना किं प्रलापेन शृणु मे परमं वचः ।
नाहं बिभेमि कौन्तेय साक्षादपि शतक्रतोः १७
यमवायुकुबेरेभ्यो द्रोणभीष्मशतादपि ।
बिभेमि नाहमेतेभ्यो जानामि त्वां स्थिरं युधि ।
केशवेनापि संग्रामे साक्षादिन्द्रेण वा समम् ॥ १८
इदं तु चिन्तयन्नेव परिमुह्यामि केवलम् ।
निश्चयं नाधिगच्छामि नावगच्छामि किंचन ॥ १९
एवं वराङ्गरूपस्य लक्षणैः सूचितस्य च ।
केन कर्मविपाकेन क्लीबत्वं त्वामुपागतम् ॥ २०
मन्ये त्वां क्लीबरूपेण चरन्तं शूलपाणिनम् ।
गन्धर्वराजप्रतिमं देवं वाऽपि शतक्रतुम् ॥ २१
अर्जुन उवाच ।
भ्रातुर्नियोगाज्ज्येष्ठस्य संवत्सरमिदं व्रतम् ।
चरामि ब्रह्मचर्यं वै सत्यमेतद्ब्रवीमि ते ॥ २२
नास्मि क्लीबो महाबाहो परवान्धर्मसंयुतः ।
उर्वशीशापसंभूतं क्लैब्यं समुपसंस्थितम् ॥ २३
पुराऽहमाज्ञया भ्रातुर्ज्येष्ठस्यास्मि सुरालयम् ।
प्राप्तवानुर्वशी दृष्टा सुधर्मायां मया तदा ॥ २४
नृत्यन्तीं परमं रूपं बिभ्रतीं वज्रिसन्निधौ ।
अपश्यं तामनिमिषं कूटस्थामन्वयस्य मे ॥ २५
रात्रौ समागता मह्यं शयनं रन्तुमिच्छया ।
अहं तामभिवाद्यैव मातृसत्कारमाचरम् ॥ २६
सा च मामशपत्क्रुद्धा शिखण्डी त्वं भवेति वै ।
श्रुत्वा तमिन्द्रो मामाह मा भैस्त्वं पार्थ षण्डता ॥
उपकारो भवेत्तुभ्यमज्ञातवसतौ पुरा ।
इतीन्द्रो मामनुग्राह्य ततः प्रेषितवान्वृषा ॥ २८
तदिदं समनुप्राप्तं व्रतं चीर्णं मयाऽनघ ।
समाप्तव्रतमुत्तीर्णं विद्धि मां त्वं नृपात्मज ॥ २९
उत्तर उवाच ।
परमोऽनुग्रहो मेऽद्य यत्प्रतर्को न मे वृथा ।
न हीदृशाः क्लीबरूपा भवन्ति तु नरोत्तमाः ३०
सहायवानस्मि रणे युद्ध्येयममरैरपि ।
साध्वसं तत्प्रनष्टं मे किं करोमि ब्रवीहि मे ॥ ३१
अहं ते संग्रहीष्यामि हयाञ्शत्रुनिबर्हण ।
शिक्षितो ह्यस्मि सारथ्ये निष्ठितः पुरुषर्षभ ॥ ३२
दारुको वासुदेवस्य यथा शक्रस्य मातलिः ।
तथा मां विद्धि सारथ्ये शिक्षितं नरपुङ्गव ॥ ३३
अश्वा ह्येते महाबाहो तवैवाहवदुर्जयाः ।
योग्या रथवरे युक्ताः प्राणवन्तो जितश्रमाः ३४
यस्य यातेन पश्यन्ति भूमौ क्षिप्तं पदंपदम् ।
दक्षिणां यो धुरं वोढा सुग्रीवेण समो हयः ॥ ३५
योऽयं हयो धुर्यवरो वामां वहति शोभनः ।
तं मन्ये मेघपुष्पस्य जवेन सदृशं हयम् ॥ ३६
योऽयं वहति वै पार्ष्णिं दक्षिणामश्चितोद्यतः ।
वलाहकादभिमतस्तेजसा वीर्यवत्तरः ॥ ३७
योऽयं काञ्चनसन्नाहो वामं वहति शोभनः ।
धुर्यं शैब्यस्य तं मन्ये जवेन बलवत्तरम् ॥ ३८
त्वामेवायं रथो वोढुं संग्रामेऽर्हति धन्विनम् ।

त्वं चेमं रथमास्थाय योद्धुमर्हो मतो मम ।
सर्वशत्रुभिरायातो देवराज इवासुरैः ॥ ३९
वैशंपायन उवाच ।
ततो रथादवस्कन्द्य वीर्यवानरिमर्दनः ।
प्रणम्य देवान्गाण्डीवमादाय रुरुचे श्रिया ॥४०
ततो विमुच्य बाहुभ्यां शङ्खचूडानि पाण्डवः ।
तौ च दुन्दुभिसन्नादौ प्रतिबद्ध्य तलावुभौ ॥४१
इन्द्रदत्ते च ते दिव्ये उद्धृत्यामुच्य कुण्डले ।
श्लक्ष्णान्केशान्मृदून्स्निग्धाञ्श्वेतेनोद्ग्रथ्य वाससा॥
अथासौ प्राङ्मुखो भूत्वा शुचिः प्रयतमानसः ।
अभिदध्यौ महाबाहुः सर्वास्त्राणि रथोत्तमे ॥ ४३
ऊचुश्च पार्थं सर्वाणि प्राञ्जलीनि नृपात्मजम् ।
इमानि स्मो महोदार किङ्कराणीन्द्रनन्दन ॥ ४४
प्रणिपत्य ततः पार्थः समालभ्य च पाणिना ।
सर्वाणि मानसानीह भवतेत्यभ्यभाषत ॥ ४५
प्रतिगृह्य ततोऽस्त्राणि प्रहृष्टवदनोऽभवत् ।
अधिज्यं तरसा कृत्वा गाण्डीवं व्याक्षिपद्धनुः ४६
तस्य विक्षिप्यमाणस्य धनुषोऽभून्महास्वनः ।
यथा शैलस्य महतः शैलानाक्षिप्य जघ्नुषः ॥ ४७
सनिर्घाताऽभवद्भूमिर्दिक्षु वायुर्ववौ भृशम् ।
भ्रान्तद्विजं खमभवत्प्राकम्पन्त महाद्रुमाः ॥ ४८
तं शब्दं कुरवो राजन्विस्फोटमशनेरिव ।
ताक्ष्यं शब्दमिव श्रुत्वा वित्रेसुर्दीनमानसाः ॥४९
यथेन्द्रो व्याक्षिपद्धीमं विस्फोटमशनेर्भुवि ।
तथाऽर्जुनो धनुःश्रेष्ठं बाहुभ्यामाक्षिपद्बली ॥ ५०
महाशनिमहाशब्दसदृशो ज्यास्वनो महान् ।
शत्रून्वीरांश्च संतर्ज्य निग्रहस्थो रथे स्थितः ॥५१
'उत्तर उवाच ।
एकस्त्वं पाण्डवश्रेष्ठ बहूनेतान्महारथान् ।
कथं जेष्यसि संग्रामे सर्वशस्त्रास्त्रपारगान् ॥५२
असहायोऽसि कौन्तेय ससहायाश्च कौरवाः ।
अत एव महाबाहो भीतस्तिष्ठामि तेऽग्रतः ॥५३
वैशंपायन उवाच ।
उवाच पार्थो मा भैषीः प्रहस्य स्वनवत्तदा ॥५४
युध्यमानस्य मे वीर गन्धर्वैः सुमहाबलैः ।
सहायो घोषयात्रायां कस्तदासीत्सखा मम ॥५५
तथा प्रतिभये तस्मिन्देवदानवसंकुले ।
खाण्डवे युध्यमानस्य कस्तदासीत्सखा मम ॥५६
निवातकवचैः सार्धं पौलोमैश्च महाबलैः ।
युध्यतो देवराजार्थे कः सहायस्तदाऽभवत् ॥५७
स्वयंवरे तु पाञ्चाल्या राजभिः सह संयुगे ।
युध्यतो बहुभिस्तात कः सहायस्तदाऽभवत् ॥५८
उपजीव्य गुरुं द्रोणं शुक्रं वैश्रवणं यमम् ।
वरुणं पावकं चैव कृपं कृष्णं च माधवम् ।
पिनाकपाणिनं चैव कथमेतान्न योधये ॥ ५९
रथं वाहय मे शीघ्रं व्येतु ते मानसो ज्वरः ॥'६०

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

अर्जुनेन युद्धप्रस्थानसमये उत्तररथात्सिंहध्वजस्यावरोपणपूर्वकं स्वध्यानसंनिहितस्य हनुमद्ध्वजस्य रथे स्थापनम् ॥ १ ॥ तथा स्वशङ्खादिशब्दश्रवणवित्रस्तस्योत्तरस्य समाश्वासनपूर्वकं रणायाभियानम् ॥ २ ॥

वैशंपायन उवाच ।
उत्तरं सारथिं कृत्वा शमीं कृत्वा प्रदक्षिणम् ।
आयुधं सर्वमादाय ततः प्रायाद्धनञ्जयः ॥ १
ध्वजं च सिंहं मात्स्यस्य भ्रातृणामायुधानि च ।
प्रणिधाय शमीमध्ये प्रयातुमुपचक्रमे ॥ २
ततः काञ्चनलाङ्गूलं ध्वजं वानरलक्षणम् ।
दिव्यं मायामयं युक्तं विहितं विश्वकर्मणा ।
मनसा चिन्तयामास प्रसादं पावकस्य च ॥ २
स च तच्चिन्तितं ज्ञात्वा ध्वजे भूतान्ययोजयत् ।
रथे वानरमुच्छ्रित्य गाण्डीवं व्याक्षिपद्धनुः ॥ ४
सपताकं विचित्राङ्गं सोपासङ्गं महाबलम् ।
खात्पपात रथे तूर्णं दिव्यरूपं मनोरमम् ॥ ५

रथमास्थाय बीभत्सुः कौन्तेयः श्वेतवाहनः ।
बद्धासिः सतलत्राणः प्रगृहीतशरासनः ।
ततः प्रायादुदीचीं स कपिप्रवरकेतनः ॥ ६
सैन्याभ्याशं स संप्राप्य गृहीत्वा शङ्खमुत्तमम् ।
स्वनवन्तं महाशब्दं देवदत्तं धनञ्जयः ।
शशाङ्करूपं बीभत्सुः प्राध्मापयदरिंदमः ॥ ७
[शशाङ्ककुन्दधवलं मुखे निक्षिप्य वासविः ।
उच्छ्वसद्गण्डयुगलं सिराल्याचितफालकम् ॥ ८
आरक्तनिम्ननयनं ह्रस्वस्थूलशिरोधरम् ।
अतिश्लिष्टोदरोरस्कं तिर्यगाननशोभितम् ॥ ९
यावत्स्वशक्तिसामर्थ्यं त्रैलोक्यं क्षोभयन्निव ।
मरुद्भिर्दशभिश्चैव प्राध्मापयदरिंदमः ॥] १०
शङ्खशब्दोस्य सोत्यर्थं श्रूयते कालमेघवत् ॥ ११
तस्य शङ्खस्य शब्देन धनुषो निस्वनेन च ।
वानरस्य निनादेन रथनेमिस्वनेन च ।
जङ्गमस्य भयं घोरमकरोत्पाकशासनिः ॥ १२
शङ्खशब्देन पार्थस्य मुखेनाश्वाः पतन्क्षितौ ।
उत्तरश्चापि संत्रस्तो रथोपस्थ उपाविशत् ॥ १३
अथाश्वान्रश्मिभिः पार्थः समुद्यम्य परंतपः ।
अभ्राजत रथोपस्थे भानुर्मेराविवोत्तरे ॥ १४
शङ्खघोषेण वित्रस्तं ज्याघातेन च मूर्च्छितम् ।
उत्तरं संपरिष्वज्य समाश्वासयदर्जुनः ॥ १५
मा भैस्त्वं राजपुत्राग्र्य क्षत्रियोसि परन्तप ।
कथं पुरुषशार्दूल शत्रुमध्ये विषीदसि ॥ १६
श्रुतास्ते शङ्खशब्दाश्च भेरीशब्दाश्च सर्वशः ।
कुञ्जराणां च निनदा व्यूढानीकेषु नित्यशः ॥ १७
स त्वं कथमिवानेन शङ्खशब्देन भीषितः ।
विषण्णरूपो वित्रस्तः पुरुषः प्राकृतो यथा ॥ १८

उत्तर उवाच ।
श्रुता मे शङ्खशब्दाश्च भेरीशब्दाश्च नित्यशः ।
कुञ्जराणां च निनदा व्यूढानीकेषु तिष्ठतः ॥ १९
नैवंविधाः शङ्खशब्दाः पुरा जातु मया श्रुताः ।
ध्वजस्य चापि रूपं मे दृष्टपूर्वं नहीदृशम् ।
धनुषश्चापि घोषश्च श्रुतपूर्वो न मे क्वचित् ॥ २०
अस्य शङ्खस्य शब्देन धनुषो निस्वनेन च ।
अमानुषाणां शब्देन भूतानां ध्वजवासिनाम् ।
रथनेमिप्रणादेन मनो मे मुह्यते भृशम् ॥ २१
व्याकुलाश्च दिशः सर्वा हृदयं व्यथतीव च ।
ध्वजेन पिहिताः सर्वा दिशो न प्रतिभान्ति मे ।
गाण्डीवस्य च शब्देन कर्णौ मे बधिरीकृतौ ॥ २२
वैशंपायन उवाच ।
पुनर्ध्वजं पुनः शङ्खं धनुश्चैव पुनःपुनः ।
स मूढचेता वैराटिरर्जुनं समुदैक्षत ॥ २३
स मुहूर्तं प्रयातं तु पार्थो वैराटिमब्रवीत् ॥ २४
स्थिरो भव महाबाहो संज्ञां चात्मानमानय ।
एकान्ते रथमास्थाय पद्भ्यां त्वमवपीड्य च ।
दृढं च रश्मीन्संयच्छ शङ्खं ध्मास्याम्यहं पुनः ॥ २५
एवमुक्त्वा महाबाहुः सव्यसाची परन्तपः ।
ततः शङ्खमुपाध्मासीद्दारयन्निव पर्वतान् ।
गुहा गिरीणां च तदा दिशः शैलांस्तथैव च ॥ २६
ज्याघोषं तलघोषं च कृत्वा भूतान्यमोहयत् ।
उत्तरश्चापि संलीनो रथोपस्थ उपाविशत् ।
तं समाश्वासयामास पुनरेव धनञ्जयः ॥ २७
तस्य शङ्खस्य शब्देन रथनेमिस्वनेन च ।
गाण्डीवस्य च शब्देन पृथिवी समकम्पत ॥ २८

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

द्रोणेनार्जुनशङ्खनादादिना तस्यार्जुनत्वनिर्धारणेन दुर्योधनंप्रति तन्निवेदनपूर्वकं दुर्निमित्तप्रदर्शनम् ॥ १ ॥

वैशंपायन उवाच ।
भारद्वाजस्ततो द्रोणः सर्वशस्त्रभृतांवरः ।

* इमे कुण्डलिताः ३ श्लोकाः ध. पुस्तक एव वर्तन्ते ।

राजानं चाह संप्रेक्ष्य दुर्योधनमरिंदमः ॥ १
यथा रथस्य निर्घोषो यथा शङ्ख उदीर्यते ।
कम्पते च यथा भूमिर्नैषोन्यः सव्यसाचिनः ॥२
औत्पातिकमिदं राजन्निमित्तं भवतीह नः ।
न हि पश्यामि विजयं सैन्येऽस्माकं परन्तप ॥ ३
शस्त्राणि न प्रकाशन्ते न प्रहृष्यन्ति वाहनाः ।
अग्नयश्च न भासन्ते सुसमिद्धा न शोभनाः ॥ ४
प्रत्यादित्यं च नः सर्वे मृगा घोरा नदन्ति च ।
शकुनाश्चापसव्याश्च वेदयन्ति महाभयम् ॥ ५
गोमायुरेष सैन्यानां रुदन्मध्येन धावति ।
चाषा नदन्ति चाकाशे वेदयन्तो महद्भयम् ॥ ६
भवतां चैव रोमाणि प्रहृष्टानीव लक्षये ॥ ७
अनुष्णाङ्गाश्च संखिन्ना जृम्भन्ते चाप्यभीक्ष्णशः।
विष्कम्भन्ति च मातङ्गा मुञ्चन्त्यश्रूणि वाजिनः।
सदा मूत्रं पुरीषं च उत्सृजन्ति पुनःपुनः ॥ ८
लोहितार्द्रा च पृथिवी दिशः सर्वाः प्रधूमिताः।
न च सूर्यः प्रतपति महद्वेदयते भयम् ॥ ९
हस्तिनश्चापि वित्रस्ता योधाश्चापि वितत्रसुः ।
पराभूता च वः सेना न कश्चिद्योद्धुमिच्छति॥१०
विषण्णमुखभूयिष्ठाः सर्वे योधा विचेतसः ।
दिशं ते दक्षिणां सर्वे विप्रेक्षन्ते पुनःपुनः ॥ ११
मृगाश्च पक्षिणश्चैव सव्यमेव पतन्ति नः ।
वादित्रोद्धुष्टघोषाश्च न च गाढं स्वनन्ति च ।
ध्वजाग्रेषु निलीयन्ते वायसास्तन्न शोभनम् ॥१२
यथा मेघस्य निनदो गम्भीरस्तूर्णमायतः ।
श्रूयते रथनिर्घोषो नायमन्यो धनञ्जयात् ॥ १३
अश्वानां स्वनतां शब्दो वहतां पाकशासनिम् ।
वानरस्य रथे दिव्यो निस्वनः श्रूयते महान्॥१४
शङ्खशब्देन पार्थस्य कर्णौ मे बधिरीकृतौ ।
सर्वसैन्यं च वित्रस्तं नायमन्यो धनञ्जयात् ॥१५
राजानमग्रतः कृत्वा दुर्योधनमरिन्दमम् ।
गाः प्रस्थाप्य च तिष्ठामो व्यूढानीकाः प्रहारिणः ।
प्रविभज्य त्रिधा सेनां समुच्छ्रित्य ध्वजानपि १६
शितैर्बाणैः प्रताप्येमां चमूमेष धनञ्जयः ।
मूर्ध्नि सर्वनरेन्द्राणां वामपादं करिष्यति ॥ १७
न ह्येष शक्यो बीभत्सुर्जेतुं देवासुरैरपि ।
दिक्षु गुल्मा निवेश्यन्तां यत्ता योत्स्यामहेऽर्जुनं१८

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

द्रोणवचनादर्जुनस्यार्जुनत्वावधारणेन विषादात्तूर्ष्णींभूतेषु स्वीयेषु दुर्योधनेन द्रोणानादरपूर्वकं तान्प्रति समरप्रोत्साहनम् ॥ १ ॥

वैशंपायन उवाच ।
ततो दुर्योधनो राजा समरे भीष्ममब्रवीत् ।
द्रोणं च रथिशार्दूलं कृपं च सुमहाबलम् ॥ १
उक्तोऽयमर्थ आचार्य मया कर्णेन चासकृत् ।
पुनरेव च वक्ष्यामि न हि तृप्यामि तद्ब्रुवन् ॥२
पराजितैर्विवस्तव्यं तैश्च द्वादशवत्सरान् ।
वने जनपदेऽज्ञातैरेष एव पणो हि नः ॥ ३
तेषां न तावन्निर्वृत्तो वत्सरः स त्रयोदशः ।
अज्ञातवासे बीभत्सुरथास्माभिः परिश्रुतः ॥ ४
अनिर्वृत्ते तु निर्वासे यदि बीभत्सुरागतः ।
पुनर्द्वादशवर्षाणि वने वत्स्यन्ति पाण्डवाः ॥ ५
लोभाद्वा ते न जानीयुरस्मान्वा मोह आविशत् ।
हीनातिरिक्तमेतेषां भीष्मो वेदितुमर्हति ॥ ६
अर्थानां हि पुनर्द्वैधे नित्यं भवति संशयः ।
अन्यथा चिन्तितो ह्यर्थः पुनर्भवति चान्यथा ॥७
उत्तरं मार्गमाणानां मात्स्यसेनां युयुत्सताम् ।
यदि बीभत्सुरायातः किंनु कृत्यमतः परम् ॥ ८
त्रिगर्तानां कृतं कार्यं पाण्डवानां च मार्गणम् ।
विप्रकारैर्हि मात्स्येन सुशर्मा बाधितः पुरा ॥ ९
तेषां भयाभिपन्नानां त्रस्तानां त्राणमिच्छताम् ।

अभयं याचमानानां तदाऽस्माभिः परिश्रुतम् १०
प्रथमं तैर्ग्रहीतव्यं मात्स्यानां गोधनं महत् ।
अष्टम्याश्चापराह्णे तु इति नस्तैः समाहितम् ॥ ११
नवम्यां पुनरस्माभिः सूर्यस्योदयनं प्रति ।
इमा गावो ग्रहीतव्या याते मत्स्ये गवांपदम् ॥१२
इत्येवं निश्चयोऽस्माकं मन्त्रोऽभून्नागसाह्वये ।
पाण्डवानां परिज्ञाने सर्वेषां नः परस्परम् ॥ १३
ते वा गाश्च नयिष्यन्ति यदि वा स्युः पराजिताः ।
अस्मान्वाऽप्यतिसन्धाय कुर्युर्मात्स्येन संगतिम् १४
अथवा तानुपादाय मात्स्यो जानपदैः सह ।
सर्वथा सेनया सार्धमस्मानेष युयुत्सति ॥ १५
तेषामेको महावीर्यः कश्चिदेव पुरःसरः ।
अस्माञ्जेतुमिहायातो मात्स्यो वाऽपि स्वयं भवेत् १६
यद्येष राजा मात्स्यानां यदि बीभत्सुरागतः ।
सर्वैर्योद्धव्यमस्माभिरिति नः समयः कृतः ॥ १७
अथ कस्मात्स्थिता ह्येते रथेषु रथिसत्तमाः ।
भीष्मद्रोणकृपाः कर्णो विकर्णो द्रौणिरेव च ।
संभ्रान्तमनसः सर्वे प्राप्ते ह्यस्मिन्धनञ्जये ॥ १८
नान्यत्र युद्धाच्छ्रेयोस्ति तथाऽऽत्मा प्रणिधीयताम्
सर्वलोकेन वा युद्धं देवैर्वाऽस्तु सवासवैः ॥ १९
अनाच्छिन्ने धनेऽस्माकमथ शक्रेण वज्रिणा ।
यमेन वाऽपि संग्रामे को हास्तिनपुरं व्रजेत् ॥२०
शरैरभिप्रणुन्नानां भग्नानां गहने वने ।
को हि जीवेत्पदातीनां भवेदश्वेषु संशयः ॥ २१
आचार्यं पृष्ठतः कृत्वा तथा नीतिर्विधीयताम् ।
जानामि च मतं तेषामतस्त्रासयतीव नः ॥ २२
अर्जुने चापि संप्रीतिमधिकामुपलक्षये ।
तथा दृष्ट्वा हि बीभत्सुमुपायान्तं प्रशंसति ।
यथा सेना न भज्येत तथा नीतिर्विधीयताम् २३
अदेशिका ह्यरण्येऽस्मिन्कृच्छ्रे शत्रुवशं गता ।
यथा न विभ्रमेत्सेना तथा नीतिर्विधीयताम् २४
अश्वानां हेषितं श्रुत्वा का प्रशंसा भवेत्परे ।
स्थाने वाऽपि व्रजन्तो वा सदा हेषन्ति वाजिनः २५
सदा च वायवो वान्ति नित्यं वर्षति वासवः ।
स्तनयित्नोश्च निर्घोषः श्रूयते बहुशस्तथा ॥ २६
भीषयन्पाण्डवेयेभ्यो भवान्सर्वानिमाञ्जनान् ।
प्रमुखे सर्वसैन्यानामबद्धं बहु भाषते ॥ २७
यथैवाश्वान्मार्गमाणास्तानेवाभिपरीप्सवः ।
हेषितानीव शृण्वन्ति तदिदं भवतस्तथा ॥ २८
किमत्र कार्यं पार्थस्य कथं वा स प्रशस्यते ।
अन्यत्र कामाद्द्वेषाद्वा रोषाद्वाऽस्मासु केवलम् २९
आचार्या वै कारुणिकाः प्राज्ञाश्चापायदर्शिनः ।
नैते महाहवे घोरे संप्रष्टव्याः कथंचन ॥ ३०
प्रासादेषु विचित्रेषु गोष्ठीपानाशनेषु च ।
कथा विचित्राः कुर्वाणाः पण्डितास्तत्र शोभनाः॥
बहून्याश्चर्यरूपाणि कुर्वते जनसंसदि ।
इष्वस्त्रे चापसंधाने पण्डितास्तत्र शोभनाः ॥ ३२
परेषां विवरज्ञाने मनुष्याचरितेषु च ।
अन्नसंस्कारदोषेषु पण्डितास्तत्र शोभनाः ॥ ३३
पण्डितान्पृष्ठतः कृत्वा परेषां गुणवादिनः ।
विधीयतां तथा नीतिर्यथा वध्येत वै परः ॥ ३४
गावश्चैताः प्रतिष्ठन्तां सेनां व्यूहन्तु माचिरम् ।
आरक्षाश्च विधीयन्तां यत्र योत्स्यामहे परैः ॥ ३५

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

कर्णेनात्मश्लाघनपूर्वकमर्जुनपराभवनमिथ्याप्रतिज्ञानम् ॥ १ ॥

कर्ण उवाच ।
सर्वानायुष्मतो भीतान्संत्रस्तानिव लक्षये ।
अयुद्धमनसश्चैव सर्वांश्चैवानवस्थितान् ॥ १
यद्येष जामदग्न्यो वा यदि वेन्द्रः पुरंदरः ।

सप्तम्याश्चापराह्णे त्विति नवम्यां पुनरस्माभिरिति च थ. पाठः ॥ ११ ॥ सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

वासुदेवेन सहितो यदि बीभत्सुरागतः ।
अहमेनं निरोत्स्यामि वेलेव वरुणालयम् ॥ २
रुक्मपुङ्खाः प्रसन्नाग्रा मुक्ता हस्तवता मया ।
छादयन्तु शराः सूर्यं पार्थस्यायुर्निरोधकाः ॥ ३
मम चापप्रमुक्तानां शराणां नतपर्वणाम् ।
निवृत्तिर्गच्छतां नास्ति सर्पाणां श्वसतामिव ॥ ४
शराणां पुङ्खसक्तानां मौर्व्याऽभिहतयोर्भृशम् ।
श्रूयते तलयोः शब्दो भेर्योराहतयोरिव ॥ ५
एकैकं चतुरः पञ्च क्वचित्षष्टिं क्वचिच्छतम् ।
हतान्पश्यत मात्स्यानामिषुभिर्निहतान्रथान् ॥ ६
मद्बाहुमुक्तैरिषुभिस्तैलधौतैः पतत्रिभिः ।
खद्योतैरिव संपृक्तमन्तरिक्षं विराजताम् ॥ ७
ध्वजाग्राद्वानरस्तस्य भल्लेनाभिहतो मया ।
अद्यैव पततां भूमौ विनदन्भैरवान्रवान् ॥ ८
शत्रोर्मयाभिपन्नानां भूतानां ध्वजवासिनाम् ।
दिशः प्रतिष्ठमानानामस्तु शब्दो दिवं गतः ॥ ९
क्रुद्धेनास्त्रं मया मुक्तं निर्दहेत्पृथिवीमिमाम् ।
स्थितं संग्रामशिरसि पार्थमेकाकिनं किमु ॥ १०
समाहितश्च बीभत्सुर्वर्षाण्यष्टौ च पञ्च च ।
जातस्नेहश्च युद्धस्य मयि संदर्शयिष्यति ॥ ११
पात्रीभूतस्तु कौन्तेयो ब्राह्मणो गुणवानिव ।
शरमालां स गृह्णातु मत्प्रसृष्टां स्वधामिव ॥ १२
एष चापि महेष्वासस्त्रिषु लोकेषु विश्रुतः ।
अहं चापि नरश्रेष्ठादर्जुनान्नावमः क्वचित् ॥ १३
मम हस्तप्रमुक्तानां शराणां नतपर्वणाम् ।
निवृत्तिर्गच्छतां नास्ति वैश्वानरशिखार्चिषाम् १४
इतश्चेतश्च मुक्तानां शराणां नतपर्वणाम् ।
तुमुलः श्रूयतां नादः षट्पदां गायतामिव ॥ १५
अन्तरा संपतद्भिस्तु गृध्रपत्रैः शिलाशितैः ।
शलभानामिवाकाशे छाया संप्रति दृश्यताम् ॥१६
अद्य मत्कार्मुकोत्सृष्टाः शिताः पार्थस्य मर्मगाः ।
शरीरमुपसर्पन्तु वल्मीकमिव पन्नगाः ॥ १७
बर्हिबर्हिणराजानां बर्हिणां बर्हिणामिव ।
पततां पततां घोषः पततां पततामिव ॥ १८
अद्य त्वहमृणान्मोक्ष्ये यन्मया तत्प्रतिश्रुतम् ।
धार्तराष्ट्रस्य तत्काले निहत्य समरेऽर्जुनम् ॥ १९
इन्द्राशनिसमस्पर्शं महेन्द्रसमविक्रमम् ।
अर्दयिष्याम्यहं पार्थमुल्काभिरिव कुञ्जरम् ॥ २०
शरजालमहाज्वालमसिशक्तिगदेन्धनम् ।
निर्दहन्तमनीकानि शमयिष्येऽर्जुनानलम् ॥ २१
रथादतिरथं लोके सर्वशस्त्रभृतांवरम् ।
विवशं पार्थमादास्ये गरुत्मानिव पन्नगम् ॥ २२
क्षुद्रकैर्विविधैर्भल्लैर्निपतद्भिश्च मामकैः ।
संमूढचेताः कौन्तेयः कर्तव्यं नाभिपद्यताम् ॥ २३
अद्य दुर्योधनस्याहं शोकं हृदि चिरं स्थितम् ।
समूलमपनेष्यामि हरन्पार्थशिरः शरैः ॥ २४
अद्य मत्कार्मुकोत्सृष्टैर्भल्लैश्च नतपर्वभिः ।
हताश्वं विरथं पार्थं पौरुषे पर्यवस्थितम् ।
निश्वसन्तं यथा नागमद्य पश्यन्तु कौरवाः ॥२५
जामदग्न्यान्मया लब्धं दिव्यास्त्रमृषिसत्तमात् ।
तदुपाश्रित्य वीर्यं च युध्येयमपि वासवम् ॥ २६
ध्वजाग्रे वानरस्तिष्ठन्भल्लेन निहतो मया ।
अद्यैव पततां भूमौ विनदन्भैरवान्रवान् ॥ २७
कामं गच्छन्तु कुरवो गाः प्रगृह्य परंतपाः ।
रथेषु वाऽपि तिष्ठन्तो युद्धं पश्यन्तु मामकम् ॥२८

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

बर्हिणां बर्हिणामिव एकैकस्य पृष्ठपृष्ठे गच्छतां मयूराणां मयूराणामिव बर्हिबर्हिणराजानां बर्हिणो मयूरस्य बर्हिणैः शरमूले पत्ररूपेण स्थितमयूरपत्रैः राजानां राजमानानां । राजृ दीप्ताविति धातोः कर्त्रर्थे पचाद्यचि कृते रूपनिष्पत्तिः । पततां पपतां एकैकस्य शरस्य पृष्ठे पृष्ठे निपततां शराणां घोषः पततां मालारूपेण निपतमानानां पततां पक्षिणां घोषइव अखिलैः श्रूयतामिति योग्यक्रियाध्याहारेण संबन्धः । यद्वा बर्हिणां बर्हवतां उत्पन्नबर्हाणामित्यर्थः । बर्हिणां मयूराणामिव पततां पततां पुंखानुपुंखतया क्षणेक्षणे पततां पततां शराणां घोषः पततां पक्षिणां घोष इव पततां दिशिदिशि पततामिति लोडन्तक्रिया । सर्वैः श्रूयतामिति भावः । बर्हिबर्हिणवाजानामिति ट. थ. ध. पाठः ॥ १८ ॥ अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

कृपेणार्जुनचरित्रप्रशंसनपूर्वकं कर्णगर्हणम् ॥ १ ॥ तथा स्वेषु एकैकेनार्जुनस्य दुर्जयत्वकथनपूर्वकं संभूयाभियाननिर्धारणम् ॥ २ ॥

वैशंपायन उवाच ।
तस्य तद्वचनं श्रुत्वा नीतिशास्त्रविशारदः ।
आचार्यः कुरुवीराणां कृपः शारद्वतोऽब्रवीत् ॥ १
सदैव तव राधेय युद्धे क्रूरतरा मतिः ।
नार्थानां प्रकृतिं वेत्सि नानुबन्धमवेक्षसे ॥ २
नया हि बहवः सन्ति शास्त्राण्याश्रित्य चिन्तिताः ।
तेषां युद्धं सुपापिष्ठं वेदयन्ति पुराविदः ॥ ३
देशकालेन संयुक्तं युद्धं विजयदं भवेत् ।
हीनकालं तदेवेह अनर्थायोपकल्पते ॥ ४
देशे काले च विक्रान्तं कल्याणाय विधीयते ।
आनुकूल्येन कार्याणामुत्तरं तु विधीयते ॥ ५
भारं हि रथकारस्य न व्यवस्यन्ति पण्डिताः ।
परिचिन्त्य तु पार्थेन संनिपातो न नः क्षमः ॥६
एको हि शत्रून्समरे समर्थः प्रतिबाधितुम् ।
एकः कुरूनभ्यरक्षदेकश्चाग्निमतर्पयत् ॥ ७
एकश्च पञ्च वर्षाणि ब्रह्मचर्यमधारयत् ।
एकः सुभद्रामारोप्य द्वैरथे कृष्णमाह्वयत् ॥ ८
सैन्धवं वनवासे तु जित्वा कृष्णामथानयत् ।
एकश्च पञ्च वर्षाणि शक्रादस्त्राण्यशिक्षत ॥ ९
एकः सपत्नाञ्जित्वा तु कुरूणामकरोद्यशः ।
एको गन्धर्वराजानं चित्रसेनमरिन्दमः ।
विजिग्ये तरसा सङ्ख्ये सेनां चास्य सुदुर्जयाम् ॥१०
पाञ्चाली श्रीमती प्राप्ता क्षत्रं जित्वा स्वयंवरे ।
आदाय गतवान्पार्थो भवान्कनु गतस्तदा ॥ ११
तथा निवातकवचाः कालकेयाश्च दानवाः ।
दैवतैरप्यवध्यास्ते एकेन युधि पातिताः ॥ १२
एकेन हि त्वया कर्ण किं नामेह कृतं पुरा ।
एकैकेन यथा तेषां भूमिपाला वशे कृताः ॥१३
इन्द्रोपि हि न पार्थेन संयुगे योद्धुमर्हति ।
यस्तेनाशंसते योद्धुं कर्तव्यं तस्य भेषजम् ॥ १४
आशीविषस्य क्रुद्धस्य पाणिमुद्यम्य दक्षिणम् ।
अवमुच्य प्रदेशिन्या दंष्ट्रामादातुमिच्छसि ॥ १५
अथवा कुञ्जरं मत्तमेकमेकचरं वने ।
निरङ्कुशं समारुह्य नगरं यातुमिच्छसि ॥ १६
समिद्धं पावकं चापि घृतमेदोवसाहुतम् ।
घृताक्तश्चीरवासास्त्वं मध्येनोत्सर्तुमिच्छसि ॥१७
आत्मानं यः समाबध्य कण्ठे बद्ध्वा तथा शिलाम् ।
समुद्रं प्रतरेद्दोर्भ्यां तत्र किं कर्ण पौरुषम् ॥ १८
अकृतास्त्रः कृतास्त्रं वै बलवन्तं सुदुर्बलः ।
तादृशं कर्ण यः पार्थं योद्धुमिच्छेत्स दुर्मतिः १९
अस्माभिरेव निकृतो वर्षाणीह त्रयोदश ।
सिंहः पाशविनिर्मुक्तो न नः शेषं करिष्यति ॥२०
एकान्ते पार्थमासीनं कूपेऽग्निमिव संवृतम् ।
अज्ञानादभ्यवस्कन्द्य प्राप्ताः स्मो भयमुत्तमम् ॥२१
उत्सृष्टं तूलराशौ तु एकोऽग्निं शमयेत्कथम् ।
सह युद्ध्यामहे पार्थमागतं युद्धदुर्मदम् ॥ २२
यत्ता वयं पराक्रान्ता व्यूढानीकाः प्रहारिणः ।
युद्धायावस्थितं पार्थमागतं पाकशासनिम् ॥ २३
यत्ताः सर्वे रथश्रेष्ठं परिवार्य समन्ततः ।
षड्रथाः परिकीर्यन्तां वज्रपाणिमिवासुराः ॥ २४
द्रोणो दुर्योधनो भीष्मो भवान्द्रौणिस्तथा वयम् ।
सर्वे युद्ध्यामहे पार्थं कर्ण मा साहसं कृथाः ॥२५

भारं हीति । यथा रथकारेण दिव्योऽयं मया निर्मितो रथः सुदृढाङ्गः अनेन त्वं देवानपि सर्वथा जेष्यसीत्युक्ते तद्वचसि भारं दत्त्वा देशकालानुकूल्यमनपेक्ष्यैव न व्यवस्यन्ति । योद्धुमिति शेषः । एवं त्वद्वचसि भारं दत्त्वा देशाद्यानुकूल्यमनवेक्ष्य कथमस्माभिर्योद्धव्यम् । तवतु वचनं रथकारवचनवदर्थशून्यमिति भावः ॥ ६ ॥ एकः संयमिनीं जित्वा इति ध. पाठः ॥ १० ॥ एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

न ह्यसंगत्य समरे पार्थं जेष्यामहे वयम् । संगत्य समरे पार्थं सर्वे जेष्यामहे वयम् ॥ २६

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

पञ्चाशोऽध्यायः ॥ ५० ॥

कृपेण स्वगर्हणममृष्यता कर्णेन तदुपालम्भः ॥ १ ॥ तदसहिष्णुनाऽश्वत्थाम्ना सममोंद्धाटनं कर्णदुर्योधनोपालम्भः ॥ २ ॥

वैशंपायन उवाच ।
कृपस्य वचनं श्रुत्वा कर्णो राजन्युधांपतिः ।
पुनः प्रोवाच संरब्धो गर्हयन्ब्राह्मणं कृपम् ॥ १
कर्ण उवाच ।
लक्षयाम्यहमाचार्यं भयाद्भक्तिं गतं रिपौ ।
भीतेन हि न योद्धव्यमहं योत्स्ये धनञ्जयम् ॥ २
ननु वारुणमाग्नेयं याम्यं वायव्यमेव च ।
अस्त्रं ब्रह्मशिरश्चैव सत्वहीनस्य ते वृथा ॥ ३
मित्रकार्यं कृतमिदं पितापुत्रैर्महारथैः ।
भर्तृपिण्डश्च निर्विष्टो यथेष्टं गन्तुमर्हथ ॥ ४
भिक्षां हरस्व नित्यं त्वं यज्ञाननुचरस्व च ।
आमन्त्रणानि भुङ्क्ष्वाद्य माऽस्मान्युद्धेन भीषय ॥ ५
भार्गवास्त्रं मया मुक्तं निर्दहेत्पृथिवीमिमाम् ।
किं पुनः पाण्डुपुत्राणामेकमर्जुनमाहवे ॥ ६
आगमिष्यन्ति पदवीं मात्स्याः पाण्डवमाश्रिताः ।
कीचकानां तु बलिनां शत्रुसेनावमर्दिनाम् ॥ ७
तानहं निहनिष्यामि भवता गम्यतां गृहम् ।
किं वेदवादिनां कार्यं परस्नेहानुभाषिणाम् ॥ ८
तस्य तद्वचनं श्रुत्वा अश्वत्थामा प्रतापवान् ।
उवाच वदतांश्रेष्ठो दुर्योधनमवेक्ष्य च ॥ ९
न च तावज्जिता गावो न च सीमान्तरं गताः ।
न हास्तिनपुरं प्राप्तास्त्वं च कर्ण विकत्थसे ॥ १०
बहूनि धर्मशास्त्राणि पठन्ति द्विजसत्तमाः ।
तेषु किंस्विदिदं दृष्टं द्यूते जीयेत यन्नृपः ॥ ११
संग्रामान्विपुलाञ्जित्वा लब्ध्वा च विपुलं धनम् ।
विजित्य च महीं कृत्स्नां नेह कत्थन्ति पाण्डिताः ॥
पचत्यग्निरवाक्यस्तु तूष्णीं भाति दिवाकरः ।
तूष्णीं धारयते लोकान्वसुधा सचराचरान् ॥ १३
चातुर्वर्ण्यस्य कर्माणि विहितानि महर्षिभिः ।
धनं यैरधिगन्तव्यं यच्च कुर्वन्न दुष्यति ॥ १४
अधीत्य ब्राह्मणो वेदान्याजयेत यजेत वा ।
क्षत्रियो धनमाहृत्य यजेतैव न याजयेत् ॥ १५
वैश्योऽधिगम्य वित्तानि वार्ताकर्माणि कारयेत् ॥
शूद्रः शुश्रूषणं कुर्यात्त्रिषु वर्णेषु नित्यशः ।
वन्दनायोगविधिभिर्वैतसीं वृत्तिमाश्रितः ॥ १७
वर्तमाना यथाशास्त्रं प्राप्य चापि महीमिमाम् ।
प्रकुर्वन्ति महाभागा यज्ञान्सुविपुलानपि ॥ १८
का जातिस्तेषु सूतेयं केऽपि मन्त्राः क्रियाश्च काः ।
केयं वर्णेषु या राज्ञो वक्तृभोक्तृनियन्तृषु ॥ १९
वैशंपायन उवाच ।
दुर्योधनमभिप्रेक्ष्य कर्णं च कुरुसंसदि ।
अश्वत्थामा भृशं क्रुद्धो दुर्योधनमतर्जयत् ॥ २०
प्राप्य द्यूतेन को राज्यं क्षत्रियः स्तोतुमर्हति ।
तथा नृशंसरूपोयं धार्तराष्ट्रश्च निर्घृणः ॥ २१
तथाऽधिगम्य वित्तानि को विकत्थेद्विचक्षणः ।
निकृत्या वञ्चनायोगैश्चरन्वैतंसिको यथा ॥ २२
कतमद्द्वैरथं युद्धं यत्राजैषीर्धनञ्जयम् ।
नकुलं सहदेवं वा धनं येषां त्वया हृतम् ॥ २३
युधिष्ठिरो जितः कस्मिन्भीमश्च बलिनांवरः ।
इन्द्रप्रस्थं त्वया कस्मिन्संग्रामे निर्जितं पुरा ॥ २४
तथैव कतमद्युद्धं यस्मिन्कृष्णा जिता त्वया ।
एकवस्त्रा सभां नीता क्षुद्रकर्मन्रजस्वला ॥ २५
मूलमेषां महत्कृत्तं सारार्थी चन्दनं यथा ।
क्षुद्रं कर्म समास्थाय तत्र किं विदुरोऽब्रवीत् ॥ २६

यदुक्तं ब्राह्मणानां भोजनादावेव कौशलं न युद्ध इति तत्र तवापि वैश्यत्वान्न युद्धे सामर्थ्यमस्तीति दर्शयिष्यन्वर्णानां कर्माणि विभजते चातुर्वर्ण्यस्येत्यादिना ॥ १४ ॥ वैतंसिको व्याधः ॥ २२ ॥ अनृतं द्यूतं कुर्वता धार्तराष्ट्रेण धर्मस्य मूलं कृत्तं छिन्नं । तत्र तदा विदुरः किमब्रवीत् क्षयमूलं द्यूतमिति तत्स्मरेति शेषः ॥ २६ ॥

यथाशक्ति मनुष्याणाममर्षं लक्षयामहे ।
अन्येषामपि सत्त्वानामपि कीटपिपीलिकैः ॥२७
द्रौपद्याः संपरिक्लेशं न क्षन्तुं पाण्डवोऽर्हति ।
क्षयाय धार्तराष्ट्राणां प्रादुर्भूतो धनञ्जयः ॥ २८
त्वं पुनः पण्डितो भूत्वा ह्याचार्यं क्षेममिच्छसि ।
वैरान्तकरणो जिष्णुर्न नः शेषं करिष्यति ॥ २९
नैव देवा न गन्धर्वा नासुरा न च राक्षसाः ।
भयादिह न युद्ध्येरन्पाण्डुपुत्रेण धीमता ॥ ३०
यं यमेकोपि संक्रुद्धः संग्रामे निपतिष्यति ।
वृक्षं गरुडवद्वेगाद्विनिहत्यान्तमेष्यति ॥ ३१
त्वत्तो विशिष्टं वीर्येण धनुष्यमरराट्समम् ।
वासुदेवसमं युद्धे तं पार्थं को न पूजयेत् ॥ ३२
देवं दैवेन युद्ध्येत मानुषेण च मानुषम् ।
अस्त्रं ह्यस्त्रेण यो हन्यात्कोऽर्जुनेन समः पुमान् ॥
पुत्रादनवमः शिष्य इति धर्मविदो विदुः ।
एतेनापि निमित्तेन प्रियो द्रोणस्य पाण्डवः ॥ ३४
यथा त्वमकरोर्द्यूतमिन्द्रप्रस्थं यथाऽहरः ।
यथाऽनैषीः सभां कृष्णां तथा युध्यस्व पाण्डवं ३५
अयं ते मातुलः प्राज्ञः क्षत्रधर्मस्य कोविदः ।
दुर्द्यूतदेवी गान्धारः शकुनिर्युद्ध्यतामिह ॥ ३६
नाक्षान्क्षिपति गाण्डीवं न कृतं द्वापरं न च ।
ज्वलतो निशितान्बाणांस्तांस्तान्क्षिपति गाण्डिवं ॥
न हि गाण्डीवनिर्मुक्ता गृध्रपक्षाः सुतेजनाः ।
नान्तरेष्ववतिष्ठन्ते गिरीणामपि दारणाः ॥ ३८
अन्तकः पवनो मृत्युस्तथाऽग्निर्बडवामुखः ।
कुर्युरेते क्वचिच्छेषं न तु क्रुद्धो धनञ्जयः ॥ ३९
यथा सभायां द्यूतं त्वं मातुलेन सहाकरोः ।
तथा युद्धस्व संग्रामे सौबलेन सुरक्षितः ॥ ४०
युद्ध्यतां काममाचार्यो नाहं योत्स्ये धनञ्जयम् ।
मत्स्यो ह्यस्माभिरायोध्यो यद्यागच्छेद्गवांपदम् ४१

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥

एकपञ्चाशोऽध्यायः ॥ ५१ ॥

कर्णकृतद्रोणकृपाधिक्षेपसंक्रुद्धमश्वत्थामानं प्रति भीष्मेण द्रोणादिप्रशंसनपूर्वकं परिसान्त्वनम् ॥१॥ दुर्योधनेन भीष्मकर्णाभ्यां सह कृपद्रोणक्षमापनम् ॥ २ ॥

वैशंपायन उवाच ।
ततः शान्तनवस्तत्र धर्मार्थकुशलं हितम् ।
दुर्योधनमिदं वाक्यमब्रवीत्कुरुसंसदि ॥ १
साधु पश्यति वै द्रोणः कृपः साध्वनुपश्यति ।
आचार्यपुत्रः सहजं निश्चितं साधु भाषते ॥ २
कर्णस्तु क्षत्रधर्मेण केवलं योद्धुमिच्छति ।
आचार्यो नावमन्तव्यः पुरुषेण विजानता ।
देशकालौ तु संप्रेक्ष्य योद्धव्यमिति मे मतिः ॥ ३
यस्य सूर्यसमाः पञ्च सपत्नाः स्युः प्रहारिणः ।
कथमभ्युदये तेषां न प्रमुह्येत पण्डितः ॥ ४
स्वार्थे सर्वे विमुह्यन्ति येऽपि धर्मविदो जनाः ।
तस्मात्तन्त्वं न जानाति यत्तु कार्यं नराधिपः ॥ ५
धार्तराष्ट्रोपि दुर्बुद्धिः पश्यन्नपि धनञ्जयम् ।
नैव पश्यति नाघ्राति मन्दः क्रोधवशं गतः ॥ ६
वैशंपायन उवाच ।
एवमुक्त्वा तु राजानं पुनर्द्रौणिमुवाच ह ।
प्राञ्जलिर्भरतश्रेष्ठः साम्ना बुद्धिमतांवरः ॥ ७
कर्णो हि यदवोचत्त्वां तेजस्संजननाय तत् ।
आचार्यपुत्रः क्षमतां महत्कार्यमुपस्थितम् ॥ ८
नायं कालो विरोधस्य कौन्तेये समुपस्थिते ।
क्षन्तव्यं भवता सर्वमाचार्येण कृपेण च ॥ ९
भवतां हि कृतास्त्रत्वं यथाऽऽदित्ये प्रभा तथा ।
यथा चन्द्रमसो लक्ष्मीः सर्वथा नापकृष्यते ।
एवं भवत्सु ब्राह्मण्यं ब्रह्मास्त्रं च प्रतिष्ठितम् ॥१०

चकारात् त्रेतापि समुच्चीयते । कृतादयो द्यूतशास्त्रप्रसिद्धाः पाशकाः ॥ ३७ ॥ पञ्चाशोऽध्यायः ॥ ५० ॥

चत्वार एकतो वेदाः क्षात्रमेकत्र दृश्यते ।
नैतत्समस्तमुभयं कस्मिंश्चिदनुशुश्रुम ।
अन्यत्र भारताचार्यात्सपुत्रादिति मे मतिः ॥ ११
वेदान्ताश्च पुराणानि इतिहासं पुरातनम् ।
जामदग्न्यमृते राजन्को द्रोणादधिको भवेत् ॥ १२
ब्रह्मास्त्रं चैव वेदाश्च नैतदन्यत्र दृश्यते ॥ १३
आचार्यपुत्रः क्षमतां नायं कालो विभेदने ।
सर्वे संहत्य युद्ध्यामः पाकशासनिमागतम् ॥ १४
बलस्य व्यसनानीह यान्युक्तानि मनीषिभिः ।
मुख्यो भेदो हि तेषां तु पापिष्ठो विदुषां मतः ॥ १५
अश्वत्थामोवाच ।
नैवं न्याय्यमिदं वाच्यमस्माकं पुरुषर्षभ ।
किंतु रोषपरीतेन गुरुणा भाषिता गुणाः ॥ १६
शत्रोरपि गुणा ग्राह्या दोषा वाच्या गुरोरपि ।
सर्वथा सर्वयत्नेन पुत्रे शिष्ये हितं वदेत् ॥ १७
आचार्य एष क्षमतां शान्तिरत्र विधीयताम् ।
अभिद्यमाने तु गुरौ निवृत्तं रोषकारितम् ॥ १८
वैशंपायन उवाच ।
ततो दुर्योधनो द्रोणं क्षमयामास भारत ।
सह कर्णेन भीष्मेण कृपं चैव महाबलम् ॥ १९
द्रोण उवाच ।
यदेतत्प्रथमं वाक्यं भीष्मः शान्तनवोऽब्रवीत् ।
तेनैवाहं प्रसन्नो वै परमत्र विधीयताम् ॥ २०
यथा दुर्योधनं पार्थो नोपसर्पति संगरे ।
साहसाद्यदि वा मोहात्तथा नीतिर्विधीयताम् ॥ २१
वनवासे ह्यनिर्वृत्ते दर्शयेन्न धनञ्जयः ।
धनं चालभमानोऽत्र नाद्य तत्क्षन्तुमर्हति ॥ २२
यथा नायं समायुञ्ज्याद्धार्तराष्ट्रं कथंचन ।
न च सेनां पराजय्यात्तथा नीतिर्विधीयताम् ॥ २३
उक्तं दुर्योधनेनापि पुरस्ताद्वाक्यमीदृशम् ।
तदनुस्मृत्य गाङ्गेय यथावद्वक्तुमर्हसि ॥ २४

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

भीष्मेण दुर्योधनंप्रति हेतूपन्यासपूर्वकं युधिष्ठिरंप्रति श्रुतवनवासादिकालस्य परिसमाप्तिकथनम् ॥ १ ॥ भीष्मेणार्जुनपराक्रमप्रशंसनपूर्वकं पाण्डवैः सह संधिविधानेपि दुर्योधनेन तत्प्रतिषेधनम् ॥ २ ॥ भीष्मेण द्रोणवचनाद्द्रोभिः सह दुर्योधनस्य प्रस्थापनपूर्वकं सेनाया व्यूहीकरणेन समराभियानम् ॥ ३ ॥

भीष्म उवाच ।
कलाः काष्ठाश्च युज्यन्ते मुहूर्ताश्च दिनानि च ।
अर्धमासाश्च मासाश्च नक्षत्राणि ग्रहास्तथा ॥ १
ऋतवश्चापि युज्यन्ते तथा संवत्सरा अपि ।
एवं कालविभागेन कालचक्रं प्रवर्तते ॥ २
तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात् ।
पञ्चमे पञ्चमे वर्षे द्वौ मासावधिमासकौ ॥ ३
एषामभ्यधिका मासाः पञ्च च द्वादश क्षपाः ।
त्रयोदशानां वर्षाणामिति मे वर्तते मतिः ॥ ४
पूर्वेद्युरेव निर्वृत्तस्ततो बीभत्सुरागतः ॥ ५
सर्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ।
एवमेतद्ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ॥ ६
सर्वे पञ्च महात्मानः सर्वे धर्मार्थकोविदाः ।
येषां युधिष्ठिरो राजा कस्माद्धर्मेऽपराध्नुयुः ॥ ७
कामात्क्रोधाच्च लोभाच्च कामक्रोधभयादपि ।
स्नेहाद्वा यदि वा मोहाद्धर्मं नात्येति धर्मजः ॥ ८
अलुब्धाश्चैव कौन्तेयाः कृतवन्तश्च दुष्करम् ।
न चापि केवलं राज्यमिच्छेयुस्ते ह्यधर्मतः ॥ ९
तदैव ते हि विक्रान्तुमीषुः कौरवनन्दनाः ।
धर्मपाशनिबद्धास्तु न चेलुः क्षत्रियव्रतात् ॥ १०

यथा दुर्योधनो राजा न गच्छेत्कांचिदापदमिति ट. थ. पाठः । यथा नायशसा युक्तो धार्तराष्ट्रः कथंचनेति ध. पाठः

॥ २१ ॥ एकपञ्चाशोऽध्यायः ॥ ५१ ॥

यश्चानृत इति ख्यातः स च गच्छेत्पराभवम् ।
वृणुयुर्मरणं पार्था नानृतत्वं कथंचन ॥ ११
प्राप्ते तु काले स्वानर्थान्नोत्सृजेयुर्नरर्षभाः ।
अपि वज्रभृता गुप्तांस्तथावीर्या हि पाण्डवाः॥ १२
प्रतियुद्ध्येम समरे सर्वशस्त्रभृतांवरम् ॥ १३
तस्माद्यदत्र कल्याणं लोके सद्भिरनुष्ठितम् ।
तत्संविधीयतां शीघ्रं मा वो ह्यर्थोऽभ्यगात्परम्१४
न हि पश्यामि संग्रामे कदाचिदपि कौरव ।
एकान्तसिद्धिं राजेन्द्र संप्राप्तश्च धनञ्जयः ॥ १५
संप्रवृत्ते तु संग्रामे भावाभावौ जयाजयौ ।
अवश्यमेकं स्पृशतो दृष्टमेतदसंशयम् ॥ १६
तस्माद्युद्धोपचरितं कर्म वा धर्मसंहितम् ।
क्रियतामाशु राजेन्द्र संप्राप्तश्च धनञ्जयः ॥ १७
एको हि समरे पार्थः पृथिवीं निर्दहेच्छरैः ।
भ्रातृभिः सहितो भूत्वा किं पुनः कौरवात्रणे ।
तस्मात्सन्धिं कुरुश्रेष्ठ कुरुष्व यदि मन्यसे ॥ १८
दुर्योधन उवाच ।
नाहं राज्यं प्रदास्यामि पाण्डवेभ्यः पितामह ।
ग्रामं सेनां च दासांश्च स्वल्पं द्रव्यमपि प्रभो ।
युद्धोपचारिकं यत्तु तत्सर्वं संविधीयताम् ॥ १९
वैशंपायन उवाच ।
भीष्मस्योपरते वाक्ये तथा दुर्योधनस्य च ।
प्राप्तमर्थ्यं च यद्वाक्यं द्रोणश्चाह द्विजोत्तमः ॥ २०
यत्तु युद्धोपचरितं भवेद्वा धर्मसंहितम् ।
कस्त्वया सदृशो लोके भूयस्त्वं वक्तुमर्हसि ॥ २१
अत्र या मामिका बुद्धिः श्रूयतां यदि रोचते ।
सर्वथा हि मया श्रेयो वक्तव्यं कुरुनन्दन ॥ २२
राजा बलचतुर्भागं क्षिप्रमादाय गच्छतु ।
ततोऽपरश्चतुर्भागो गाः समादाय गच्छतु ।
वयं चार्धेन सैन्यस्य प्रतियोत्स्याम पाण्डवम् ॥२३
अहं भीष्मश्च कर्णश्च अश्वत्थामा कृपस्तथा ।
प्रतियोत्स्याम बीभत्सुमागतं कृतनिश्चयम् ॥ २४
एवं राजा सुगुप्तः स्यान्न क्लैब्यं गन्तुमर्हति ।
मत्स्यं वा पुनरायातमथवापि शतक्रतुम् ।
अहमावारयिष्यामि वेलेव मकरालयम् ॥ २५
वैशंपायन उवाच ।
तद्वाक्यं रुरुचे तेषां द्रोणेनोक्तं महात्मना ।
तथाहि कृतवान्राजा कौरवाणामनन्तरम् ॥ २६
भीष्मः प्रस्थाप्य राजानं गोधनं तदनन्तरम् ।
सेनामुख्यान्व्यवस्थाप्य व्यूहितुं संप्रचक्रमे ॥ २७
द्रोणस्योपरते वाक्ये भीष्मः प्रोवाच बुद्धिमान् ।
आचार्य मध्ये तिष्ठ त्वमश्वत्थामा तु सव्यतः ।
कृपः शारद्वतो धीमान्पार्श्वं रक्षतु दक्षिणम् ॥ २८
विकर्णश्च महावीर्यो दुर्मुखश्च परन्तपः ।
शकुनिः सौबलश्चैव दुःसहश्च महाबलः ।
द्रोणस्य पार्श्वमजिताः पालयन्तु महाबलाः ॥२९
अग्रतः सूतपुत्रस्तु कर्णस्तिष्ठतु दंशितः ।
अहं सर्वस्य सैन्यस्य पश्चात्स्थास्यामि पालयन्॥३०
सर्वे महारथाः शूरा महेष्वासा महाबलाः ।
युद्ध्यन्तु पाण्डवश्रेष्ठमागतं यत्नतो युधि ॥ ३१
वैशंपायन उवाच ।
अभेद्यं परसैन्यानां व्यूहं व्यूह्य कुरूत्तमः ।
वज्रगर्भं व्रीहिमुखं पद्मचन्द्रार्धमण्डलम् ॥ ३२
तस्य व्यूहस्य पश्चार्धे भीष्मश्चाथोद्यतायुधः ।
सौवर्णं तालमुच्छ्रित्य रथे तिष्ठन्नशोभत ॥ ३३

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

इन्द्रेण सुदर्शननामनि कामगामिनि प्रासादे देवगणसमारोपणपूर्वकमर्जुनकुरुरणावलोकनाय गगनाङ्गणावतरणम् ॥ १ ॥

वैशंपायन उवाच ।
ततः सुदर्शनं नाम प्रासादं हरिवाहनः ।

तस्माद्युद्धोचितं कर्मेति ध. पाठः ॥ १८ ॥ पद्मगर्भमिति थ. पाठः ॥ ३२ ॥ द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

सर्वान्देवान्समारोप्य प्रययौ यत्र पाण्डवः ॥ १
स्थूणाराजिसहस्रं तु यत्र मध्ये प्रतिष्ठितम् ।
तत्र सूर्यपथेऽतिष्ठद्विमला महती सभा ॥ २
आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ।
तत्र श्वेतानि चक्राणि काञ्चनस्फाटिकानि च ॥३
तथा चित्राणि छत्राणि दिव्यरूपाणि भारत ।
मणिरत्नविचित्राणि नानारूपाणि भागशः ।
आकाशे सह दृश्यन्ते भानुमन्ति शुभानि च ॥ ४
अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च ।
तथा धातुर्विधातुश्च मित्रस्य धनदस्य च ।
रुद्रस्य विष्णोः सवितुस्त्रिदशानां तथैव च ॥ ५
काञ्चनानि च दामानि विविधाश्चोत्तमस्रजः ।
दिव्यपुष्पाभिसंवीतास्तत्र चित्राणि भेजिरे ॥ ६
तस्मिंस्तु राजन्प्रासादे दिव्यरत्नविभूषिते ।
दिव्यगन्धसमायुक्ताः स्रजो दिव्याश्चकाशिरे ॥७
दिव्यश्च वायुः प्रववौ गन्धमादाय सर्वशः ।
ऋतवः पुष्पमादाय समतिष्ठन्त भारत ॥ ८
प्रजानां पतयः सप्त सप्त चैव महर्षयः ।
तत्र देवर्षयश्चैव देवराजं दिवौकसः ।
इन्द्रेण सहिताः सर्वे त्रिदशाश्च व्यवस्थिताः ॥ ९
न पङ्को न रजस्तत्र प्रविवेश कथंचन ।
आदित्यश्च विरूक्षोत्र नातिवेलमिवातपत् ॥ १०
दिव्यगन्धं समादाय वायुस्तत्राभिगच्छति ।
आकाशं च दिशः सर्वा दर्शनीयमदृश्यत ॥ ११
तत्र देवाः समारुह्य तं दिव्यं सर्वतःप्रभम् ।
अम्बरे विमलेऽतिष्ठन्प्रासादं कामगामिनम् ॥१२
तत्र राजर्षयश्चैव समारुह्य दिवौकसः ।
श्वेतो राजा वसुमनास्तथा भद्रः प्रदर्शनः ॥ १३
नृगो ययातिर्नहुषो मान्धाता भरतः कुरुः ।
अष्टकश्च शिबिश्चोभौ स च राजा पुरूरवाः ॥ १४
डम्भोद्भवः कार्तवीर्यो ह्यर्जुनः सगरस्तथा ।
दिलीपः केरलः पूरुः शर्यातिः सोमकस्तदा ॥१५
हरिश्चन्द्रश्च तेजस्वी रघुर्दशरथस्तथा ।
भगीरथश्च राजर्षिः सर्वे च जनमेजय ॥ १६
पाण्डुश्चैव महाराजश्चामरव्यजनोज्वलः ।
छत्रेण ध्रियमाणेन राजसूयश्रिया वृतः ॥ १७
एते चान्ये च बहवः पुण्यशीलाः शुचिव्रताः ।
कीर्तिमन्तो महावीर्यास्तत्रैवासन्दिवि स्थिताः १८
गणाश्चाप्सरसां सर्वे गन्धर्वाश्चापि सर्वशः ।
दैत्यराक्षसयक्षाश्च सुपर्णाः पन्नगास्तथा ॥ १९
वासवप्रमुखाः सर्वे देवाश्च सगणेश्वराः ।
आसंस्तत्र समारूढाः संग्रामं तं दिदृक्षवः ॥ २०
इत्यम्बरे व्यवस्थाय प्रासादस्था दिवौकसः ।
एकस्य च बहूनां च युद्धं द्रष्टुं व्यवस्थिताः ॥ २१

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

सेनामध्ये दुर्योधनमनवलोकयताऽर्जुनेनोत्तरंप्रति तत्पदवीमनु रथयापनचोदना ॥ १ ॥ तथा बाणाभ्यां द्रोणाद्यभिवादनपूर्वकं ताभ्यामेव कर्णमूले कुशलप्रश्नः ॥ २ ॥ द्रोणेन तत्कौशलश्लाघनम् ॥ ३ ॥

वैशंपायन उवाच ।
तथा व्यूढेष्वनीकेषु कौरवेयैर्महारथैः ।
उपायादर्जुनस्तूर्णं रथघोषेण नादयन् ॥ १
ददृशुस्ते ध्वजाग्रं वै शुश्रुवुश्च रथस्वनम् ।
दोधूयमानस्य भृशं गाण्डीवस्य च निस्वनम् ॥ २
त्रिक्रोशमात्रं गत्वा तु पाण्डवः श्वेतवाहनः ।
सेनामुखमभिप्रेक्ष्य पार्थो वैराटिमब्रवीत् ॥ ३
राजानं नात्र पश्यामि रथानीके व्यवस्थितम् ।
दक्षिणं पक्षमादाय कुरवो यान्त्युदङ्मुखाः ॥ ४
उत्सृज्यैतद्रथानीकं महेष्वासाभिरक्षितम् ।
गवाग्रमभितो याहि यावत्पश्यामि मे रिपुम् ॥५
गवाग्रमभितो गत्वा गाश्चैवाशु निवर्तय ।
यावदेते निवर्तन्ते कुरवो जवमास्थिताः ।
तावदेव पशून्सर्वान्निवर्तिष्ये तवाभिभो ॥ ६

वैशंपायन उवाच ।
इत्युक्त्वा समरे पार्थो वैराटिमपराजितः ।
सव्यं पक्षमनुप्राप्य जवेनाश्वानचोदयत् ॥ ७
ततोऽभ्यवादयत्पार्थो भीष्मं शान्तनवं कृपम् ।
द्वाभ्यांद्वाभ्यां तथाऽऽचार्यं द्रोणं प्रथमतः क्रमात्॥
द्रोणं कृपं च भीष्मं च पृषत्कैरभ्यवादयत् ।
ततस्तत्सर्वमालोक्य द्रोणो वचनमब्रवीत् ॥ ९
महारथमनुप्राप्तं दृष्ट्वा गाण्डीवधन्विनम् ।
न कश्चिद्योद्धुमिच्छेत न च गुप्तं स्वजीवितम् ।
अयं वीरश्च शूरश्च दुर्धर्षश्चैव संयुगे ॥ १०
एतद्ध्वजाग्रं पार्थस्य दूरतः प्रतिदृश्यते ।
मेघः सविद्युत्स्तनितो रोरवीति च वानरः॥ ११
आस्थाय च रथं याति गाण्डीवं विक्षिपन्धनुः १२
अश्वानां स्तनतां शब्दो वहतां पाकशासनिम् ।
रथस्याम्बुधरस्येव श्रूयते भृशदारुणः ॥ १३
दारयन्निव तेजस्वी वसुधां वासवात्मजः ।
एष तिष्ठन्रथिश्रेष्ठो रथे रथिशतप्रणुत् ॥ १४
एष दृष्ट्वा रथानीकमस्माकमरिमर्दनः ।
श्रीमान्वदान्यो धृतिमान्सत्करोति च पाण्डवः१५
इमौ बाणावनुप्राप्तौ पादयोः प्रत्युपस्थितौ ।
रथस्याग्रे निखातौ मे चित्रपुङ्खावजिह्मगौ॥ १६
इमौ चाप्यपरौ बाणावभितः कर्णमूलयोः ।
संस्पृशन्तावतिक्रान्तौ पृष्ट्वानामयं भृशम्॥ १७
चिरदृष्टोऽयमस्माभिर्धर्मज्ञो बान्धवप्रियः ।
अतीव ज्वलते लक्ष्म्या पाण्डुपुत्रः प्रतापवान् १८
निरुष्य च वने वासं कृत्वा कर्म सुदुष्करम् ।
अभिवादयते पार्थः पूजयन्मामरिंदमः ॥ १९
अमर्षेण हि संपूर्णो दुःखेन प्रतिबोधितः ।
अद्येमां भारतीं सेनामेको नाशयते ध्रुवम्॥ २०

व्यधिकं दशमुष्य वत्सराणां
स्वजनेनाविदितस्त्रयोदशं च ।
ज्वलते रथमास्थितः किरीटी
तम इव रात्रिजमभ्युदस्य सूर्यः ॥ २१
रथी शरी चारुमाली निषङ्गी
शङ्खी पताकी कवची किरीटी ।
खड्गी च धन्वी च विराजतेऽयं
शिखीव यज्ञेषु घृतेन सिक्तः ॥ २२

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

अर्जुनेन सेनामध्ये सुयोधनानवलोकनेन तस्य गवामादानेन गमनसंभावनया रथेन गवाग्रं प्रत्यभियानम् ॥ १ ॥ भीष्मेण पार्थभावविज्ञानात्सेनया सह तमनुधावनम् ॥ २ ॥ गवान्तिकमुपगतवताऽर्जुनेन तद्रक्षिणां बाणगणैरभिहननेन गवां विनिवर्तनम् ॥ ३ ॥

वैशंपायन उवाच ।
तमदूरमुपायान्तं दृष्ट्वा पाण्डवमर्जुनम् ।
नारयः प्रेक्षितुं शेकुस्तपन्तं हि यथा रविम् ॥ १
स तं दृष्ट्वा रथानीकं पार्थः सारथिमब्रवीत् ।
इषुपातमात्रे सेनायाः स्थापयाश्वानरिंदम ।
यावत्समीक्षे व्यूहेऽस्मिन्मम शत्रुं सुयोधनम् ॥ २
रक्तवैडूर्यविकृतं मणिप्रवरभूषितम् ।
परं जानाम्यहं तस्य ध्वजं दूरात्समुच्छ्रितम् ॥ ३
यद्येनमिह पश्यामि दुर्बुद्धिमतिमानिनम् ।
यमाय प्रेषयिष्यामि सहायः स्याद्यदीश्वरः ॥ ४
सर्वानन्याननादृत्य दृष्ट्वा तमतिमानिनम् ।
सिंहः क्षुद्रमृगस्येव पतिष्ये तस्य मूर्धनि ॥ ५
हनिष्यामि तमेवाद्य शरैर्गाण्डीवनिःसृतैः ।
तस्मिन्हते भविष्यन्ति सर्व एव पराजिताः ॥ ६
शरैश्च शमयिष्येऽहं धार्तराष्ट्रं ससौबलम् ।
असभ्यानां च वक्तारं कुरूणां किल किल्बिषम्॥७
राजानं नेह पश्यामि निरामिषमिदं बलम् ।
अभिद्रवे ह राजानं व्यक्तमित्यत्र निर्भयः ॥ ८

आस्थितो मध्यमाचार्योप्यश्वत्थामाऽप्यनन्तरम् ।
कृपकर्णौ पुरस्तात्तु महेष्वासौ व्यवस्थितौ ॥ ९
भूरिश्रवाः सोमदत्तो बाह्लीकश्च जयद्रथः ।
दक्षिणं पक्षमाश्रित्य स्थिता युद्धविशारदाः ॥१०
साल्वराजो द्युमत्सेनो वृषसेनश्च सौबलः ।
दशार्णश्चैव कालिङ्गो वामं पक्षं समाश्रितः ॥ ११
पृष्ठतः कुरुमुख्यश्च भीष्मस्तिष्ठति दंशितः ।
सोऽर्धसैन्येन बलवान्सर्वेषां नः पितामहः ॥१२
दुर्योधनं न पश्यामि क्व नु राजा स तिष्ठति ।
उत्सृज्यैतद्रथानीकं याहि यत्र सुयोधनः ॥ १३
तं हत्वा संनिवर्तिष्ये गाः स आदाय गच्छति ।
गवाग्रमभितो याहि यत्र राजा भविष्यति ॥ १४
वैशंपायन उवाच ।
इत्युक्त्वा समरे पार्थो वैराटिमपराजितः ।
संस्पृशानो धनुर्दिव्यं त्वरमाणोऽगमत्तदा ॥ १५
ततो भीष्मोऽब्रवीद्वाक्यं कुरुमध्ये परंतपः ।
चिरदृष्टोऽयमस्माभिर्धर्मज्ञो बान्धवप्रियः ॥ १६
अतीव ज्वलते लक्ष्म्या पाकशासनिरागतः ।
एष दुर्योधनं पार्थो मार्गते निकृतिं स्मरन् ॥ १७
सेनामत्यर्थमालोक्य त्वरते ग्रहणेऽस्य च ।
मृगं सिंह इवादातुमीक्षते पाकशासनिः ॥ १८
नैषोऽन्तरेण राजानं बीभत्सुः स्थातुमर्हति ।
तस्य पार्ष्णिं ग्रहीष्यामो जवेनाभिप्रधावतः ॥१९
न ह्येनमभिसंक्रुद्धमेको युद्ध्येत संयुगे ।
अन्यो देवान्महादेवात्कृष्णाद्वा देवकीसुतात् ।
आचार्याच्च सपुत्राद्वा भारद्वाजान्महारथात् ॥२०
किं नो गावः करिष्यन्ति द्रव्यं वा विपुलं तथा ।
दुर्योधनः पार्थगतः पुरा प्राणान्विमुञ्चति ॥ २१
वैशंपायन उवाच ।
इत्युक्त्वा समरे भीष्मः सेनया सह कौरवः ।
अन्वधावत्तदा पार्थं धार्तराष्ट्रस्य रक्षणे ॥ २२
विक्रोशमात्रं यात्वा तु पार्थो वैराटिमब्रवीत् ।
इषुपातमात्रे सेनायाः स्थापयाश्वानरिंदम ॥ २३
एतदग्रं गवां दृष्टं मन्दं वाहय सारथे ।
याह्युत्तरेण सेनाया गाश्चैव प्रविभज्य च ॥ २४
परिक्षिप्य गवां यूथमत्र योत्स्ये सुयोधनम् ।
गच्छन्ति सत्वरा गावः सगोपाः परिमोचय ॥२५
तत्र गत्वा पशून्वीर सगोपान्परिमोचय ।
अन्तरेण च सेनायाः प्राङ्मुखो गच्छ चोत्तर ॥२६
इमे त्वतिरथाः सर्वे मम वीर्यपराक्रमम् ।
पश्यन्तु कुरवो युद्धे महेन्द्रस्येव दानवाः ॥ २७
वैशंपायन उवाच ।
ततः स रथिनां श्रेष्ठो नाम विश्राव्य चात्मनः ।
निशिताग्राञ्शरांस्तीक्ष्णान्मुमोचांतकसन्निभान् ॥
शलभैरिव चाकाशं धाराभिरिव पर्वतम् ।
निरावकाशमभवच्छरैः क्षिप्तैः किरीटिना ॥ २९
विकीर्यमाणास्तु शरैस्ते योधा धार्तराष्ट्रिकाः ।
गाश्चैव न च पश्यन्ति पार्थमुक्तैरजिह्मगैः ॥ ३०
सा चापि बहुला सेना पार्थबाणाभिपीडिता ।
नापश्यद्विष्टतां भूमिं नान्तरिक्षं दिशोपि वा ॥ ३१
अर्जुनस्तु तदा हृष्टो दर्शयन्वीर्यमात्मनः ।
पीडयामास सैन्यानि गाण्डीवप्रसृतैः शरैः ॥३२
तेषां नैवापयाने च नाभियाने भवन्मतिः ।
शीघ्रतामेव पार्थस्य पूजयन्तस्तु विस्मिताः ॥ ३३
चन्द्रावदातं सामुद्रं कुरुसैन्यभयंकरम् ।
ततः शङ्खमुपाध्मासीद्द्विषतां रोमहर्षणम् ।
ज्याघोषं तलघोषं च कृत्वा भूतान्यमोहयत् ॥ ३४
तस्य शङ्खस्य शब्देन धनुषो निस्वनेन च ।
शब्देनामानुषाणां च भूतानां ध्वजवासिनाम् ।
वियद्गतानां देवानां मानुषाणां रवेण च ॥ ३५
ऊर्ध्वं पुच्छं विधून्वाना हेषमाणाः समन्ततः ।
गावः सवत्साः संत्रस्ता निवृत्ता दक्षिणां दिशं ३६
ततः स समरे शूरो बीभत्सुः शत्रुपूगहा ।
गोपालांश्चोदयामास गावश्चोदयतेति च ॥ ३७
उत्तरं चाह बीभत्सुर्हर्षयन्पाण्डुनन्दनः ।
गवामग्रं समीक्षस्व गाश्चैवाशु निवर्तय ॥ ३८
यावदेते निवर्तन्ते कुरवो जवमास्थिताः ।
याह्युत्तरेण गाश्चैताः सैन्यानां च नृपात्मज ॥ ३९

पश्यन्तु कुरवः सर्वे मम वीर्यपराक्रमम् ॥ ४०
वैशंपायन उवाच ।
ते लाभमिव मन्वानाः कुरवोऽर्जुनमाहवे ।
दृष्ट्वा यान्तमदूरस्थं क्षिप्रमभ्यपतन्रथैः ॥ ४१
हस्त्यश्वपरिवारेण महताऽभिविराजता ।
योधैः प्रासासिहस्तैश्च चापबाणोद्यतायुधैः ॥ ४२
तान्यनीकान्यशोभन्त कुरूणामाततायिनाम् ।
संसर्पन्त इवाकाशे विद्युत्वन्तो वलाहकाः ॥ ४३
तानि दृष्ट्वाऽप्यनीकानि निवर्तितरथानि च ।
पार्थोऽपि वायुवद्धोरं सैन्याग्रं व्यधुनोच्छरैः ॥ ४४
तां शत्रुसेनां तरसा प्रणुद्य
गाश्चापि जित्वा धनुषा परेण ।
दुर्योधनायाभिमुखं प्रयान्तं
कुरुप्रवीराः सहसाऽभ्यगच्छन् ॥ ४५
गोषु प्रयातासु जवेन मात्स्या-
न्किरीटिनं प्रीतियुतं च दृष्ट्वा ।
पशून्समादाय ततो निवृत्ता
गोपाः समस्ताः प्रययुश्च राष्ट्रम् ॥ ४६

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

अर्जुनेनोत्तरंप्रति द्रोणकर्णादिरथानामसाधारणध्वजचिह्नप्रदर्शनपूर्वकं तत्तन्नामनिर्देशेन तत्तत्पराक्रमवर्णनम् ॥ १ ॥

वैशंपायन उवाच ।
ततस्त्रीणि सहस्राणि रथानां च धनुष्मताम् ।
घोराणि कुरुवीराणां पर्यकीर्यन्त भारत ॥ १
कर्णो रथसहस्रेण प्रत्यगृह्णाद्धनञ्जयम् ।
भीष्मः शान्तनवो धीमान्सहस्रेण पुरस्कृतः ॥ २
तथा रथसहस्रेण भ्रातृभिः परिवारितः ।
पश्चाद्दुर्योधनोऽतिष्ठद्यशसा च श्रिया ज्वलन् ॥ ३
अतिष्ठन्नवकाशेषु पादाताः सह वाजिभिः ।
भीमरूपाश्च मातङ्गास्तोमराङ्कुशचोदिताः ॥ ४
तानि दृष्ट्वा ह्यनीकानि विततानि महात्मनाम् ।
वैराटिमुत्तरं तं तु प्रत्यभाषत पाण्डवः ॥ ५
जाम्बूनदमयी वेदी ध्वजाग्रे यस्य दृश्यते ।
शोणाश्वाश्वा रथे युक्ता द्रोण एष प्रकाशते ॥ ६
आचार्यो निपुणो धीमान्ब्रह्मविच्छूरसत्तमः ।
आहवे चाप्रतिद्वन्द्वो दूरपाती महारथः ॥ ७
सुप्रसन्नो महावीरः कुरुष्वैनं प्रदक्षिणम् ।
अत्रैव चाविरोधेन एष धर्मः सनातनः ॥ ८
यदि मे प्रहरेद्द्रोणः शरीरे मे प्रहृष्यतः ।
ततोऽस्मिन्प्रहरिष्यामि नान्यथा बुद्धिरस्ति मे ॥ ९
भारताचार्यमुख्येन ब्राह्मणेन महात्मना ।
तेन मे युध्यमानस्य मन्दं वाहय सारथे ॥ १०
ध्वजाग्रे सिंहलाङ्गूलो दिक्षु सर्वासु शोभते ।
भारताचार्यपुत्रस्तु सोऽश्वत्थामा विराजते ॥ ११
ध्वजाग्रं दृश्यते यत्र बालसूर्यसमप्रभम् ।
दुर्जयः सर्वसैन्यानां देवैरपि सवासवैः ।
तेन मे युध्यमानस्य मन्दं वाहय सारथे ॥ १२
ध्वजाग्रे गोवृषो यस्य काञ्चनोऽभिविराजते ।
आचार्यवरमुख्यस्तु कृप एष महारथः ॥ १३
द्रोणेन च समो वीर्ये पितुर्मे परमः सखा ।
तेन मे युध्यमानस्य मन्दं वाहय सारथे ॥ १४
यस्य काञ्चनकम्बूभिर्हस्तिकक्ष्यापरिष्कृतः ।
ध्वजः प्रकाशते दूराद्रथे विद्युद्गणोपमः ॥ १५
एष वैकर्तनः कर्णः प्रतिमानं धनुष्मताम् ।
दृढवैरी सदाऽस्माकं नित्यं कटुकभाषणः ॥ १६
यस्याश्रयबलादेव धार्तराष्ट्रः ससौबलः ।
अस्मान्निरस्य राज्याच्च पुनरद्यापि योत्स्यति ॥ १७
एष वै स्पर्धते नित्यं मया सह सुदुर्जयः ।
जामदग्न्यस्य रामस्य शिष्यो ह्येष महारथः ॥ १८
सर्वास्त्रकुशलः कर्णः सर्वशस्त्रभृतांवरः ।
युद्धेऽप्रतिमवीर्यश्च दृढवेधी पराक्रमी ॥ १९

शरीरे प्रहरिष्यतः इति नान्यथा युद्धमस्ति मे-इति च. ध. पाठः ॥ ९ ॥ षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

अद्याहं युद्धमेतेन करिष्ये सूतबन्धुना ।
द्रष्टा त्वमावयोर्युद्धं बलिवासवयोरिव ॥ २०
महारथेन शूरेण सूतपुत्रेण धन्विना ।
तेन मे युध्यमानस्य शीघ्रं वाहय सारथे ॥ २१
यस्य चैव रथोपस्थे नागो मणिमयो ध्वजः ।
एष दुर्योधनस्तत्र कौरवो यशसा वृतः ॥ २२
लब्धलक्षो दृढं वेधी लघुहस्तः प्रतापवान् ।
तेन मे युध्यमानस्य शीघ्रं वाहय सारथे ॥ २३
यस्तु श्वेतावदातेन पञ्चतालेन केतुना ।
वैडूर्यमयदण्डेन तालवृक्षेण राजते ॥ २४
हस्तावापी बृहद्धन्वा सेनां तिष्ठति हर्षयन् ।
रामेण जामदग्न्येन द्वैरथेनाजितः पुरा ॥ २५
शीघ्रश्च लघुवेधी च लघुहस्तः प्रतापवान् ।
एष शान्तनवो भीष्मः सर्वेषां नः पितामहः२६
ककुदः सर्वसैन्यानां सर्वशस्त्रभृतांवरः ।
जयश्रियाऽवबद्धस्तु सुयोधनवशानुगः ।
पश्चादेष प्रयातव्यो न मे विघ्नकरो भवेत् ॥ २७
इत्येतांस्त्वरितः पार्थः कथयित्वा तु चोत्तरे ।
रूपतश्चिह्नतश्चैव युद्धाय त्वरते पुनः ॥ २८

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

अर्जुनस्य भीष्मद्रोणादिभिः सह युद्धम् ॥ १ ॥ अर्जुनेन कर्णस्य पराभवः ॥ २ ॥

वैशंपायन उवाच ।
अश्वत्थामा ततस्तत्र कर्णं संप्रेक्ष्य वीर्यवान् ।
उवाच स्मयमानोऽसौ सूतपुत्रमरिन्दमम् ॥ १
कर्ण यस्त्वं सभामध्ये बह्वबद्धं विकत्थसे ।
न मे युधि समोऽस्तीति तदिदं प्रत्युपस्थितम्॥२
एषोऽन्तक इव क्रुद्धः सर्वभूतावमर्दनः ।
संग्रामशिरसो मध्ये जृम्भते केसरी यथा ॥ ३
शूरोसि यदि संग्रामे दर्शयस्व सभां विना ॥ ४
यद्यशक्तोसि संग्रामे पार्थेनाद्भुतकर्मणा ।
पुनरेव सभां गत्वा धार्तराष्ट्रेण धीमता ।
मातुलं परिगृह्याशु मन्त्रयस्व यथासुखम् ॥ ५
वैशंपायन उवाच ।
एवमुक्तस्तथा कर्णः क्रोधादुद्वृत्य लोचने ।
द्रोणपुत्रमिदं वाक्यमुवाच कुरुसन्निधौ ॥ ६
नाहं बिभेमि बीभत्सोर्न कृष्णाद्देवकीसुतात् ।
पाण्डवेभ्योपि सर्वेभ्यः क्षत्रधर्ममनुव्रतः ॥ ७
सत्वाधिकानां पुंसां तु धनुर्वेदोपजीविनाम् ।
गर्जतां जायते दर्पः स्वरश्च न विषीदति ॥ ८
पश्यत्वाचार्यपुत्रो मामर्जुनेनातिरंहसा ।
युध्यमानं सुसंयुक्तं जयो वै मय्यवस्थितः ॥ ९
वैशंपायन उवाच ।
ततः प्रहस्य बीभत्सुः कौन्तेयः श्वेतवाहनः ।
दिव्यमस्त्रं विकुर्वाणः प्रत्ययाद्रथिसत्तमः ॥ १०
महात्मानं मन्दबुद्धिर्निश्वसन्धृतराष्ट्रजः ।
उवाच स महाराज राजा दुर्योधनस्तदा ॥ ११
न विघ्नो ह्यर्जुनं तत्र वसन्तं मत्स्यवेश्मनि ।
तेनेदं कर्ण मत्स्यानामग्रहीष्म धनं बहु ॥ १२
एवं चेत्तर्हि गच्छामो विसृजन्तो धनं बहु ।
अयशो नातिवर्तेत लोकयोरुभयोरपि ॥ १३
किं च युद्धात्परं नास्ति क्षत्रियाणां सुखावहम् ।
तस्मात्पार्थेन संग्रामं कुर्महे न पलायनम् ॥ १४
एतावदुक्त्वा राजा वै ह्यभियानमियेष सः ।
तथा दशसहस्राणि वीराणां हि धनुष्मताम् ।
अभ्यद्रवंस्तदा पार्थं शलभा इव पावकम् ॥ १५
वर्मिता वाजिनस्तत्र संभृताश्च पदातिभिः ।
भीमरूपाश्च मातङ्गास्तोमराङ्कुशपाणिभिः ॥ १६
अधिष्ठिताः सुसंयत्तैर्हस्तिशिक्षाविशारदैः ।
अभ्यद्रवन्सुसंक्रुद्धाश्चापहस्तोद्यतायुधाः ॥ १७
पश्च चैनं रथोदग्रास्त्वरिताः पर्यवारयन् ।
द्रोणो भीष्मश्च कर्णश्च कुरुराजश्च वीर्यवान् ॥१८

अश्वत्थामा महाबाहुर्धनुर्वेदपरायणः ।
इषूंश्च सम्यगस्यन्तो जीमूता इव वार्षिकाः ॥१९
ते लाभमिव मन्वानाः प्रत्यगृह्णन्धनंजयम् ।
शरौघानभिवर्षन्तो नादयन्तो दिशो दश ॥ २०
ततः प्रहस्य बीभत्सुः कौन्तेयः श्वेतवाहनः ।
दिव्यमस्त्रं प्रकुर्वाणः प्रत्ययाद्रथिसत्तमान् ॥ २१
यथा रश्मिभिरादित्यः प्रच्छादयति मेदिनीम् ।
तथा गाण्डीवनिर्मुक्तैः शरैराच्छादयद्दिशः ॥ २२
न रथानां न चाश्वानां न ध्वजानां न वर्मिणाम् ।
अतिविद्धैः शितैर्बाणैरासीद्व्यङ्गुलिरन्तरम् ॥ २३
दैवयोगाद्धि पार्थस्य हयानामुत्तरस्य च ।
शिक्षाबलोपपन्नत्वादस्त्राणां वै परिक्रमात् ।
ध्वजगाण्डीवयोश्चापि दैव्या शक्त्या च मायया ॥
इतस्ततश्च संयाने दूरे वाऽप्यथवाऽन्तिके ।
दुर्गे विषमजाते वा स्थले निम्ने तथा क्षितौ ।
न च रुध्येद्गतिस्तस्य रथस्य मनसो यथा ॥ २५
समरेषु तु विद्वांसस्तस्य तांस्तान्परिक्रमान् ।
वीर्यमत्यद्भुतं दृष्ट्वा तथा पार्थस्य तद्बलम् ।
त्रेसुरेवं परे भीताः पराङ्मुखरथा अपि ॥ २६
कालाग्निमिव बीभत्सुं निर्दहन्तमिव प्रजाः ।
नारयः प्रेक्षितुं शेकुर्ज्वलन्तमिव पावकम् ॥ २७
तानि भिन्नान्यनीकानि रेजुरर्जुनमार्गणैः ।
तिग्मांशोश्च घनाभ्राणि व्याप्तानीव गभस्तिभिः॥
अशोकानां वनानीव सञ्चितैः कुसुमैः शुभैः ।
पार्थः संरञ्जयामास रुधिरेणाकुलं बलम् ॥ २९
सहस्रशोऽर्जुनशरैश्छिन्नान्युच्चावचानि च ।
छत्राणि च पताकाश्च खेऽभ्युवाह सदागतिः ३०
ये ह्यर्जुनबलत्रस्ताः परिपेतुर्दिशो दश ।
रथांशं देशमुत्सृज्य पार्थच्छिन्नयुगा हयाः॥ ३१
निकृत्तपूर्वचरणास्ते निपेतुः शितैः शरैः ।
शिरोभिः प्रथमं जग्मुर्मेदिनीं जघनैर्हयाः ॥ ३२
चक्षुर्नासाविषाणेषु दन्तवेष्टेषु च द्विपान् ।
मर्मस्वन्येषु चाहत्य तथा निघ्नन्गजोत्तमाः ॥३३
कौरवाणां गजानां च शरीरैर्गतचेतसाम् ।
क्षणेन संवृता भूमिर्मेघैरिव नभस्थलम् ॥ ३४
अस्त्रैर्दिव्यैर्महाबाहुरर्जुनः प्रहसन्निव ।
बडबामुखसंभूतः कालाग्निरिव संवृतः ॥ ३५
यथा युगान्तसमये सर्वं स्थावरजङ्गमम् ।
कालपक्वमशेषेण धक्ष्येदुग्रशिखः शिखी ॥ ३६
तद्वत्पार्थोऽस्त्रतेजोभिर्धनुषो निस्वनेन च ।
दैवाद्वीर्याच्च बीभत्सुस्तस्मिन्दौर्योधने बले ॥ ३७
रणे शक्तिममित्राणां प्रणीयोपनिनाय सः ।
चेष्टां प्रायेण भूतानां रात्रिः प्राणभृतामिव ॥३८
सोऽतीयात्सहसा शत्रून्सहसा तेऽभिपेदिरे ।
शीघ्रादूरं दृढामोघमस्त्रमस्यातिमानुषम् ।
दृष्ट्वा ते कौरवा भीता अतिमानुषविक्रमम्॥३९
खगपत्राभिसंवीतैः खाविष्टैः खगमैरिव ।
अर्जुनस्य खमावव्रे लोहितप्राणपैः खगैः ॥ ४०
अर्जुनेन विनिर्मुक्ताः शरा गाण्डीवधन्वना ।
तार्क्ष्यवेगा इवाकाशे ससञ्जुः परमर्मसु ॥ ४१
वर्माणि सारथिश्चैव हेमजालानि वाजिनाम् ।
किरीटं सूर्यसंकाशं वैयाघ्रमथ चर्म च ॥ ४२
ततः सर्वाणि गात्राणि रथस्य द्विषतां शरैः ।
नीहारेणेव भूतानि छन्नानीह चकाशिरे ॥ ४३
सकृदेव न तं शेकुः कथमभ्यसितुं परे ।
अनभ्यस्तः पुनस्तैर्हि रथः सोभिपपात तान् ४४
तच्छरा द्विट्शरीरेषु यथा च न ससञ्जिरे ।
द्विधाऽनीकेषु बीभत्सोर्न ससज्ज रथस्तथा ॥ ४५
स तद्धि क्षोभयामास विगाह्याखिलं रथी ।
अनन्तवेगो भुजगः क्रीडन्निव महार्णवे ॥ ४६
अस्यतो नित्यमत्यर्थं सर्वघोषाधिकस्तथा ।
संनादः श्रूयते भूतैर्धनुषश्च किरीटिनः ॥ ४७
संच्छिन्नास्तत्र मातङ्गा बाणैरल्पान्तरान्तरैः ।
संस्यूतास्तत्र दृश्यन्ते मेघा इव गभस्तिभिः ॥४८
दिशोऽनुभ्रमतः सर्वा सव्यदक्षिणमस्यतः ।
सततं दृश्यते युद्धे सायकासनमण्डलम् ॥ ४९
पतन्त्यरूपेषु यथा चक्षूंषि न कदाचन ।
नालक्ष्येषु शराः पेतुस्तस्य गाण्डीवधन्वनः ॥५०

महागजसहस्रस्य युगपन्मृद्नतो वनम् ।
कौन्तेयरथमार्गस्तु रणे घोरतरोऽभवत् ॥ ५१
नूनं पार्थजयैषित्वाच्छक्रः सर्वामरैः सह ।
हन्त्यस्मानिति मन्यन्ते पार्थेनैवार्दिताः परे ॥५२
घ्नन्तमत्यर्थमहितान्सव्यसाचिनमाहवे ।
कालमर्जुनरूपेण ग्रसन्तमिव च प्रजाः ॥ ५३
कुरुसेनाशरीराणि पार्थेनानाहतान्यपि ।
पेतुः पार्थहतानीव पार्थकर्मानुदर्शनात् ॥ ५४
ओषधीनां शिरांसीव कालपक्तिसमन्वयात् ।
अवनेमुः कुरूणां हि शिरांस्यर्जुनजाद्भयात् ॥५५
चकार चार्जुनः क्रोधाद्विमुखान्रुषितानपि ॥५६
अर्जुनेनापि भिन्नानि बलाग्राणि पुनः क्वचित् ।
चक्रुर्लोहितधाराभिर्धरणीं लोहितोत्तराम् ॥ ५७
लोहितेनापि संपृक्तैः पांसुभिः पवनोद्धतैः ।
तेनैव च समुद्भूतैः सूक्ष्मैर्लोहितबिन्दुभिः ॥ ५८
लोहितार्द्रैः प्रहरणैः प्रभग्ना लोहितोक्षिताः ।
लोहितेषु निमग्नास्ते निहताश्च किरीटिना ॥ ५९
बभूवुर्लोहितास्तत्र भृशमादित्यरश्मयः ।
आकाशं तत्क्षणेनासीत्सन्ध्याभ्रमिव लोहितं ६०
अप्यस्तं प्राप्य चादित्यो निवर्तेत न पाण्डवः ।
निवर्तन्ते न जित्वारिं नित्यजल्पविचक्षणाः ॥६१
तान्सर्वान्समरे शूरान्पौरुषे पर्यवस्थितान् ।
दिव्यैरस्त्रैरमोघात्मा सर्वानाच्छेद्धनुर्धरान् ॥ ६२
स तु द्रोणं त्रिसप्तत्या नाराचानां समार्पयत् ।
अशीत्या शकुनिं चैव द्रौणिमप्याशु सप्तभिः ६३
दुःसहं दशभिर्बाणैरर्जुनः समविध्यत ।
दुश्शासनं द्वादशभिः कृपं शारद्वतं त्रिभिः ।
भीष्मं शान्तनवं षष्ट्या प्रत्यविध्यत्स्तनान्तरे ६४
स कर्णं कर्णिनाऽविध्यत्पीतेन निशितेन च ।
वासविर्द्विषतां मध्ये विव्याध परमेषुणा ॥ ६५
स कर्णं सतनुत्राणं निर्भिद्य निशितः शरः ।
अगच्छद्दारयन्भूमिं चोदितो दृढधन्वना ॥ ६६
ततोऽस्य वाहान्व्यहनच्चतुर्भिश्चतुरः क्षुरैः ।
सारथेश्च शिरः कायादपाहरदरिन्दमः ।
अर्धचन्द्रेण चिच्छेद चापं तस्य करे स्थितम् ॥६७
तस्मिन्विद्धे महाभागे कर्णे सर्वास्त्रपारगे ।
हताश्वसूते विरथे ततोऽनीकमभज्यत ॥ ६८

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

अर्जुनेन रणे विकर्णादिपराभवनपूर्वकं कर्णानुजहननम् ॥ १ ॥ अर्जुनपराजितेन कर्णेन रणाङ्गणादपयानम् ॥ २ ॥

वैशंपायन उवाच ।
तत्प्रभग्नं बलं सर्वं विपुलौघस्वनं तथा ।
भीष्ममासाद्य संतस्थौ वेलामिव महोदधिः ॥ १
तानि सर्वाणि गाङ्गेयः समाश्वास्य परंतपः ।
ततो व्यूह्य महाबाहुः समरेष्वपराजितः ॥ २
रथनागाश्वकलिलं युयुजे युद्धकोविदः ।
अभेद्यं परसैन्यानां शूरैरपि समीक्षितम् ॥ ३
आचार्यदुर्योधनसूतपुत्रैः
कृपेण भीष्मेण च पालितानि ।
अवध्यकल्पानि दुरासदानि
रथाश्वमातङ्गसमाकुलानि च ॥ ४
तेषामनीकानि किरीटमाली
व्यूढानि दृष्ट्वा विपुलध्वजानि ।
गाण्डीवधन्वा द्विषतां निहन्ता
वैराटिमामन्त्र्य ततोऽभ्युवाच ॥ ५
सुसंगृहीतैरथ रश्मिभिस्त्वं
हयान्नियम्य प्रसमीक्ष्य यत्तः ।
संप्रेषयाशु प्रतिवीरमेनं
वैकर्तनं योधयितुं वृणोमि ॥ ६
यां हस्तिकक्ष्यां बहुधा विचित्रां
स्तम्भे रथे पश्यसि दर्शनीयाम् ।

विवर्तमानां ज्वलनप्रकाशां
वैकर्तनस्यैतदनीकमग्र्यम् ॥ ७
एतेन शीघ्रं प्रतिपादयेमान्
श्वेतान्हयान्काञ्चनजालकक्ष्यान् ।
सर्वं जवं तत्र विदर्शयिष्ये
ह्यासादयैतद्रथवीरवृन्दम् ॥ ८
गजो गजेनेव हि योद्धुकामो
मया सदा काङ्क्षति सूतपुत्रः ।
तमेव मां प्रापय सूतपुत्रं
दुर्योधनोपाश्रयजातदर्पम् ।
तं पातयिष्यामि रथस्य मध्ये
सहस्रनेत्रोऽशनिनेव वृत्रम् ॥ ९
वैशंपायन उवाच
स तैर्हयैर्जातजवैर्बृहद्भिः
पुत्रो विराटस्य हिरण्यकक्ष्यैः ।
विध्वंसयंस्तद्रथिनामनीकं
ततोऽवहत्पाण्डवमाजिमध्ये ॥ १०
तमापतन्तं परमेण तेजसा
समीक्ष्य वैकर्तनमभ्यरक्षन् ।
अभ्यद्रवंस्ते रथवीरवृन्दा
व्याघ्रेण चाक्रान्तमिवर्षभं रणे ॥ ११
चित्राङ्गदश्चित्ररथश्च वीरः
संग्रामजिद्दुःसहचित्रसेनौ ।
विविंशतिर्दुर्मुखदुर्जयौ च
विकर्णदुःशासनसौबलाश्च ।
शोणो निषेधश्च तमन्वयुस्ते
वैकर्तनं शीघ्रतरं युवानः ॥ १२
पुत्रा ययुस्ते सहसोदराश्च
वैकर्तनं पार्थगतं समीक्ष्य ।
प्रगृह्य चापानि महाबला रणे
धनंजयं पर्यकिरञ्शरार्चिभिः ॥ १३
तेषां धनुर्ज्याकृतनैकतन्त्रीं
प्रासोपवीणां शरसङ्घकोणाम् ।
कराग्रयन्त्रां स्थिरचापदण्डां
वीणामुपावादयदाशु पार्थः ॥ १४

तस्मिंस्तु युद्धे तुमुले प्रवृत्ते
पार्थं विकर्णोऽतिरथं रथेन ।
विपाठवर्षेण कुरुप्रवीरो
भीमेन भीमानुजमाससाद ॥ १५
ततो विकर्णस्य धनुर्विकृत्य
जाम्बूनदेनोपहितं दृढज्यम् ।
न्यपातयत्तद्ध्वजमस्य विद्ध्वा
छिन्नध्वजः सोऽप्यपयाज्जवेन ॥ १६
तं शात्रवाणां गणबाधितारं
कर्माणि कुर्वाणममानुषाणि ।
शत्रुंतपो वैरममृष्यमाणः
समार्पयत्कूर्मनखेन पार्थम् ॥ १७
स तेन राज्ञाऽतिरथेन विद्धो
विगाहमानो ध्वजिनीं परेषाम् ।
शत्रुंतपं पञ्चभिराशु विद्ध्वा
ततोऽस्य सूतं दशभिर्जघान ॥ १८
ततः स विद्धो भरतर्षभेण
बाणेन कायावरणातिगेन ।
गतासुराजौ निपपात राज-
न्नगो नगाग्रादिव वातरुग्णः ॥ १९
रथर्षभास्ते तु रथर्षभेण
वीरा रणे वीरतरेण भग्नाः ।
चकम्पिरे वातवशेन काले
प्रकम्पितानीव महावनानि ॥ २०
हताश्च पार्थेन नरप्रवीरा
भूमौ युवानः सुषुपुः सुवेषाः ।
वसुप्रदा वासवतुल्यवीर्याः
पराजिता वासवजेन सङ्ख्ये ।
सुवर्णकार्ष्णायसवर्मनद्धा
नागा यथा हैमवते प्रवृद्धाः ॥ २१
तथा स शत्रून्समरे विनिघ्नन्
गाण्डीवधन्वा पुरुषप्रवीरः ।
चचार सङ्ख्ये विदिशो दिशश्च
दहन्निवाग्निर्वनमातपान्ते ॥ २२

सुजीर्णपर्णानि यथा वसन्ते
विशातयित्वा तु रजो नुदन्खे ।
तथा सपत्नान्विकिरन्किरीटी
चचार सङ्ख्येऽतिरथो रथेन २३
शोणाश्ववाहस्य हयान्निहत्य
वैकर्तनभ्रातुरदीनसत्वः ।
एकेन संग्राममजितः शरेण
शिरो जहाराथ किरीटमाली ॥ २४
तस्मिन्हते भ्रातरि सूतपुत्रो
वैकर्तनो वीर्यमदप्रतापी ।
प्रगृह्य दन्ताविव नागराजो
महाबलः सिंहमिवाजगाम ॥ २५
स पाण्डवं द्वादशभिः पृषत्कै-
वैंकर्तनः पार्थमुपाजघान ।
विव्याध गात्रेषु हयांश्च सर्वा-
न्विराटपुत्रं च शरैर्विजघ्ने ॥ २६
तमापतन्तं समरे किरीटी
वैकर्तनं सर्वसमृद्धतेजाः ।
प्रच्छादयामास महाधनुष्मा-
न्व्यपेधयच्छत्रुगणांश्च वीरः ॥ २७
निहत्य कर्णस्य ततः किरीटी
पुरश्चरांश्चापि च पृष्ठगोपान् ।
समीपमभ्यागमदप्रमेयो
वितत्य पक्षौ गरुडो यथोरगम् ॥ २८
तावुत्तमौ सर्वधनुर्धराणां
महाबलौ सर्वसपत्नसाहौ ।
कर्णं च पार्थं च निशम्य युद्धे
दिदृक्षमाणाः कुरवोऽवतस्थुः २९
तं पाण्डवः स्पष्टमुदीर्णकोपं
कृतागसं कर्णमुदीक्ष्य कोपात् ।
क्षणेन साश्वं सरथं ससूत-
मन्तर्दधे मेघ इवातिवृष्ट्या ॥ ३०

ततः सयुग्याः सरथाः सनागा
योधा विनेदुर्भरतर्षभाणाम् ।
अन्तर्हितं भीष्ममुखाः समीक्ष्य
किरीटिना कर्णरथं पृषत्कैः ॥ ३१
स चापि तानर्जुनबाहुमुक्ता-
ञ्शराञ्शरौघैः प्रतिहत्य तूर्णम् ।
बभौ महात्मा सधनुः सबाणः
सविष्फुलिङ्गोऽग्निरिवाथ कर्णः ॥ ३२
ततस्तु जज्ञे करतालघोषः
सशङ्खभेरीपणवाकुलस्तु ।
प्रक्ष्वेलितास्फोटितसिंहनादै-
र्वैकर्तनं पूजयतां कुरूणाम् ॥ ३३
आधूतलाङ्गूलमहापताकं
रथोत्तमं श्रेष्ठतमं कुरूणाम् ।
ततः सगाण्डीवकृतप्रणादं
किरीटिनं प्रेक्ष्य ननाद कर्णः ॥ ३४
पार्थोपि वैकर्तनमर्दयित्वा
साश्वं सकेतुं सरथं ससूतम् ।
ननाद हर्षात्सहसा किरीटी
पितामहं द्रोणकृपौ च दृष्ट्वा ॥ ३५
सिषेच पार्थं बहुभिः शरौघै-
र्वैकर्तनः संयति तीक्ष्णवेगैः ।
वैकर्तनश्चापि किरीटमाली
प्रच्छादयामास शितैः शरौघैः ॥ ३६
तयोरमोघान्सृजतोः शरौघा-
नस्त्रज्ञयोरास महान्विमर्दः ।
राहुप्रमुक्ताविव चन्द्रसूर्यौ
क्षणान्तरेणानुददर्श लोकः ॥ ३७
हतास्तु पार्थेन रथप्रवीरा
भूमौ युवानः सुषुपुः सुकेशाः ।
सुवर्णलोहायसवर्मगात्रा
वृक्षा यथा हैमवते निकृत्ताः ॥ ३८

वायुर्यथा खे आकाशे रजो नुदन् चरति तथेत्यध्याहारेण योजना ॥ २३ ॥ कर्णमुदीक्ष्य हर्षादिति ध. पाठः ॥ ३० ॥

अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

तथा स शत्रून्समरे विनिघ्न-
न्गाण्डीवधन्वा व्यधमत्सपत्नान् ।
चचार सङ्ख्ये विदिशो दिशश्च
दहन्निवाग्निर्वनमातपान्ते ॥ ३९
सुशीर्णपर्णानि यथा वसन्ते
विधूनयन्वायुरिवाल्पसारान् ।
तथा सपत्नान्विधमन्किरीटी
चचार सङ्ख्येऽतिरथो रथेन ॥ ४०
शत्रूनिवेन्द्रः समरे किरीटी
विद्रावयंस्तद्रथवीरवृन्दम् ।
प्राच्छादयच्चारुकिरीटमाली
वरेषुभिः शत्रुगणाननेकान् ॥ ४१
कर्णं तदोवाच किरीटमाली
शूरः कुरूणां प्रवरोऽभिगर्जन् ॥ ४२
कर्ण यस्त्वं सभामध्ये बहुबद्धं प्रभाषसे ।
न मे युधि समोस्तीति तदिदं प्रत्युपस्थितम् ४३
सभायां पौरुषं प्रोच्य धर्ममुत्सृज्य केवलम् ।
कर्तुमिच्छसि यत्कर्म तन्मन्ये दुष्करं त्वया ॥४४
यत्त्वया कथितं पूर्वं नास्ति मत्सम इत्यपि ।
तत्सत्यं कुरु राधेय कुरुमध्ये मया सह ॥ ४५
सभायां यस्तु पाञ्चालीं क्लिश्यमानां तदा त्वया।
दृष्टवानसि तस्याद्य फलमश्नुहि केवलम् ॥ ४६
धर्मपाशनिबद्धेन यन्मया मर्षितं तव ।
तस्य पापस्य राधेय फलं प्राप्नुहि दुर्मते ॥ ४७
एहि कर्ण मया सार्धमिहाद्य कुरु वैशसम् ।
प्रेक्षका कुरवः सन्तु सर्वे ते सहसैनिकाः ॥ ४८
इदानीमेव तावत्त्वमपयातो रणान्मम ।
कस्माज्जीवसि राधेय निहतस्त्वनुजस्तव ॥ ४९
यो भ्रातरं पातयित्वा कस्त्यक्त्वा च रणाजिरम्।
त्वदन्यः पुरुषः सत्सु ब्रूयादेवं व्यवस्थितः ॥५०
कर्ण उवाच ।
ब्रवीषि वाचा यत्पार्थ कर्मणा तत्समाचर ।
विशेषितो हि त्वं वाचा कर्मणाप्रतिमं भुवि ॥५१
यत्त्वया मर्षितं पूर्वं तदशक्तेन मर्षितम् ।
इति गृह्णीम ते पार्थ तमदृष्ट्वा पराक्रमम् ॥ ५२
धर्मपाशनिबद्धेन यत्त्वया मर्षितं पुरा ।
तथैव बद्धमात्मानमबद्ध इति मन्यसे ॥ ५३
न हि तावद्वने वासो यथोक्तं चरितस्त्वया ।
क्लिष्टस्त्वमर्थलोभात्तु समयं छेत्तुमिच्छसि ॥ ५४
यदि चेन्द्रः स्वयं पार्थ तव युद्ध्येत कारणात् ।
तथाऽपि न व्यथा काचिन्मम स्याद्विक्रमिष्यतः ५५
अयं कौन्तेयकामस्ते नचिरात्समुपस्थितः ।
योत्स्यसे हि मया सार्धमत्र पश्यामि ते बलम् ५६
वैशंपायन उवाच ।
इति कर्णो ब्रुवन्नेव बीभत्सुमपराजितम् ।
अभ्ययाद्विसृजन्बाणान्कायावरणभेदिनः ॥ ५७
प्रतिजग्राह तान्पार्थः प्रीयमाणो महारथः ॥ ५८
शरवर्षेण महता पर्जन्य इव वृष्टिमान् ।
अभीयाय हि बीभत्सुर्गाण्डीवं विक्षिपन्धनुः ॥५९
जिघांसुः समरे कर्णं विससर्ज शरान्बहून् ।
तान्कर्णः प्रतिजग्राह वायुवेगमिवाचलः ॥ ६०
तयोर्दैवासुरसमः सन्निपातोऽभवन्महान् ।
किरतोः शरजालानि कृत्स्नं व्योम निरन्तरं ॥६१
उत्पेतुर्मेघजालानि घोररूपाणि सर्वशः ।
ववर्ष च रजो भौमं कर्णपार्थसमागमे ॥ ६२
न स्म सूर्यः प्रतपति न च वाति समीरणः ।
शरप्रच्छादितं व्योम छायाभूतमिवाभवत् ॥ ६३
गाण्डीवस्य च निर्घोषः कर्णस्य धनुषस्तथा ।
दह्यतामिव वेणूनामासीत्परमदारुणः ॥ ६४
अर्जुनस्तु हयान्नागान्रथांश्च विनिपातयन् ।
क्षोभयामास तत्सैन्यं कर्णं विव्याध चासकृत् ॥
ततः पार्थो महाबाहुः कर्णस्य धनुरच्छिनत् ।
छिन्नधन्वा ततः कर्णः शक्तिं चिक्षेप वेगवान्
तां शक्तिं समरे पार्थश्चिच्छेद निशितैः शरैः ६६
ततो निपेतुर्बहुशो राधेयस्य पदानुगाः ।
तांश्च गाण्डीवनिर्मुक्तैः प्राहिणोद्यमसादनम् ६७
अशेरताव्रत्य महीं समग्रां
पार्थेषुमार्गे निहता द्विपेन्द्राः ।

हिरण्यकक्ष्याः शरजालचित्रा
यथा नगाः पावकजालनद्धाः ॥ ६८
तं शत्रुसेनाङ्गनिबर्हणानि
कर्माणि कुर्वाणममानुषाणि ।
वैकर्तनः पूर्वममृष्यमाणः
समार्पयल्लक्ष्यमिवाशु पार्थम् ॥ ६९
ततश्चतुर्भिस्तुरगान्विकृष्य
विव्याध कर्णोऽथ धनंजयस्य ।
षड्भिश्च सूतं दशभिर्हयांश्च
षष्ठ्या च पार्थं त्रिभिरस्य केतुम् ॥ ७०
सविष्फुलिङ्गोज्ज्वलभीमघोषः
कोपेन्धनः केतुशिखः शरार्चिः ।
कर्णाग्निरस्त्रानिलभीमवातो
बभौ दिधक्षन्निव पार्थकक्षम् ॥ ७१
स्वनेमिशङ्खस्वनभीमघोष-
श्चलत्पताकोज्ज्वलभीमविद्युत् ।
पार्थाम्बुदः शस्त्रशराम्बुधारः
कर्णानलं संशमयांचकार ॥ ७२
तेनातिविद्धः समरे किरीटी
प्रबोधितः सिंह इव प्रसुप्तः ।
गाण्डीवधन्वा प्रवरः कुरूणां
प्रतत्वरे कर्णवधाय जिष्णुः ॥ ७३
स ब्राह्ममस्त्रं समरे किरीटी
प्रादुश्चकाराद्भुतवीर्यकर्मा ।
सन्तापयन्कर्णरथं शरौघै-
र्लोकानिमान्त्सूर्य इवांशुमाली ॥ ७४
स हस्तिनेवाभिहतो गजेन्द्रः
प्रगृह्य भल्लान्निशितान्निषङ्गात् ।
आकर्णपूर्णं तु धनुर्विकृष्य
विव्याध बाणैरथ सूतपुत्रम् ॥ ७५
अथास्य बाहू सशिरो ललाटं
ग्रीवामुरः स्कन्धभुजान्तरं च ।
कर्णस्य पार्थो युधि निर्बिभेद
वज्रैरिवाद्रिं भगवान्महेन्द्रः ॥ ७६
स पार्थमुक्तानविषह्य बाणान्
गजो गजेनेव जितस्तरस्वी ।
विहाय संग्रामशिरोपयातो
वैकर्तनः पार्थशराभितप्तः ॥ ७७

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

द्रोणार्जुनयोर्युद्धवर्णनम् ॥ १ ॥ अर्जुनबाणाहतिविषण्णे द्रोणे अश्वत्थाम्ना तद्रक्षणायार्जुनप्रत्यभियानम् ॥ २ ॥ अत्रान्तरेऽर्जुनदत्तावकाशेन द्रोणेन रणादपयानम् ॥ ३ ॥

वैशंपायन उवाच ।
जितं वैकर्तनं दृष्ट्वा पार्थो वैराटिमब्रवीत् ।
स्थिरो भव त्वं संग्रामे जयोऽस्माकं नृपात्मज ॥१
यावच्छङ्खमुपाध्यास्ये द्विषतां रोमहर्षणम् ।
अविक्लबमसंभ्रान्तमव्यक्तहृदयेक्षणम् ॥
याहि शीघ्रं यतो द्रोणो ममाचार्यो रणे स्थितः ॥२
तथा संक्रीडमानस्य अर्जुनस्य रणाजिरे ।
बलं सत्वं च तेजश्च लाघवं च व्यवर्धत ॥ ३
तच्चाद्भुतमभिप्रेक्ष्य भयमुत्तरमाविशत् ॥ ४
उत्तर उवाच ।
अस्त्राणां तव दिव्यानां शरौघान्क्षिपतः शितान् ।
मनो मे मुह्यतेऽत्यर्थं तव दृष्ट्वा पराक्रमम् ॥ ५
द्वैधीभूतं मनो मह्यं भयाद्भरतसत्तम ।
अदृष्टपूर्वं पश्यामि तव गाण्डीवनिस्वनम् ॥ ६
तव बाहुबलं चैव धनुः कर्षयतो बहु ।
तव तेजो दुराधर्षं यथा विष्णोस्त्रिविक्रमे ॥ ७
वैशंपायन उवाच ।
तमुत्तरश्चित्रमवेक्ष्य गाण्डिवं
शरांश्च मुक्तान्सहसा किरीटिना ।

भीतोऽब्रवीदर्जुनमाजिमध्ये
नाहं तवाश्वान्विषहे नियन्तुम् ॥ ८
तमब्रवीत्किंचिदिव प्रहस्य
गाण्डीवधन्वा द्विषतां निहन्ता ।
मया सहायेन कुतोऽस्ति ते भयं
प्रेह्युत्तराश्वाननुमन्त्र्य वाहय ॥ ९
वैशंपायन उवाच ।
आश्वासितस्तेन धनंजयेन
वैराटिरश्वान्प्रतुतोद शीघ्रम् ।
धनंजयश्चापि विकृष्य चापं
विष्फारयामास महेन्द्रकल्पः ॥ १०
उत्तरं चैव बीभत्सुरब्रवीत्पुनरर्जुनः ।
न भेतव्यं मया सार्धं तात संग्राममूर्धनि ॥ ११
राजपुत्रोऽसि ते भद्रं कुले महति मात्स्यके ।
जातस्त्वं क्षत्रियकुले न विषीदितुमर्हसि ॥ १२
धृतिं कृत्वा सुविपुलां राजपुत्र रथं मम ।
युध्यमानस्य संग्रामे राजभिः सह वाहय ॥ १३
उक्त्वा तमेवं बीभत्सुरर्जुनः पुनरब्रवीत् ।
पाण्डवो रथिनां श्रेष्ठो भारद्वाजं समीक्ष्य तु ॥१४
यत्रैषा काञ्चनी वेदिर्दृश्यतेऽग्निशिखोपमा ।
उच्छ्रिता काञ्चने दण्डे पताकाभिरलंकृता ॥ १५
तत्र मां वह भद्रं ते द्रोणं योत्स्यामि सत्तमम् ।
भारद्वाजेन योत्स्येऽहमाचार्येण महात्मना ॥ १६
अमी शोणाः प्रकाशन्ते तुरगाः साधुवाहिनः ।
युक्ता रथवरे तस्य सर्वशिक्षाविशारदाः ॥ १७
यतो रथवरे शूरः सर्वशस्त्रभृतांवरः ।
स्निग्धवैडूर्यसंकाशस्ताम्राक्षः प्रियदर्शनः ॥ १८
आदित्य इव तेजस्वी बलवीर्यसमन्वितः ।
सर्वलोकधनुःश्रेष्ठः सर्वलोकेषु पूजितः ।
अङ्गिरोशनसोस्तुल्यो नये बुद्धिमतांवरः ॥ १९
चत्वारो निखिला वेदाः साङ्गोपाङ्गाः सलक्षणाः।
धनुर्वेदश्च कार्त्स्न्येन ब्राह्मं चास्त्रं प्रतिष्ठितम् ॥२०
पुराणमितिहासश्च अर्थविद्या च मानवम् ।
भारद्वाजे समस्तानि सर्वाण्येतानि सांप्रतम् ॥२१
क्षमा दमश्च सत्यं च तेजो मार्दवमार्जवम् ।
प्रतिष्ठिता गुणा यस्मिन्बहवो द्विजसत्तमे ॥ २२
यस्याहमिष्टः सततं मम चेष्टः सदा च सः ।
क्षत्रधर्मं पुरस्कृत्य तेन योत्स्ये हि सांप्रतम् ॥२३
आचार्यं प्रापयेदानीं ममोत्तर महारथम् ।
अपरं पश्य संग्राममद्भुतं मम तस्य च ॥ २४
उत्तरस्त्वेवमुक्तोऽश्वांश्चोदयामास तं प्रति ।
आजगामार्जुनरथो भारद्वाजरथं प्रति ॥ २५
तमापतन्तं वेगेन पाण्डवं सरथं रणे ।
द्रोणोप्यभ्यद्रवत्पार्थं मतो मत्तमिव द्विपम् ॥ २६
स तु रुक्मरथं दृष्ट्वा कौन्तेयः समभिद्रुतम् ।
आचार्यं तं महाबाहुः प्राञ्जलिर्वाक्यमब्रवीत् ॥२७
उषिताः स्मो वने वासं प्रतिकर्मचिकीर्षवः ।
कोपं नार्हसि नः कर्तुं सदा समरदुर्जय ॥ २८
अहं तु ताडितः पूर्वं प्रहरेयं तवानघ ।
इति मे वर्तते बुद्धिस्तद्भवान्क्षन्तुमर्हति ॥ २९
ततः प्राध्मापयच्छङ्खं भेरीपटहवादितम् ।
व्यक्षोभत बलं सर्वमुद्धूतमिव सागरम् ॥ ३०
वैशंपायन उवाच ।
ततस्तु प्राहिणोद्द्रोणः शरानथ स विंशतिम् ।
अप्राप्तानेव तान्पार्थश्चिच्छेद कृतहस्तवान् ॥ ३१
ततः शरसहस्रेण रथं पार्थस्य वीर्यवान् ।
अवाकिरत्ततो द्रोणः शीघ्रहस्तं प्रदर्शयन् ॥ ३२
एवं प्रवृत्ते युद्धे भारद्वाजकिरीटिनोः ॥ ३३
अश्वाञ्शोणान्महावेगान्हंसवर्णैस्तु वाजिभिः ।
मिश्रितान्समरे दृष्ट्वा व्यस्मयन्त पृथग्जनाः ॥ ३४
रथं रथेन पार्थस्य समाहत्य परंतपः ।
हर्षयुक्तस्तदाऽऽचार्यः प्रत्यगृह्णात्स पाण्डवम् ॥३५
समाश्लिष्टाविवान्योन्यं द्रोणपाण्डवयोर्ध्वजौ ।
दृष्ट्वा प्राकम्पत मुहुर्भारतानां महाचमूः ॥ ३६
तत्तु युद्धं प्रवृत्तं ह्याचार्यस्यार्जुनस्य च ।
विमुञ्चतोः शरानुग्रान्विशिखान्दीप्ततेजसः ॥ ३७
तौ वीरौ वीर्यसंपन्नौ दृष्ट्वा समरमूर्धनि ।
आचार्यशिष्यौ रथिनौ कृतवीर्यौ तरस्विनौ ॥३८

उभौ विश्रुतकर्माणावुभौ श्रमगतौ जये ।
उभावतिरथौ लोके ह्युभौ परपुरंजयौ ।
क्षिपन्तौ शरजालानि क्षत्रियान्मोह आविशत्॥३९
व्यस्मयन्त नराः सर्वे द्रोणार्जुनसमागमे ।
नराणां ब्रुवतां वाक्यं श्रूयते स महास्वनः॥४०
द्रोणं हि समरे कोऽन्यो योद्धुमर्हत्यथार्जुनात् ।
रौद्रः क्षत्रियधर्मोऽयं गुरुं वै यदयोधयत्॥ ४१
इत्यब्रुवञ्जनास्तत्र संग्रामशिरसि स्थिताः ।
तौ समीक्ष्य तु संरब्धौ सन्निकृष्टौ महारथौ ॥४२
छादयेतां शरौघैस्तावन्योन्यमपराजितौ ।
संयुगे संचकाशेतां कालसूर्याविवोदितौ ॥ ४३
विष्फार्य च महाचापं हेमपृष्ठं दुरासदम् ।
संरब्धस्तु तदा द्रोणः प्रत्ययुध्यत फल्गुनम् ॥४४
स सायकमयैर्जालैरर्जुनस्य रथं प्रति ।
भानुमद्भिः शिलाधौतैर्बाणैः प्राच्छादयद्दिशः॥४५
अर्जुनस्तु तदा द्रोणं महावेगैर्महारथः ।
विव्याध शतशो बाणैर्धाराभिरिव पर्वतम् ॥ ४६
कालमेघ इवोष्णान्ते फल्गुनः समवाकिरत्॥ ४७
तस्य जाम्बूनदमयैश्चित्रैश्चापच्युतैः शरैः ।
प्राच्छादयद्रथश्रेष्ठं भारद्वाजोऽर्जुनस्य वै ॥ ४८
तथैव दिव्यं गाण्डीवं धनुरानम्य चार्जुनः ।
शत्रुघ्नं वेगवत्सृष्टं भारसाधनमुत्तमम् ॥ ४९
शोभते स्म महाबाहुर्गाण्डीवं विक्षिपन्धनुः ।
शरांश्च विसृजंश्चित्रान्सुवर्णविकृतान्बहून् ॥ ५०
प्राच्छादयदमेयात्मा भारद्वाजरथं प्रति ।
द्रोणचापविनिर्मुक्तान्बाणान्बाणैरवारयत् ॥ ५१
सरथोऽप्यचरत्पार्थः प्रेक्षणीयो महारथः ।
युगपद्दिक्षु सर्वासु सर्वतोऽस्त्राण्यवासृजत् ॥ ५२
आददानं शरान्घोरान्संदधानं च पाण्डवम् ।
विसृजन्तं च कौन्तेयं न स्म पश्यन्ति लाघवात् ५३
एकच्छायमिवाकाशं बाणैश्चक्रे समन्ततः ।
नादृश्यत ततो द्रोणो नीहारेणेव पर्वतः ॥ ५४
मरीचिविकचस्येव राजन्भानुमतो वपुः ।
आसीत्पार्थस्य सुमहद्वपुः शरशतार्चितम् ॥ ५५
क्षिपतः शरजालानि कौन्तेयस्य महात्मनः ।
तान्विधूय शरान्घोरान्द्रोणोऽपि समितिंजयः ।
बभासे तिमिरं व्योम्नि विधूय सविता यथा ॥ ५६
अग्निचक्रोपमं घोरं मण्डलीकृतमाहवे ।
विकृष्य सुमहच्चापं मेघस्तनितनिस्वनम् ।
असकृन्मुञ्चतो बाणान्ददृशुः कुरवो युधि ॥ ५७
दिक्षु सर्वासु विपुलः शुश्रुवेऽथ जनैस्तदा ।
द्रोणस्यापि धनुर्घोषो विद्युत्स्तनितनिस्वनः ।
अभवद्विस्मयकरः सैन्यानां भरतर्षभ ॥ ५८
तप्तजाम्बूनदमयैर्दीप्तैरग्निसमैः शरैः ।
प्राच्छादयदमेयात्मा दिशः सूर्यस्य च प्रभाम्॥५९
ततः काञ्चनपुङ्खानां शराणां नतपर्वणाम् ।
वियद्गतानां चरतां दृश्यन्ते बहवो व्रजाः ॥ ६०
शरासनात्तु द्रोणस्य प्रभवन्ति स्म सायकाः ।
एको दीर्घ इवाभान्तः प्रदृश्यन्ते महाशराः ।
आकाशे समदृश्यन्त हंसानामिव पङ्क्तयः॥ ६१
एवं सुवर्णविकृतान्विमुञ्चन्तौ शरान्बहून् ।
आकाशं संवृतं वीरावुल्काभिरिव चक्रतुः ॥ ६२
तयोः शराश्च विबभुः कङ्कबर्हिणवाससः ।
पङ्क्त्यः शरदि मत्तानां सारसानामिवाम्बरे ॥६३
तत्तु युद्धं महाघोरं तयोः संरब्धयोरभूत् ।
अत्यद्भुतमचिन्त्यं च वृत्रवासवयोरिव ॥ ६४
महागजाविवासाद्य विषाणाग्रैः परस्परम् ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ ६५
अथ त्वाचार्यमुख्येन शरान्सृष्टाञ्शिलाशितान् ।
अवारयच्छितैर्बाणैरर्जुनो जयतांवरः ॥ ६६
दर्शयन्नैन्द्रमात्मानमुग्रमुग्रपराक्रमः ।
इषुभिस्तूर्णमाकाशं बहुभिश्च समावृणोत् ॥ ६७
जिघांसन्तं नरव्याघ्रमर्जुनं भीमदर्शनम् ।
विव्याध निशितैर्द्रोणः शरैः सन्नतपर्वभिः ॥ ६८
हृष्टः समभवद्द्रोणो रणशौण्डः प्रतापवान् ।
अर्जुनेन समं क्रीडञ्शरैः सन्नतपर्वभिः ॥ ६९
तौ व्यदारयतां शूरौ सन्नद्धौ रणशोभिनौ ।
उदीरयन्तौ दिव्यानि ब्राह्माद्यस्त्राणि भागशः ७०

पार्थस्तु समरे शूरो दर्शयन्वीर्यमात्मनः ।
स महास्त्रैर्महात्मानं द्रोणं प्राच्छादयच्छरैः ॥ ७१
अस्त्रैरस्त्राणि संवार्य पार्थो द्रोणमवारयत् ॥ ७२
तयोरासीत्संप्रहारः क्रुद्धयोर्नरसिंहयोः ।
अमृष्यमाणयोः सङ्ख्ये बलिवासवयोरिव ॥ ७३
दर्शयेतां महास्त्राणि भारद्वाजार्जुनौ रणे ॥ ७४
ऐन्द्रं वायव्यमाग्नेयमस्त्रमस्त्रेण पाण्डवः ।
मुक्तंमुक्तं द्रोणचापाद्ग्रसते स पुनःपुनः ॥ ७५
एवं शूरौ महेष्वासौ विसृजन्तौ शिलाशितान् ।
एकच्छायमकुर्वातां गगनं शरवृष्टिभिः ॥ ७६
ततोऽर्जुनेन मुक्तानां पततां च शरीरिषु ।
पर्वतेष्विव वज्राणां शराणां श्रूयते स्वनः ॥ ७७
ततो नागा रथाश्वाश्च सादिनश्च विशांपते ।
शोणिताक्ताश्च दृश्यन्ते पुष्पिता इव किंशुकाः॥७८
बाहुभिश्च सकेयूरैर्निकृत्तैश्च महारथैः ।
सुवर्णचित्रैः कवचैर्ध्वजैश्च विनिपातितैः ॥ ७९
योधैश्च निहतैस्तत्र पार्थबाणाभिपीडितैः ।
बलमासीत्सुसंभ्रान्तं द्रोणार्जुनसमागमे ॥ ८०
विधून्वानौ तु तौ वीरौ धनुषी भारसाधने ।
प्राच्छादयेतामन्योन्यं दिधक्षन्तौ वरेषुभिः ॥८१
अथान्तरिक्षे नादोऽभूद्द्रोणं तत्र प्रशंसताम् ।
दुष्करं कृतवान्द्रोणो यदर्जुनमयोधयत् ॥ ८२
प्रमाथिनं महावीर्यं दृढमुष्टिं दुरासदम् ।
जेतारं सर्वदैत्यानां सर्वेषां च महारथम् ॥ ८३
अविभ्रमं च शिक्षां च लाघवं दूरपातनम् ।
पार्थस्य समरे दृष्ट्वा द्रोणस्यासीच्च विस्मयः ॥८४
तत्प्रवृत्तं चिरं घोरं तयोर्युद्धं महात्मनोः ।
अवर्तत महारौद्रं लोकसंक्षोभकारकम् ॥ ८५
अथ गाण्डीवमुद्यम्य दिव्यं धनुरमर्षणः ।
विचकर्ष रणे पार्थो बाहुभ्यां भरतर्षभः ॥ ८६
तस्य बाणमयं वर्षं शलभानामिवाभवत् ।
न च बाणान्तरे तस्य वायुः शक्नोति सर्पितुम् ॥८७
अभीक्ष्णं संदधानस्य बाणानुत्सृजतस्तथा ।
नान्तरं ददृशे किंचित्पार्थस्यापततोपि च ॥ ८८
युद्धे तु कृतशीघ्रास्त्रे वर्तमाने सुदारुणे ।
शीघ्राच्छीघ्रतरं पार्थः शरानन्यानुदैरयत् ॥ ८९
ततः शरसहस्राणि शराणां नतपर्वणाम् ।
युगपत्प्रापतंस्तत्र द्रोणस्य रथमन्तिकात् ॥ ९०
विकीर्यमाणे द्रोणे तु शरैर्गाण्डीवधन्वना ।
हाहाकारो महानासीत्सैन्यानां भरतर्षभ ॥ ९१
पाण्डवस्य तु शीघ्रास्त्रं मघवा समपूजयत् ।
गन्धर्वाप्सरसश्चैव ये च तत्र समागताः ॥ ९२
द्रोणं युद्धार्णवे मग्नं दृष्ट्वा पुत्रः प्रतापवान् ।
ततो वृन्देन महता रथिनां रथियूथपः ।
आचार्यपुत्रस्तु शरैः पाण्डवं प्रत्यवारयत् ॥ ९३
अश्वत्थामा तु तत्कर्म हृदयेन महात्मनः ।
पूजयामास पार्थस्य कोपं चास्य तदाऽकरोत् ॥९४
स मन्युवशमापन्नः पार्थमभ्यद्रवद्रणे ।
किरञ्शरसहस्राणि पर्जन्य इव वृष्टिमान् ॥ ९५
आवृत्य च महाबाहुर्यतो द्रोणस्ततोऽभवत् ।
अन्तरं प्रददौ पार्थो द्रोणस्य व्यपसर्पितुम् ॥ ९६
स तु लब्धान्तरस्तूर्णमपायाज्जवनैर्हयैः ।
छिन्नवर्मध्वजरथो निकृत्तः परमेषुभिः ॥ ९७
पराजिते तदा द्रोणे द्रोणपुत्रः समागतः ।
सदण्ड इव रक्ताक्षः कृतान्तः समरे स्थितः ॥९८

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः ॥ ६० ॥

अर्जुनेन द्रौणिपराभवनम् ॥ १ ॥

वैशंपायन उवाच ।
तं पार्थः प्रतिजग्राह वायुवेगमिवाचलः ।
शरजालेन महता वर्षमाण इवाम्बुदः ॥ १
तयोर्देवासुरसमः सन्निपातो महानभूत् ।

किरतोः शरजालानि वृत्रवासवयोरिव ॥ २
न स सूर्यस्तदा भाति न च वाति समीरणः ।
शरगाढे कृते व्योम्नि छायाभूतमिवाभवत् ॥ ३
महांश्चटचटाशब्दो योधयोर्युध्यमानयोः ।
दह्यतामिव वेणूनामासीत्परमदारुणः ॥ ४
हयांस्तस्यार्जुनः सञ्चे कृतवानल्पतेजसः ।
ते राजन्न प्रजानन्ति दिशं कांचन मोहिताः ॥५
ततो द्रौणिर्महावीर्यः पार्थस्य विचरिष्यतः ।
विवरं सूक्ष्ममालोक्य ज्यां नुनोद क्षुरेण सः ॥ ६
तदस्यापूजयन्देवाः कर्म दृष्ट्वाऽतिमानुषम् ।
न शक्तोऽन्यः पुमान्स्थातुमृते द्रौणेर्धनंजयम् ॥७
ततो द्रौणिर्धनुर्व्यस्य व्यपक्रम्य नरर्षभः ।
पुनरप्यभ्यहन्पार्थं हृदये कङ्कपत्रिभिः ॥ ८
ततः पार्थो महाबाहुः प्रहसन्स्वनवत्तदा ।
योजयामास च तदा मौर्व्या गाण्डीवमोजसा ॥९
तं दृष्ट्वा क्रुद्धमायान्तं प्रभिन्नमिव कुञ्जरम् ।
क्रुद्धः समाह्वयामास द्रौणिर्युद्धाय भारत ॥ १०
ततोऽर्धचन्द्रमाहृत्य तेन पार्थः समाहतः ।
चिच्छेद तस्य चापं च सूतं चाश्वं च तेजसा ।
विव्याध निशितैश्चापि शरैराशीविषोपमैः ॥ ११
सोऽन्यं रथं समास्थाय प्रत्यायाद्रथिपुङ्गवः ।
वारणेनेव मत्तेन मत्तो वारणयूथपः ॥ १२
ततः प्रववृते युद्धं पृथिव्यामेकवीरयोः ।
रणमध्ये द्वयोरेव सुमहद्रोमहर्षणम् ॥ १३
तौ वीरौ कुरवः सर्वे ददृशुर्विस्मयान्विताः ।
युध्यमानौ महात्मानौ द्विरदाविव संगतौ ॥ १४
तौ समाजघ्नतुर्वीरौ परस्परजयैषिणौ ।
शरै राशीविषाकारैर्ज्वलद्भिरिव पावकैः ॥ १५
अक्षयाविषुधी दिव्यौ पाण्डवस्य महात्मनः ।
तेन पार्थो रणे शूरस्तस्थौ गिरिरिवाचलः ॥ १६
अश्वत्थाम्नः पुनर्बाणाः क्षिप्रमभ्यस्यतो रणे ।
जग्मुः परिक्षयं शीघ्रमभूत्तेनाधिकोऽर्जुनः ॥ १७

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः ॥ ६१ ॥

अर्जुनेन युगपद्द्रोणादिभिः सह युद्धम् ॥ १ ॥

वैशंपायन उवाच ।
एतस्मिन्नन्तरे तत्र महावीर्यपराक्रमः ।
आजगाम महाबाहुः कृपः शस्त्रभृतांवरः ।
अर्जुनं प्रतियोद्धुं वै युद्धकामो महारथः ॥ १
अथ द्रौणे रथं त्यक्त्वा कृपस्य रथमुत्तमम् ।
आजगामार्जुनस्तूर्णं सूर्यवैश्वानरप्रभम् ॥ २
तौ वीरौ सूर्यसंकाशौ योत्स्यमानौ महारथौ ।
वार्षिकाविव जीमूतौ व्यरोचेतां व्यवस्थितौ ॥ ३
प्रगृह्य गाण्डिवं लोके विश्रुतं पुनरर्जुनः ।
अभ्ययाद्भरतश्रेष्ठो विनिघ्नञ्शरमालया ॥ ४
कृपश्च धनुरादाय तथैवार्जुनमभ्यगात् ॥ ५
प्रगृह्य बलवच्चापं नाराचात्रक्तभोजनान् ।
कृपः पार्थाय चिक्षेप शतशोऽथ सहस्रशः ॥ ६
जीमूत इव घर्मान्ते शरवर्षं विमुञ्चति ।
नन्दयन्सुहृदः सर्वान्प्रत्ययुध्यत फल्गुनम् ॥ ७
विकृष्य बलवच्चापं पाण्डवोऽमितविक्रमः ।
चचार समरे पार्थश्चित्रमार्गान्विदर्शयन् ॥ ८
सर्वाश्चैव दिशो बाणैः प्रदिशश्च महाबलः ।
एकच्छायमिवाकाशं सर्वतः कृतवान्प्रभुः ॥ ९
प्राच्छादयदमेयात्मा पार्थः शरशतैः कृपम् ।
उद्गतः समरे मेघो धाराभिरिव पर्वतम् ॥ १०
स शरैरर्पितः क्रुद्धः शितैरग्निशिखोपमैः ।
कृपो बभूव समरे विधूमोऽग्निरिव ज्वलन् ॥ ११
ततः शरसहस्रेण पार्थमप्रतिमौजसम् ।
अर्दयित्वा महाबाहुर्ननाद समरे कृपः ॥ १२
ततः कनकपुङ्खेन शरेण नतपर्वणा ।
बिभेद समरे पार्थः कृपस्य ध्वजमुत्तमम् ॥ १३
ततः पश्चान्महातेजा नाराचान्सूर्यसन्निभान् ।

जग्राह समरे पार्थो भूयो बहुशिलीमुखान् ॥ १४
तैस्तदानीं महाबाहुः कृपस्य रथरक्षिणः ।
जघान क्षत्रियश्रेष्ठो युध्यमानान्महारथान् ॥ १५
चन्द्रकेतुः सुकेतुश्च चित्राश्वो मणिमांस्तदा ।
मुञ्जमौलिश्च विक्रान्तो हेमवर्णो भयावहः ॥ १६
सुरथोऽतिरथश्चैव सुषेणोऽरिष्ट एव च ।
नृकेतुश्च सहानीकास्ते निषेदुर्गतासवः ॥ १७
तान्निहत्य ततः पार्थो निमेषादिव भारत ।
पुनरन्यान्समाधत्त त्रयोदश शिलीमुखान् ॥ १८
अथास्य युगमेकेन चतुर्भिश्चतुरो हयान् ।
षष्ठेन तु शिरः सङ्ख्ये कृपस्य रथसारथेः ॥ १९
त्रिभिस्त्रिवेणुं बलवान्द्वाभ्यामक्षं महाबलः ।
द्वादशेन तु भल्लेन कृपस्य सशरं धनुः ॥ २०
छित्त्वा वज्रनिकाशेन फल्गुनः प्रहसन्निव ।
त्रयोदशेनेन्द्रसमः प्रत्यविध्यत्स्तनान्तरे ॥ २१
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
अथ शक्तिं परामृश्य सूर्यवैश्वानरप्रभाम् ।
चिक्षेप सहसा क्रुद्धः पार्थायाद्भुतकर्मणे ॥ २२
तामर्जुनस्तथारूपां शक्तिं हेमपरिष्कृताम् ।
रुरोध सायकैस्तीक्ष्णैरर्धचन्द्रमुखैश्च ताम् ॥ २३
आपतन्तीं महोल्काभां चिच्छेद दशभिः शरैः ।
सापतद्दशधा भूमौ पार्थेन निहता शरैः ॥ २४
शक्त्यां तु विनिकृत्तायां विरथः शरपीडितः ।
गदापाणिरवप्लुत्य रथात्तूर्णममित्रहा ।
गदां चिक्षेप सहसा पार्थायामिततेजसे ॥ २५
सा च मुक्ता गदा गुर्वी रूपेणास्य परिष्कृता ।
अर्जुनस्य शरैर्नुन्ना प्रतिमार्गं जगाम सा ॥ २६
अथ खड्गं समुद्धृत्य शतचन्द्रं च भानुमत् ।
इयेष पाण्डवं हन्तुं कृपो लघुपराक्रमः ॥ २७
स शरद्वत्सुतस्तूर्णं महाचार्यः सुशिक्षितः ।
खेचरेव चचारैकः क्रमाचर्मासिधृग्भुवि ॥ २८
ततः क्षुरप्रैः कौन्तेयो दशभिः खड्गचर्मणी ।
निमेषादिव चिच्छेद तदद्भुतमिवाभवत् ॥ २९

खेचरः इवेतिच्छेदः ॥ २८ ॥

विषण्णवदनस्तत्र विनाशात्खड्गचर्मणोः ।
दन्तैर्दन्तच्छदान्दष्ट्वा चुकोप हृदि दीर्घवत् ॥ ३०
भवत्विति पुनश्चोक्त्वा युद्धापगमनोद्यतः ।
अश्वत्थाम्नस्तु स रथं कृपः समभिपुप्लुवे ।
स्वस्रीयस्य महातेजा जग्राह च धनुः पुनः ॥ ३१
एतस्मिन्नन्तरे क्रुद्धो भीष्मो द्रोणमथाब्रवीत् ।
दृष्ट्वा कृपं फल्गुनेन पीडितं चोर्जितं च तम् ॥ ३२
एकैकमस्मान्संग्रामे पराजयति फल्गुनः ।
अहं द्रोणश्च कर्णश्च द्रौणिर्गौतम एव च ।
अन्ये च बहवः शूरा वयं जेष्याम वासविम् ॥ ३३
समागम्य ततः सर्वे भीष्मद्रोणमुखा रथाः ।
अर्जुनं सहसा युक्ताः प्रत्ययुध्यन्त भारत ॥ ३४
स सायकमयैर्जालैः सर्वतस्तान्महारथान् ।
प्राच्छादयच्छरौघैस्तान्नीहार इव पर्वतान् ॥ ३५
नदद्भिश्च महानागैर्हेषमाणैश्च वाजिभिः ।
भेरीशङ्खनिनादैश्च स शब्दस्तुमुलोऽभवत् ॥ ३६
नागाश्वकायान्निर्भिद्य लौहानि कवचानि च ।
पार्थस्य शरवर्षाणि न्यपतञ्शतशः क्षितौ ॥ ३७
त्वरमाणः शरानस्यन्पाण्डवस्तु प्रकाशते ।
मध्यंदिनगतोऽर्चिष्माञ्छरदीव दिवाकरः ॥ ३८
अविषह्य शरान्सर्वे पार्थचापच्युतान्रणे ।
उदक्प्रयान्ति विध्वस्ता रथेभ्यो रथिनस्तदा ।
सादिनश्चाश्वपृष्ठेभ्यो भूमौ चापि पदातयः ॥ ३९
शरैस्तु ताड्यमानानां कवचानां महात्मनाम् ।
ताम्रराजतलौहानां प्रादुरासीन्महास्वनः ॥ ४०
छन्नमायोधनं जज्ञे शरीरैर्गतचेतसाम् ।
श्रान्त्या गलितशस्त्राणां पततामश्वसादिनाम् ॥ ४१
शून्यान्कुर्वन्रथोपस्थान्मानवैरास्तृणोन्महीम् ।
प्रनृत्यन्निव संग्रामे चापहस्तो धनंजयः ।
शिरांस्यपातयत्सङ्ख्ये क्षत्रियाणां नरर्षभः ॥ ४२
श्रुत्वा गाण्डीवनिर्घोषं विष्फूर्जितमिवाशनेः ।
त्रस्तानि सर्वसैन्यानि व्यलीयन्त च भागशः ॥ ४३
कुण्डलोष्णीषधारीणि जातरूपस्रजानि च ।

एकषष्टितमोऽध्यायः ॥ ६१ ॥

पतितानि स्म दृश्यन्ते शिरांसि रणमूर्धनि ॥ ४४
विशिखोन्मथितैर्गात्रैर्बाहुभिश्च सकार्मुकैः ।
सहस्ताभरणैश्चान्यैः प्रच्छन्ना भाति मेदिनी ॥४५
शिरसां पात्यमानानां समरे निशितैः शरैः ।
अश्मवृष्टिरिवाकाशादभवद्भरतर्षभ ॥ ४६
दर्शयित्वा तदाऽऽत्मानं रौद्रं रौद्रपराक्रमः ।
जघान समरे शूराञ्छतशोऽथ सहस्रशः ॥ ४७
तथावरुद्धश्चारण्ये दशवर्षाणि त्रीणि च ।
क्रोधाग्निमुत्ससर्जाजौ धार्तराष्ट्रेषु पाण्डवः ॥ ४८
तस्य तद्दहतः सैन्यं दृष्ट्वा चास्य पराक्रमम् ।
सर्वे शान्तिपरा योधा धार्तराष्ट्रस्य भारत ॥ ४९
यथा नलवनं नागः प्रभिन्नः षाष्टिहायनः ।
एवं सर्वानपामृद्नादर्जुनः शस्त्रतेजसा ॥ ५०
विद्राव्य च ततः सैन्यं त्रासयित्वा महारथान् ।
अर्जुनो जयतांश्रेष्ठः पर्यावर्तत भारत ॥ ५१
तस्य मार्गान्विचरतो निघ्नतश्च रणाजिरे ।
प्रावर्तत नदी घोरा शोणितान्त्रतरङ्गिणी ॥ ५२
अस्थिशैवालसंबाधां संग्रामे पार्थनिर्मिताम् ।
शरचापप्लवां घोरां मांसशोणितकर्दमाम् ॥ ५३
रथोडुपां चान्त्रसर्पां केशशैवालशाड्वलाम् ।
करवालासिपाठीनां चामरोष्णीषफेनिलाम् ॥५४
अश्वग्रीवामहावर्तां कबन्धजलमानुषाम् ।
काककङ्करुतां तीव्रां सारसक्रौञ्चनादिताम् ॥५५
सिंहनादमहानादां शङ्खस्वनमहास्वनाम् ।
वीरोत्तमाङ्गपद्माढ्यां शरचापमहानलाम् ॥ ५६
पदातिमत्स्यकलुषां गजशीर्षककच्छपाम् ।
गोमायुमृगसंघुष्टां मांसमज्जाभिकर्दमाम् ॥ ५७
प्रावर्तयन्नदीं घोरां पिशाचगणसेविताम् ।
अपारामनिवार्यां च रक्तोदां सर्वतो वृताम् ॥५८
अभीक्ष्णमकरोत्पार्थो नदीमुत्तमशोणिताम् ।
गजवर्ष्ममहाद्वीपामश्वदेहमहाशिलाम् ॥ ५९
पदातिदेहसंघाटां रथावलिमहातरुम् ।
केशशाड्वलसंछन्नां सुतरां भीतिदां नृणाम् ॥ ६०
अगाधरक्तोदवहां यमसागरगामिनीम् ।
दुस्तरां भीरुमर्त्यानां शूराणां सुतरां नृप ।
प्रावर्तयन्नदीमेवं भीषणां पाकशासनिः ॥ ६१
तस्याददानस्य शरान्सन्दधानस्य मुञ्चतः ।
विकर्षतश्च गाण्डीवं न किंचिद्ददृशेऽन्तरम् ॥ ६२

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ॥ ६२ ॥

रणाय भीष्मार्जुनयोः समागमे देवैस्तयोः प्रशंसनम् ॥ १ ॥

वैशंपायन उवाच ।
एवं विद्राव्य तत्सैन्यं पार्थो भीष्ममुपाद्रवत् ।
त्रस्तेषु सर्वसैन्येषु कौरव्यस्य महात्मनः ॥ १
बाणान्धनुषि संधाय चतुरः पाकशासनिः ।
भीष्मं च प्राहिणोद्धीतस्तं द्वाभ्यामभ्यवादयत् ॥२
तस्य कर्णान्तिकं गत्वा द्वावब्रूतां च कौशलम् ।
सोऽप्याशीरवदद्भीष्मः कौन्तेयो जयतामिति ॥३
नरसिंहमुपायान्तं जिगीषन्तं परात्रणे ।
वृषसेनोऽभ्ययात्तूर्णं योद्धुकामो धनंजयम् ॥ ४
वैकर्तनात्मजो वीरः संग्रामे लोकविश्रुतः ।
शौर्यवीर्यादिभिः कर्णाद्बिम्बाद्बिम्ब इवोद्धृतः ॥५
आत्मना युध्यतस्तस्य वृषसेनस्य पाण्डवः ।
मुहूर्तं तस्य तद्दृष्ट्वा हस्तलाघवपौरुषे ।
तुतोष च ततः पार्थो वृषसेनपराक्रमम् ॥ ६
तस्य पार्थस्तदा क्षिप्रं क्षुरधारेण कार्मुकम् ।
न्यकृन्तद्गृध्रपत्रेण जाम्बूनदपरिष्कृतम् ॥ ७
अथैनं पञ्चभिर्भूयः प्रत्यविध्यत्स्तनान्तरे ।
स पार्थबाणाभिहतो रथात्प्रस्कन्द्य दुद्रुवे ॥ ८
दुःशासनो विकर्णश्च शकुनिश्च विविंशतिः ।
आयान्तं भीमधन्वानं पर्यकीर्यन्त पाण्डवम् ॥ ९
तेषां पार्थो रणे क्रुद्धः शरैः सन्नतपर्वभिः ।
युगं ध्वजं शरासं च चिच्छेद तरसा रणे ॥ १०

ते निकृत्तध्वजाः सर्वे छिन्नकार्मुकवेष्टनाः ।
रणमध्यादपययुः पार्थबाणाभिपीडिताः ॥ ११
ततः प्रहस्य बीभत्सुर्वैराटिमिदमब्रवीत् ।
एतं मे प्रापयेदानीं तालं सौवर्णमुच्छ्रितम् ॥१२
मेघमध्ये यथा विद्युदुज्ज्वलन्ती पुनः पुनः ।
असौ शान्तनवो भीष्मस्तत्र याहि परंतप ॥ १३
अस्त्राणि तस्य दिव्यानि दर्शयिष्यामि संयुगे ।
घोररूपाणि चित्राणि लघूनि च गुरूणि च ॥१४
अस्माकं पोषको नित्यमाबाल्यान्मत्स्यभूमिप ।
श्रेयस्कामी सदाऽस्माकं योगक्षेमकरः सदा ॥१५
तस्याङ्के विर्धितो बाल्ये तद्योत्स्येऽनेन सांप्रतम् ।
अस्माकं धार्तराष्ट्राणां शमकामो दिवानिशम् ॥१६
वैशंपायन उवाच ।
तस्य तद्वचनं श्रुत्वा वैराटिः पार्थसारथिः ।
वाहयच्चोदितस्तेन रथं भीष्मरथं प्रति ॥ १७
तं रथं चोदितं दृष्ट्वा फल्गुनस्य रथोत्तमम् ।
वायुनेव महामेघं सहसाऽभिसमीरितम् ।
तं प्रत्ययाच्च गाङ्गेयो रथेनादित्यवर्चसा ॥ १८
आयान्तमर्जुनं दृष्ट्वा भीष्मः परपुरंजयः ।
प्रत्युज्जगाम युद्धार्थी महर्षभमिवर्षभः ॥ १९
तथा हि गुप्त एतेषां दुराधर्षः पितामहः ।
हन्यमानेषु योधेषु धनंजयमुपाद्रवत् ॥ २०
प्रगृह्य कार्मुकश्रेष्ठं जातरूपपरिष्कृतम् ।
शरानादाय तीक्ष्णाग्रान्मर्मदेहप्रमाथिनः ॥ २१
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
शुशुभे स नरव्याघ्रो गिरिः सूर्योत्तरो यथा ॥२२
प्राध्माप्य शङ्खं गाङ्गेयो धार्तराष्ट्रान्प्रहर्षयन् ।
प्रदक्षिणमुपावृत्य बीभत्सुं प्रत्यवारयत् ॥ २३
तमवेक्ष्य समायान्तं कौन्तेयः परवीरहा ।
प्रत्यगृह्णादमेयात्मा प्रियातिथिमिवागतम् ।
देवदत्तं महाशङ्खं प्रदध्मौ युधि वीर्यवान् ॥ २४
तौ शङ्खनादावत्यर्थं भीष्मपाण्डवयोस्तदा ।
नादयामासतुर्द्यां च खं च भूमिं च सर्वशः ॥ २५
अन्तरिक्षे च जल्पन्ति सर्वे देवाः सवासवाः ।
यदर्जुनः कुरून्सर्वान्प्राक्रन्तच्छस्त्रतेजसा ॥ २६
कुरुश्रेष्ठाविमौ वीरौ रणे भीष्मधनंजयौ ।
सर्वास्त्रकुशलौ वीरावप्रमत्तौ रणे सदा ॥ २७
उभौ देवमनुष्येषु विश्रुतौ स्वपराक्रमैः ।
उभौ परमसंरब्धावुभौ दीप्तधनुर्धरौ ॥ २८
समागतौ नरव्याघ्रौ व्याघ्राविव तरस्विनौ ।
उभौ सदृशकर्माणौ सूर्यस्याग्नेश्च भारत ॥ २९
वासुदेवस्य सदृशौ कार्तवीर्यसमावुभौ ।
उभौ विश्रुतकर्माणावुभौ शूरौ महाबलौ ।
सर्वास्त्रविदुषां श्रेष्ठौ सर्वशस्त्रभृतां वरौ ॥ ३०
अग्नेरिन्द्रस्य सोमस्य यमस्य धनदस्य च ।
अनयोः सदृशं वीर्यं मित्रस्य वरुणस्य च ॥ ३१
को वा कुन्तीसुतं युद्धे द्वैरथेनोपयास्यति ।
ऋते शान्तनवादन्यः क्षत्रियो भुवि विद्यते ॥३२
इति संपूजयामासुर्भीष्मं दृष्ट्वाऽर्जुनं गतम् ।
तं रणे संप्रहृष्यन्तं दृष्ट्वा देवाः सवासवाः ॥ ३३
अथ बहुविधतूर्यशङ्खघोषै-
विविधरवैः सह सिंहनादमिश्रैः ।
कुरुवृषभमपूजयत्कुरूणां
बलममराधिपसैन्यसप्रभं तत् ॥ ३४

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

अर्जुनेन भीष्मपराजयः ॥ १ ॥

वैशंपायन उवाच ।
ततो भीष्मः शरानष्टौ ध्वजे पार्थस्य वीर्यवान् ।
समार्पयन्महावेगाञ्ज्वलतः पन्नगानिव ॥ १
ते ध्वजं पाण्डुपुत्रस्य समासाद्य पतत्रिणः ।
ध्वजस्थं कपिमाजघ्नुः ध्वजाग्रनिलयांश्च तान् ॥२
सारथिं च हयांश्चास्य विव्याध दशभिः शरैः ।

उरस्यताडयत्पार्थं त्रिभिरेवायसैः शरैः ॥ ३
ततोऽर्जुनः शरैस्तीक्ष्णैर्विद्ध्वा कुरुपितामहम् ।
ध्वजं च सारथिं चापि विव्याध दशभिः शरैः ॥४
तद्युद्धमभवद्घोरं रोमहर्षणमद्भुतम् ।
भीष्मस्य सह पार्थेन बलिवासवयोरिव ॥ ५
सन्ततं शरजालाभिराकाशं समपद्यत ।
अम्बुदैरिव धाराभिस्तयोः कार्मुकनिःसृतैः ॥ ६
भल्लैर्भल्लाः समाहत्य कुरुपाण्डवयो रणे ।
अन्तरिक्षे व्यराजन्त खद्योताः प्रावृषीव हि ॥ ७
अग्निचक्रोपमं घोरं मण्डलीकृतमाहवे ।
गाण्डीवमभवज्जिष्णोः सव्यं दक्षिणमस्यतः ॥ ८
पर्वतं वारिधाराभिश्छादयन्निव तोयदः ।
अर्जुनश्छादयद्भीष्मं शरवर्षैरनेकशः ॥ ९
तां समुद्रमिवोद्भूतां शरवृष्टिं समुद्यताम् ।
व्यधमत्सायकैर्भीष्मः सोर्जुनं च न्यवारयत् ॥१०
ततस्तानि विसृष्टानि शरजालानि सङ्घशः ।
आहतानि व्यशीर्यन्त अर्जुनस्य रथं प्रति ॥ ११
ततः कनकपुङ्खाग्रैः शितैः संनतपर्वभिः ।
पतद्भिः खगवाजैश्च द्यौरासीत्संवृता शरैः ॥ १२
ततः प्रासृजदुग्राणि शरजालानि पाण्डवः ।
तावन्ति शरजालानि भीष्मः पार्थाय प्राहिणोत् ॥

साश्वं ससूतं सरथं स पार्थं
समाचिनोद्धारतो वत्सदन्तैः ।
प्रच्छादयामास दिशश्च सर्वा
नभश्च बाणैस्तपनीयपुङ्खैः ॥ १४

ततो देवर्षिगन्धर्वाः साधुसाध्वित्यपूजयन् ।
दुष्करं कृतवान्भीष्मो यदर्जुनमवारयत् ॥ १५
बलवानर्जुनो दक्षः क्षिप्रकारी च पाण्डवः ।
कोऽन्यः समर्थः पार्थस्य वेगं धारयितुं रणे ॥ १६
ऋते शान्तनवाद्भीष्मात्कृष्णाद्वा देवकीसुतात् ।
आचार्यवरमुख्याद्वा भारद्वाजान्महाबलात् ॥ १७
अस्त्रैरस्त्राणि संवार्य क्रीडतः पुरुषोत्तमौ ।
चक्षूंषि सर्वभूतानां मोदयन्तौ महाबलौ ॥ १८
प्राजापत्यं तथैवैन्द्रमाग्नेयं च सुदारुणम् ।
कौबेरं वारुणं चैव याम्यं वायव्यमेव च ।
प्रयुञ्जानौ महात्मानौ समरे तौ विरेजतुः ॥ १९
विस्मितान्यथ भूतानि तौ दृष्ट्वा संयुगे तदा ।
साधु पार्थ महाबाहो साधु भीष्मेति चाब्रुवन् ॥२०
नैतदन्यो मनुष्येषु प्रदर्शयितुमाहवे ।
महास्त्राणां संप्रयोगं समरे भीष्मपार्थयोः ॥ २१
एवं सर्वास्त्रविदुषोरस्त्रयुद्धमवर्तत ॥ २२
अथ जिष्णुरुदावृत्य शितधारेण कार्मुकम् ।
न्यकृन्तद्गृध्रपत्रेण शातकुम्भपरिष्कृतम् ॥ २३
निमेषान्तरमात्रेण भीष्मोऽन्यत्कार्मुकं रणे ।
समादाय नरव्याघ्रः सज्यं चक्रे महाबलः ॥२४
शरांश्च सुबहून्क्रुद्धो मुमोचाशु धनंजये ।
अर्जुनोपि शरांस्तीक्ष्णान्भीष्माय निशितान्बहून् ।
चिक्षेप च महातेजास्तथा भीष्मश्च पाण्डवे ॥२५
तयोर्दिव्यास्त्रविदुषोरस्यतोरनिशं शरान् ।
न विशेषस्तदा राजन्दृश्यते सुमहात्मनोः ॥ २६
अथावृणोद्दश दिशः शरैरतिरथस्तदा ।
किरीटमाली कौन्तेयः शूरं शान्तनवं तथा ॥२७
अतीव पाण्डवो भीष्मं भीष्मश्चातीव पाण्डवम् ।
बभूव तत्र सङ्ग्रेऽस्मिन्लोके राजंस्तदद्भुतम् ॥ २८
पाण्डवेन हताः शूरा भीष्मस्य रथरक्षिणः ।
शेरते स्म महाबाहो कौन्तेयस्याभितो रथम् ॥२९
ततो गाण्डीवनिर्मुक्ता निरमित्रं चिकीर्षवः ।
असक्ताः पुङ्खसंसक्ताः श्वेतवाहनपत्रिणः ॥ ३०
निष्पतन्तो रथात्तस्य धौता हैरण्यवाससः ।
आकाशे प्रत्यदृश्यन्त हंसानामिव पङ्क्तयः ॥ ३१
तस्य तद्दिव्यमस्त्रं हि प्रगाढं चित्रमस्यतः ।
प्रेक्षन्ते स्मान्तरिक्षस्थाः सर्वे देवाः सवासवाः ॥३२
तं दृष्ट्वा परमप्रीतो गन्धर्वश्चित्रमद्भुतम् ।
शशंस देवराजाय चित्रसेनः प्रतापवान् ॥ ३३
पश्येमानरिनिर्दारान्संसक्तानिव गच्छतः ।
चित्ररूपमिदं जिष्णोर्दिव्यमस्त्रमुदीर्यतः ॥ ३४
नेदं मनुष्याः श्रद्दध्युर्न हीदं तेषु विद्यते ।
सौराणां च महास्त्राणां विचित्रोऽयं समागमः ॥३५

मध्यन्दिनगतं सूर्यं प्रतपन्तमिवाम्बरे ।
न शक्नुवन्ति सैन्यानि पाण्डवं प्रसमीक्षितुम् ॥३६
उभौ विश्रुतकर्माणावुभौ शूरौ महीक्षिताम् ।
उभौ विचित्रकर्माणावुभौ युधि दुरासदौ ॥ ३७
इत्युक्तो देवराजस्तु पार्थभीष्मसमागमम् ।
पूजयामास दिव्येन पुष्पवर्षेण भारत ॥ ३८
[*अश्वत्थामा ततोऽभ्येत्य द्रुतं कर्णमभाषत ।
अहमेको हनिष्यामि समेतान्सर्वपाण्डवान् ॥३९
इति कर्ण समक्षं मे सभामध्ये त्वयोदितम् ।
न तु तत्कृतमेकस्माद्भीतो धावसि सूतज ॥ ४०
वैचित्रवीर्यजाः सर्वे त्वामाश्रित्य पृथासुतान् ।
जेतुमिच्छन्ति संग्रामे भवान्युध्यस्व फल्गुनम्॥४१
अश्वत्थामोदितं वाक्यं श्रुत्वा दुर्योधनस्तदा ।
प्रत्युवाच रुषा द्रौणिं कर्णप्रियचिकीर्षया ॥ ४२
मा मानभङ्गं विप्रेन्द्र कुरु विश्रुतकर्मणः ।
मानभङ्गेन राज्ञां तु बलहानिर्भविष्यति ॥ ४३
शूरा वदन्ति संग्रामे वाचा कर्माणि कुर्वते ।
पराक्रमन्ति संग्रामे स्वस्य वीर्यानुसारतः ॥ ४४
तस्मात्त्वं नार्हति भवान्गर्हितुं शूरसंमतम् ।
राज्ञैवमुक्तः स द्रौणिर्गतरोषोऽभवत्तदा ॥] ४५
ततो भीष्मः शान्तनवो बाणान्पार्श्वे समार्पयत् ।
अस्यतः प्रतिसन्धाय विवृतं सव्यसाचिनः ॥४६
ततः प्रसह्य बीभत्सुः पृथुधारेण कार्मुकम् ।
न्यकृन्तद्गृध्रपत्रेण भीष्मस्यामिततेजसः ॥ ४७
अथैनं दशभिः पश्चात्प्रत्यविध्यत्स्तनान्तरे ।
यतमानं पराक्रान्तं कुन्तीपुत्रो धनञ्जयः ॥ ४८
स पीडितो महाबाहुर्गृहीत्वा रथकूबरम् ।
गाङ्गेयो युधि दुर्धर्षस्तस्थौ दीप इवातुरः ॥ ४९
तं विसंज्ञमपोवाह संयन्ता रथवाजिनाम् ।
उपदेशमनुस्मृत्य रक्षमाणो महारथम् ॥ ५०
पराक्रमे च शौर्ये च वीर्ये सत्त्वे बले रणे ।
शस्त्रास्त्रेषु च सर्वेषु लाघवे दूरपातने ॥ ५१
यस्य नास्ति समो लोके पितृदत्तवरश्च यः ।
जितश्रमो जितारातिर्निस्तन्द्रिः खेदवर्जितः ।
यः स्वेच्छामरणः शूरः पितृशुश्रूषणे रतः ॥ ५२
दुर्योधनहितार्थाय युद्ध्वा पार्थेन संगरे ।
पृथासुतहितार्थाय पराजित इवाभवत् ॥ ५३

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

अर्जुनेन द्रोणादिपञ्चरथान्प्रत्यभियानम् ॥ १ ॥

वैशंपायन उवाच ।
भीष्मं विजित्य संग्रामे कुरूणां मिषतां रणे ।
ततो युद्धमनाः प्रायात्पार्थः पञ्च महारथान् ॥ १
आददानश्च नाराचान्विमृशन्निषुधी अपि ।
संस्पृशानश्च गाण्डीवं भूयः कर्णं समभ्यगात् ॥२
द्रौणिरुवाच ।
कर्ण यत्तत्सभामध्ये बह्वबद्धं प्रभाषसे ।
न मे युधि समोऽस्तीति तदिदं प्रत्युपस्थितम् ॥३
एषोऽन्तक इव क्रुद्धः सर्वभूतावमर्दनः ।
अदूरात्प्रत्युपस्थाय जृम्भते केसरी यथा ।
न पलायस्व शूरश्चेत्स्थित्वा युध्यस्व फल्गुनम् ॥४
कर्ण उवाच ।
नाहं बिभेमि बीभत्सोः कृष्णाद्वा देवकीसुतात् ।
पाण्डवेभ्योपि सर्वेभ्यः क्षत्रधर्ममनुव्रतः ॥ ५
सत्वाधिकानां शूराणां धनुर्वेदोपजीविनाम् ।
दर्शनाज्जायते दर्पः स्वरश्च न विषीदति ॥ ६
पश्यत्वाचार्यपुत्रो मामर्जुनेन समं युधि ।

गास्ता विजित्येति थ. ध. पाठः ॥ १ ॥

* इमे कुण्डलिताः श्लोकाः ध. पुस्तके वर्तन्ते ।

युध्यमानं सुसंयुक्तं दैवं तु दुरतिक्रमम् ॥ ७
अश्वत्थामोवाच ।
को दोषः कर्ण शूराणां वाचा साकं हि पौरुषम् ।
विद्यते यदि तल्लोके गुणोत्तरमिहोच्यते ॥ ८
युध्यस्व त्वमभीः पार्थ मपलायस्व मा रणात् ।
उक्तं वचः स्मरन्कर्ण नाहमित्यादि संयुगे ॥ ९
वैशंपायन उवाच ।
तं समन्ताद्रथाः पञ्च परिवार्य धनञ्जयम् ।
त इषून्सम्यगस्यन्तो मुमुक्षन्तोपि जीवितात् ॥१०
ते लाभमिव मन्वानाः क्षिप्रमार्च्छन्धनञ्जयम् ।
शरौघान्सम्यगस्यन्तो जीमूता इव वार्षिकाः ॥११
बहुभिर्निशितैर्बाणैर्विविधैर्लोमवापिभिः ।
आद्रवन्प्रत्यवस्थाय प्रत्यविध्यन्धनञ्जयम् ॥ १२
ततः प्रहस्य बीभत्सुः सर्वशस्त्रभृतांवरः ।
दिव्यमस्त्रं विकुर्वाणः प्रत्ययाद्रथसत्तमान् ॥ १३
यथा रश्मिभिरादित्यः प्रच्छादयति मेदिनीम् ।
एवं गाण्डीवनिर्मुक्तैः शरैः प्राच्छादयद्दिशः ॥१४
न रथानां न नागानां न ध्वजानां न वाजिनाम् ।
अविद्धं निशितैर्बाणैरासीद्द्व्यङ्गुलमन्तरम् ॥ १५
सर्वे शान्तिपरा योधाः स्वचित्तं नाभिजज्ञिरे ।
हस्तिनोऽश्वाश्च वित्रस्ता व्यवलीयन्त भारत॥१६
यथा नलवनं नागः प्रभिन्नः षाष्टिहायनः ।
एवं सर्वानपामृद्नादर्जुनः शस्त्रतेजसा ॥ १७
गाण्डीवस्य तु घोषेण पृथिवी समकम्पत ।
मनांसि धार्तराष्ट्राणामप्यक्रन्तद्धनञ्जयः ॥ १८
ततो विगाह्य सैन्यानां मध्यं शस्त्रभृतांवरः ।
सारथिं समरे शूरस्त्वभ्यभाषत वीर्यवान् ॥ १९
संनियम्य हयानेतान्मन्दं वाहय सारथे ।
आचार्यपुत्रं समरे योधयिष्येऽपराजितम् ॥ २०
पुरा ह्येष मया युक्तः स मे भवति पृष्ठतः ॥ २१
एवमुक्तेऽर्जुनेनासावश्वत्थामरथं प्रति ।
विराटपुत्रो जवनान्भृशमश्वानचोदयत् ॥ २२
कर्ण उवाच ।
एषोपयाति बीभत्सुर्व्यथितो गाढवेदनः ।
तं तु तत्रैव यास्यामि नासौ मुच्येत जीवितात् २३
द्रोण उवाच ।
नासौ भयेन निर्यातो महात्मा पाकशासनिः ।
नैवं भीता निवर्तन्ते न पुनर्गाढवेदनाः ॥ २४
यद्येनमभिसंरब्धं पुनरेवाभियास्यसि ।
बहून्यस्त्राणि जानीते न पुनर्मोक्ष्यते भवान् ॥२५
दिष्ट्या दुर्योधनो मुक्तो दिष्ट्या गावः पलायिताः ।
मुक्तो दिष्ट्या च संग्रामे किं रणेन करिष्यसि ॥ २६
क्रोशमात्रमपाक्रम्य बलमन्वानयामहे ।
अन्वागतबलाः पार्थ पुनरेवाभियास्यथ ॥ २७

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

अर्जुनेनोत्तरंप्रति भीष्मादिसकाशे रथप्रापणप्रेरणापूर्वकं तदाप्यायनाय स्वपराक्रमप्रकथनम् ॥ १ ॥ तदा दुःशासनादिपराभवनपूर्वकं भीष्मादिभिः सहायोधनम् ॥ २ ॥

वैशंपायन उवाच ।
कर्ण पराजितं दृष्ट्वा पार्थो वैराटिमब्रवीत् ।
एतं मां प्रापयेदानीं रथवृन्दं प्रहारिणाम् ॥ १
यत्र शान्तनवो भीष्मः सर्वेषां नः पितामहः ।
सुयुद्धं काङ्क्षमाणो वै रथे तिष्ठति दंशितः ॥ २
तालो वै काञ्चनो यत्र वज्रवैडूर्यभूषितः ।
अतीव समरे भाति मातरिश्वप्रकम्पितः ॥ ३
दारुणं प्रहरिष्यामि रथवृन्दानि धन्विनाम् ।
आदास्याम्यहमेतेषां धनुर्ज्यावेष्टनानि च ॥ ४
अस्यन्तं दिव्यमस्त्राणि चित्रमुत्तर पश्यसि ॥ ५
शतह्रदां जृम्भमाणां मेघस्थां प्रावृषीव च ।
सुवर्णपृष्ठं गाण्डीवं पश्यन्तु कुरवो मम ॥ ६

पुरा ह्येष मया मुक्त इति ख. पाठः ॥ २१ ॥

दक्षिणेनाथ वामेन कतमेन स्विदस्यति ।
इति मां शत्रवः सर्वे न विज्ञास्यन्ति सारथे ॥७
अस्त्रोदकां हयावर्तां नागनक्रां रथह्रदाम् ।
नदीं प्रस्कन्दयिष्यामि परलोकापहारिणीम् ॥ ८
पाणिपादशिरःपृष्ठबाहुशङ्खचराचरम् ।
वनं कुरूणां छेत्स्यामि भल्लैः सन्नतपर्वभिः ॥ ९
तूणीशयाः सुपुङ्खाग्रा विशिखा दुन्दुभिस्वनाः ।
मया प्रमुक्ताः संग्रामे कुरून्धक्ष्यन्ति सायकाः १०
ध्वजवृक्षं शरतृणं नागाश्वश्वापदाकुलम् ।
रथसिंहगणैर्युक्तं धनुर्वल्लिसमाकुलम् ।
वनमादीपयिष्यामि कुरूणामस्त्रतेजसा ॥ ११
जयतो भारतीं सेनामेकस्य मम संयुगे ।
शतं मार्गा भविष्यन्ति पावकस्येव कानने ॥१२
मया चक्रमिवाविद्धं सैन्यं द्रक्ष्यसि केवलम् ।
तानहं रथनीडेभ्यः परलोकाय शात्रवान् ।
एकः प्रद्रावयिष्यामि चक्रपाणिरिवासुरान् ॥१३
असंभ्रान्तो रथे तिष्ठन्समेषु विषमेषु च ।
मार्गमावृत्य तिष्ठन्तमपि भेत्स्यामि पर्वतम् ॥ १४
अहमिन्द्रस्य संग्रामे द्विषतो बलदर्पितान् ।
मातलिं सारथिं कृत्वा निवातकवचात्रणे ।
हतवान्सर्वतः सर्वान्धावतो युध्यतस्तदा ॥ १५
निवातकवचान्हत्वा गाण्डीवास्त्रैः सहस्रशः ।
परं पारे समुद्रस्य हिरण्यपुरमारुजम् ॥ १६
हत्वा षष्टिसहस्राणि रथानामुग्रधन्विनाम् ।
पौलोमान्कालकेयांश्च समरे भृशदारुणान् ।
असुरानहनं घोरात्रौद्रेणास्त्रेण सारथे ॥ १७
अहमिन्द्राद्दृढां मुष्टिं ब्रह्मणः क्षिप्रहस्तताम् ।
प्रगाढनिपुणं चित्रमतिवृद्धं प्रजापतेः ॥ १८
रौद्रं रुद्रादहं वेद्मि वारुणं वरुणादपि ।
सौर्यं सूर्यादहं वेद्मि याम्यं दण्डधरादपि ॥ १९
अस्त्रमाग्नेयमग्नेश्च वायव्यं मातरिश्वनः ।
अन्यैर्देवैरहं प्राप्तः को मां विषहते पुमान् ॥ २०
अद्य गाण्डीवनिर्मुक्तैःशरौघै रोमहर्षणैः ।
कुरूणां पातयिष्यामि रथवृन्दानि धन्विनाम् २१

वैशंपायन उवाच ।
एवमाश्वासितस्तेन वैराटिः सव्यसाचिना ।
व्यगाहत रथानीकं भीमं भीष्मस्य वाजिभिः ॥२२
रथिसिंहमनाधृष्यं जिगीषन्तं परात्रणे ।
अभ्यधावत्तदैवोग्रो ज्यां विकर्षन्धनञ्जयः ॥ २३
दुःशासनोऽभ्ययात्तूर्णमर्जुनं भरतर्षभ ॥ २४
अन्येऽपि चित्राभरणा युवानो मृष्टकुण्डलाः ।
अभ्ययुर्भीमधन्वानो मौर्वीं पर्यस्य बाहुभिः ॥२५
दुःशासनो विकर्णश्च वृषसेनो विविंशतिः ।
अभीता भीमधन्वानं पाण्डवं पर्यवारयन् ॥ २६
तस्य दुःशासनः षष्टिं वामपार्श्वे समार्पयत् ।
अस्यतः प्रतिसन्धाय कुन्तीपुत्रस्य धीमतः ॥ २७
पुनश्चैव स भल्लेन विद्ध्वा वैराटिमुत्तरम् ।
द्वितीयेनार्जुनं वीरं प्रत्यविध्यत्स्तनान्तरे ॥ २८
तस्य जिष्णुरुदावृत्य क्षुरधारेण कार्मुकम् ।
प्राकृन्तद्गृध्रपत्रेण जातरूपपरिष्कृतम् ॥ २९
अथैनं पञ्चभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे ।
सोपयातो रथोपस्थात्पार्थबाणाभिपीडितः ॥ ३०
सर्वा दिशश्चाभ्यपतद्बीभत्सुरपराजितः ।
तं विकर्णः शरैस्तीक्ष्णैर्गृध्रपक्षैः शिलाशितैः ।
विव्याध परवीरघ्नमर्जुनं धृतराष्ट्रजः ॥ ३१
ततस्तमपि कौन्तेयः शरेण नतपर्वणा ।
ललाटेऽभ्यहनद्गाढं स विद्धः प्राद्रवद्भयात् ॥ ३२
ततः पार्थमुपाद्रुत्य दुस्सहः सविविंशतिः ।
अवाकिरच्छरैस्तीक्ष्णैः परीप्सन्भ्रातरं रणे ॥ ३३
तावुभौ गृध्रपत्राभ्यां निशिताभ्यां धनञ्जयः ।
विव्याध युगपद्व्यग्रस्तयोर्वाहानसूदयत् ॥ ३४
तौ हताश्वौ तु विद्धाङ्गौ धृतराष्ट्रात्मजावुभौ ।
अभिपत्य रथैरन्यैरपनीतौ पदानुगैः ॥ ३५
व्यद्रावयदशेषांश्च धृतराष्ट्रसुतांस्तदा ।
विद्राव्य च रणे पार्थो रणभूमिं व्यराजयत् ॥ ३६
किरीटमाली कौन्तेयो लब्धलक्षः प्रतापवान् ।
पातयन्नुत्तमाङ्गानि बाहूंश्च परिघोपमान् ॥ ३७
अशेरत महावीराः शतशो रुक्ममालिनः ॥ ३८

कमलदिनकरेन्दुसन्निभैः
सितदशनैः सुमुखाक्षिनासिकैः ।
रुचिरमकरकुण्डलैर्मही
पुरुषशिरोभिरथास्तृता बभौ ॥ ३९
सुनसं चारुदीप्ताक्षं कृप्तश्मश्रु स्वलंकृतम् ।
अदृश्यत शिरश्छिन्नमनेकं हेमकुण्डलम् ॥ ४०
एवं तत्प्रहतं सैन्यं समन्तात्प्रद्रुतं भयात् ॥ ४१
अथ दुर्योधनः कर्णः सौबलः शकुनिस्तदा ।
द्रोणश्च द्रोणपुत्रश्च कृपश्चातिरथो रणे ॥ ४२
सहिता विजयं तत्र योधयन्तो महारथाः ।
विष्फारयन्तश्चापानि बलवन्ति महाबलाः ॥ ४३
ततः कीर्णपताकेन रथेनादित्यवर्चसा ।
पुनरावृत्य मार्गस्थं ददृशुर्वानरध्वजम् ॥ ४४
ते महास्त्रैर्महेष्वासाः परिवार्य धनञ्जयम् ।
अभ्यवर्षन्सुसंक्रुद्धा महामेघा इवाचलम् ॥ ४५
शरौघान्सम्यगस्यन्तो जीमूता इव शारदाः ।
युद्धे तस्थुर्महावीर्याः प्रतपन्तः किरीटिनम् ॥ ४६
इषुभिर्बहुभिस्तूर्णं निशितैर्लोमवाहिभिः ।
अदूरात्प्रत्यवस्थाय पाण्डवं समयोधयन् ॥ ४७
ततः प्रहस्य बीभत्सुस्तमैन्द्रं पञ्चवार्षिकम् ।
अस्त्रमादित्यसंकाशं गाण्डीवे समयोजयत् ॥ ४८
नाक्षाणां न च चक्राणां न रथानां न वाजिनाम् ।
अङ्गुलाद्व्यङ्गुलाद्वापि विवृतं प्रत्यदृश्यत ॥ ४९
यथा रश्मिभिरादित्यो वृणुते सर्वतो दिशम् ।
एवं किरीटिना मुक्तं सर्वं प्राच्छादयज्जगत् ॥ ५०
यथा बलाहके विद्युत्पावको वा शिलोच्चये ।
तथा गाण्डीवमभवच्चक्रायुधमिवाततम् ॥ ५१
यथा वर्षति पर्जन्यो विद्युत्पतति पर्वते ।
विस्फूर्जिता दिशः सर्वा ज्वलद्गाण्डीवमावृणोत् ॥
त्रस्ताश्च रथिनः सर्वे चैन्द्रमस्त्रं विकुर्वति ।
सर्वे शान्तिपरा योधाः स्वचित्तं नाभिजज्ञिरे ।
सहिता द्रोणभीष्माभ्यां प्रमोहगतचेतनाः ॥५३
तानि सर्वाणि सैन्यानि भग्नानि भरतर्षभ ।
प्राद्रवन्त दिशः सर्वा भयाद्वै सव्यसाचिनः ॥५४

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः ॥ ६६ ॥

अर्जुनेन भीतमुत्तरंप्रति समाश्वासनपूर्वकं दुर्योधनंप्रति रथयापनचोदना ॥ १ ॥ तथा स्वबाणाभिघातासहनेन पलायमानं तंप्रति सोपहासमाह्वानम् ॥ २ ॥

अर्जुन उवाच ।
दक्षिणामेव तु दिशं हयानुत्तर वाहय ।
पुरा सार्थी भवत्येषामयं शब्दोऽत्र तिष्ठताम् ॥१
अश्वत्थाम्नः प्रतिरथं प्राचीमुद्याहि सारथे ।
अचिराद्द्रष्टुमिच्छामि गुरुपुत्रं यशस्विनम् ॥ २
वैशंपायन उवाच ।
मोहयित्वा तु तान्सर्वान्धनुर्घोषेण पाण्डवः ।
प्रसव्यं चैवमावृत्य क्रोशार्धं प्राद्रवत्तदा ॥ ३
यथा सततगो वायुः सुपर्णश्चापि शीघ्रगः ।
तथा पार्थरथः शीघ्रमाकाशे पर्यवर्तत ॥ ४
मुहूर्तोपरते शब्दे प्रतियाते धनञ्जये ।
हस्त्यश्वरथपादातं पुरस्कृत्य महारथाः ॥ ५
द्रोणभीष्ममुखाः सर्वे सैन्यानां जघने ययुः ।
यत्ताः पार्थमपश्यन्तः सहिताः शरविक्षताः ॥ ६
सैनिका ऊचुः ।
दिष्ट्या दुर्योधनो मुक्तः सैन्यं भूयिष्ठमागतम् ।
क्रोशमात्रमतिक्रम्य बलमन्वानयामहे ।
यात यत्र वनं गुल्मं नदीमन्वश्मकां प्रति ॥ ७
वैशंपायन उवाच ।
अथ दुर्योधनो दृष्ट्वा भग्नं स्वं बलमाहवे ।
अमृष्यमाणः क्रोधेन प्रतिमार्गेन्धनञ्जयम् ॥ ८
न्यवर्तत कुरुश्रेष्ठ स्वेनानीकेन संवृतः ।
वार्यमाणो दुराधर्षैर्भीष्मद्रोणकृपैर्भृशम् ॥ ९

वार्यमाणः परिव्रार्यमाणः ॥ ९ ॥

ततोऽर्जुनश्चित्रमुदारवेगं
समीक्ष्य गाण्डीवमुवाच वाक्यम् ।
भोगीन्द्रकल्पं भुवनेषु रूढ-
मभेद्यमच्छेद्यमदाह्यमाजौ ॥ १०
इदं त्विदानीमनयं कुरूणां
शिवं धनुः शत्रुनिबर्हणं च ।
अत्याशुगं वेगवदाशुकर्तृ
अवारणीयं महते रणाय ॥ ११
प्रदारणं शत्रुवरूथिनीना-
मनीकजित्संयति वज्रकल्पम् ।
वैधव्यदं शत्रुनितम्बिनीनां
सुखप्रदं कौरववंशजानाम् ॥ १२
प्रयाहि यत्रैष सुयोधनो हि
तं पातयिष्यामि शरैः सुतीक्ष्णैः ।
आचार्यपुत्रं च सुयोधनं च
पितामहं सूतसुतं च सङ्ख्ये ।
द्रोणं कृपं चैव निवार्य सर्वा-
ञ्शिरो हरिष्यामि सुयोधनस्य ॥ १३

वैशंपायन उवाच ।

तदुत्तरश्चित्रमुदारवेगं
धनुश्च दृष्ट्वा निशिताञ्शरांश्च ।
भीतोऽब्रवीदर्जुनमाजिमध्ये
नाहं तवाश्वान्विषहे नियन्तुम् ॥ १४
तमब्रवीन्मात्स्यसुतं प्रहस्य
गाण्डीवधन्वा द्विषतां निहन्ता ।
मया सहायेन कुतो भयं ते
प्रेह्युत्तराश्वानुपमन्त्रयस्व ॥ १५
आश्वासितस्तेन धनञ्जयेन
वैराटिरश्वानतुदञ्जवेन ।
विष्फारयंस्तद्धनुरुग्रवेगं
युयुत्समानः पुनरेव जिष्णुः ॥ १६
गाण्डीवशब्देन तु तत्रतत्र
भूमौ निपेतुर्बहवोऽतिवेलम् ।
शङ्खस्य शब्देन तु वानरस्य
शब्देन ते योधवराः समन्तात् ॥ १७

अर्जुन उवाच ।

एषोऽतिमानी धृतराष्ट्रपुत्रः
सेनामुखे सर्वसमृद्धतेजाः ।
पराजयं नित्यममृष्यमाणो
निवर्तते युद्धमनाः पुरस्तात् ॥ १८
तमेव याहि प्रसमीक्ष्य युक्तः
सुयोधनं तत्र सहानुजं च ॥ १९

वैशंपायन उवाच ।

तमापतन्तं प्रसमीक्ष्य सर्वे
कुरुप्रवीराः सहसाऽभ्यगच्छन् ।
प्रहस्य वीरः स तु तानतीत्य
दुर्योधने द्वौ निचखान बाणौ ॥ २०
तेनार्दितो नाग इव प्रभिन्नः
पार्थेन विद्धो धृतराष्ट्रपुत्रः ।
युयुत्समानोऽतिरथेन सङ्ख्ये
स्वयं विगृह्यार्जुनमाससाद ॥ २१
स भीमधन्वानमुदग्रवेगो
धनञ्जयं शत्रुशतैरजेयम् ।
आकर्णपूर्णायतचोदितेन
भल्लेन विव्याध ललाटमध्ये ॥ २२
स तेन बाणेन समर्पितेन
जाम्बूनदाभेन सुसंहितेन ।
रराज पार्थो रुधिरं क्षरन्वै
यथैकरश्मिर्भगवान्दिवार्कः ॥ २३
अथास्य बाणेन विदारितस्य
प्रादुर्बभूवास्रमजस्रमुष्णम् ।
सा तस्य जाम्बूनदपुष्पचित्रा
मालेव धाराऽभिविराजते स्म ॥ २४
स तेन बाणाभिहतस्तरस्वी
दुर्योधनेनोद्धतमन्युवेगः ।
शरानुपादाय विषाग्निकल्पा-
न्विव्याध राजानमदीनसत्वः ॥ २५
दुर्योधनश्चापि तमुग्रतेजाः
पार्थश्च दुर्योधनमेकवीरः ।

अन्योन्यमाजौ पुरुषप्रवीरौ
समं समाजग्मतुराजमीढौ ॥ २६
ततः प्रभिन्नेन महागजेन
महीधराभेन पुनर्विकर्णः ।
रथैश्चतुर्भिर्गजपादरक्षैः
कुन्तीसुतं पाण्डवमभ्यधावत् ॥ २७
तमापतन्तं त्वरितं गजेन्द्रं
धनञ्जयः कुम्भललाटमध्ये ।
आकर्णपूर्णेन दृढायसेन
बाणेन विव्याध भृशं तु वीरः ॥ २८
पार्थेन सृष्टः स तु गृध्रपत्रो
ह्यापुङ्खदेशं प्रविवेश नागम् ।
विदार्य शैलप्रवरप्रकाशं
यथाऽशनिः पर्वतमिन्द्रसृष्टः ॥ २९
शरप्रतप्तः स तु नागराजः
प्रवेपिताङ्गो व्यथितान्तरात्मा ।
संसीदमानो निपपात भूमौ
वज्राहतं शृङ्गमिवाचलस्य ॥ ३०
निपातिते दन्तिवरे पृथिव्यां
त्रासाद्विकर्णः सहसाऽवतीर्य ।
तूर्णं पदान्यष्टशतानि गत्वा
विविंशतेः स्यन्दनमारुरोह ॥ ३१
निहत्य नागं तु शरेण तेन
वज्रोपमेनाद्रिवरप्रकाशम् ।
तथाविधेनैव शरेण पार्थो
दुर्योधनं वक्षसि निर्बिभेद ॥ ३२
हते गजे राजनि चैव भिन्ने
भग्ने विकर्णे च सपादरक्षे ।
गाण्डीवमुक्तैर्विशिखैः प्रभिन्ना-
स्ते योधमुख्याः सहसा प्रजग्मुः ॥ ३३
दृष्ट्वैव बाणेन हतं च नागं
योधांश्च सर्वान्नृपतिर्निरीक्ष्य ।
रथं समावृत्य कुरुप्रवीरो
रणात्प्रदुद्राव यतो न पार्थः ॥ ३४
तं भीतरूपं त्वरितं व्रजन्तं
दुर्योधनं शत्रुगणावमर्दी ।
अन्वाह्वयद्योद्धुमनाः किरीटी
बाणाभिविद्धं रुधिरं वमन्तम् ॥ ३५
तस्मिन्महेष्वासवरेऽतिविद्धे
धनञ्जयेनाप्रतिमेन युद्धे ।
सर्वाणि सैन्यानि भयार्दितानि
त्रासं ययुः पार्थमुदीक्ष्य तानि ॥ ३६
ततस्तु ते शान्तिपराश्च सर्वे
दृष्ट्वाऽर्जुनं नागमिव प्रभिन्नम् ।
उच्चैर्नदन्तं बलमत्तमाजौ
मध्ये स्थितं सिंहमिवर्षभाणाम् ॥ ३७
गाण्डीवशब्देन तु पाण्डवस्य
योधा निपेतुः सहसा रथेभ्यः ।
भयार्दिताः पार्थशराभितप्ताः
सिंहाभिपन्ना इव वारणेन्द्राः ॥ ३८
संरक्तनेत्रः पुनरिन्द्रकर्मा
वैकर्तनं द्वादशभिः पृषत्कैः ।
वित्रास्य तेषां द्रवतां समेक्ष-
दुःशासनं चैकरथेन पार्थः ॥ ३९
कर्णोऽब्रवीत्पार्थशराभितप्तो
दुर्योधनं दुष्प्रसहं च दृष्ट्वा ।
दृष्टोऽर्जुनोऽयं प्रतियाम शीघ्रं
श्रेयो विधास्याम इतो गतेन ॥ ४०
मन्ये त्वया तात कृतं च कार्यं
यदर्जुनोऽस्माभिरिहाद्य दृष्टः ।
भूयो वनं गच्छतु सव्यसाची
पश्यामि पूर्णं समयं न तेषाम् ॥ ४१
वैशंपायन उवाच ।
शरार्दितास्ते युधि पाण्डवेन
प्रसस्रुरन्योन्यमथाह्वयन्तः ।
कर्णोऽब्रवीदापतत्येष जिष्णु-
र्दुर्योधनं संपरिवार्य यामः ॥ ४२
सर्वास्त्रविद्वारणयूथपाभः
काले प्रहर्ता युधि शात्रवाणाम् ।

अयं च पार्थः पुनरागतो नो
मूलं च रक्ष्यं भरतर्षभाणाम् ॥ ४३
समीक्ष्य पार्थं तरसाऽऽपतन्तं
दुर्योधनः कालमिवात्तशस्त्रम् ।
भयार्तरूपः शरणं प्रपेदे
द्रोणं च कर्णं च कृपं च भीष्मम् ॥ ४४
तं भीतरूपं शरणं व्रजन्तं
दुर्योधनं शत्रुसहो निषङ्गी ।
इत्यब्रवीत्प्रीतमनाः किरीटी
बाणाभितप्तं रुधिरं वमन्तम् ॥ ४५
विहाय कीर्तिं च यशश्च लोके
युद्धात्परावृत्य पलायसे किम् ।
न नन्दयिष्यन्ति तवाहतानि
तूर्याणि युद्धादवरोपितस्य ॥ ४६
न भोक्ष्यसे सोऽद्य महीं समग्रां
यानानि वस्त्राण्यथ भोजनानि ।
कल्याणगन्धीनि च चन्दनानि
युद्धात्परावृत्य तु भोक्ष्यसे किम् ।
सुवर्णमाल्यानि च कुण्डलानि
हारांश्च वैडूर्यकृतोपधानान् ॥ ४७
च्युतस्य युद्धान्न तु शङ्खशब्दा-
स्तथा भविष्यन्ति तवाद्य पाप ।
न भोगहेतोर्वरचन्दनं च
स्त्रियश्च मुख्या मधुरप्रलापाः ।
युद्धात्प्रयातस्य नरेन्द्रसूनो
परे च लोके फलिता न चेह ॥ ४८
युधिष्ठिरस्यासि निदेशकारी
पार्थस्तृतीयो युधि च स्थिरोसि ।
तदर्थमावृत्य मुखं प्रयच्छ
नरेन्द्रवृत्तं स्मर धार्तराष्ट्र ॥ ४९
मोघं तवैतद्भुवि नामधेयं
दुर्योधनेतीह कृतं पुरस्तात् ।
दुर्योधनस्त्वं प्रथितोसि नाम्ना
सुयोधनः सन्निकृतिप्रधानः ।
नहीह दुर्योधनता तवाद्य
पलायमानस्य रणं विहाय ॥ ५०
न ते पुरस्तादथ पृष्ठतो वा
पश्यामि दुर्योधन रक्षितारम् ।
परीप्स युद्धेन कुरुप्रवीर
प्राणान्मया बाणबलाभितप्तान् ॥ ५१

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

सोपहासमर्जुनसमाहूतेन दुर्योधनेन पुनः परावृत्याभियानम् ॥ १ ॥ भीष्मादिभिस्तद्रक्षणाय परितोऽवस्थानम् ॥ २ ॥ अर्जुनेन तैः सह चिरं प्रयुध्य पश्चात्संमोहनास्त्रप्रयोगः ॥ ३ ॥ उत्तरेणार्जुनचोदनयाऽस्त्रमोहितानां द्रोणादीनां वस्त्रापहरणम् ॥ ४ ॥ अर्जुनेन बाणैर्भीष्माद्यभिवादनम् ॥ ५ ॥

वैशंपायन उवाच ।
आहूयमानस्तु स तेन सङ्ख्ये
महात्मना वै धृतराष्ट्रसूनुः ।
निवर्तितश्चापि गिराङ्कुशेन
गजो मदोन्मत्त इवाङ्कुशेन ॥ १
सोमृष्यमाणो वचसाऽभिमृष्टो
महारथेनातिरथस्तरस्वी ।
ततः स पर्याववृते रथेन
भोगी यथा पादतलाभिमृष्टः ॥ २
ततो दुर्योधनः क्रुद्धो विक्षिपन्धनुरुत्तमम् ।
धृतिं कृत्वा सुविपुलां प्रत्युवाच धनञ्जयम् ॥ ३
सोहमिन्द्रादभिक्रुद्धान्न बिभेमीह भारत ।
भुक्त्वा सुविपुलं राज्यं वित्तानि च सुखानि च ।
किमर्थं युद्धसमये पलायिष्ये नरोत्तम ॥ ४

सुयोधनस्त्वं निकृतिप्रधान इति ख. पाठः ॥ ५० ॥

षट्षष्टितमोऽध्यायः ॥ ६६ ॥

एवमुक्त्वा महाराजः प्रत्ययुध्यत भारत ।
संन्यवर्तत शीघ्राश्वस्तोत्रार्दित इव द्विपः ॥ ५
आक्रान्तभोगस्तेजस्वी धनुर्वक्र इवोरगः ।
रथं रथेन संगम्य योधयामास पाण्डवम् ॥ ६
तं प्रेक्ष्य कर्णः परिवर्तमानं
निवृत्य संस्तम्भितसर्वगात्रम् ।
दुर्योधनं दक्षिणतोऽन्वरक्ष-
त्पार्थान्महाबाहुरधिज्यधन्वा ॥ ७
गान्धारराजः शकुनिर्निवृत्य
द्रौणिश्च सर्वास्त्रविदां वरिष्ठः ।
ररक्षतुः कौरवमभ्युपेत्य
पार्थान्नृवीरौ युधि सव्यतश्च ॥ ८
भीष्मस्ततः शान्तनवो विवृत्य
हिरण्यकक्ष्यांस्त्वरया तुरंगान् ।
दुर्योधनं पश्चिमतो ररक्ष
पार्थान्महाबाहुरधिज्यधन्वा ॥ ९
द्रोणः कृपश्चैव विविंशतिश्च
दुःशासनश्चैव निवृत्य शीघ्रम् ।
सर्वे पुरस्तात्प्रणिधाय बाणा-
न्दुर्योधनार्थे त्वरिताऽभ्युपेयुः ॥ १०
सर्वाण्यनीकानि निवर्तितानि
संप्रेक्ष्य पूर्णौघनिभानि पार्थः ।
हंसो महामेघमिवापतन्तं
धनञ्जयः प्रत्यपतत्तरस्वी ॥ ११
ते सर्वतः संपरिवार्य पार्थ-
मस्त्राणि दिव्यानि समाददानाः ।
ववर्षुरभ्येत्य शरैः समग्रै-
र्मेघा यथा भूधरमम्बुवेगैः ॥ १२
ततोऽस्त्रमस्त्रेण निवार्य तेषां
गाण्डीवधन्वा कुरुपुङ्गवानाम् ।
संमोहनं शत्रुसहोऽन्यदस्त्रं
प्रादुश्चकारैन्द्रमवारणीयम् ॥ १३
ततो दिशश्चानुदिशो निवार्य
शरैः सुघोरैर्निशितैः सुपुङ्खैः ।
गाण्डीवशब्देन मनांसि तेषां
महाबलं प्रव्यथयांचकार ॥ १४
ततः पुनर्भीमरवं निगृह्य
दोर्भ्यां महाशङ्खमुदारघोषम् ।
व्यनादयन्संप्रदिशो दिशः खं
भुवं च पार्थो द्विषतां निहन्ता ॥ १५
संमोहनास्त्रप्रभवैः शरौघै-
र्विनष्टदेहाश्च निपत्य योधाः ।
निःसत्ववेगाः कुरुराजसैन्याः
कुड्योपमास्तस्थुरनीहमानाः ॥ १६
ते शङ्खनादेन कुरुप्रवीराः
संमोहिताः पार्थसमीरितेन ।
उत्सृज्य चापानि दुरासदानि
सर्वे तदा मोहपरा बभूवुः ॥ १७
ततो विसंज्ञानि परेषु पार्थः
संस्मृत्य संदेशमथोत्तरायाः ।
निर्याहि वाहादिति मात्स्यपुत्र-
मुवाच यावत्कुरवो विसंज्ञाः ॥ १८
आचार्यशारद्वतयोः सुशुक्ले
कर्णस्य पीतं रुचिरं च वस्त्रम् ।
द्रौणेश्च राज्ञश्च तथैव नीले
वस्त्रे समादत्स्व नरप्रवीर ॥ १९
भीष्मस्य संज्ञां तु तथैव मन्ये
जानाति मेऽस्त्रप्रतिघातमेषः ।
एतस्य वाहान्कुरु सव्यतस्त्व-
मेवं प्रयातव्यममूढसंज्ञैः ॥ २०
रश्मीन्समुत्सृज्य ततो महात्मा
रथादवप्लुत्य विराटपुत्रः ।
वस्त्राण्युपादाय महारथानां
नानाविधान्यद्भुतवर्णकानि ॥ २१

पूर्णौघनिभानि पूर्णनदीप्रवाहसदृशानि॥११॥ अनीहमानाः अचेष्टमानाः॥१६॥यावद्विसंज्ञास्तावन्निर्याहीत्यध्याहारेण योजना ॥ १८ ॥ आदत्स्व गृहाण ॥ १९ ॥ अमूढसंज्ञैः अस्माभिरिति शेषः । सव्यतस्त्वमेवं हि धर्ममाहुर्जितस्येति ध. पाठः ॥ २० ॥

महान्ति चीनांशुदुकूलकानि
पट्टांशुकानि विविधानि मनोज्ञकानि ।
हारांश्च राज्ञां मणिभूषणानि
सुवर्णनिष्काभरणानि मारिष ॥ २२
माणिक्यबाह्वङ्गदकङ्कणानि
अन्यानि राज्ञां मणिभूषणानि ।
वस्त्राण्युपादाय महारथानां
तूर्णं पुनः स्वं रथमारुरोह ॥ २३
राज्ञश्च सर्वान्कृतसंनिकाशा-
न्संमोहनास्त्रेण विसंज्ञकल्पान् ।
नासाग्रविन्यस्तकराङ्गुलीकः
पार्थो जहास स्मयमानचेताः ॥ २४
ततोऽन्वशात्तांश्चतुरः सदश्वा-
न्पुत्रो विराटस्य हिरण्यकक्ष्यान् ।
ते तन्न्यतीयुर्द्विषतामनीकं
श्वेता वहन्तोऽर्जुनमाजिमध्यात् ॥ २५
तथा प्रयान्तं पुरुषप्रवीरं
भीष्मः शरैरभ्यहनत्तरस्वी ।
स चापि भीष्मस्य हयान्निहत्य
विव्याध भीष्मं दशभिः पृषत्कैः ॥ २६
ततोऽर्जुनो भीष्ममपास्य युद्धे
विद्ध्वाऽस्य यन्तारमरिष्टधन्वा ।
तस्थौ विमुक्तो रथवृन्दमध्या-
द्राहुं विदार्येव सहस्ररश्मिः ॥ २७
लब्ध्वा तु संज्ञां पुरुषप्रवीरः
पार्थं निरीक्ष्याथ महेन्द्रकल्पम् ।
रणात्प्रमुक्तं पुरुषप्रवीरं
स धार्तराष्ट्रस्त्वरितो बभाषे ॥ २८
अयं कथंचिद्भवतो विमुक्त-
स्तं वै प्रबध्नीत यथा न मुच्येत् ।
तमब्रवीच्छान्तनवः प्रहस्य
क्व ते गता बुद्धिरभूत्क्व वीर्यम् ॥ २९
शान्तिं परां प्राप्य यथा स्थितस्त्व-
मुत्सृज्य बाणांश्च धनुश्च चित्रम् ।
न त्वेव बीभत्सुरलं नृशंसं
कर्तुं न पापेऽस्य मनो निविष्टम् ॥ ३०
जह्यान्न धर्मं त्रिदिवस्य हेतोः
सर्वे तु तस्मान्न हता रणेऽस्मिन् ।
क्षिप्रं कुरून्याहि कुरुप्रवीर
विजित्य गाश्च प्रतियातु पार्थः ॥ ३१
संमोहनास्त्रप्रतिमोहिताः स्थ
यूयं न जानीथ धनापहारम् ।
पश्यामि वस्त्राभरणानि राज-
न्विराटपुत्रेण समाहृतानि ॥ ३२
नृपेषु सर्वेषु च मोहितेषु
हन्तुं यदीच्छेत्स हनिष्यतीति ।
तदा तु धर्मात्मतया नृवीरो
न चाहनद्वो बलभित्तनूजः ॥ ३३
भाग्येन युष्मानवधीन्न पार्थः
संधिं कुरूणामनुमन्यमानः ।
तद्यात यूयं सहसैनिकैस्तै-
र्हतावशिष्टैर्गजसाह्वयं पुरम् ॥ ३४
वैशंपायन उवाच ।
दुर्योधनस्तस्य निशम्य वाक्यं
पितामहस्यात्महितं प्रशस्य ।
अतीतकामो युधि सोऽत्यमर्षी
राजा विनिश्वस्य बभूव तूष्णीम् ॥ ३५
तद्भीष्मवाक्यं हि निशम्य सर्वे
धनञ्जयाग्निं च विवर्धमानम् ।
निवर्तनायैव मतिं निदध्यु-
र्दुर्योधनं तं परिरक्षमाणाः ॥ ३६
तान्प्रस्थितान्प्रीतमनाः समर्थो
धनञ्जयः सर्वकुरुप्रवीरः ।
आमन्त्र्य वीरोऽनुययौ मुहूर्तं
गाण्डीवघोषेण विनद्य लोकम् ॥ ३७
तेषामनीकानि निरीक्ष्य पार्थो
विकीर्णयानध्वजकार्मुकाणि ।

कृतसंनिकाशान् कृतं कृतकं प्रतिमादि निश्चेष्टतया तत्सदृशा-
नित्यर्थः ॥ २४ ॥

गाण्डीवधन्वा प्रहसन्कुरूणां
शङ्खं प्रदध्मौ बलवान्बलेन ॥ ३८
ते शङ्खशब्दं तुमुलं निशम्य
ध्वजस्य शब्दं च ततोऽन्तरिक्षे ।
गाण्डीवशब्देन मुहुर्मुहुस्ते
भीता ययुः सर्वधनं विहाय ॥ ३९
तानर्जुनो दूरतरं विभज्य
धनं च सर्वं निखिलं निवर्त्य ।
आपृच्छय तान्दूरमनुप्रयात्वा
धनञ्जयस्तत्र कुरून्महात्मा ।
गुरूंश्च सर्वानभिवाद्य बाणै-
र्न्यवर्ततोदग्रमनाः शरैः सह ॥ ४०
पितामहं शान्तनवं महात्मा
द्वाभ्यां शराभ्यामभिवाद्य वीरः ।
द्रोणं कृपं चैव कुरूंश्च मान्या-
ञ्शरैश्च सर्वानभिवाद्य सङ्ख्ये ।
दुर्योधनस्योत्तमरत्नचित्रं
चिच्छेद पार्थो मकुटं शरौघैः ॥ ४१
अराजवंशस्य किमर्थमेत-
न्नित्यं न धार्यं मकुटं त्वयेति ।
संपातितं भूमितले सरत्नं
प्रीतस्ततो मात्स्यसुतो बभूव ॥ ४२
धनञ्जयं नागमिव प्रभिन्नं
विजित्य शत्रून्परिवर्तमानम् ।
गास्ता विजित्याभिमुखं प्रयान्तं
न शक्नुवन्तः कुरवः प्रयाताः ॥ ४३
धनञ्जयं सिंहमिवात्तशस्त्रं
गा वै विजित्याभिमुखं प्रयान्तम् ।
उदीक्षितुं पार्थिवास्ते न शेकु-
र्यथैव मध्याह्नगतं हि सूर्यम् ॥ ४४
रक्तानि वासांसि च तानि गृह्य
रणोत्कटो नाग इव प्रभिन्नः ।
जित्वा च वैराटिमुवाच पार्थः
प्रहृष्टरूपो रथिनां वरिष्ठः ॥ ४५
आवर्तयाश्वान्पशवो जितास्ते
याताः परे प्रैहि पुरं प्रहृष्टः ।
उद्धुष्यतां ते विजयोऽद्य शीघ्रं
गात्रं तु ते सेवतु माल्यगन्धः ।
माता तु ते नन्दतु बान्धवाश्च
त्वामद्य दृष्ट्वा समुदीर्णहर्षम् ॥ ४६

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

अर्जुनेनोत्तरंप्रति युधिष्ठिरादितत्वप्रकाशनप्रतिषेधनम् ॥ १ ॥ तथा श्मशानमेत्य शमीतरौ गाण्डिवादिनिधानपूर्वकं पुनर्बृहन्नलावेषपरिग्रहेण सारथ्यकरणम् ॥ २ ॥ उत्तरेणार्जुनचोदनया स्वजयोद्घोषणाय नगरंप्रति दूतप्रेषणम् ॥ ३ ॥

वैशंपायन उवाच ।
ततो विजित्य संग्रामे कुरुगोवृषभेक्षणः ।
समानयामास तदा विराटस्य धनं महत् ॥ १
गतेषु च प्रभग्नेषु धार्तराष्ट्रेषु सर्वशः ।
वनान्निष्क्रम्य गहनाद्बहवः कुरुसैनिकाः ।
भयात्संत्रस्तमनसः समाजग्मुस्ततस्ततः ॥ २
मुक्तकेशाः प्रदृश्यन्ते स्थिताः प्राञ्जलयस्तदा ।
क्षुत्पिपासापरिश्रान्ता विदेशस्था विचेतसः ।
ऊचुः प्राञ्जलयः सर्वे पार्थ किं करवामहे ॥ ३
प्राणानन्तर्मनोयातान्प्रयाचिष्यामहे वयम् ।
वयं चार्जुन ते दासा ह्यनुरक्ष्या ह्यनाथकाः ॥ ४
अर्जुन उवाच ।
अनाथान्दुःखितान्दीनान्कृशान्वृद्धान्पराजितान् ।
न्यस्तशस्त्रान्निराशांश्च नाहं हन्मि कृताञ्जलीन् ॥ ५
भवन्तो यान्तु विस्रब्धा निर्भया अमृता यथा ।
मम पादरजोलक्ष्म्या जीवन्तु सुचिरं भुवि ॥ ६

स्मित्वा च वैराटिमुवाचेति पाठान्तरम् ॥ ४५ ॥

तस्य तामभयां वाचं श्रुत्वा योधाः समागताः ।
आयुःकीर्तियशोभिस्ते तमाशीभिरवर्धयन् ॥ ७
ततो निवृत्ताः कुरवो भग्नाश्च दिवमास्थिताः ।
प्रयाताः सर्वतस्तत्र नमस्कृत्य धनञ्जयम् ॥ ८
एवं दत्ताभयास्तेन ततो याताः कुरून्प्रति ॥ ९
स कर्म कृत्वा परमार्यकर्मा
निहत्य शत्रून्द्विषतां निहन्ता ।
यातो महामेघ इवातपान्ते
विद्राव्य पार्थः कुरुसैन्यमेकः ॥ १०
तं मात्स्यपुत्रं द्विषतां निहन्ता
वचोऽब्रवीत्संपरिगृह्य राजन् ॥ ११
पितुः सकाशे तव तात सर्वे
वसन्ति पार्था विदितं त्वयेति ।
तान्मास्म शंसीर्नगरं प्रविश्य
भीतः प्रणश्येत्स च मत्स्यराजः ॥ १२
मया जिता सा ध्वजिनी कुरूणां
मया हि गावो विजिता द्विषद्भ्यः ।
एवं तु कामं नगरं प्रविश्य
त्वमात्मना कर्म कृतं ब्रवीहि ॥ १३
उत्तर उवाच ।
यत्ते कृतं कर्म न वारणीयं
तत्कर्म कर्तुं मम नास्ति शक्तिः ।
न त्वां प्रवक्ष्यामि पितुः सकाशे
यावन्न मां वक्ष्यसि सव्यसाचिन् ॥ १४
वैशंपायन उवाच ।
स शत्रुसेनां तरसा विजित्य
आच्छिद्य सर्वं तु धनं कुरूणाम् ।
श्मशानमागम्य पुनः शमीं ता-
मभ्येत्य तस्थौ शरविक्षताङ्गः ॥ १५
ततः स वह्निप्रतिमो महाकपिः
सहैव भूतैर्दिवमुत्पपात ।
तथा च माया विहिता बभूव सा
ध्वजं च सिंहं युयुजे रथे पुनः ॥ १६
निधाय तच्चायुधमाजिमर्दनः
कुरूत्तमानामिषुधीन्ध्वजांस्तथा ।
प्रायात्स मात्स्यो नगरं प्रवेष्टुं
किरीटिना सारथिना महात्मा ॥ १७
पार्थश्च कृत्वा परमार्यकर्म
निहत्य शत्रून्द्विषतां निहन्ता ।
विधाय भूयश्च तथैव वेषं
जग्राह रश्मीन्पुनरुत्तरस्य ।
बृहन्नलारूपमथो विधाय
प्रायात्स मात्स्यो नगरं प्रवेष्टुम् ॥ १८
वैशंपायन उवाच ।
ततो निवृत्ताः कुरवः प्रभग्नाः शममास्थिताः ।
परस्परमवेक्ष्यैव जग्मुस्ते हृतवाससः ॥ १९
पन्थानमुपसंगम्य फल्गुनो वाक्यमब्रवीत् ।
राजपुत्र प्रपद्यस्व धनानीमानि सर्वशः ।
गोकुलानि महाबाहो वीरगोपालकैः सह ॥ २०
ततोऽपराह्णे यास्यामो विराटनगरं प्रति ।
आश्वास्य पाययित्वा च परिप्लाव्य च वाजिनः २१
गच्छन्तु त्वरितं दूता गोपालाः प्रेषितास्त्वया ।
नगरे प्रियमाख्यातुं घोषयन्तु च ते जयम् ॥२२
उत्तरस्त्वरमाणोऽथ दूतानाज्ञापयत्ततः ।
वचनादर्जुनस्यैव ह्याचक्षध्वं जयं मम ॥ २३
मया जिता सा ध्वजिनी कुरूणां
मया च गावो विजिता द्विषद्भ्यः ।
एवं तु कामं नगरं प्रविश्य
मयाऽऽत्मना कर्म कृतं ब्रवीत ॥ २४

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

विराटेन युधिष्ठिरादिभिः सह सुशर्मादिजयानन्तरं पुरंप्रत्यागमनम् ॥ १ ॥ तथा उत्तरस्य कुरुविजयाय सहबृहन्नलया गमनश्रवणेन तद्रक्षणाय सेनाचोदना ॥ २ ॥ अत्रान्तरे विराटाय दूतैरुत्तरजयनिवेदनम् ॥ ३ ॥

वैशंपायन उवाच ।
स विजित्य धनं चापि विराटो वाहिनीपतिः ।
प्राविशन्नगरं हृष्टश्चतुर्भिः सह पाण्डवैः ॥ १
जित्वा त्रिगर्तान्संग्रामे गाश्चैवानाय्य केवलाः ।
अशोभत महाराजः सह पार्थैः श्रिया वृतः ॥ २
तमासनगतं वीरं सुहृदां प्रीतिवर्धनम् ।
उपतस्थुः प्रकृतयः समन्ताद्ब्राह्मणैः सह ॥ ३
सभाजितः सभासद्भिः प्रतिनन्द्य स मत्स्यराट् ।
विसर्जयामास तदा द्विजांश्च प्रकृतीस्तथा ॥ ४
ततः स राजा मात्स्यानां विराटो वाहिनीपतिः ।
प्रविश्यान्तःपुरं रम्यं स्त्रीशतैरुपशोभितम् ।
उत्तरं तत्र नापश्यत्क यात इति चाब्रवीत् ॥ ५
आचख्युस्तत्र संहृष्टाः स्त्रियः कन्याश्च वेश्मनि ।
अन्तःपुरचराश्चैव कुरुभिर्गोधनं हृतम् ॥ ६
ताञ्जेतुमभिसंरब्ध एक एवातिसाहसात् ।
बृहन्नलासहायश्च निर्यातः पृथिवींजयः ॥ ७
उपयातानतिरथान्द्रोणं शान्तनवं कृपम् ।
कर्णं दुर्योधनं चैव द्रोणपुत्रं च षड्रथान् ॥ ८
ततो विराटः परमाभितप्तः
पुत्रं निशम्यैकरथेन यातम् ।
बृहन्नलासारथिमाजिमर्दनं
प्रोवाच सर्वानथ मन्त्रिमुख्यान् ॥ ९
गवां शतसहस्राणि अभिभूय ममात्मजम् ।
कुरवः कालयन्ति स्म सर्वे युद्धविशारदाः ॥ १०
तस्माद्गच्छन्तु मे योधा बलेन महता वृताः ।
उत्तरस्य परीप्सार्थं ये त्रिगर्तैरविक्षताः ॥ ११
वैशंपायन उवाच ।
हयांश्च नागांश्च रथांश्च शीघ्रं
वादित्रसङ्घांश्च ततः प्रभूतान् ।
प्रस्थापयामास सुतस्य हेतो-
र्विचित्रचित्राभरणोपपन्नान् ॥ १२
एवं स राजा मात्स्यानां महानक्षौहिणीपतिः ।
व्यादिदेशाथ स क्षिप्रं वाहिनीं चतुरङ्गिणीम् ॥ १३
कुमारमाशु जानीत यदि जीवति वा नवा ।
यस्य यन्ता गतः षण्डो मन्येऽहं स न जीवति ॥ १४
तमब्रवीद्धर्मसुतो विराट-
मार्तं विदित्वा कुरुभिः प्रतप्तम् ।
बृहन्नला सारथिश्चेन्नरेन्द्र
परे न नेष्यन्ति तवाद्य गाश्च ॥ १५
सर्वान्महीपान्सहितान्कुरूंश्च
तथैव देवासुरनागयक्षान् ।
अलं विजेतुं समरे सुतस्ते
अनुष्ठितः सारथिना हि तेन ॥ १६
सर्वथा कुरवश्चापि ये चान्ये वसुधाधिपाः ।
त्रिगर्तान्निर्जिताञ्श्रुत्वा न स्थास्यन्ति कथंचन १७
वैशंपायन उवाच ।
अथोत्तरेण प्रहिता दूतास्ते शीघ्रगामिनः ।
विराटनगरं प्राप्य जयं प्रावेदयंस्तदा ॥ १८
राजानं वृतमाचख्युर्मन्त्रिभिर्जयमुत्तमम् ।
पराजयं कुरूणां च उपायान्तं तथोत्तरम् ॥ १९
सर्वा विनिर्जिता गावः कुरवश्च पराजिताः ।
उत्तरः सह सूतेन कुशली च परंतपः ॥ २०
कङ्क उवाच ।
दिष्ट्या ते निर्जिता गावः कुरवश्च पराजिताः ।
दिष्ट्या ते विजयी पुत्रः श्रूयते पार्थिवर्षभ ॥ २१
नाद्भुतं त्विह मन्येऽहं यत्ते पुत्रोऽजयत्कुरून् ।
ध्रुव एव जयस्तस्य यस्य यन्ता बृहन्नला ॥ २२
देवेन्द्रसारथिश्चैव मातलिः ख्यातविक्रमः ।
कृष्णस्य सारथिश्चैव न बृहन्नलया समौ ॥ २३

वैशंपायन उवाच ।
ततो विराटो नृपतिः संप्रहृष्टतनूरुहः ।
श्रुत्वा तु विजयं तस्य कुमारस्यामितौजसः ।
संतोषयित्वा दूतांस्तान्धनरत्नैश्च सर्वशः ॥ २४
गते त्वनुजने तस्मिन्दूतवाक्यं निशम्य च ।
उत्तरस्य जयात्प्रीतो विराटः प्रत्यभाषत ॥ २५
राजमार्गाः क्रियन्तां वै पताकाभिरलंकृताः ।
पुष्पोपहारैरर्च्यन्तां देवताश्चापि सर्वशः ॥ २६
कुमारा योधमुख्याश्च गणिकाश्च स्वलंकृताः ।
वादित्राणि च सर्वाणि प्रत्युद्यान्तु सुतं मम ॥ २७
भवन्तु ते लब्धजये सुते मे
पौराश्च मर्त्याश्च परे च नार्यः ।
ते शुक्लवस्त्राः प्रभवन्तु मार्गे
सुगन्धमाल्याभरणाश्च नार्यः ॥ २८
भजन्तु सर्वा गणिकाः सुतं मे
नार्यश्च कन्याः सहसैनिकाश्च ।
स्वलंकृतास्ताः सुभगाः सुवेषाः
पुत्रस्य पन्थानमनुव्रजन्तु ॥ २९
घण्टापणवकाः शीघ्रं मत्तमारुह्य कुञ्जरम् ।
शृङ्गाटकेषु सर्वेषु समाख्यान्तु जयं मम ॥ ३०
उत्तरा च कुमारीभिर्बह्वाभरणभूषिता ।
सखीं विजितसंग्रामां प्रत्युद्यातु बृहन्नलाम् ॥ ३१
श्रुत्वा तु वचनं तस्य पार्थिवस्य महात्मनः ।
तथैव चक्रुः संहृष्टाः पौराः स्वस्तिकपाणयः ॥ ३२
सूताश्च सर्वे सहमागधाश्च
हृष्टा विराटस्य पुरे जनौघाः ।
भेर्यश्च तूर्याणि च वारिजाश्च
वेषैः परार्ध्यैः प्रमदाजनाश्च ॥ ३३
वन्दिप्रवादाः पणवादिकाश्च
तथैव वाद्यानि च वंशशब्दाः ।
कांस्यं सतालं मधुरं च गीत-
मादाय नार्यो नगरान्निरीयुः ॥ ३४
प्रत्युद्ययुः पुत्रमनन्तवीर्यं
ते ब्राह्मणाः शान्तिपराः प्रधानाः ।
स्वाध्यायवेदाध्ययनक्रमज्ञाः
स्वस्तिक्रियागीतजपप्रधानाः ॥ ३५

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः ॥ ७० ॥

उत्तरजयश्रवणहृष्टेन विराटेन युधिष्ठिरेण सह द्यूतदेवनम् ॥ १ ॥ विराटेनोत्तरप्रशंसने कङ्केन बृहन्नलया कुरुपराजय-कथनम् ॥ २ ॥ ततो रुष्टेन विराटेन कङ्कस्य कर्णमूलेऽक्षेणाभिहननम् ॥ ३ ॥ सैरन्ध्र्या क्षतात्प्रस्रवतो रक्तस्य निजोत्तरीयेण ग्रहणम् ॥ ४ ॥ तथा विराटेन तद्ग्रहणकारणप्रश्ने तत्कथनम् ॥ ५ ॥

वैशंपायन उवाच ।
प्रस्थाप्य सेनां कन्याश्च गणिकाश्च स्वलंकृताः ।
मत्स्यराजो महाराजः प्रहृष्ट इदमब्रवीत् ॥ १
त्रिगर्ताः कुरवः सर्वे संग्रामे निर्जिता मया ।
प्रविश्यान्तःपुरं हृष्टा द्यूतं दीव्याम ब्राह्मण ॥ २
अक्षानाहर सैरन्ध्रि आसनं चोपकल्पय ।
आदाय व्यजनं त्वं च पार्श्वतोऽनन्तरा भव ॥ ३
तं तथावादिनं दृष्ट्वा पाण्डवः प्रत्यभाषत ।
न देवितव्यं हृष्टेन कितवेनेति नः श्रुतम् ॥ ४
न त्वामद्य मुदा युक्तमहं देवितुमुत्सहे ।
प्रियं तु ते चिकीर्षामि वर्ततां यदि रोचते ।
द्यूतं कर्तुं न वाञ्छामि नरेन्द्र जनसंसदि ॥ ५
विराट उवाच ।
स्त्रियो गावो हिरण्यं च यच्चान्यद्वसु किंचन ।
न मे किंचित्त्वया कार्यमन्तरेणापि देवितम् ॥ ६
कङ्क उवाच ।
किं ते द्यूतेन राजेन्द्र बहुदोषेण मानद ।
देवने बहवो दोषास्तस्मात्तत्परिवर्जयेत् ॥ ७
श्रुतो वा यदि वा दृष्टो धर्मराजो युधिष्ठिरः ।
स राज्यं धनमक्षय्यं पणमेकममन्यत ॥ ८

कृष्णां च भार्यां दयितां भ्रातॄंश्च त्रिदशोपमान् ।
निःसंशयं स कितवः पश्चात्तप्स्यति पाण्डवः ॥९
विविधानां च रत्नानां धनानां च पराजये ।
अभीप्सितविनाशश्च वाक्पारुष्यमनन्तरम् ॥ १०
अविश्वास्यं बुधैर्नित्यमेकाह्ना द्रव्यनाशनम् ।
द्यूते हारितवान्सर्वं तस्माद्द्यूतं न रोचये ॥ ११
अथवा मन्यसे राजन्दीव्याव यदि रोचते ।
एवमाभाष्य वाक्यैस्तु क्रीडतस्तौ नरोत्तमौ ॥१२
प्रवर्तमाने द्यूते तु मात्स्यः पाण्डवमब्रवीत् ॥ १३
पश्य पुत्रेण मे युद्धे तादृशाः कुरवो जिताः ।
कुरवोऽतिरथाः सर्वे देवैरपि सुदुर्जयाः ॥ १४
ततोऽब्रवीद्धर्मराजो द्यूते मात्स्यं युधिष्ठिरः ।
दिष्ट्या ते विजिता गावः कुरवश्च पराजिताः १५
अत्यद्भुततमं मन्ये उत्तरश्चेत्कूरूञ्जयेत् ।
यन्ता बृहन्नला यस्य स कथंचिद्विजेष्यते ॥ १६
ततो विराटः क्षुभितो मन्युना च परिप्लुतः ।
उवाच वचनं क्रुद्धः परिव्राजमनन्तरम् ॥ १७
तादृशेन तु योधेन महेष्वासेन धीमता ।
कुरवो निर्जिता युद्धे तत्र किं ब्राह्मणाद्भुतम् ॥१८
युधिष्ठिर उवाच ।
यन्ता तथाविधो यस्य रथे तिष्ठति वीर्यवान् ।
यदि तद्दुष्करं कुर्यात्तत्र किं नाद्भुतं भवेत् ॥ १९
विराट उवाच ।
समं षण्डेन मे पुत्रं ब्रह्मबन्धो प्रशंससि ।
वाच्यावाच्यं न जानीषे नूनं मामवमन्यसे ॥ २०
पुमांसो बहवो दृष्टाः सूताश्च बहवो मया ।
विक्रम्य यन्ता योद्धा च न मे दृष्टः कदाचन ॥ २१
विप्रियं न चरेद्राज्ञामनुकूलं प्रियं वदेत् ।
आचरन्विप्रियं राज्ञां न जातु सुखमेधते ॥ २२
वयस्यत्वात्तु ते सर्वमपराधमिमं क्षमे ।
नेदृशीं प्रवदेर्वाचं यदि जीवितुमिच्छसि ॥ २३
वैशंपायन उवाच ।
ततोऽब्रवीत्पुनः कङ्कः प्रहस्य कुरुवर्धनः ।
बृहन्नलाया राजेन्द्र घुष्यतां नगरे जयः ॥ २४
उत्तरेण तु सारथ्यं कृतं नूनं भविष्यति ।
निमित्तं किंचिदुत्पन्नं तर्कश्चापि दृढो मम ।
यतो जानामि राजेन्द्र नान्यथा तद्भविष्यति २५
कुरवोऽपि महावीर्या देवैरपि सुदुर्जयाः ।
ससोमवरुणादित्यैः सयक्षेशहुताशनैः ॥ २६
यत्र शान्तनवो भीष्मो द्रोणकर्णौ सुदुर्जयौ ।
अश्वत्थामा विकर्णश्च सोमदत्तो जयद्रथः ॥ २७
भूरिश्रवाः शलो भूरिर्जलसन्धिश्च वीर्यवान् ।
दुर्योधनो दुष्प्रसहो दुःशासनविविंशती ॥ २८
वृषसेनोऽश्ववेगश्च वायुवेगसुवर्चसौ ।
बाह्लीकः शूरसेनश्च युयुत्सुश्च परन्तपः ॥ २९
सौबलः शकुनिश्चैव द्युमत्सेनश्च साल्वराट् ।
अन्ये च बहवः शूरा नानाजनपदेश्वराः ॥ ३०
कृपेणाचार्यमुख्येन सहिताः कुरवो नृपाः ।
सज्जकार्मुकनिस्त्रिंशा रथिनो रथयूथपाः ।
अन्ये चैव महावीर्या राजपुत्रा महारथाः ॥ ३१
मरुद्गणैः परिवृतः साक्षादपि पुरंदरः ।
तद्बलं न जयेत्क्रुद्धो भीष्मद्रोणादिभिर्वृतम् ॥३२
कस्तद्बृहन्नलादन्यो मनुष्यः प्रतियोत्स्यति ।
यस्य बाहुबले तुल्यो न भविष्यति कश्चन ॥ ३३
अतीव समरं दृष्ट्वा हर्षो यस्याभिवर्धते ।
किमेवं पुरुषो लोको दिवि वा भुवि विद्यते ॥३४
वैशंपायन उवाच ।
तेन संक्षुभितो राजा दीर्यमाणेन चेतसा ।
अब्रवीद्वचनं क्रूरमजानन्वै युधिष्ठिरम् ॥ ३५
कङ्क मा ब्रूहि मे वाक्यं प्रतिकूलं द्विजोत्तम ।
बहुशः प्रतिषिद्धस्त्वं न च वाचं नियच्छसि ॥ ३६
नियन्ता चेन्न विद्येत न कश्चिद्धर्ममाचरेत् ।
इति प्रक्षुभितो राजा सोऽक्षेणाभ्यहनद्भृशम् ॥३७
तस्य तक्षकभोगाभं बाहुमुत्क्षिप्य दक्षिणम् ।
विराटः प्राहनत्क्रुद्धः कर्णमाश्रित्य दक्षिणम् ॥ ३८
मुखे युधिष्ठिरं कोपान्नैवमित्यवभर्त्सयन् ।
बलवत्प्रतिविद्धस्य नस्तः शोणितमास्रवत् ॥ ३९
अक्षेणाभिहतो राजा विराटेन युधिष्ठिरः ।

धनानां च विनाशः वाक्पारुष्यं चाभवदिति शेषपूरणेन योजना ॥ १० ॥ किं किमपि ॥ १९ ॥

तूष्णीमासीन्महाबाहुः कृष्णां पश्यन्सुदुःखिताम्॥
तस्य रक्तोत्पलनिभं शिरसः शोणितं तदा ।
प्रावर्तत महाबाहोरभिघातान्महात्मनः ॥ ४१
तदप्राप्तं महीं पार्थः पाणिभ्यां समधारयत् ।
अवैक्षत च धर्मात्मा द्रौपदीं पार्श्वतः स्थिताम्॥४२
सा वेदनामभिज्ञाय भर्तुश्चित्तवशानुगा ।
सा विषण्णा च भीता च क्रुद्धा च द्रुपदात्मजा ४३
बाष्पं नियम्य कृच्छ्रेण भर्तुर्निःश्रेयसैषिणी ।
उत्तरीयेण सूक्ष्मेण तूर्णं जग्राह शोणितम् ॥ ४४
निगृह्य रक्तं वस्त्रेण सैरन्ध्री दुःखमोहिता ।
सौवर्णं गृह्य भृङ्गारं शोणितं तदपामृजत् ।
युधिष्ठिरस्य राजेन्द्र द्रुपदेन्द्रसुता तदा ॥ ४५
विराट उवाच ।
सैरन्ध्रि किमिदं रक्तमुत्तरीयेण गृह्यते ।
कोऽत्र हेतुर्विशालाक्षि तन्ममाचक्ष्व तत्वतः॥ ४६
सैरन्ध्र्युवाच ।
रक्तबिन्दूनि यावन्ति कङ्कस्य धरणीतले ।
तावद्वर्षाणि राष्ट्रे ते अनावृष्टिर्भविष्यति ॥ ४७
एतन्निमित्तं मात्स्येन्द्र कङ्कस्य रुधिरं मया ।
गृहीतमुत्तरीयेण विनाशो मा भवेत्तव ॥ ४८
यतीशं यो विहन्येत तस्यायुर्विनशिष्यति ।
यो यतीशं नियम्येत सहस्रं यातना यमे ॥ ४९
यतौ रक्तं दर्शयति यावत्पांसुरगृह्यत ।
तावन्तः पितृलोकस्थाः पितरः प्रपतन्त्यधः ॥५०
इति ज्ञात्वा विराटेन्द्र धृतं रक्तं च वाससा ।
मया तव हितार्थाय त्वयि प्रणयकारणात् ॥ ५१

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः ॥ ७१ ॥

अर्जुनकुरुयुद्धदिदृक्षया समागतैर्देवैरर्जुनं श्लाघमानैः सद्भिः पुनः स्वर्गंप्रति गमनम् ॥ १ ॥ उत्तरेण सवादित्रघोषं पौरैः प्रत्युद्गम्यमानेन स्वनगरप्रवेशनम् ॥ २ ॥

जनमेजय उवाच ।
युद्धं तु मानुषं द्रष्टुमागतास्त्रिदशाः पुरा ।
किमकुर्वन्त ते पश्चात्कथयस्व ममानघ ॥ १
वैशंपायन उवाच ।
वासवप्रमुखाः सर्वे देवाः सर्षिपुरोगमाः ।
यक्षगन्धर्वसङ्घाश्च गणा अप्सरसां तथा ॥ २
युद्धं तु मानुषं दृष्ट्वा कुरूणां फल्गुनस्य च ।
एकस्य च बहूनां च रौद्रमत्युग्रदर्शनम् ॥ ३
अस्त्राणामथ दिव्यानां प्रयोगानथ संग्रहान् ।
लघु सुष्ठु च चित्रं च कृतीनां च प्रयत्नतः ॥ ४
भीष्मं शारद्वतं द्रोणं कर्णं गाण्डीवधन्वना ।
जितानन्यान्भूमिपालान्दृष्ट्वा जग्मुर्दिवौकसः॥ ५
सर्वे ते परितुष्टाश्च प्रशस्य च मुहुर्मुहुः ।
असङ्गगतिना तेन विमानेनाशुगामिना ।
प्रतिजग्मुरसङ्गास्ते त्रिदिवं च दिवौकसः ॥ ६
[*कुरवो निर्जिताः सर्वे भीष्मद्रोणकृपादयः ।
अजय्यास्त्रिदशैः सर्वैः सेन्द्रैः सर्वैः सुरासुरैः ।
पार्थेनैकेन संग्रामे विस्मयो नो महानहो ॥ ७
कस्मिन्मुहूर्ते संजातः कस्य धर्मस्य वा फलम् ॥ ८
किमाश्चर्यं फल्गुनेऽस्मिन्यो रुद्रेण न्ययोधयत् ।
निवातकवचानाजौ यस्त्रिंशत्कोटिसंमितान् ॥ ९
तस्य चैतत्किमाश्चर्यं स्तुवन्त इति ते सुराः ।
जग्मुः सुरालयं हृष्टा विस्मयाविष्टचेतसः ॥] १०
कुरवोऽर्जुनबाणैश्च ताडिताः शरविक्षताः ।

धरणीतले पतेयुरिति शेषः ॥ ४७ ॥ नियम्येत नियमयेत् तस्येति शेषः ॥ ४९ ॥ अगृह्यत गृह्येत रक्तेनेति शेषः ॥ ५० ॥ इतीममर्थम् ॥ ५१ ॥ सप्ततितमोऽध्यायः ॥ ७० ॥

* इमे श्लोकाः थ. पुस्तकमात्रे वर्तन्ते ।

कुरूनभिमुखा याताः समग्रबलवाहनाः ॥ ११
विराटनगराच्चैव गजाश्वरथसंकुलाः ।
योधैः क्षत्रियदायादैर्बलवद्भिरधिष्ठिताः ॥ १२
विराटप्रहिता सेना नगराच्छीघ्रयायिनी ।
उत्तरं सह सूतेन प्रत्ययात्तमरिन्दमम् ॥ १३
तस्मिंस्तूर्यशताकीर्णे हस्त्यश्वरथसंकुले ।
प्रहर्षः स्त्रीकुमाराणां तुमुलः समपद्यत ॥ १४
अर्जुनस्तु ततो दृष्ट्वा सैन्यरेणुं समुत्थितम् ।
सैन्यध्वजं निशम्याथ वैराटिं समभाषत ॥ १५
नगरे तुमुलः शब्दो रेणुश्चाक्रमते नभः ।
किंनु खल्वपयातास्ते कुरवो नगरं गताः ॥ १६
ते चैव निर्जिताऽस्माभिर्महेष्वासाः सुतेजसः ।
आमुञ्च कवचं वीर चोदयस्व च वाजिनः ।
जवेनाभिप्रपद्यस्व विराटनगरं प्रति ॥ १७
न तावत्तलनिर्घोषं गाण्डीवस्य च निस्वनम् ।
ध्वजं वा दर्शयिष्यामि अथवा स्वजनो भवेत् ॥१८

उत्तर उवाच ।

सेनाग्रमेतन्मात्स्यानां गणिकाश्च स्वलंकृताः ।
कन्या रथेषु दृश्यन्ते योधा विविधवाससः ॥१९
उत्तरामत्र पश्यामि सखीभिः परिवारिताम् ।
अनीकिन्यः प्रदृश्यन्ते हस्तिनोश्वाश्च वर्मिताः २०
रथिनश्च पदाताश्च बहवो न च शस्त्रिणः ।
विराटवचनात्सर्वे संहृष्टाः प्रतिभान्ति मे ।
न च मेऽत्र प्रतीघातश्चित्तस्य स्वजने यथा ॥२१

वैशंपायन उवाच ।

ततः शीघ्रं समासाद्य उत्तरं स्वजनो बहु ।
परस्परममित्रघ्नं सस्वजे तं समागतम् ॥ २२

जना ऊचुः ।

प्रीतिमान्पुरुषव्याघ्रो हर्षयुक्तः पुनःपुनः ।
दिष्ट्या जयसि भद्रं ते दिष्ट्या सूतो बृहन्नला ।
दिष्ट्या संग्राममागम्य भयं तव न किंचन ॥२३

उत्तर उवाच ।

अजैषीदेष ताञ्जिष्णुः कुरूनेकरथो रणे ।
एतस्य बाहुवीर्येण तथेन गावो जिता मया ।
कुरवो निर्जिता यस्मात्संग्रामेऽमिततेजसः ॥ २४
अकार्षीदेष तत्कर्म देवपुत्रोपमो युवा ।
एष तत्पुरुषव्याघ्रो विक्षोभ्य कुरुमण्डलम् ।
गावः प्रसह्य विजिता रणे मां चाभ्यपालयत् ॥ २५

वैशंपायन उवाच ।

उत्तरस्य वचः श्रुत्वा शंसमानस्य चार्जुनम् ।
चोदिता राजपुत्रेण जयं मङ्गलवादिनः ॥ २६
ततो गन्धैश्च माल्यैश्च धूपैश्च वसुसंभृतैः ।
कन्याः पार्थममित्रघ्नं किरन्त्यः समपूजयन् ॥२७
आपूर्यमाणो माल्यैश्च गन्धैश्च विविधैः शुभैः ।
संपूज्यमानो लोकेन नगरद्वारमागमत् ॥ २८

भेर्यश्च तूर्याणि च वेणवश्च
विचित्रवेषाः प्रमदाजनाश्च ।
पुरो विराटस्य महाबलस्य
निष्क्रम्य भूमिंजयमभ्यनन्दन् ॥ २९
प्रशस्यमानस्तु जयेन तत्र
पुत्रो विराटस्य न हृष्यति स्म ।
संभाष्यमाणस्तु जयेन तत्र
सोऽन्तर्मनाः पाण्डवमीक्षमाणः ॥ ३०
पुत्र्यै विराटस्य ततो वराणि
वस्त्राण्यदात्पाण्डुसुतः सखीभ्यः ।
सभाजयंश्चापि समागतास्ता
दृष्ट्वा जयं तच्च बलं कुमार्यः ॥ ३१

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥

जिष्णुः जयशीलः ॥ २४ ॥ जयं घोषयन्निति शेषः ॥२६॥ अन्तर्मनाः दुर्मनाः ॥ ३० ॥ एकसप्ततितमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

उत्तरेण राजाभ्यनुज्ञयाऽन्तःपुरमेत्य तदभिवादनम् ॥ १ ॥ युधिष्ठिरव्रणावलोकनभीतोत्तरचोदनया विराटेन युधिष्ठिरक्षमापनम् ॥ २ ॥ ततोऽर्जुनस्यान्तःप्रवेशः ॥ ३ ॥ उत्तरस्यैव जेतृत्वभ्रमहृष्टेन विराटेन तत्प्रशंसनम् ॥ ४ ॥ तेन तंप्रति कस्यचिद्देवपुत्रस्यैव जेतृत्वकथनम् ॥ ५ ॥ ततोऽर्जुनेनोत्तराप्रभृतिभ्यः कुरुवस्त्रप्रदानम् ॥ ६ ॥

वैशंपायन उवाच ।
सभाज्यमानः पौरैश्च स्त्रीभिर्जानपदैरपि ।
आसाद्यान्तःपुरद्वारं पित्रे संप्रत्यवेदयत् ॥ १
ततो द्वाःस्थः समासाद्य प्रणिपत्य कृताञ्जलिः ।
वर्धयित्वा जयाशीर्भिरिदं वचनमब्रवीत् ॥ २
राजन्पृथुयशस्तुभ्यं जित्वा शत्रून्समागतः ।
उत्तरः सह सूतेन द्वारि तिष्ठति वारितः ॥ ३
कुमारो योधमुख्यैश्च गणिकाभिश्च संवृतः ।
पौरजानपदैर्युक्तः पूज्यमानो जयाशिषा ॥ ४
ततो हृष्टो महीपालः क्षत्तारमिदमब्रवीत् ।
प्रवेशयोभौ तौ तूर्णं दर्शनेप्सुरहं तयोः ॥ ५
क्षत्तारं कुरुराजस्तु शनैः कर्ण उपाजपत् ।
उत्तरः प्रविशत्वेको न प्रवेश्या बृहन्नला ॥ ६
एतस्य हि महाबाहोर्व्रतं नित्यं महात्मनः ।
यो ममाङ्गे व्रणं कुर्याच्छोणितं वा प्रदर्शयेत् ।
अन्यत्र संग्रामगतान्न स जीवेत्कथंचन ॥ ७
व्यक्तं भृशं सुसंक्रुद्धो मां दृष्ट्वैव सशोणितम् ।
विराटमिह सामात्यं हन्यात्सबलवाहनम् ॥ ८
इन्द्रं वापि कुबेरं वा यमं वा वरुणं तथा ।
मम शोणितकर्तारं मृद्नीयात्किं पुनर्नरम् ॥ ९
क्षणमात्रं तु तत्रैव द्वारि तिष्ठतु वीर्यवान् ।
इति प्रोवाच धर्मात्मा युधिष्ठिर उदारधीः ॥ १०
इत्युक्त्वा क्षमया युक्तो धर्मराजो घृणान्वितः ।
सभायां सह मात्स्येन तूष्णीमुपविवेश ह ॥ ११
ततो राजसुतो ज्येष्ठः प्राविशत्पृथिवींजयः ।
ववन्दे स पितुः पादौ कङ्कं चाप्युपतिष्ठत ॥ १२
पश्यन्युधिष्ठिरं दृष्ट्वा वक्रया चरणौ पितुः ।
अभिवाद्य ततो दृष्ट्वा कङ्कस्य रुधिरप्लुतम् ।
हृदयेऽदह्यत तदा मृत्युग्रस्त इवोत्तरः ॥ १३
ततो रुधिरसिक्ताङ्गमनेकाग्रमनागसम् ।
भूमावेकान्त आसीनं सैरन्ध्र्या समुपासितम् ।
ततः पप्रच्छ राजानं त्वरमाण इवोत्तरः ॥ १४
केनायं ताडितः कङ्कः केन पापमिदं कृतम् ।
को वा जिगमिषुर्मृत्युं केन स्पृष्टः पदोरगः ॥ १५
श्रोत्रियो ब्राह्मणश्रेष्ठ इन्द्रासनरतिक्षमः ।
पूजनीयोऽभिवाद्यश्च न प्रबाध्योऽयमीदृशः ॥ १६
वैशंपायन उवाच ।
स पुत्रस्य वचः श्रुत्वा विराटो राष्ट्रवर्धनः ।
प्रत्युवाचोत्तरं वाक्यं साध्वसाद्धस्तमानसः ॥ १७
पुत्र ते विजयं श्रुत्वा प्रहृष्टोऽहं मुदा भृशम् ।
अक्षक्रीडनयाऽनेन कालक्षेपमकारिषम् ॥ १८
तत्राजयत्कुरून्सर्वानुत्तरो राष्ट्रवर्धनः ।
इत्युक्ते हि मया पुत्र नेति कङ्को बृहन्नला ।
अजयत्सा कुरून्सर्वानिति मामब्रवीन्मुहुः ॥ १९
प्रशंसिते मया पुत्र विजये तव विश्रुते ।
बृहन्नलाया विजयं कङ्कोऽस्तुवत वै रुषा ॥ २०
मया प्रशस्यमाने तु त्वयि षण्डं प्रशंसति ।
बृहन्नलाप्रशंसाभिरभ्यसूयमहं तदा ।
ताडितोऽयं मया पुत्र दुरात्मा शत्रुपक्षकृत् ॥ २१
ताडितोऽयं यतिः कङ्क इत्युक्ते तद्वचोत्तरः ।
श्रुत्वा पितुर्भृशं क्रुद्धः पितरं वाक्यमब्रवीत् ॥ २२
अकार्यं ते कृतं राजन्क्षिप्रमेष प्रसाद्यताम् ।
मा त्वा ब्रह्मविषं घोरं समूलमुपनिर्दहेत् ॥ २३
यावन्न क्षयमायाति कुलं सर्वमशेषतः ।
स्फीतं वृद्धं च मात्स्यानामयं तावत्प्रसाद्यताम् २४
प्रणम्य पादयोरस्य दण्डवत्क्षितिमण्डले ।

क्षत्तारं सारथिम् ॥ ५ ॥ कर्ण उपाजपत् कर्णे इति च्छेदः ॥ ६ ॥ ममाङ्ग इति मम युधिष्ठिरस्य । संग्रामाय गतात् गमनात् ॥ ७ ॥ रुधिरप्लुतं रुधिरस्रावम् ॥ १३ ॥ अनेकाग्रं व्यग्रम् । युधिष्ठिरं दृष्ट्वा राजानं पप्रच्छेत्यन्वयः ॥ १४ ॥ तद्वचः इति च्छेदः संधिरार्षः ॥ २२ ॥

प्रगृह्य पादौ पाणिभ्यामयं तावत्प्रसाद्यताम् ॥२५
दक्षेण पाणिना स्पृष्ट्वा शपे त्वां क्षपितं मया ।
इति यावद्वदेत्कङ्क अयं तावत्प्रसाद्यताम् ॥ २६
स पुत्रस्य वचः श्रुत्वा विराटः साध्वसाकुलः ।
क्षमयामास कौन्तेयं छन्नं ब्राह्मणवर्चसा ॥ २८
क्षमयन्तं तु राजानं पाण्डवः प्रत्यभाषत ।
चिरं क्षान्तं मया राजन्मन्युर्मम न विद्यते ॥२७
यदि स्म तत्पतेद्भूमौ रुधिरं मम पार्थिव ।
सराष्ट्रस्त्वमिहोच्छेदमापद्येथा नरर्षभ ॥ २९
न दूषयामि राजेन्द्र यस्तु हन्याददूषकम् ।
फलं तस्य महाराज क्षिप्रं दारुणमाप्नुयात् ॥ ३०
वैशंपायन उवाच ।
शोणिते तु व्यतिक्रान्ते प्रविवेश बृहन्नला ।
अभिवाद्य महाराजं कङ्कं चाप्युपतिष्ठत ॥ ३१
क्षमयित्वा तु कौरव्यं रणादुत्तरमागतम् ।
परिष्वज्य दृढं राजा प्रवेश्य भवनोत्तमम् ।
प्रशशंस ततो मात्स्यः शृण्वतः सव्यसाचिनः॥३२
विराट उवाच ।
त्वया दायादवानस्मि कैकेयीनन्दिवर्धन ।
त्वया मे सदृशः पुत्रो न भूतो न भविष्यति॥ ३३
पदं पदसहस्रेण यश्चरन्नापराध्नुयात् ।
तेन कर्णेन ते तात कथमासीत्समागमः ॥ ३४
रणे यं प्रेक्ष्य सीदन्ति हृतवीर्यपराक्रमाः ।
कृपेन तेन ते तात कथमासीत्समागमः ॥ ३५
यस्य तद्विश्रुतं लोके महद्वृत्तमनुत्तमम् ।
पितुः कृते कृतं घोरं ब्रह्मचर्यमनुत्तमम् ॥ ३६
योऽयोधीत्समरे रामं जामदग्न्यं प्रतापिनम् ।
भीष्मोसौ पुरुषव्याघ्र न च युद्धे पराजितः ॥ ३७
पराक्रमी च दुर्धर्षो विद्वाञ्शूरो जितेन्द्रियः ।
दृढवेधी क्षिप्रकारी विश्रुतः सर्वकर्मसु ॥ ३८
तेन ते सह भीष्मेण कुरुवृद्धेन संयुगे ।
युद्धमासीत्कथं तात सर्वमेतद्ब्रवीहि मे ॥ ३९
पर्वतं यो विनिर्भिन्द्याद्राजपुत्रो वरेषुभिः ।
दुर्योधनेन ते तात कथमासीत्समागमः ॥ ४०
आचार्यो वृष्णिवीराणां पाञ्चालानां च यः प्रभुः ।
कुरूणां पाण्डवानां च सर्वक्षत्रस्य यो गुरुः ॥ ४१
सर्वशस्त्रभृतां श्रेष्ठः सर्वलोकेषु विश्रुतः ।
तेन द्रोणेन ते तात कथमासीत्समागमः ॥ ४२
आचार्यपुत्रो यः शूरो द्रोणादनवमो रणे ।
तेन वीरेण ते तात कथमासीत्समागमः ॥ ४३
सर्वे चैव महावीर्या धार्तराष्ट्रा महारथाः ।
तैस्तैर्वीरैश्च ते तात कथमासीत्समागमः ॥ ४४
उत्तर उवाच ।
न मया निर्जिता गावो न मया कुरवो जिताः ।
कृतं च कर्म तत्सर्वं देवपुत्रेण केनचित् ॥ ४५
स हि भीतं द्रवन्तं मां भीष्मद्रोणमुखान्कुरून् ।
दृष्ट्वा विषण्णं संग्रामे देवपुत्रो न्यवारयत् ॥ ४६
स हि तिष्ठन्रथोपस्थे वज्रपाणिनिभो युवा ।
तेन ते निर्जिता गावस्तेन ते कुरवो जिताः॥४७
तस्य तत्कर्म वीरस्य न मया तात तत्कृतम् ।
स हि शारद्वतं द्रोणं द्रोणपुत्रं च वीर्यवान् ।
सूतपुत्रं च भीष्मं च चकार विमुखाञ्शरैः ॥ ४८
दुर्योधनं च समरे प्रभिन्नमिव कुञ्जरम् ।
प्रभग्नमब्रवीद्भीतं राजपुत्रं महाबलम् ॥ ४९
न हास्तिनपुरे त्राणं तव पश्यामि किंचन ।
न हास्तिनपुरे भोगा भोक्तुं शक्याः पलायता॥५०
व्यायामेन परीप्सस्व जीवितं कौरवात्मज ।
न मोक्ष्यसे पलायंस्त्वं लोके युद्धमना भव ।
पृथिवीं भोक्ष्यसे जित्वा हतो वा स्वर्गमाप्स्यसि५१
स निवृत्तो नरव्याघ्रो मुञ्चन्वज्रनिभाञ्शरान् ।
सचिवैः संवृतो राजा भीष्मद्रोणकृपादिभिः ।
ततो मे रोमहर्षोऽभूदूरुस्तम्भश्च मेऽभवत् ॥ ५२

तस्येति । स इति शेषः । स हन्ता तस्य स्वकृतहननस्य ॥३०॥ उपतिष्ठत उपातिष्ठत असेवत ॥ ३१ ॥ दायादवान्पुत्रवान् ॥ ३३ ॥ पदसहस्रेण लक्ष्यसहस्रार्थम् । हेत्वर्थे तृतीया । युगपत्सहस्रलक्ष्याणि वेद्धुमित्यर्थः । चरन् बाणैः । पदं एकमपि लक्ष्यं नापराध्नुयात् लक्ष्यात् च्युतसायको न भवेदित्यर्थः॥३४॥ तिष्ठन् अयुध्यतेति शेषः ॥ ४७ ॥ स निवृत्तोऽभूदित्यन्वयः

यद्भूद्घनसंकाशमनीकं व्यधमच्छरैः ।
तत्प्रणुद्य रथानीकं सिंहदर्पसमो युवा ।
तान्कुरून्द्रावयद्राजन्रणे नाग इव श्वसन् ॥ ५३
एकेन तेन शूरेण षड्रथाः परिनिर्जिताः ।
शार्दूलेनेव मत्तेन मृगास्तृणचरा यथा ॥ ५४
हयानां च गजानां च शूराणां च धनुष्मताम् ।
निहतानि सहस्राणि भग्ना च कुरुवाहिनी ॥ ५५
सूतपुत्रं शतैर्विद्ध्वा हयान्हत्वा महारथः ।
अस्त्रेण मोहयित्वा तं रक्तवस्त्रं समाददे ॥ ५६
चतुर्भिः पुनरानर्च्छद्भीष्मं शान्तनवं शरैः ।
स तं विद्ध्वा हयांश्चाशु नास्य वस्त्रं समाददे ॥ ५७
दुर्योधनं च बलवान्बाणैर्विव्याध सप्तभिः ।
तं स विद्ध्वा हयांश्चास्य पीतवस्त्रं समाददे ॥ ५८
द्रोणं कृपं च बलवान्सोमदत्तं जयद्रथम् ।
भूरिश्रवसमिन्द्राभं शकुनिं च महारथम् ॥ ५९
त्रिभिस्त्रिभिः स विद्ध्वा तु दुःशासनमुखानपि ।
विविधानि च वस्त्राणि महार्हाण्याजहार सः ६०
द्वाभ्यां शराभ्यां विद्ध्वाऽथ तथाऽऽचार्यसुतं रणे ।
चापं छित्त्वा विकर्णस्य नीले चादत्त वाससी ६१

विराट उवाच ।
क्व स वीरो महाबाहुर्देवपुत्रो महायशाः ।
यो ममामोचयत्पुत्रं कुरुभिर्ग्रस्तमाहवे ॥ ६२
इच्छामि तममित्रघ्नं द्रष्टुमर्चितुमेव च ।
येन मे त्वं च गावश्च मोक्षिता देवसूनुना ॥६३
तस्मै दास्यामि तां पुत्रीं ग्रामांश्चैव तु हाटकान् ।
स्फुरितं कटिसूत्रं च स्त्रीसहस्रशतानि च ॥ ६४
उत्तर उवाच ।
अन्तर्धानं गतस्तात देवपुत्रः प्रतापवान् ।
अद्य श्वो वा परश्वो वा मन्ये प्रादुर्भविष्यति ॥६५
वैशंपायन उवाच ।
एवमाख्यायमानस्तु छन्नं सत्रेण पाण्डवम् ।
वसन्तं तं तु नाज्ञासीद्विराटः पार्थमर्जुनम् ॥६६
ततः पार्थोऽभ्यनुज्ञातो विराटेन महात्मना ।
सह पुत्रेण मात्स्यस्य मन्त्रयित्वा धनंजयः ॥६७
इत्येवं ब्रूहि राजानं विराटं समुपस्थितम् ।
इत्युक्त्वा सहसा पार्थः प्रविश्यान्तःपुरं शुभम् ।
ददौ वस्त्राणि रत्नानि विराटदुहितुः स्वयम् ॥६८
उत्तरा तु महार्हाणि वस्त्राण्याभरणानि च ।
प्रगृह्य तानि सर्वाणि प्रीता सानुचराऽभवत् ॥६९

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

भीमार्जुनादिभी रात्रौ युधिष्ठिरसमीपगमनम् ॥ १ ॥ युधिष्ठिरेण सहर्षं स्वानभिभाषणे अर्जुनेन भीमंप्रति तत्कारणप्रश्नः ॥ २ ॥ युधिष्ठिरेण तंप्रति विराटेनाक्षताडनस्य तत्कारणत्वकथनम् ॥ ३ ॥ भीमादिभिः क्रोधाद्विराटवधाध्यवसाये युधिष्ठिरेण हेतुकथनेन तत्प्रतिषेधनम् ॥ ४ ॥

वैशंपायन उवाच ।
प्रदाय वस्त्राणि किरीटमाली
विराटगेहे मुदितः सखीभ्यः ।
कृत्वा महत्कर्म तदाऽऽजिमध्ये
दिदृक्षया सोऽभिजगाम पार्थम् ॥ १
तं प्रेक्षमाणस्त्वथ धर्मराजं
पप्रच्छ पार्थोऽथ स भीमसेनम् ।
किं धर्मराजो हि यथापुरं मां
मुखं प्रतिच्छाद्य न चाह किंचित् ॥ २
तमेवमुक्त्वा परिशङ्कमानं
दृष्ट्वाऽर्जुनं भीमसेनं च राजा ।
तदाऽब्रवीत्तावभिवीक्ष्य राज-
न्युधिष्ठिरस्तत्परिमृज्य रक्तम् ॥ ३

॥ ५२ ॥ सिंहेन दर्पे समः । द्रावयत् अद्रावयत् ॥ ५३ ॥ तृणचरास्तृणभक्षकाः ॥ ५४ ॥ सत्रेण वेषान्तरेण ॥ ६६ ॥ * इतो ब्रूहि राजानं विराटं चेति थ. पाठः ॥ ६८ ॥ द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

दुरात्मना त्वय्यभिपूज्यमाने
विराटराज्ञाऽभिहतोऽस्मि पार्थ ।
तस्मात्प्रहाराद्रुधिरस्य बिन्दू-
न्पश्यन्न चेमे पृथिवीं स्पृशेयुः ।
इति प्रतिच्छाद्य मुखं ततोऽहं
मन्युं नियच्छन्नुपविष्ट आसम् ॥ ४
शुभार्हे राष्ट्रं न खिलीकृतं भवे-
द्वयं तु यस्मिन्सुखिनोऽभवाम ।
क्रुद्धे तु वीरे त्वयि चाप्रतीते
राजा विराटो न लभेत शर्म ॥ ५
अजानता तेन च शौर्यमाजौ
छन्नस्य सत्रेण बलं च पार्थ ।
इदं विराटेन मयि प्रयुक्तं
त्वां वीक्षमाणो न गतोस्मि हर्षम् ॥ ६
वैशंपायन उवाच ।
तेनाप्रमेयेन महाबलेन
तस्मिंस्तथोक्ते शममास्थितेन ।
तं भीमसेनो बलवानमर्षी
धनंजयं क्रुद्धमुवाच वाक्यम् ॥ ७
न पार्थ नित्यं क्षमकालमाह
बृहस्पतिर्ज्ञानवतां वरिष्ठः ।
क्षमीह सर्वैः परिभूयतेसौ
यथा भुजङ्गो विषवीर्यहीनः ॥ ८
विराटमद्यैव निहत्य शीघ्रं
सपुत्रपौत्रं सकुलं ससैन्यम् ।
योक्ष्यामहे धर्मसुतं च राज्ये
अद्यैव शीघ्रं त्वरितेष मात्स्यः ॥ ९
अनेन पाञ्चालसुताऽथ कृष्णा
उपेक्षिता कीचकेनाभियुक्ता ।
तस्मादयं नार्हति राजशब्दं
राजा भव त्वं नृप पार्थवीर्यात् ॥ १०
राजा कुरूणां च युधिष्ठिरोऽयं
मात्स्येषु राजा भवतु प्रवीरः ।
तं मात्स्यदेहं शतधा भिनद्मि
पूर्णोदकं कुम्भमिवाश्मनीह ॥ ११
अर्जुन उवाच ।
भवतः क्षमया राजन्त्सर्वे दोषाश्च नोऽभवन् ।
तं मात्स्यं सबलं हत्वा सपुत्रज्ञातिबान्धवम् ।
पश्चाच्चैव कुरून्सर्वान्हनिष्यामि न संशयः ॥ १२
भीमसेनश्च ये चान्ये तथैवेति तमब्रुवन् ॥ १३
तमब्रवीद्धर्मसुतो महात्मा
क्षमी वदान्यः कुपितं च भीमम् ।
न प्रत्युपस्थास्यति चेत्सदारः
प्रसादने सम्यगथास्तु वध्यः ॥ १४
न हन्तव्यो दुरात्माऽयं विराटश्चापि तेऽर्जुन १५
श्वः प्रभाते प्रवेक्ष्यामः सभां सिंहासनेष्वपि ।
राजवेषेण संयुक्ताः स्थानमस्य स्वलंकृताः ॥ १६
विराटो यदि तत्रस्थान्राजालङ्कारशोभितान् ।
राजलक्षणसंपन्नान्यदि तत्र न मंस्यते ।
पश्चाद्धन्यामहे पार्थ विराटं सहबान्धवम् ॥ १७
इतिकर्तव्यतां सर्वे मन्त्रयित्वा तु पाण्डवाः ।
न्यवसंश्चैव तां रात्रिं धर्मज्ञा धर्मवत्सलाः ॥ १८
सहपुत्रेण मात्स्यः स संप्रहृष्टो नराधिपः ।
तां रात्रिमवसत्प्रीतः संप्रहृष्टेन चेतसा ॥ १९

॥ इति श्रीमन्महाभारते विराटपर्वणि गोग्रहणपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

समाप्तं च गोग्रहणपर्व ॥ ४ ॥

(अथ वैवाहिकपर्व ॥ ५ ॥)

चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

कुरुविजयदिनात्परेद्युः प्रभाते युधिष्ठिरादिभी राजलक्षणधारणेन सिंहासनादिपूपवेशनम् ॥ १ ॥ ततः सहोत्तरेण सभामागतवता विराटेन युधिष्ठिरंप्रति राजासनोपवेशनाक्षेपः ॥ २ ॥ अर्जुनेन तंप्रति युधिष्ठिरस्य याथातथ्यकथनेन तदीयगुणानुवर्णनपूर्वकं तस्य राजासनारोहणार्हत्वप्रतिपादनम् ॥ ३ ॥

वैशंपायन उवाच ।
ततो द्वितीये दिवसे भ्रातरः पञ्च पाण्डवाः ।
स्नाताः शुक्लाम्बरधराः सर्वे सुचरितव्रताः ॥ १
युधिष्ठिरं पुरस्कृत्य सर्वाभरणभूषिताः ।
अभिपन्ना महाभागा भ्राजमाना महारथाः ॥ २
विराटस्य सभां प्राप्य भूमिपालासनेषु ते ।
निषेदुः पावकप्रख्याः सत्रे धिष्ण्येष्विवाग्नयः ॥ ३
तेषु तत्रोपविष्टेषु विराटः पृथिवीपतिः ।
तस्यां रात्र्यां व्यतीतायां प्रातःकृत्यं समाप्य च ॥ ४
गोसुवर्णादिकं दत्त्वा ब्राह्मणेभ्यो यथाविधि ।
आजगाम सभां राजा उत्तरेण सह प्रभो ॥ ५
स तान्दृष्ट्वा महासत्वाञ्ज्वलतः पावकानिव ।
राजवेषानुपादाय पार्थिवो विस्मितोऽभवत् ॥ ६
किमिदं को विधिस्त्वेष भयार्त इव पार्थिवः ।
पुरुषप्रवरान्दृष्ट्वा विषादमगमन्नृपः ॥ ७
अथ मात्स्योऽब्रवीत्कङ्कं देवराजमिव स्थितम् ।
मरुद्गणैरुपासीनं त्रिदशानामिवेश्वरम् ॥ ८
स किलाक्षनिवापस्त्वं सभास्तारो मया कृतः ।
अथ राजासने कस्मादुपविष्टोऽस्यलंकृतः ॥ ९
वैशंपायन उवाच ।
परिहासेच्छया राज्ञो विराटस्य निशम्य तत् ।
स्मयमानोऽब्रवीद्वाक्यमर्जुनः परवीरहा ॥ १०
इन्द्रस्यार्धासनं राजन्नयमारोढुमर्हति ।
ब्रह्मण्यः श्रुतवांस्त्यागी सर्वलोकाभिपूजितः ॥ ११
एष विग्रहवान्धर्म एष वीर्यवतां वरः ।
एष बुद्ध्याधिको लोके तपसां च परायणम् ॥ १२
एषोऽस्त्रं विविधं वेत्ति त्रैलोक्ये सचराचरे ।
न चैवान्यः पुमान्वेत्ति न वेत्स्यति कदाचन ॥ १३
न देवा नासुराः केचिन्न मनुष्या न राक्षसाः ।
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ॥ १४
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ।
पाण्डवानामतिरथो यज्ञधर्मपरो वशी ॥ १५
महर्षिकल्पो राजर्षिः सर्वलोकेषु विश्रुतः ।
बलवान्धृतिमान्दक्षः सत्यवादी जितेन्द्रियः ॥ १६
धनैश्च संचयैश्चैव शक्रवैश्रवणोपमः ।
यथा मनुर्महातेजा लोकानां परिरक्षिता ।
एवमेव महातेजाः प्रजानुग्रहकारकः ॥ १७
अयं कुरूणामृषभः कुन्तीपुत्रो युधिष्ठिरः ।
यस्य कीर्तिः स्थिता लोके सूर्यस्येवोद्यतः प्रभा ॥ १८
संसरन्ति दिशः सर्वा यशसोस्य गभस्तयः ।
उदितस्येव सूर्यस्य तेजसोऽनुगभस्तयः ॥ १९
एनं त्रिंशत्सहस्राणि कुञ्जराणां तरस्विनाम् ।
अन्वयुः पृष्ठतो राजन्यावदध्यावसत्कुरून् ॥ २०
त्रिंशच्चैव सहस्राणि रथानां रथिनां वरम् ।
सदश्वैरुपसंपन्नाः पृष्ठतोऽनुययुस्तदा ॥ २१
वाजिनां च शतं राजन्त्सहस्राण्ययुतानि च ।
इममष्टशतं सूताः सुमृष्टमणिकुण्डलाः ।
तुष्टुवुर्मागधैः सार्धं पुरा शक्रमिवर्षयः ॥ २२
इमं नित्यमुपातिष्ठन्कुरवः किंकरास्तदा ।
सर्वे च नृप राजानं धनेश्वरमिवामराः ॥ २३
एष सर्वान्महीपालान्करमाहारयत्तदा ।
वैश्यानिव महाराज विवशान्स्ववशानपि ॥ २४
अष्टाशीतिसहस्राणि स्नातकानां महात्मनाम् ।
उपजीवन्ति राजानमेनं सुचरितव्रताः ॥ २५
एष वृद्धाननाथांश्च व्यङ्गान्पङ्गूंश्च वामनान् ।
पुत्रवत्पालयामास प्रजाधर्मेण चाभिभूः ॥ २६

राजवेषाऽनुपादाय स्थितानिति शेषः ॥ ६ ॥

चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

एष धर्मे दमे चैव दाने सत्ये रतः सदा ।
महाप्रसादो ब्रह्मण्यः सत्यवादी च पार्थिवः २७
श्रीमत्संपत्प्रभावेन तप्यते यस्य कौरवः ।
सगणः सह कर्णेन सौबलेन च वीर्यवान् ॥२८
गुणा न शक्याः संख्यातुमेतस्यैव नरेश्वर ।
एष धर्मपरो नित्यमनृशंसः सुशीलवान् ॥ २९
एवं युक्तो महाराजा पाण्डवः पुरुषर्षभः ।
कथं नार्हति राजार्हमासनं पृथिवीपतिः ॥ ३०

॥ इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

अर्जुनेन विराटप्रश्नाद्बल्लादीनां भीमसेनादित्वकथनम् ॥ १ ॥ उत्तरेण विराटंप्रति तत्तल्लक्षणाभिधानपूर्वकं युधिष्ठिरादीनां निर्देशः ॥ २ ॥ तथाऽर्जुनपराक्रमवर्णनम् ॥ ३ ॥ ततो विराटेन सप्रणामं युधिष्ठिरादिप्रसादनम् ॥ ४ ॥

विराट उवाच ।
यद्येष राजा कौरव्यः कुन्तीपुत्रो युधिष्ठिरः ।
कतमोऽस्यार्जुनो भ्राता भीमश्च कतमो बली ॥१
नकुलः सहदेवो वा द्रौपदी वा यशस्विनी ।
यदा ह्यक्षैर्जिता ह्येते नान्तरा श्रूयते कथा ॥ २
अर्जुन उवाच ।
य एष बल्लोऽभूत्ते सूपकारश्च ते नृप ।
एष भीमो महाभाग भीमवेगपराक्रमः ॥ ३
एष क्रोधवशान्हत्वा पर्वते गन्धमादने ।
सौगन्धिकानि पुष्पाणि कृष्णार्थे समुपानयत् ॥४
गन्धर्व एष वै हन्ता कीचकानां दुरात्मनाम् ।
व्याघ्रानृक्षान्गजांश्चैव हतवांश्च पुरे तव ॥ ५
हिडिम्बं च बकं चैव किर्मीरं च जटासुरम् ।
हत्वा निष्कण्टकं चक्रे अरण्यं सर्वतः शुभम् ॥६
यश्चासीदश्वबन्धस्ते नकुलोऽयं परन्तप ।
गोसङ्ख्यः सहदेवश्च माद्रीपुत्रौ महाबलौ ॥ ७
शृङ्गारवेषाभरणौ रूपवन्तौ मनस्विनौ ।
नानारथसहस्राणां समर्थौ भरतर्षभौ ॥ ८
एषा पद्मपलाशाक्षी सुमध्या चारुहासिनी ।
सैरन्ध्री द्रौपदी राजन्यत्कृते कीचका हताः ॥९
द्रुपदस्य प्रिया पुत्री धृष्टद्युम्नस्य चानुजा ।
अग्निकुण्डात्समुद्भूता द्रौपदी त्ववगम्यताम् ॥१०
भीम उवाच ।
अस्त्रज्ञो दुर्लभः कश्चित्केवलं पृथिवीमनु ।
धनुर्भृतामतिश्रेष्ठः कौन्तेयोयं धनंजयः ॥ ११
एतेन खाण्डवं तस्य ह्यकामस्य शतक्रतोः ।
दग्धं नागवनं चैव सह नागैर्नराधिप ॥ १२
वर्षं च शरवर्षेण वारितं दुर्जयेन वै ।
करमाहारिताः सर्वे पार्थिवाः पृथिवीतले ॥ १३
स्त्रीवेषं कृतवानेष तव राजन्निवेशने ।
बृहन्नलेति यामाहुरर्जुनं जयतांवरम् ॥ १४
उषिताःस्म सुखं सर्वे तव राजन्निवेशने ।
अज्ञातवासे निभृता गर्भवास इव प्रजाः ॥ १५
वैशंपायन उवाच ।
यदाऽर्जुनेन ते वीराः कथिताः पञ्च पाण्डवाः ।
पुनरेव च तान्पार्थान्दर्शयामास चोत्तरः ॥ १६
उत्तर उवाच ।
य एष जाम्बूनदशुद्धगौर-
तनुर्महान्सिंह इव प्रवृद्धः ।
प्रचण्डघोणः पृथुदीर्घनेत्र-
स्ताम्रायताक्षः कुरुराज एषः ॥ १७
अयं पुनर्मत्तगजेन्द्रगामी
प्रतप्तचामीकरशुद्धगौरः ।
पृथ्वायतांसो गुरुदीर्घबाहु-
र्वृकोदरः पश्यत पश्यतैनम् ॥ १८
यस्त्वेव पार्श्वेऽस्य महाधनुष्मा-
ञ्श्यामो युवा वारणयूथपोपमः ।
सिंहोन्नतांसो गजराजगामी
पद्मायताक्षोऽर्जुन एष वीरः ॥ १९

राज्ञः समीपे पुरुषोत्तमौ तु
यमाविमौ विष्णुमहेन्द्रकल्पौ ।
मनुष्यलोके सकले समोऽस्ति
ययोर्न रूपे न बले न शीले ॥ २०
आभ्यां तु पार्श्वे कनकोत्तमाङ्गी
यैषा प्रभा मूर्तिमतीव गौरी ।
नीलोत्पलाभा सुरदेवतेव
कृष्णा स्थिता मूर्तिमतीव लक्ष्मीः ॥ २१
वैशंपायन उवाच ।
एवं निवेद्य तान्पार्थान्पाण्डवान्पञ्च भूपतेः ।
ततोऽर्जुनस्य वैराटिः कथयामास विक्रमम् ॥ २२
अयं स द्विषतां मध्ये मृगाणामिव केसरी ।
अचरद्रथवृन्देषु निघ्नंस्तेषां परावरान् ॥ २३
अनेन विद्धा मातङ्गा महामेघोपमास्तदा ।
हिरण्यकक्ष्याः संग्रामे दन्ताभ्यामगमन्महीम् २४
अनेन विजिता गावो निर्जिताः कुरवो युधि ।
अस्य शङ्खस्य शब्देन कर्णौ मे बधिरीकृतौ ॥२५
जायते रोमहर्षो मे संस्मृत्यास्य धनुर्ध्वनिम् ।
ध्वजस्य वानरं भूतैराक्रोशन्तं सहानुगैः ॥ २६
नाददानं शरान्घोरान्न मुञ्चन्तं शरोत्करान् ।
न कार्मुकं विकर्षन्तमेनं पश्यामि संयुगे ॥ २७
एतद्धनुःप्रमुक्ताश्च शराः पुङ्खानुपुङ्खिनः ।
नालक्ष्येषु रणे पेतुर्नाराचा रक्तभोजनाः ॥ २८
तीक्ष्णनाराचसंकृत्तशिरोबाहूरुवक्षसाम् ।
कलेबराणि दृश्यन्ते योधानां साश्वसादिनां॥२९
अनेन तटिनी तत्र शोणिताम्बुप्रवाहिनी ।
प्रवर्तिता भीमरूपा यां स्मृत्वाऽद्यापि मे मनः ।
प्रकम्पते चण्डवायुकम्पिता कदली यथा ॥ ३०
अनेन राजन्वीरेण भीष्मद्रोणमुखा रथाः ।
दुर्योधनेन सहिता निर्जिता भीमकर्मणा ॥ ३१
अयं भीतं द्रवन्तं मां देवपुत्रो न्यवारयत् ।
यस्य बाहुबलेनास्मि जीवन्प्रत्यागतः पुरम् ॥ ३२
वैशंपायन उवाच ।
तस्य तद्वचनं श्रुत्वा मात्स्यराजः प्रतापवान् ।
धनंजयं परिष्वज्य पाण्डवानथ सर्वशः ॥ ३३
धर्मराजं नमस्कृत्य राजा राज्येऽभिषेचितम् ।
नातृप्यद्दर्शने तेषां विराटो वाहिनीपतिः ॥ ३४
संप्रीयमाणो राजानं युधिष्ठिरमथाब्रवीत् ।
दिष्ट्या भवन्तः संप्राप्ताः सर्वे कुशलिनो वनात् ।
दिष्ट्या विचरितं कृच्छ्रमज्ञातं च दुरात्मभिः ३५
इदं राज्यं च वः सर्वं यच्चापि वसु किंचन ।
विभक्तमेतद्भवतां नोत्कण्ठां कर्तुमर्हथ ।
अविभक्तं भवद्भिर्मे न सन्देहो नराधिपाः ॥३६

॥ इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

उत्तरेण विराटंप्रति युधिष्ठिरादिकृतोपकारस्मारणपूर्वकमुत्तरायाः प्रदानेन तत्प्रसादनचोदना ॥ १ ॥ युधिष्ठिरेणोत्तरायाः पुरस्कारेण सप्रणामं प्रसादयते विराटायाभयप्रदानम् ॥ २ ॥

वैशंपायन उवाच ।
विराटस्य वचः श्रुत्वा पार्थिवस्य महात्मनः ।
उत्तरः प्रत्युवाचेदमभिपन्नो युधिष्ठिरे ॥ १
प्रसादनं प्राप्तकालं पाण्डवस्याभिरोचये ।
तेजस्वी बलवाञ्शूरो राजराजेश्वरः प्रभुः ॥ २
उत्तरां च स्वसारं मे पार्थस्यामित्रकर्शन ।
प्रणिपत्य प्रयच्छामस्ततः शिष्टा भवामहे ॥ ३
वयं च सर्वे सामात्याः कुन्तीपुत्रं युधिष्ठिरम् ।
प्रसाद्याभ्युपतिष्ठामो राजन्किं करवामहे ॥ ४
राजंस्त्वमसि संग्रामे गृहीतस्तेन मोक्षितः ।
एतेषां बाहुवीर्येण गावश्च विजितास्त्वया ॥ ५
कुरवो निर्जिता यस्मात्संग्रामेऽमिततेजसः ।

अभिपन्नोऽपराधं कृतवान् ॥ १ ॥ ततस्तुष्टा भवन्तु ते इति थ. पाठः ॥ ३ ॥ षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

एष तत्सर्वमकरोत्कुन्तीपुत्रो युधिष्ठिरः ॥ ६
अर्च्याः पूज्याश्च मान्याश्च प्रत्युत्थेयाश्च पाण्डवाः।
अर्घार्हाश्चाभिवाद्याश्च प्राप्तकालं च मे मतम् ॥ ७
पूज्यतां पूजनीयाश्च महाभागाश्च पाण्डवाः ।
न ह्येते कुपिता शेषं कुर्युराशीविषोपमाः ॥ ८
तस्माच्छीघ्रं प्रपद्येम कुन्तीपुत्रं युधिष्ठिरम् ।
प्रसादयाम्यहं तत्र सह पार्थैर्महात्मभिः ॥ ९
उत्तरामग्रतः कृत्वा शिरःस्नातां कृताञ्जलिः ।
जानाम्यहमिदं सर्वमेषां तु बलपौरुषम् ।
कुले च जन्म महति फल्गुनस्य च विक्रमम् ॥१०
वैशंपायन उवाच ।
उत्तरात्पाण्डवाञ्श्रुत्वा विराटो रिपुसूदनः ।
उत्तरं चापि संप्रेक्ष्य प्राप्तकालमचिन्तयत् ॥ ११
ततो विराटः सामात्यः सहपुत्रः सबान्धवः ।
उत्तरामग्रतः कृत्वा शिरःस्नातां कृताञ्जलिः ।
भूमौ निपतितस्तूर्णं पाण्डवस्य समीपतः ॥ १२
विराट उवाच ।
प्रसीदतु महाराजो धर्मपुत्रो युधिष्ठिरः ।
प्रच्छन्नरूपवेषत्वान्नाग्निर्दृष्टस्तृणैर्वृतः ॥ १३
शिरसाऽभिप्रपन्नोस्मि सपुत्रपरिचारकः ॥ १४
यदस्माभिरजानद्भिरधिक्षिप्तो महीपतिः ।
अवमत्य कृतं सर्वमज्ञानात्प्राकृते यथा ।
क्षन्तुमर्हसि तत्सर्वं धर्मज्ञो धर्मवत्सल ॥ १५
यदिदं मामकं राष्ट्रं पुरं राज्यं च पार्थिव ।
सदण्डकोशं विसृजे तव वश्योस्मि पार्थिव ।
वयं च सर्वे सामात्या भवन्तं शरणं गताः ॥ १६
वैशंपायन उवाच ।
तं धर्मराजः पतितं महीतले
सबन्धुवर्गं प्रसमीक्ष्य पार्थिवम् ।
उवाच वाक्यं परलोकदर्शनः
प्रनष्टमन्युर्गतशोकमत्सरः ॥ १७
न ते भयं पार्थिव विद्यते मयि
प्रतीतरूपोस्म्यनुचिन्त्य मानसम् ।
एतत्त्वया सम्यगिहोपपादितं
द्विजैरमात्यैः सदृशैश्च पाण्डितैः ।
इमां च कन्यां समलंकृतां भृशं
समीक्ष्य तुष्टोस्मि नरेन्द्रसत्तम ॥ १८
क्षान्तमेतन्महाबाहो यन्मां वदसि पार्थिव ।
न चैव किंचित्पश्यामि विकृतं ते नराधिप ॥ १९
वैशंपायन उवाच ।
ततो विराटः परमाभितुष्टः
समेत्य राज्ञा सभयं चकार ।
राज्यं च सर्वं विससर्ज तस्मै
सदण्डकोशं सपुरं महात्मा ॥ २०

॥ इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

विराटेनार्जुनंप्रति स्वकुमार्या उत्तराया भार्यात्वेन प्रतिग्रहणप्रार्थने तंप्रत्यर्जुनेन सहेतुकथनं स्नुषात्वेन परिग्रहाङ्गीकरणम् ॥ १ ॥ दुर्योधनेन युधिष्ठिरंप्रति दूतमुखेन त्रयोदशवत्सरस्यासंपूर्तावेवार्जुनेनात्मप्रकाशनात्पुनर्वनवासविधेयतानिवेदनम् ॥ २ ॥ युधिष्ठिरेण तंप्रति तेनैव दूतेन भीष्ममुखात्संदेहस्य परिहरणीयताप्रतिवेदनम् ॥ ३ ॥ भीष्मेण विचार्य निर्धारणपूर्वकं संकेतकालस्य पूर्णत्वोक्तिः ॥ ४ ॥

विराट उवाच ।
यच्च वक्ष्याम्यहं तेऽद्य मा शङ्केथा युधिष्ठिर ।
इदं सनगरं राष्ट्रं सजनं सवधूजनम् ।
युष्यभ्यं संप्रदास्यामि भोक्ष्याम्युच्छिष्टमेव च ॥१
अहं वृद्धश्चिरं राजन्भुक्तभोगश्चिरं सुखम् ।
राज्यं दत्त्वा तु युष्मभ्यं प्रव्रजिष्यामि काननम् ॥२
उत्तरां प्रतिगृह्णातु सव्यसाची धनंजयः ।
अयं ह्यौपयिको भर्ता तस्याः पुरुषसत्तमः ॥ ३
वैशंपायन उवाच ।
एवमुक्तो धर्मराजः पार्थमैक्षद्धनंजयम् ।

ईक्षितं चार्जुनो ज्ञात्वा मात्स्यं वचनमब्रवीत् ॥ ४
वयं वनान्तरात्प्राप्ता न ते राज्यं गृहामहे ।
किंतु दुर्योधनादीनां राज्ञां राज्यं गृहामहे ॥ ५
प्रतिगृह्णाम्यहं राजन्स्नुषां दुहितरं तव ।
युक्तो ह्यावां हि संबन्धो मात्स्यभारतवंशयोः ६
विराट उवाच ।
किमर्थं पाण्डवश्रेष्ठ भार्यां दुहितरं मम ।
प्रतिग्रहीतुं नेमां त्वं मया दत्तमिहेच्छसि ॥ ७
अर्जुन उवाच ।
अन्तःपुरेऽहमुषितः सदा पश्यन्सुतां तव ।
रहस्यं च प्रकाशं च विश्वस्ता पितृवन्मयि ॥ ८
प्रियो बहुमतश्चाहं नर्तने गीतवादिते ।
आचार्यवच्च मां नित्यं मन्यते दुहिता तव ॥ ९
वयस्थया तया राजन्सह संवत्सरोषितः ।
अतिशङ्का ततोऽस्थाने तव लोकस्य च प्रभो ॥१०
तस्मादामन्त्रये त्वाऽद्य पुत्रार्थं मे विशांपते ।
शुद्धं जितेन्द्रियं मन्ये तस्याः शुद्धिः कृता मया११
स्नुषायां दुहितुर्वापि पुत्रे चात्मनि वा पुनः ।
अतिशङ्कां न पश्यामि तेन शुद्धिर्भविष्यति ॥१२
अभिषङ्गादहं भीतो मिथ्याचारात्परंतप ।
स्नुषार्थमुत्तरां राजन्प्रतिगृह्णामि ते सुताम् ॥ १३
स्वस्रीयो वासुदेवस्य साक्षाद्देवसुतो यथा ।
दयितश्चक्रहस्तस्य बलवानस्त्रकोविदः ॥ १४
अभिमन्युर्महाबाहुः पुत्रो मम विशांपते ।
जामाता तव युक्तो वै भर्ता च दुहितुस्तव ॥ १५
विराट उवाच ।
उपपन्नं कुरुश्रेष्ठे कुन्तीपुत्रे धनंजये ।
सदैव धर्मनित्यश्च ज्ञातज्ञानश्च पाण्डवः ॥ १६
यत्कृत्यं मन्यसे पार्थ क्रियतां तदनन्तरम् ।
सर्वे कामाः समृद्धा मे संबन्धी यस्य मेऽर्जुनः ॥
वैशंपायन उवाच ।
एवं ब्रुवति राजेन्द्रे कुन्तीपुत्रो युधिष्ठिरः ।
अन्वजानत संबन्धं समये कृष्णमात्स्ययोः ॥१८
दूतान्सर्वेषु मित्रेषु वासुदेवे च भारत ।
प्रेषयामास कौन्तेयो विराटश्च महीपतिः ॥ १९
प्रतिगृह्य स्नुषार्थं वै दर्शयन्व्रतमात्मनः ।
शीलशौचसमाचारं लोकस्यावेद्य फल्गुनः ॥ २०
लोके विख्याप्य माहात्म्यं यशश्च स परंतपः ।
कृतार्थः शुचिरव्यग्रस्तुष्टिमानभवत्तदा ॥ २१
युधिष्ठिर उवाच ।
राजन्प्रीतोस्मि भद्रं ते सखा मेऽसि परन्तप ।
सुखमध्युषिताः सर्वे अज्ञातास्त्वयि पार्थिव ॥२२
वैशंपायन उवाच ।
विराटनगरे राजा धर्मात्मा संशितव्रतः ।
पूजितश्चाभिषिक्तश्च रत्नैश्च शतशोर्चितः ॥ २३

तथा ब्रुवन्तं प्रसमीक्ष्य राजा
परं प्रहृष्टः स्वजनेन तेन ।
स्नेहात्परिष्वज्य नृपो भुजाभ्यां
ददौ महार्थं कुरुपाण्डवानाम् ॥ २४
युद्धात्प्रयाताः कुरवो हि मार्गे
समेत्य सर्वे हितमेव तत्र ।
आचार्यपुत्रः शकुनिश्च राजा
दुर्योधनः सूतपुत्रश्च कर्णः ।
संमन्त्र्य राजन्सहिताः समर्थाः
समादिशन्दूतमथो समग्राः ॥ २५
युधिष्ठिरश्चापि सुसंप्रहृष्टो
दुर्योधनाद्दूतमपश्यदागतम् ।
स चाब्रवीद्धर्मराजं समेत्य
युधिष्ठिरं पाण्डवमुग्रवीर्यम् ॥ २६
धनञ्जयेनासि पुनर्वनाय
प्रव्राजितः समये तिष्ठ पार्थ ।
त्रयोदशे ह्येव किरीटमाली
संवत्सरे पाण्डवेयोऽद्य दृष्टः ॥ २७
वैशंपायन उवाच ।
ततोऽब्रवीद्धर्मसुतः प्रहस्य
क्षिप्रं गत्वा ब्रूहि सुयोधनं तम् ।
पितामहः शान्तनवो ब्रवीतु
पूर्णो न पूर्णोऽद्य त्रयोदशो नः ॥ २८

आवां आवयोः ॥ ६ ॥ सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

संवत्सरान्ते तु धनञ्जयेन
विष्फारितं गाण्डिवमाजिमध्ये ।
पूर्णो न पूर्णो न इति ब्रवीतु
यदस्य सत्यं मम तत्प्रमाणम् ॥ २९
तेनैवमुक्तः स निवृत्य दूतो
दुर्योधनं प्राप्य शशंस तत्त्वम् ॥ ३०
समेत्य दूतेन स राजपुत्रो
दुर्योधनो मन्त्रयामास तत्र ।
भीष्मेण कर्णेन कृपेण चैव
द्रोणेन भूरिश्रवसा च सार्धम् ॥ ३१
संमन्त्र्य रात्रौ बहुभिः सुहृद्भि-
र्भीष्मोऽब्रवीद्धार्तराष्ट्रं महात्मा ।
तीर्णप्रतिज्ञेन धनंजयेन
विष्फारितं गाण्डिवमाजिमध्ये ॥ ३२
वैशंपायन उवाच ।
नेच्छन्त्यसत्येन सुरेन्द्रलोकं
पाण्डोः सुता ब्रह्मणश्चापि लोकम् ।
तथ्यं च ते पथ्यमहं ब्रवीमि
स्वर्ग्यं यशस्यं परलोकपथ्यम् ॥ ३३
कुन्तीसुतैस्त्वं समुपैहि सन्धिं
भुङ्क्ष्व स्वराज्यं सह पाण्डवेयैः ।
युध्यस्व नोचेत्स्थिरबुद्धिराजौ
कुन्तीसुतैर्यद्यपि राज्यमिच्छेः ॥ ३४
आन्तं न शक्यं कपटेन भोक्तुं
राज्यं परेषां महतां बलीनाम् ।
जित्वा शत्रून्भुङ्क्ष्व राज्यं समग्रं
हतो भवान्भोक्ष्यति वत्रिलोकम् ॥ ३५
वैशंपायन उवाच ।
ततः स भागीरथिसूनुवाक्यं
निशम्य गान्धारितनूद्भवो नृपः ।
उवाच भीष्मं प्रमुखे च पित्रो-
र्महीं न दद्यामणुमात्रिकामपि ।
निहन्मि पाण्डूदरसंभवान्वा
हतोस्मि तैर्वा सुरलोकमेमि ॥ ३६
ते धार्तराष्ट्राः समयं निशम्य
तीर्णप्रतिज्ञस्य धनंजयस्य ।
संचिन्त्य सर्वे सहिताः सुहृद्भिः
सपार्थिवाः स्वानि गृहाणि जग्मुः ॥ ३७

॥ इति श्रीमन्महाभारते विराटपर्वणि वैवाहिकपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

अज्ञातवासपरिसमापनानन्तरमुपप्लाव्यनगरे वसद्भिः पाण्डवैर्दूतमुखेन समाहूतैः रामकृष्णादिभिः सुभद्राभिमन्युप्रभृतिभिः सहोपप्लाव्यं प्रत्यागमनम् ॥ १ ॥ तथा द्रौपदेयादिभिः सह द्रुपदादिभिरागमनम् ॥ २ ॥ तत उत्तरयाऽभिमन्योरुद्वाहः ॥ ३ ॥

वैशंपायन उवाच ।
ततस्त्रयोदशे वर्षे निवृत्ते पञ्च पाण्डवाः ।
उपप्लाव्ये विराटस्य वासं चक्रुः पुरोत्तमे ॥ १
दूतान्मित्रेषु सर्वेषु ज्ञातिसंबन्धिकेष्वपि ।
प्रेषयामास कौन्तेयो विराटश्च महीपतिः ॥ २
तेषु तत्रोपविष्टेषु प्रेषितेषु ततस्ततः ।
तत्रागमन्महाबाहुर्वनमाली बलानुजः ॥ ३
तस्मिन्काले निशम्याथ दूतवाक्यं जनार्दनः ।
दयितं स्वस्त्रियं पुत्रं सुभद्रायाः सुमानितम् ।
अभिमन्युं समादाय रामेण सहितस्तदा ॥ ४
सर्वयादवमुख्यैश्च संवृतः परवीरहा ।
शङ्खदुन्दुभिनिर्घोषैर्विराटनगरं ययौ ॥ ५
कृतवर्मा च हार्दिक्यो युयुधानश्च सात्यकिः ।
अनाधृष्टिस्तथाऽक्रूरः सांबो निशठ एव च ।
प्रद्युम्नश्च महाबाहुरुल्मुकश्च महाबलः ॥ ६
अभिमन्युमुपादाय सह मात्रा परन्तपाः ।
कृष्णेन सहिताः सर्वे पाण्डवान्द्रष्टुमागताः ॥ ७
इन्द्रसेनादयश्चैव रथैस्तैः सुसमाहितैः ।

उपेयुः सहिताः सर्वे परिसंवत्सरोषिताः ॥ ८
दशनागसहस्राणि हयानां द्विगुणं तथा ।
रथानां नियुतं पूर्णं निखर्वं च पदातयः ॥ ९
वृष्ण्यन्धकाश्च शतशो भोजाश्च परमौजसः ।
अन्वयुर्वृष्णिशार्दूलं वासुदेवं महाबलम् ॥ १०
वासुदेवं तथाऽऽयान्तं श्रुत्वा पाण्डुसुतास्तदा ।
मात्स्येन सहिताः सर्वे प्रत्युद्याता जनार्दनम् ११
शङ्खदुन्दुभिनिर्घोषैर्मङ्गलैश्च जनार्दनम् ।
ववन्दुर्मुदिताः सर्वे पादयोस्तस्य पाण्डवाः ।
मात्स्येन सहिताः सर्वे आनन्दाश्रुपरिप्लुताः॥ १२
पाण्डवा ऊचुः ।
तव कृष्ण प्रसादाद्वै वर्षाण्येतानि सर्वशः ।
त्रयोदशोपि दाशार्ह यथा स समयः कृतः ॥१३
उषिताः स्मो जगन्नाथ त्वं नाथो नो जनार्दन ।
रक्षस्व देवदेवेश त्वामार्य शरणं गताः ॥ १४
वैशंपायन उवाच ।
तान्वन्दमानान्सहसा परिष्वज्य जनार्दनः ।
विराटस्य सहायांस्तान्सर्वयादवसंवृतः ॥ १५
यथार्हं पूजयामास मुदा परमया युतः ।
वृष्णिवीराश्च तान्सर्वान्यथार्हं प्रतिपेदिरे ॥ १६
कृष्णा च देवकीपुत्रं ववन्दे पादयोस्तथा ।
तामुद्यम्य सुकेशान्तां नयने परिमृज्य च ।
उवाच वाक्यं देवेशः सर्वयादवसन्निधौ
मा शोकं कुरु कल्याणि धार्तराष्ट्रान्स
अचिराद्घातयित्वाऽहं पार्थेन सहि
युधिष्ठिराय दास्यामि यातु
अभिमन्युना च पार्थेन
सत्यमेतद्वचो मह्य
इत्युक्त्वा तां
अन्वास्त
काशि
अ

धृष्टद्युम्नश्च दुर्धर्षः सर्वशस्त्रभृतांवरः ।
उपप्लाव्यं ययुः शीघ्रं पाण्डवार्थे महाबलाः ॥ २३
ततः शतसहस्राणि प्रयुतान्यर्बुदानि च ।
समीपमभिवर्तन्ते योधा यौधिष्ठिरं बलम् ॥ २४
समुद्रमिव घर्मान्ते स्रोतःश्रेष्ठाः पृथक्पृथक् ।
आपूरयन्महीपाला यज्वानो भूरिदक्षिणैः ।
वेदावभृथसंपन्नाः शूराः सर्वे तनुत्यजः ॥ २५
तानागतानभिप्रेक्ष्य पार्थो ज्ञानभृतां वरः ।
पूजयामास विधिवद्यथार्हं राजसत्तमान् ॥ २६
पारिबर्हं ददौ कृष्णः पाण्डवानां महात्मनाम् ।
स्त्रियो वासांसि रत्नानि पृथक्पृथगनेकशः ॥ २७
राजानो राजपुत्राश्च निवृत्ते समये तथा ।
यथार्हं पाण्डवश्रेष्ठैरवर्तन्ताभिपूजिताः ।
आसन्प्रहृष्टमनसः पारिबर्हं ददुस्तदा ॥
सर्वेषु समवेतेषु राजभिर्वृष्णिभिः स
विवाहो विधिवद्राजन्ववृधे
ततः शङ्खा मृद
अभिमन्यो
उच्चाव
भ

सौभद्रश्चानवद्याङ्गो विराटतनयां तदा ॥ ३८
तत्रातिष्ठद्गृहीत्वा तु रूपमिन्द्रस्य धारयन् ।
स्नुषां तां परिगृह्णानः कुन्तीपुत्रो युधिष्ठिरः ॥३९
द्रुपदश्च विराटश्च शिखण्डी च महाबलः ।
युयुधानश्च शैब्यश्च धृष्टद्युम्नश्च सात्यकिः ॥ ४०
सप्तैतेऽक्षौहिणीपाला यज्वानो भूरिदक्षिणाः ।
पाण्डवं परिवार्यैते निवेशं चक्रिरे तदा ॥ ४१
तत्रस्थायां तु सेनायां मात्स्यो धर्मभृतांवरः ।
प्रीतो दुहितरं गृह्य प्रददावभिमन्यवे ॥ ४२
प्रतिगृह्योत्तरां पार्थः पुरस्कृत्य जनार्दनम् ।
विवाहं कारयामास सौभद्रस्य महात्मनः ॥ ४३
ततो विवाहो ववृधे स्फीतः सर्वगुणान्वितः ।
सौभद्रस्याद्भुतं कर्म पितुस्तव पितुस्तदा ॥ ४४
...म्यः शिष्यैः परिवृतो जुहावाग्नौ विधानतः ।
...क्षिणीकुर्वन्सौभद्रः पाणिमग्रहीत् ॥४५
... मात्स्यराजो धनं महत् ।
...तरंहसाम् ॥ ४६

द्वे च नागशते मुख्ये धनं बहुविधं तदा ।
प्रादान्मात्स्यपतिर्हृष्टः कन्याधनमनुत्तमम् ॥
पारिबर्हं च पार्थेभ्यः प्रददौ मत्स्यपुङ्गवः ।
कृष्णेन सह कौन्तेयः प्रत्यगृह्णात्प्रभूतवत् ॥
कृते विवाहे तु तदा धर्मपुत्रो युधिष्ठिरः ।
ब्राह्मणेभ्यो ददौ वित्तं यदुपाहरदच्युतः ॥
गोसहस्राणि वस्त्राणि रत्नानि विविधानि च
भूषणानि च सर्वाणि यानानि शयनानि च ॥
नागरान्प्रीतिभिर्दिव्यैस्तर्पयामास भूपतिः ॥
तन्महोत्सवसंकाशं हृष्टपुष्टजनाकुलम् ।
नगरं मत्स्यराजस्य शुशुभे भरतर्षभ ॥
पुरोहितैरमात्यैश्च पौरैर्जानपदैः सह ।
विराटो नृपतिः श्रीमान्सौभद्रायाभिमन्यवे ।
तां सुतामुत्तरां दत्त्वा मुमुदे परमं तदा ॥
जनमेजय उवाच ।
वृत्ते विवाहे हृष्टात्मा यदुवाच युधिष्ठिरः ।
तत्सर्वं कथयस्वेह कृतवन्तो यदुत्तरम् ॥

...साहस्रिकायां संहितायां वैयासिक्यां विराटपर्वणि वैवाहिकपर्वणि
...सप्ततितमोऽध्यायः ॥ ७८ ॥

... ॥ समाप्तं च विराटपर्व ॥ ४ ॥

...ः ।
...नीताः ।
...जग्मुः ॥

आविश्य योगेनात्मानं त्रीणि वर्षशतान्यपि ।
तस्य चोपददौ पुत्रान्सहस्रं क्रतुसंमितान् ।]
योगेश्वरं देवगीतं वेत्थ कृष्ण न संशयः ॥ ७२
याज्ञवल्क्य इति ख्यात ऋषिः परमधार्मिकः ।
आराध्य स महादेवं प्राप्तवानतुलं यशः ॥ ७३
वेदव्यासश्च योगात्मा पराशरसुतो मुनिः ।
सोऽपि शंकरमाराध्य प्राप्तवानतुलं यशः ॥ ७४
वालखिल्या मघवता ह्यवज्ञाताः पुरा किल ।
तैः क्रुद्धैर्भगवान्रुद्रस्तपसा तोषितो ह्यभूत् ॥ ७५
तांश्चापि दैवतश्रेष्ठः प्राह प्रीतो जगत्पतिः ।
सुपर्णं सोमहर्तारं तपसोत्पादयिष्यथ ॥ ७६
महादेवस्य रोषाच्च आपो नष्टाः पुराऽभवन् ।
ताश्च सप्तकपालेन देवैरन्याः प्रवर्तिताः ॥ ७७
ततः पानीयमभवत्प्रसन्ने त्र्यम्बके भुवि ।
अत्रिभार्या सुतं दत्तं सोमं दुर्वाससं प्रभो ॥ ७८
अत्रेर्भार्याऽपि भर्तारं संत्यज्य ब्रह्मवादिनी ।
नाहं तव मुने भूयो वशगा स्यां कथंचन ॥ ७९
इत्युक्त्वा सा महादेवमगमच्छरणं किल ।
निराहारा भयादत्रेस्त्रीणि वर्षशतान्यपि ॥ ८०
अशेत मुसलेष्वेव प्रसादार्थं भवस्य सा ।
तामब्रवीद्धसन्देवो भविता वै सुतस्तव ॥ ८१
विना भर्त्रा चरुद्रेण भविष्यति न संशयः ।
वंशे तवैव नाम्ना तु ख्यातिं यास्यति चेप्सिताम्॥
विकर्णश्च महादेवं तथा भक्तसुखावहम् ।
प्रसाद्य भगवान्सिद्धिं प्राप्तवान्मधुसूदन ॥ ८३
शाकल्यः संशितात्मा वै नववर्षशतान्यपि ।
आराधयामास भवं मनोयज्ञेन केशव ॥ ८४
तं चाह भगवांस्तुष्टो ग्रन्थकारो भविष्यसि ।
वत्साक्षया च ते कीर्तिस्त्रैलोक्ये वै भविष्यति ८५
अक्षयं च कुलं तेऽस्तु महर्षिभिरलंकृतम् ।
भविष्यति द्विजश्रेष्ठः सूत्रकर्ता सुतस्तव ॥ ८६

सावर्णिश्चापि विख्यात ऋषिरासीत्कृते युगे ।
इह तेन तपस्तप्तं षष्टिवर्षशतान्यथ ॥ ८७
तमाह भगवान्रुद्रः साक्षात्तुष्टोसि तेऽनघ ।
ग्रन्थकृल्लोकविख्यातो भवितास्यजरामरः ॥ ८८
शक्रेण तु पुरा देवो वाराणस्यां जनार्दन ।
आराधितोऽभूद्भक्तेन दिग्वासा भस्मगुण्ठितः ॥
आराध्य स महादेवं देवराज्यमवाप्तवान् ॥ ८९
नारदेन तु भक्त्याऽसौ भव आराधितः पुरा ।
तस्य तुष्टो महादेवो जगौ देवगुरुर्गुरुः ॥ ९०
तेजसा तपसा कीर्त्या त्वत्समो न भविष्यति ।
गीतेन वादितव्येन नित्यं मामनुयास्यसि ॥ ९१
'बाणः स्कन्दसमत्वं च कामो दर्पविमोक्षणम् ।
लवणोऽवध्यतामन्यैर्दशास्यश्च पुनर्बलम् ।
अन्तकोऽन्तमनुप्राप्तस्तस्मात्कोऽन्यः परः प्रभुः ९२
मयाऽपि च यथा दृष्टो देवदेवः पुरा विभो ।
साक्षात्पशुपतिस्तात तच्चापि शृणु माधव ॥ ९३
यदर्थं च मया देवः प्रयतेन तथा विभो ।
आराधितो महातेजास्तच्चापि शृणु विस्तरात् ॥ ९४
यदवाप्तं च मे पूर्वं देवदेवान्महेश्वरात् ।
तत्सर्वं निखिलेनाद्य कथयिष्यामि तेऽनघ ॥ ९५
पुरा कृतयुगे तात ऋषिरासीन्महायशाः ।
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ।
तस्याहमभवं पुत्रो धौम्यश्चापि ममानुजः ॥ ९६
कस्यचित्त्वथ कालस्य धौम्येन सह माधव ।
आगच्छमाश्रमं क्रीडन्मुनीनां भावितात्मनाम् ९७
तत्रापि च मया दृष्टा दुह्यमाना पयस्विनी ।
लक्षितं च मया क्षीरं स्वादुतो ह्यमृतोपमम् ॥ ९८
तदाप्रभृति चैवाहमरुदं मधुसूदन ।
दीयतां दीयतां क्षीरं मम मातरितीरिता ॥ ९९
अभावाच्चैव दुग्धस्य दुःखिता जननी तदा ॥ १००
ततः पिष्टं समालोड्य तोयेन सह माधव ।

सप्तकपालेन त्र्यम्बकदैवत्येन हेतुना । देवैः सप्तकपालेन रुद्रमिश्रा आपो निर्मिता इत्यर्थः ॥ ७७ ॥ रुद्रप्रसादाज्जनयामासेति शेषः ॥ ७८ ॥ मुसलेष्वयोग्रेषु काष्ठकीलेषु ॥ ८१ ॥ चरुद्रः चरोर्द्रवः मण्ड इति यावत् । चरुशब्दपूर्वाद्द्रवतेरन्येभ्योपि दृश्यत इति डः । भर्तारंविनापि चरुद्रवपानमात्रेण तव पुत्रो भविष्यतीत्यर्थः ॥ ८२ ॥ धूम्रश्चापि ममानुज इति ट. थ. पाठः ॥ ९६ ॥

आवयोः क्षीरमित्येव पानार्थं समुपानयत् १०१
अथ गव्यं पयस्तात कदाचित्प्राशितं मया १०२
पित्राऽहं यज्ञकाले हि नीतो ज्ञातिकुलं महत् ।
तत्र सा क्षरते देवी दिव्या गौः सुरनन्दिनी १०३
यस्याहं तत्पयः पीत्वा रसेन ह्यमृतोपमम् ।
ज्ञात्वा क्षीरगुणांश्चैव उपलभ्य हि संभवम् ।
स च पिष्टरसस्तात न मे प्रीतिमुपावहत् ॥१०४
ततोऽहमब्रुवं बाल्याज्जननीमात्मनस्तदा ।
नेदं क्षीरोदनं मातर्यत्त्वं मे दत्तवत्यसि ॥ १०५
ततो मामब्रवीन्माता दुःखशोकसमन्विता ।
पुत्रस्नेहात्परिष्वज्य मूर्ध्नि चाघ्राय माधव ॥१०६
कुतः क्षीरोदनं वत्स मुनीनां भावितात्मनाम् ।
वने निवसतां नित्यं कन्दमूलफलाशिनाम् १०७
आस्थितानां नदीं दिव्यां वालखिल्यैर्निषेविताम्
कुतः क्षीरं वनस्थानां मुनीनां गिरिवासिनाम् १०८
पावनानां वनाशानां वनाश्रमनिवासिनाम् ।
ग्राम्याहारनिवृत्तानामारण्यफलभोजिनाम् ।
नास्ति पुत्र पयोऽरण्ये सुरभीगोत्रवर्जिते ॥ १०९
नदीगह्वरशैलेषु तीर्थेषु विविधेषु च ।
तपसा जप्यनित्यानां शिवो नः परमा गतिः ॥
अप्रसाद्य विरूपाक्षं वरदं स्थाणुमव्ययम् ।
कुतः क्षीरोदनं वत्स सुखानि वसनानि च १११
तं प्रपद्य सदा वत्स सर्वभावेन शंकरम् ।
तत्प्रसादाच्च कामेभ्यः फलं प्राप्स्यसि पुत्रक ११२
जनन्यास्तद्वचः श्रुत्वा तदाप्रभृति शत्रुहन् ।
[प्राञ्जलिः प्रणतो भूत्वा इदमम्बामवोचयं ॥ ११३
कोऽयमम्ब महादेवः स कथं च प्रसीदति ।
कुत्र वा वसते देवो द्रष्टव्यो वा कथंचन ॥ ११४
तुष्यते वा कथं शर्वो रूपं तस्य च कीदृशम् ।
कथं ज्ञेयः प्रसन्नो वा दर्शयेज्जननी मम ॥ ११५
एवमुक्ता तदा कृष्ण माता मे सुतवत्सला ।
मूर्धन्याघ्राय गोविन्द सबाष्पाकुललोचना ११६
प्रमार्जन्ती च गात्राणि मम वै मधुसूदन ॥
दैन्यमालम्ब्य जननी इदमाह सुरोत्तम ॥ ११७
दुर्विज्ञेयो महादेवो दुराधारो दुरन्तकः ।
दुराबाधश्च दुर्ग्राह्यो दुर्दृश्यो ह्यकृतात्मभिः ॥ ११८
यस्य रूपाण्यनेकानि प्रवदन्ति मनीषिणः ।
स्थानानि च विचित्राणि प्रासादाश्चाप्यनेकशः ॥
को हि तत्त्वेन तद्वेद ईशस्य चरितं शुभम् ।
कृतवान्यानि रूपाणि देवदेवः पुरा किल ।
क्रीडते च तथा शर्वः प्रसीदति यथाच वै १२०
हृदिस्थः सर्वभूतानां विश्वरूपो महेश्वरः ।
भक्तानामनुकम्पार्थं दर्शनं च यथाश्रुतम् ।
मुनीनां ब्रुवतां दिव्यमीशानचरितं शुभम् १२१
कृतवान्यानि रूपाणि कथितानि दिवौकसैः ।
अनुग्रहार्थं विप्राणां शृणु वत्स समासतः ॥ १२२
तानि ते कीर्तयिष्यामि यन्मां त्वं परिपृच्छसि ॥
ब्रह्मविष्णुसुरेन्द्राणां रुद्रादित्याश्विनामपि ।
विश्वेषामपि देवानां वपुर्धारयते भवः ॥ १२४
नराणां देवनारीणां तथा प्रेतपिशाचयोः ।
किरातशबराणां च जलजानामनेकशः ॥ १२५
करोति भगवान्रूपमाटव्यशबराण्यपि ।
कूर्मो मत्स्यस्तथा शङ्खः प्रवालाङ्कुरभूषणः ॥ १२६
यक्षराक्षससर्पाणां दैत्यदानवयोरपि ।
वपुर्धारयते देवो भूयश्च बिलवासिनाम् ॥ १२७
व्याघ्रसिंहमृगाणां च तरक्ष्वृक्षपतत्रिणाम् ।
उलूकश्वशृगालानां रूपाणि कुरुतेऽपि च ॥ १२८
हंसकाकमयूराणां कृकलासकसारसाम् ।
रूपाणि च बलाकानां गृध्रचक्राङ्गयोरपि ॥ १२९
करोति वा स रूपाणि धारयत्यपि पर्वतम् ।
गोरूपं च महादेवो हस्त्यश्वोष्ट्रखराकृतिः ॥ १३०
छागशार्दूलरूपश्च अनेकमृगरूपधृक् ।
अण्डजानां च दिव्यानां वपुर्धारयते भवः ॥ १३१
दण्डी छत्री च कुण्डी च द्विजानां वारणस्तथा ।

पावनानां पवनाशिनाम् । वनाशानां अब्भक्षाणाम् ॥ १०९ ॥ प्रपद्य प्रपन्नो भव ॥ ११२ ॥ दुराधारः मनसि धर्तुमशक्यः ॥ ११८ ॥ प्रवालाङ्कुरभूषणो वसन्तस्तेन कालोप्ययमेवेत्यर्थः ॥ १२६ ॥

षण्मुखो वै बहुमुखस्त्रिनेत्रो बहुशीर्षकः ॥ १३२
अनेककटिपादश्च अनेकोदरवक्त्रधृत् ।
अनेकपाणिपार्श्वश्च अनेकगणसंवृतः ॥ १३३
ऋषिगन्धर्वरूपश्च सिद्धचारणरूपधृत् ।
भस्मपाण्डुरगात्रश्च चन्द्रार्धकृतभूषणः ॥ १३४
अनेकरावसंघुष्टश्चानेकस्तुतिसंस्कृतः ।
सर्वभूतान्तकः सर्वः सर्वलोकप्रतिष्ठितः ॥ १३५
सर्वलोकान्तरात्मा च सर्वगः सर्ववाद्यपि ।
सर्वत्र भगवान्ज्ञेयो हृदिस्थः सर्वदेहिनाम् ॥१३६
यो हि यं कामयेत्कामं यस्मिन्नर्थेऽर्च्यते पुनः ।
तत्सर्वं वेत्ति देवेशस्तं प्रपद्य यदीच्छसि ॥ १३७
नन्दते कुप्यते चापि तथा हुंकारयत्यपि ।
चक्री शूली गदापाणिर्मुसली खड्गपट्टसी ॥१३८
भूधरो नागमौञ्जी च नागकुण्डलकुण्डली ।
नागयज्ञोपवीती य नागचर्मोत्तरच्छदः ॥ १३९
हसते गायते चैव नृत्यते च मनोहरम् ।
वादयत्यपि वाद्यानि विचित्राणि गणैर्युतः॥१४०
वल्गते जृम्भते चैव रुदते रोदयत्यपि ।
उन्मत्तमत्तरूपं च भाषते चापि सुस्वरः ॥ १४१
अतीव हसते रौद्रस्त्रासयन्नयनैर्जनम् ।
जागर्ति चैव स्वपिति जृम्भते च यथासुखम्॥१४२
जपते जप्यते चैव तपते तप्यते पुनः ।
ददाति प्रतिगृह्णाति युञ्जते ध्यायतेऽपि च ॥१४३
वेदीमध्ये तथा यूपे गोष्ठमध्ये हुताशने ।
दृश्यते दृश्यते चापि बालो वृद्धो युवा तथा ॥१४४
क्रीडते ऋषिकन्याभिर्ऋषिपत्नीभिरेव च ।
ऊर्ध्वकेशो महाशेफो नग्नो विकृतलोचनः ॥१४५
गौरः श्यामस्तथा कृष्णः पाण्डुरो धूमलोहितः ।
विकृताक्षो विशालाक्षो दिग्वासाः सर्ववासकः॥
अरूपस्याद्यरूपस्य अतिरूपाद्यरूपिणः ।
अनाद्यन्तमजस्यान्तं वेत्स्यते कोस्य तत्त्वतः १४७
हृदि प्राणो मनो जीवो योगात्मा योगसंज्ञितः ।
ध्यानं तत्परमात्मा च भावग्राह्यो महेश्वरः १४८
वादको गायनश्चैव सहस्रशतलोचनः ।
एकवक्त्रो द्विवक्त्रश्च त्रिवक्त्रोऽनेकवक्त्रकः ॥ १४९
तद्भक्तस्तद्गतो नित्यं तन्निष्ठस्तत्परायणः ।
भज पुत्र महादेवं ततः प्राप्स्यसि चेप्सितं॥ १५०
जनन्यास्तद्वचः श्रुत्वा तदाप्रभृति शत्रुहन् ।]
मम भक्तिर्महादेवे नैष्ठिकी समपद्यत ॥ १५१
ततोऽहं तप आस्थाय तोषयामास शंकरम् ।
दिव्यं वर्षसहस्रं तु वामाङ्गुष्ठाग्रविष्ठितः ॥ १५२
एकं वर्षशतं चैव फलाहारस्ततोऽभवम् ।
द्वितीयं शीर्णपर्णाशी तृतीयं चाम्बुभोजनः १५३
शतानि सप्त चैवाहं वायुभक्षस्तदाऽभवम् ।
एकं वर्षसहस्रं तु दिव्यमाराधितो मया ॥ १५४
ततस्तुष्टो महादेवः सर्वलोकेश्वरः प्रभुः ।
एकभक्त इति ज्ञात्वा जिज्ञासां कुरुते तदा॥१५५
शक्ररूपं स कृत्वा तु सर्वैर्देवगणैर्वृतः ।
सहस्राक्षस्तदा भूत्वा वज्रपाणिर्महायशाः॥ १५६
सुधावदातं रक्ताक्षं स्तब्धकर्णं मदोत्कटम् ।
आवेष्टितकरं घोरं चतुर्दंष्ट्रं महागजम् ॥ १५७
समास्थितः स भगवान्दीप्यमानः स्वतेजसा ।
आजगाम किरीटी तु हारकेयूरभूषितः ॥ १५८
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
सेव्यमानोप्सरोभिश्च दिव्यगन्धर्वनादितैः॥१५९
ततो मामाह देवेन्द्रस्तुष्टस्तेऽहं द्विजोत्तम ।
वरं वृणीष्व मत्तस्त्वं यत्ते मनसि वर्तते ॥ १६०
शक्रस्य तु वचः श्रुत्वा नाहं प्रीतमनाऽभवम् ।
अब्रवं च तदा कृष्ण देवराजमिदं वचः ॥ १६१
नाहं त्वत्तो वरं काङ्क्षे नान्यस्मादपि दैवतात् ।
महादेवादृते सौम्य सत्यमेतद्ब्रवीमि ते ॥ १६२
सत्यंसत्यं हि नः शक्र वाक्यमेतत्सुनिश्चितम् ।
न यन्महेश्वरं मुक्त्वा कथाऽन्या मम रोचते॥१६३
पशुपतिवचनाद्भवामि सद्यः
कृमिरथवा तरुरप्यनेकशाखः ।

भूधरः शेषनागः ॥ १३९ ॥ सर्ववासकः सर्वस्याच्छादकः ॥ १४६ ॥ अभवं संधिरार्षः ॥ १६१ ॥

अपशुपतिवरप्रसादजा मे
त्रिभुवनराज्यविभूतिरप्यनिष्टा ॥ १६४
[जन्मश्वपाकमध्येऽ-
पि मेऽस्तु हरचरणवन्दनरतस्य ।
मा वाऽनीश्वरभक्तो
भवानि भवनेऽपि शक्रस्य ॥ १६५
वाय्वम्बुभुजोऽपि सतो
नरस्य दुःखक्षयः कुतस्तस्य ।
भवति हि सुरासुरगुरौ
यस्य न विश्वेश्वरे भक्तिः ॥ १६६
अलमन्याभिस्तेषां
कथाभिरप्यन्यधर्मयुक्ताभिः ।
येषां न क्षणमपि रुचितो
हरचरणस्मरणविच्छेदः ॥ १६७
हरचरणनिरतमतिना
भवितव्यमनार्जवं युगं प्राप्य ।
संसारभयं न भवति
हरभक्तिरसायनं पीत्वा ॥ १६८
दिवसं दिवसार्धं वा मुहूर्तं वा क्षणं लवम् ।
न ह्यलब्धप्रसादस्य भक्तिर्भवति शंकरे ॥ १६९]
अपि कीटः पतङ्गो वा भवेयं शंकराज्ञया ।
न तु शक्र त्वया दत्तं त्रैलोक्यमपि कामये ॥१७०
[श्वाऽपि महेश्वरवचना-
द्भवामि स हि नः परः कामः ।
त्रिदशगणराज्यमपि खलु
नेच्छाम्यमहेश्वराज्ञप्तम् ॥ १७१
न नाकपृष्ठं न च देवराज्यं
न ब्रह्मलोकं न च निष्कलत्वम् ।
न सर्वकामानखिलान्वृणोमि
हरस्य दासत्वमहं वृणोमि ॥ १७२]
यावच्छशाङ्कधवलामलबद्धमौलि-
र्न प्रीयते पशुपतिर्भगवान्ममेशः ।
तावज्जरामरणजन्मशताभिघातै-
र्दुःखानि देहविहितानि समुद्वहामि ॥१७३
दिवसकरशशाङ्कवह्निदीप्तं
त्रिभुवनसारमसारमाद्यमेकम् ।
अजरममरमप्रसाद्य रुद्रं
जगति पुमानिह को लभेत शान्तिं ॥१७४
'धिक्तेषां धिक्तेषां
पुनरपि च धिगस्तु धिक्तेषाम् ।
येषां न वसति हृदये
कुपथगतिविमोक्षको रुद्रः ॥' १७५
यदि नाम जन्म भूयो
भवति मदीयैः पुनर्दोषैः ।
तस्मिंस्तस्मिञ्जन्मनि
भवे भवेन्मेऽक्षया भक्तिः ॥ १७६

शक्र उवाच ।

कः पुनर्भवने हेतुरीशे कारणकारणे ।
येन शर्वादृतेऽन्यस्मात्प्रसादं नाभिकाङ्क्षसि ॥१७७

[उपमन्युरुवाच ।

सदसद्व्यक्तमव्यक्तं यमाहुर्ब्रह्मवादिनः ।
नित्यमेकमनेकं च वरं तस्माद्वृणीमहे ॥ १७८
अनादिमध्यपर्यन्तं ज्ञानैश्वर्यमचिन्तितम् ।
आत्मानं परमं यस्माद्वरं तस्माद्वृणीमहे ॥ १७९
ऐश्वर्यं सकलं यस्मादनुत्पादितमव्ययम् ।
अबीजाद्बीजसंभूतं वरं तस्माद्वृणीमहे ॥ १८०
तमसः परमं ज्योतिस्तपस्तद्वृत्तिनां परम् ।
यं ज्ञात्वा नानुशोचन्ति वरं तस्माद्वृणीमहे १८१
भूतभावनभावज्ञं सर्वभूताभिभावनम् ।
सर्वगं सर्वदं देवं पूजयामि पुरंदर ॥ १८२
हेतुवादैर्विनिर्मुक्तं साङ्ख्ययोगार्थदं परम् ।
यमुपासन्ति तत्त्वज्ञा वरं तस्माद्वृणीमहे ॥ १८३
मघवन्मघवात्मानं यं वदन्ति सुरेश्वरम् ।
सर्वभूतगुरुं देवं वरं तस्माद्वृणीमहे ॥ १८४

मावा मैव । भवानि भूयासम् ॥ १६५ ॥ अनार्जवं वक्रम् । युगं कलियुगम् ॥ १६८ ॥ असारं नास्ति सारो यस्मादन्य-स्तम् ॥ १७४ ॥ ईशे ईशस्य । भवने सत्तायाम् । को हेतुः का युक्तिः । ईशसत्त्वे प्रमाणं नास्तीत्यर्थः ॥ १७७ ॥

यत्पूर्वमसृजद्देवं ब्रह्माणं लोकभावनम् ।
अण्डमाकाशमापूर्य वरं तस्माद्वृणीमहे ॥ १८५
अग्निरापोऽनिलः पृथ्वी खं बुद्धिश्च मनो महान्।
स्रष्टा चैषां भवेद्योऽन्यो ब्रूहि कः परमेश्वरात् ॥
मनो मतिरहंकारस्तन्मात्राणीन्द्रियाणि च ।
ब्रूहि चैषां भवेच्छक्र कोऽन्योस्ति परमं शिवात् ॥
स्रष्टारं भुवनस्येह वदन्तीह पितामहम् ।
आराध्य स तु देवेशमश्नुते महतीं श्रियम्॥१८८
भगवत्युत्तमैश्वर्यं ब्रह्मविष्णुपुरोगमम् ।
विद्यते वै महादेवाद्ब्रूहि कः परमेश्वरात् ॥ १८९
दैत्यदानवमुख्यानामाधिपत्यारिमर्दनात् ।
कोऽन्यः शक्नोति देवेशाद्दितेः संपादितुं सुतान्॥
दिक्कालसूर्यतेजांसि ग्रहवाय्विन्दुतारकाः ।
विद्धि त्वेते महादेवाद्ब्रूहि कः परमेश्वरात् ॥१९१
अथोत्पत्तिविनाशे वा यज्ञस्य त्रिपुरस्य वा ।
दैत्यदानवमुख्यानामाधिपत्यारिमर्दनः ॥ १९२
किं चात्र बहुभिः सूक्तैर्हेतुवादैः पुरंदर ।
सहस्रनयनं दृष्ट्वा त्वामेव सुरसत्तम ॥ १९३
पूजितं सिद्धगन्धर्वैर्देवैश्च ऋषिभिस्तथा ।
देवदेवप्रसादेन तत्सर्वं कुशिकोत्तम ॥ १९४
अव्यक्तमुक्तकेशाय सर्वगस्येदमात्मकम् ।
चेतनाचेतनाद्येषु शक्र विद्धि महेश्वरात् ॥ १९५
भुवाद्येषु महान्तेषु लोकालोकान्तरेषु च ।
द्वीपस्थानेषु मेरोश्च विभवेष्वन्तरेषु च ।
भगवन्मघवन्देवं वदन्ते तत्त्वदर्शिनः ॥ १९६
यदि देवाः सुराः शक्र पश्यन्त्यन्यां भवाकृतिम् ।
किं न गच्छन्ति शरणं मर्दिताश्चासुरैः सुराः ॥१९७
अभिघातेषु देवानां सयक्षोरगरक्षसाम् ।
परस्परविनाशेषु स्वस्थानैश्वर्यदो भवः ॥ १९८
अन्धकस्याथ शुक्रस्य दुन्दुभेर्महिषस्य च ।
यक्षेन्द्रबलरक्षःसु निवातकवचेषु च ।
वरदानावघाताय ब्रूहि कोऽन्यो महेश्वरात् ॥१९९
सुरासुरगुरोर्वक्त्रे कस्य रेतः पुरा हुतम् ।
कस्य वाऽन्यस्य रेतस्तद्येन हैमो गिरिः कृतः ॥२००
दिग्वासाः कीर्त्यते कोऽन्यो लोके कश्चोर्ध्वरेतसः।
कस्य चार्धे स्थिता कान्ता अनङ्गः केन निर्जितः ॥
ब्रूहीन्द्र परमं स्थानं कस्य देवैः प्रशस्यते ।
श्मशाने कस्य क्रीडार्थं नृत्ते वा कोऽभिभाष्यते ॥
कस्यैश्वर्यं समानं च भूतैः को वाऽपि क्रीडते ।
कस्य तुल्यबला देवगणाश्चैश्वर्यदर्पिताः ॥ २०३
घुष्यते ह्यचलं स्थानं कस्य त्रैलोक्यपूजितम् ।
वर्षते तपते कोऽन्यो ज्वलते तेजसा च कः ॥२०४
कस्मादोषधिसंपत्तिः को वा धारयते वसु ।
प्रकामं क्रीडते को वा त्रैलोक्ये सचराचरे २०५
ज्ञानसिद्धिक्रियायोगैः सेव्यमानश्च योगिभिः ।
ऋषिगन्धर्वसिद्धैश्च विहितं कारणं परम् ॥ २०६
कर्मयज्ञक्रियायोगैः सेव्यमानः सुरासुरैः ।
नित्यं कर्मफलैर्हीनं तमहं कारणं वदे ॥ २०७
स्थूलं सूक्ष्ममनौपम्यमग्राह्यं गुणगोचरम् ।
गुणहीनं गुणाध्यक्षं परं माहेश्वरं पदम् ॥ २०८
विश्वेशं कारणगुरुं लोकालोकान्तकारणम् ।
भूताभूतभविष्यच्च जनकं सर्वकारणम् ॥ २०९
अक्षराक्षरमव्यक्तं विद्याविद्ये कृताकृते ।
धर्माधर्मौ यतः शक्र तमहं कारणं ब्रुवे ॥ २१०
प्रत्यक्षमिह देवेन्द्र पश्य लिङ्गं भगाङ्कितम् ।
देवदेवेन रुद्रेण सृष्टिसंहारहेतुना ॥ २११
मात्रा पूर्वं ममाख्यातं कारणं लोकलक्षणम् ।
नास्ति चेशात्परं शक्र तं प्रपद्य यदीच्छसि॥२१२
प्रत्यक्षं ननु ते सुरेश विदितं संयोगलिङ्गोद्भवं
त्रैलोक्यं सविकारनिर्गुणगणं ब्रह्मादिरेतोद्भवम् ।
यद्ब्रह्मेन्द्रहुताशविष्णुसहिता देवाश्च दैत्येश्वरा
नान्यत्कामसहस्रकल्पितधियः शंसन्ति ईशात्परं॥
तं देवं सचराचरस्य जगतो व्याख्यातवेद्योत्तमं
कामार्थी वरयामि संयतमना मोक्षाय सद्यः शिवम्
हेतुभिर्वा किमन्यैस्तैरीशः कारणकारणम् ।
न शुश्रुम यदन्यस्य लिङ्गमभ्यर्चितं सुरैः ॥२१४
कस्यान्यस्य सुरैः सर्वैर्लिङ्गं मुक्त्वा महेश्वरम् ।
अर्च्यतेऽर्चितपूर्वं वा ब्रूहि यद्यस्ति ते श्रुतिः॥ २१५

यस्य ब्रह्मा च विष्णुश्च त्वं चापि सहदैवतैः ।
अर्चयध्वं सदा लिङ्गं तस्माच्छ्रेष्ठतमो हि सः॥२१६
न पद्माङ्का न चक्राङ्का न वज्राङ्का यतः प्रजाः ।
लिङ्गाङ्का च भगाङ्का च तस्मान्माहेश्वरी प्रजा २१७
देव्याःकारणरूपभावजनिताःसर्वाभगाङ्काः स्त्रियो
लिङ्गेनापि हरस्य सर्वपुरुषाः प्रत्यक्षचिह्नीकृताः।
योऽन्यत्कारणमीश्वरात्प्रवदते देव्या च यन्नाङ्कितं
त्रैलोक्ये सचराचरे स तु पुमान्बाह्यो भवेद्दुर्मतिः॥
पुल्लिङ्गं सर्वमीशानं स्त्रीलिङ्गं विद्धि चाप्युमाम् ।
द्वाभ्यां तनुभ्यां व्याप्तं हि चराचरमिदं जगत् ॥]
तस्माद्वरमहं काङ्क्षे निधनं वाऽपि कौशिक ।
गच्छ वा तिष्ठ वा शक्र यथेष्टं बलसूदन ॥२२०
काममेष वरो मेस्तु शापो वाऽथ महेश्वरात् ।
न चान्यां देवतां काङ्क्षे सर्वकामफलामपि ॥२२१
एवमुक्त्वा तु देवेन्द्रं दुःखादाकुलितेन्द्रियः ।
न प्रसीदति मे देवः किमेतदिति चिन्तयन् ॥२२२
अथापश्यं क्षणेनैव तमेवैरावतं पुनः ।
हंसकुन्देन्दुसदृशं मृणालरजतप्रभम् ॥ २२३
वृषरूपधरं साक्षात्क्षीरोदमिव सागरम् ।
कृष्णपुच्छं महाकायं मधुपिङ्गललोचनम् ॥ २२४
वज्रसारमयैः शृङ्गैर्निष्टप्तकनकप्रभैः ।
सुतीक्ष्णैर्मृदुरक्ताग्रैरुत्किरन्तमिवावनिम् ॥ २२५
जाम्बूनदेन दाम्ना च सर्वतः समलंकृतम् ।
सुवक्त्रखुरनासं च सुकर्णं सुकटीतटम् ।
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ॥२२६
ककुदं तस्य चाभाति स्कन्धमापूर्य धिष्ठितम् ।
तुषारगिरिकूटाभं सिताभ्रशिखरोपमम् ॥ २२७
तमास्थितश्च भगवान्देवदेवः सहोमया ।
अशोभत महादेवः पौर्णमास्यामिवोडुराट् ॥२२८
'किरीटं च जटाभारः सर्पाद्याभरणानि च ।
वज्रादिशूलमातङ्गगम्भीरस्तिमागतम् ॥' २२९
तस्य तेजोभवो वह्निः समेघः स्तनयित्नुमान् ।
सहस्रमिव सूर्याणां सर्वमापूर्य धिष्ठितः ॥ २३०
ईश्वरः सुमहातेजाः संवर्तक इवानलः ।
युगान्ते सर्वभूतानां दिधक्षुरिव चोद्यतः ॥२३१
तेजसा तु तदा व्याप्तं दुर्निरीक्ष्यं समन्ततः ।
पुनरुद्विग्नहृदयः किमेतदिति चिन्तयम् ॥ २३२
मुहूर्तमिव तत्तेजो व्याप्य सर्वा दिशो दश ।
प्रशान्तं च क्षणेनैव देवदेवस्य मायया ॥ २३३
अथापश्यं स्थितं स्थाणुं भगवन्तं महेश्वरम् ।
'सौरभेयगतं सौम्यं विधूममिव पावकम् ॥२३४
प्रशान्तमनसं देवं त्रिनेत्रमपराजितम् ।
सहितं चारुसर्वाङ्ग्या पार्वत्या परमेश्वरम् ॥'२३५
नीलकण्ठं महात्मानमसक्तं तेजसां निधिम् ।
अष्टादशभुजं स्थाणुं सर्वाभरणभूषितम् ॥ २३६
शुक्लाम्बरधरं देवं शुक्लमाल्यानुलेपनम् ।
शुक्लध्वजमनाधृष्यं शुक्लयज्ञोपवीतिनम् ॥ २३७
गायद्भिर्नृत्यमानैश्च वादयद्भिश्च सर्वशः ।
वृतं पार्श्वचरैर्दिव्यैरात्मतुल्यपराक्रमैः ॥ २३८
बालेन्दुमुकुटं पाण्डुं शरच्चन्द्रमिवोदितम् ।
त्रिभिर्नेत्रैः कृतोद्योतं त्रिभिः सूर्यैरिवोदितैः २३९
'सर्वविद्याधिपं देवं शरच्चन्द्रसमप्रभम् ।
नयनाह्लादसौम्योऽहमपश्यं परमेश्वरम् ॥' २४०
अशोभतास्य देवस्य माला गात्रे सितप्रभे ।
जातरूपमयैः पद्मैर्ग्रथिता रत्नभूषिता ॥ २४१
मूर्तिमन्ति तथाऽस्त्राणि सर्वतेजोमयानि च ।
मया दृष्टानि गोविन्द भवस्यामिततेजसः ॥२४२
इन्द्रायुधसहस्राभं धनुस्तस्य महात्मनः ।
पिनाकमिति विख्यातं स च वै पन्नगो महान् ॥
सप्तशीर्षो महाकायस्तीक्ष्णदंष्ट्रो विषोल्बणः ।
ज्यावेष्टितमहाग्रीवः स्थितः पुरुषविग्रहः ॥ २४४
शरश्च सूर्यसंकाशो दृष्टः पाशुपताह्वयः ।
'सहस्रभुजजिह्वास्यो भीषणो नागविग्रहः ॥२४५
शङ्खशूलासिभिश्चैव पट्टसै रूपवान्स्थितः ।
येन च त्रिपुरं दग्धं सर्वदेवमयः शरः ॥' २४६
एतदस्त्रं महाघोरं दिव्यं पाशुपतं महत् ।
अद्वितीयमनिर्देश्यं सर्वभूतभयावहम् ।
सस्फुलिङ्गं महाकायं विसृजन्तमिवानलम् ॥२४७

एकपादं महादंष्ट्रं सहस्रशिरसोदरम् ।
सहस्रभुजजिह्वाक्षमुद्गिरन्तमिवानलम् ॥ २४८
ब्राह्मान्नारायणाच्चैन्द्रादाग्नेयादपि वारुणात् ।
यद्विशिष्टं महाबाहो सर्वशस्त्रविघातनम् ॥ २४९
येन तत्त्रिपुरं दग्ध्वा क्षणाद्भस्मीकृतं पुरा ।
शरेणैकेन गोविन्द महादेवेन लीलया ॥ २५०
निर्ददाह च यत्कृत्स्नं त्रैलोक्यं सचराचरम् ।
महेश्वरभुजोत्सृष्टं निमेषार्धान्न संशयः ॥ २५१
नावध्यो यस्य लोकेऽस्मिन्ब्रह्मविष्णुसुरेष्वपि ।
तदहं दृष्टवांस्तत्र आश्चर्यमिदमुत्तमम् ॥ २५२
गुह्यमस्त्रवरं नान्यत्तत्तुल्यमधिकं हि वा ।
यत्तच्छूलमिति ख्यातं सर्वलोकेषु शूलिनः २५३
दारयेद्यां महीं कृत्स्नां शोषयेद्वा महोदधिम् ।
संहरेद्वा जगत्कृत्स्नं विसृष्टं शूलपाणिना ॥ २५४
यौवनाश्वो हतो येन मान्धाता सबलः पुरा ।
चक्रवर्ती महातेजास्त्रिलोकविजयी नृपः ॥ २५५
महाबलो महावीर्यः शक्रतुल्यपराक्रमः ।
करस्थेनैव गोविन्द लवणस्येह रक्षसः ॥ २५६
तच्छूलमतितीक्ष्णाग्रं सुभीमं रोमहर्षणम् ।
त्रिशिखां भ्रुकुटिं कृत्वा तर्जमानमिव स्थितम् ॥
विधूमं सार्चिषं कृष्णं कालसूर्यमिवोदितम् ।
सर्पहस्तमनिर्देश्यं पाशहस्तमिवान्तकम् ॥ २५८
दृष्टवानस्मि गोविन्द तदस्त्रं रुद्रसन्निधौ ।
परशुस्तीक्ष्णधारश्च दत्तो रामस्य यः पुरा ॥ २५९
महादेवेन तुष्टेन दत्तं भृगुसुताय च ।
कार्तवीर्यो हतो येन चक्रवर्ती महामृधे ॥ २६०
त्रिःसप्तकृत्वः पृथिवी येन निःक्षत्रिया कृता ।
जामदग्न्येन गोविन्द रामेणाक्लिष्टकर्मणा ॥ २६१
दीप्तधारः सुरौद्रास्यः सर्पकण्ठाग्रधिष्ठितः ॥
अभवच्छूलिनोऽभ्याशे दीप्तवह्निशतोपमः ॥२६२
असङ्ख्येयानि चास्त्राणि तस्य दिव्यानि धीमतः ।
प्राधान्यतो मयैतानि कीर्तितानि तवानघ ॥१६३
सव्यदेशे तु देवस्य ब्रह्मा लोकपितामहः ।
दिव्यं विमानमास्थाय हंसयुक्तं मनोजवम् ॥२६४
वामपार्श्वगतश्चापि तथा नारायणः स्थितः ।
वैनतेयं समारुह्य शङ्खचक्रगदाधरः ॥ २६५
स्कन्दो मयूरमास्थाय स्थितो देव्याः समीपतः ।
शक्तिघण्टे समादाय द्वितीय इव पावकः ॥२६६
पुरस्ताच्चैव देवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शंकरम् ॥२६७
स्वायंभुवाद्या मनवो भृग्वाद्या ऋषयस्तथा ।
शक्राद्या देवताश्चैव सर्वे एव समभ्ययुः ॥ २६८
सर्वभूतगणाश्चैव मातरो विविधाः स्थिताः ।
तेऽभिवाद्य महात्मानं परिवार्य समन्ततः ॥२६९
अस्तुवन्विविधैः स्तोत्रैर्महादेवं सुरास्तदा ।
'जगन्मूर्तिं महालिङ्गं तन्मध्ये स्फीतरूपिणम् २७०
ब्रह्मा भवं तदाऽस्तौषीद्रथन्तरमुदीरयन् ।
ज्येष्ठसाम्ना च देवेशं जगौ नारायणस्तदा ॥२७१
गृणन्ब्रह्म परं शक्रः शतरुद्रियमुत्तमम् ।
ब्रह्मा नारायणश्चैव देवराजश्च कौशिकः ।
अशोभन्त महात्मानस्त्रयस्त्रय इवाग्नयः ॥ २७२
तेषां मध्यगतो देवो रराज भगवाञ्छिवः ।
शरदभ्रविनिर्मुक्तः परिधिस्थ इवांशुमान् ॥ २७३
अयुतानि च चन्द्रार्कानपश्यं दिवि केशव ।
ततोऽहमस्तुवं देवं स्तवेनानेन सुव्रत ॥ २७४
उपमन्युरुवाच ।
नमो देवाधिदेवाय महादेवाय ते नमः ।
शक्ररूपाय शक्राय शक्रवेषधराय च ॥ २७५
नमस्ते वज्रहस्ताय पिङ्गलायारुणाय च ।
पिनाकपाणये नित्यं शङ्खशूलधराय च ॥ २७६
नमस्ते कृष्णवासाय कृष्णकुञ्चितमूर्धज ।
कृष्णाजिनोत्तरीयाय कृष्णाष्टमिरताय च ॥२७७
शुक्लवर्णाय शुक्लाय शुक्लाम्बरधराय च ।
शुक्लभस्मावलिप्ताय शुक्लकर्मरताय च ॥ २७८
नमोस्तु रक्तवर्णाय रक्ताम्बरधराय च ।
रक्तध्वजपताकाय रक्तस्रगनुलेपिने ॥ २७९

रथन्तरज्येष्ठे सामनी ॥ २७१ ॥

शुक्लं कर्म हिंसारहितो ध्यानादिधर्मः ॥ २७८ ॥

नमोस्तु पीतवर्णाय पीताम्बरधराय च ॥ २८०
नमोस्तूच्छ्रितच्छत्राय किरीटवरधारिणे ।
अर्धहारार्धकेयूर अर्धकुण्डलकर्णिने ॥ २८१
नमः पवनवेगाय नमो देवाय वै नमः ।
सुरेन्द्राय मुनीन्द्राय महेन्द्राय नमोस्तु ते ॥२८२
नमः पद्मार्धमालाय उत्पलैर्मिश्रिताय च ।
अर्धचन्दनलिप्ताय अर्धस्रगनुलेपिने ॥ २८३
नम आदित्यवक्त्राय आदित्यनयनाय च ।
नम आदित्यवर्णाय आदित्यप्रतिमाय च ॥२८४
नमः सोमाय सौम्याय सौम्यवक्त्रधराय च ।
सौम्यरूपाय मुख्याय सौम्यदंष्ट्राविभूषिणे ॥२८५
नमः श्यामाय गौराय अर्धपीतार्धपाण्डवे ।
नारीनरशरीराय स्त्रीपुंसाय नमोस्तु ते ॥ २८६
नमो वृषभवाहाय गजेन्द्रगमनाय च ।
दुर्गमाय नमस्तुभ्यमगम्यागमनाय च ॥ २८७
नमोस्तु गणगीताय गणवृन्दरताय च ।
गुणानुयातमार्गाय गणनित्यव्रताय च ॥ २८८
नमः श्वेताभ्रवर्णाय संध्यारागप्रभाय च ।
अनुद्दिष्टाभिधानाय स्वरूपाय नमोस्तु ते ॥२८९
नमो रक्ताग्रवासाय रक्तसूत्रधराय च ।
रक्तमालाविचित्राय रक्ताम्बरधराय च ॥ २९०
मणिभूषितमूर्धाय नमश्चन्द्रार्धभूषिणे ।
विचित्रमणिमूर्धाय कुसुमाष्टधराय च ॥ २९१
नमोऽग्निमुखनेत्राय सहस्रशशिलोचने ।
अग्निरूपाय कान्ताय नमोस्तु गहनाय च ॥२९२
खचराय नमस्तुभ्यं गोचराभिरताय च ।
भूचराय भुवनाय अनन्ताय शिवाय च ॥ २९३
नमो दिग्वाससे नित्यमधिवाससुवाससे ।
नमो जगन्निवासाय प्रतिपत्तिसुखाय च ॥ २९४
नित्यमुद्बद्धमुकुटे महाकेयूरधारिणे ।
सर्पकण्ठोपहाराय विचित्राभरणाय च ॥ २९५
नमस्त्रिनेत्रनेत्राय सहस्रशतलोचने ।
स्त्रीपुंसाय नपुंसाय नमः साङ्ख्याय योगिने २९६
शंयोरभिस्रवन्ताय अथर्वाय नमोनमः ।
नमः सर्वार्तिनाशाय नमः शोकहराय च ॥२९७
नमो मेघनिनादाय बहुमायाधराय च ।
बीजक्षेत्राभिपालाय स्रष्टाराय नमोनमः ॥ २९८
नमः सुरासुरेशाय विश्वेशाय नमोनमः ।
नमः पवनवेगाय नमः पवनरूपिणे ॥ २९९
नमः काञ्चनमालाय गिरिमालाय वै नमः ।
नमः सुरारिमालाय चण्डवेगाय वै नमः ॥ ३००
ब्रह्मशिरोपहर्ताय महिषघ्नाय वै नमः ।
नमः स्त्रीरूपधाराय यज्ञविध्वंसनाय च ॥ ३०१
नमस्त्रिपुरहर्ताय यज्ञविध्वंसनाय च ।
नमः कामाङ्गनाशाय कालदण्डधराय च ॥ ३०२
नमः स्कन्दविशाखाय ब्रह्मदण्डाय वै नमः ।
नमो भवाय शर्वाय विश्वरूपाय वै नमः ॥३०३
ईशानाय भवघ्नाय नमोस्त्वन्धकघातिने ।
नमो विश्वाय मायाय चिन्त्याचिन्त्याय वै नमः ॥
त्वं नो गतिश्च श्रेष्ठश्च त्वमेव हृदयं तथा ।]
त्वं ब्रह्मा सर्वदेवानां रुद्राणां नीललोहितः ३०५
आत्मा च सर्वभूतानां साङ्ख्ये पुरुष उच्यते ।
ऋषभस्त्वं पवित्राणां योगिनां निष्कलः शिवः ॥
गृहस्थस्त्वमाश्रमिणामीश्वराणां महेश्वरः ।
कुबेरः सर्वयक्षाणां क्रतूनां विष्णुरुच्यते ॥ ३०७
पर्वतानां भवान्मेरुर्नक्षत्राणां च चन्द्रमाः ।
वसिष्ठस्त्वमृषीणां च ग्रहाणां सूर्य उच्यते ॥३०८
आरण्यानां पशूनां च सिंहस्त्वं परमेश्वरः ।
ग्राम्याणां गोवृषश्चासि भवाँल्लोकप्रपूजितः ॥३०९
आदित्यानां भवान्विष्णुर्वसूनां चैव पावकः ।
पक्षिणां वैनतेयस्त्वमनन्तो भुजगेषु च ॥ ३१०
सामवेदश्च वेदानां यजुषां शतरुद्रियम् ।
सनत्कुमारो योगानां साङ्ख्यानां कपिलो ह्यसि ॥
शक्रोसि मरुतां देव पितॄणां हव्यवाडसि ।

मिश्रिताय मिश्रितमालाय ॥ २८३ ॥ मुकुटे मुकुटाय ॥ २९५ ॥ त्रीणि नेत्राणीव नेत्राणि लोकयात्रानिर्वाहकाण्यग्निचन्द्रसूर्याख्यानि नेत्राणि यस्य तस्मै त्रिनेत्रनेत्राय ।

लोचने लोचनाय ॥ २९६ ॥ स्रष्टाराय औणादिकः सृजेस्तारन् । स्रष्ट्रे इत्यर्थः ॥ २९८ ॥ मायाय मायाविने ॥ ३०४ ॥

ब्रह्मलोकश्च लोकानां गतीनां मोक्ष उच्यसे ॥३१२
क्षीरोदः सागराणां च शैलानां हिमवान्गिरिः ।
वर्णानां ब्राह्मणश्चासि विप्राणां दीक्षितो द्विजः ॥
आदिस्त्वमसि लोकानां संहर्ता काल एव च ।
यच्चान्यदपि लोके वै सर्वतेजोधिकं स्मृतम् ।
तत्सर्वं भगवानेव इति मे निश्चिता मतिः॥३१४
नमस्ते भगवन्देव नमस्ते भक्तवत्सल ।
योगेश्वर नमस्तेऽस्तु नमस्ते विश्वसंभव ॥ ३१५
प्रसीद मम भक्तस्य दीनस्य कृपणस्य च ।
अनैश्वर्येण युक्तस्य गतिर्भव सनातन ॥ ३१६
यच्चापराधं कृतवानज्ञात्वा परमेश्वर ।
मद्भक्त इति देवेश तत्सर्वं क्षन्तुमर्हसि ॥ ३१७
मोहितश्चास्मि देवेश त्वया रूपविपर्ययात् ।
नार्घ्यं तेन मया दत्तं पाद्यं चापि महेश्वर॥ ३१८
एवं स्तुत्वाऽहमीशानं पाद्यमर्घ्यं च भक्तितः ।
कृताञ्जलिपुटो भूत्वा सर्वं तस्मै न्यवेदयम् ॥३१९
ततः शीताम्बुसंयुक्ता दिव्यगन्धसमन्विता ।
पुष्पवृष्टिः शुभा तात पपात मम मूर्धनि ॥३२०
दुन्दुभिश्च तदा दिव्यस्ताडितो देवकिंकरैः ।
ववौ च मारुतः पुण्यः शुचिगन्धः सुखावहः ३२१
ततः प्रीतो महादेवः सपत्नीको वृषध्वजः ।
अब्रवीत्रिदशांस्तत्र हर्षयन्निव मां तदा ॥ ३२२
पश्यध्वं त्रिदशाः सर्वे उपमन्योर्महात्मनः ।
मयि भक्तिं परां नित्यमेकभावादवस्थिताम्॥३२३
एवमुक्तास्तदा कृष्ण सुरास्ते शूलपाणिना ।
ऊचुः प्राञ्जलयः सर्वे नमस्कृत्वा वृषध्वजम्॥३२४
भगवन्देवदेवेश लोकनाथ जगत्पते ।
लभतां सर्वकामेभ्यः फलं त्वत्तो द्विजोत्तमः ३२५
एवमुक्तस्ततः शर्वः सुरैर्ब्रह्मादिभिस्तथा ।
आह मां भगवानीशः प्रहसन्निव शंकरः ॥३२६
भगवानुवाच ।
वत्सोपमन्यो तुष्टोसि पश्य मां मुनिपुङ्गव ।
दृढभक्तोसि विप्रर्षे मया जिज्ञासितो ह्यसि ॥३२७
अनया चैव भक्त्या ते अत्यर्थं प्रीतिमानहम् ।
तस्मात्सर्वान्ददाम्यद्य कामांस्तव यथेप्सितान् ॥
एवमुक्तस्य चैवाथ महादेवेन धीमता ।
हर्षादश्रूण्यवर्तन्त रोमहर्षस्त्वजायत ॥ ३२९
अब्रवं च तदा देव हर्षगद्गदया गिरा ।
जानुभ्यामवनीं गत्वा प्रणम्य च पुनःपुनः ॥३३०
अद्य जातो ह्यहं देव सफलं जन्म चाद्य मे ।
यन्मे साक्षान्महादेवः प्रसन्नस्तिष्ठतेऽग्रतः ॥३३१
यं न पश्यन्ति चैवाद्धा देवा ह्यमितविक्रमम् ।
तमहं दृष्टवान्देवं कोऽन्यो धन्यतरो मया ॥३३२
एवं ध्यायन्ति विद्वांसः परं तत्त्वं सनातनम् ।
तद्विशेषमतिख्यातं यदजं ज्ञानमक्षरम् ॥ ३३३
स एष भगवान्देवः सर्वसत्त्वादिरव्ययः ।
सर्वतत्त्वविधानज्ञः प्रधानपुरुषः परः ॥ ३३४
योऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोकसंभवम् ।
वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः ॥३३५
युगान्ते चैव संप्राप्ते रुद्रमीशोऽसृजत्प्रभुः ।
स रुद्रः संहरन्कृत्स्नं जगत्स्थावरजङ्गमम् ॥ ३३६
कालो भूत्वा परं ब्रह्म याति संवर्तकानलः ।
युगान्ते सर्वभूतानि ग्रसन्निव व्यवस्थितः ॥३३७
एष देवो महादेवो जगत्स्रष्टा चराचरम् ।
कल्पान्ते चैव सर्वेषां स्मृतिमाक्षिप्य तिष्ठति ३३८
सर्वगः सर्वभूतात्मा सर्वभूतभवोद्भवः ।
आस्ते सर्वगतो नित्यमदृश्यः सर्वदैवतैः ॥ ३३९
यदि देयो वरो मह्यं यदि तुष्टोऽसि मे प्रभो ।
भक्तिर्भवतु मे नित्यं त्वयि देव सुरेश्वर ॥ ३४०
अतीतानागतं चैव वर्तमानं च यद्विभो ।
जानीयामिति मे बुद्धिः प्रसादात्सुरसत्तम ॥३४१
क्षीरोदनं च भुञ्जीयामक्षयं सह बान्धवैः ।
आश्रमे च सदाऽस्माकं सान्निध्यं परमस्तु ते ३४२
एवमुक्तः स मां प्राह भगवाँल्लोकपूजितः ।

कामेभ्यः कामान् काम्यमानान् अर्थान् ॥ ३२५ ॥ षड्विंशकमिति ख्यातमिति ट. थ. पाठः ॥ ३३३ ॥ तं त्वां प्रणम्य शिरसा प्रसाद्य प्रार्थये प्रभो इति ट. थ. पाठः ॥ ३३६ ॥

महेश्वरो महातेजाश्चराचरगुरुः शिवः ॥ ३४३
श्रीभगवानुवाच ।
अजरश्चामरश्चैव भव त्वं दुःखवर्जितः ।
यशस्वी तेजसा युक्तो दिव्यज्ञानसमन्वितः ३४४
ऋषीणामभिगम्यश्च मत्प्रसादाद्भविष्यसि ।
शीलवान्गुणसंपन्नः सर्वज्ञः प्रियदर्शनः ॥ ३४५
अक्षयं यौवनं तेऽस्तु तेजश्चैवानलोपमम् ।
क्षीरोदः सागरश्चैव यत्रयत्रेच्छसि प्रियम् ॥ ३४६
तत्र ते भविता कामं सान्निध्यं पयसोनिधेः ।
क्षीरोदनं च भुङ्क्ष्व त्वममृतेन समन्वितम् ॥ ३४७
बन्धुभिः सहितः कल्पं ततो मामुपयास्यसि ।
अक्षया बान्धवाश्चैव कुलं गोत्रं च ते सदा ॥ ३४८
भविष्यति द्विजश्रेष्ठ मयि भक्तिश्च शाश्वती ।
सान्निध्यं चाश्रमे नित्यं करिष्यामि द्विजोत्तम ॥
तिष्ठ वत्स यथाकामं नोत्कण्ठां च करिष्यसि ।
स्मृतस्त्वया पुनर्विप्र करिष्यामि च दर्शनम् ३५०
एवमुक्त्वा स भगवान्सूर्यकोटिसमप्रभः ।
ईशानः स वरान्दत्त्वा तत्रैवान्तरधीयत ॥ ३५१
एवं दृष्टो मया कृष्ण देवदेवः समाधिना ।
तदवाप्तं च मे सर्वं यदुक्तं तेन धीमता ॥ ३५२
प्रत्यक्षं चैव ते कृष्ण पश्य सिद्धान्व्यवस्थितान् ।
ऋषीन्विद्याधरान्यक्षान्गन्धर्वाप्सरसस्तथा ॥३५३
पश्य वृक्षलतागुल्मान्सर्वपुष्पफलप्रदान् ।
सर्वर्तुकुसुमैर्युक्तान्सुखपत्रान्सुगन्धिनः ॥ ३५४
सर्वमेतन्महाबाहो दिव्यभावसमन्वितम् ।
प्रसादाद्देवदेवस्य ईश्वरस्य महात्मनः ॥ ३५५
वासुदेव उवाच ।
एतच्छ्रुत्वा वचस्तस्य प्रत्यक्षमिव दर्शनम् ।
विस्मयं परमं गत्वा अब्रवं तं महामुनिम् ॥३५६
धन्यस्त्वमसि विप्रेन्द्र कस्त्वदन्योस्ति पुण्यकृत् ।
यस्य देवाधिदेवस्ते सान्निध्यं कुरुतेऽऽश्रमे ॥३५७
अपि तावन्ममाप्येवं दद्यात्स भगवाञ्शिवः ।
दर्शनं मुनिशार्दूल प्रसादं चापि शंकरः ॥ ३५८
उपमन्युरुवाच ।
[द्रक्ष्यसे पुण्डरीकाक्ष महादेवं न संशयः ।
अचिरेणैव कालेन यथा दृष्टो मयाऽनघ ॥ ३५९
चक्षुषा चैव दिव्येन पश्याम्यमितविक्रमम् ।
षष्ठे मासि महादेवं द्रक्ष्यसे पुरुषोत्तम ॥ ३६०
षोडशाष्टौ वरांश्चापि प्राप्स्यसि त्वं महेश्वरात् ।
सपत्नीकाद्यदुश्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥ ३६१
अतीतानागतं चैव वर्तमानं च नित्यशः ।
विदितं मे महाबाहो प्रसादात्तस्य धीमतः ॥]३६२
एतान्सहस्रशश्चान्यान्समनुध्यातवान्हरः ।
कस्मात्प्रसादं भगवान्न कुर्यात्तव माधव ॥ ३६४
त्वादृशेन हि देवानां श्लाघनीयः समागमः ।
ब्रह्मण्येनानृशंसेन श्रद्दधानेन चाप्युत ।
जप्यं तु ते प्रदास्यामि येन द्रक्ष्यसि शंकरम् ३६४
श्रीकृष्ण उवाच ।
अब्रवं तमहं ब्रह्मन्त्वत्प्रसादान्महामुने ।
द्रक्ष्ये दितिजसङ्घानां मर्दनं त्रिदशेश्वरम् ॥ ३६५
एवं कथयतस्तस्य महादेवाश्रितां कथाम् ।
दिनान्यष्टौ ततो जग्मुर्मुहूर्तमिव भारत ॥ ३६६
दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि ।
दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः ॥
मासमेकं फलाहारो द्वितीयं सलिलाशनः ।
तृतीयं च चतुर्थं च पञ्चमं चानिलाशनः ॥३६८
एकपादेन तिष्ठंश्च ऊर्ध्वबाहुरतन्द्रितः ।
तेजः सूर्यसहस्रस्य अपश्यं दिवि भारत ॥ ३६९
तस्य मध्यगतं चापि तेजसः पाण्डुनन्दन ।
इन्द्रायुधपिनद्धाङ्गं विद्युन्मालागवाक्षकम् ।
नीलशैलचयप्रख्यं बलाकाभूषिताम्बरम् ॥ ३७०
तत्र स्थितश्च भगवान्देव्या सह महाद्युतिः ।
तपसा तेजसा कान्त्या दीप्तया सह भार्यया ३७१
रराज भगवांस्तत्र देव्या सह महेश्वरः ।
सोमेन सहितः सूर्यो यथा मेघस्थितस्तथा ॥३७२
संहृष्टरोमा कौन्तेय विस्मयोत्फुल्ललोचनः ।
अपश्यं देवसङ्घानां गतिमार्तिहरं हरम् ॥ ३७३
किरीटिनं गदिनं शूलपाणिं
व्याघ्राजिनं जटिलं दण्डपाणिम् ।

पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रं
शुभाङ्गदं व्यालयज्ञोपवीतम् ॥ ३७४
दिव्यां मालामुरसाऽनेकवर्णां
समुद्वहन्तं गुल्फदेशावलम्बाम् ।
चन्द्रं यथा परिविष्टं ससन्ध्यं
वर्षात्यये तद्वदपश्यमेनम् ॥ ३७५
प्रमथानां गणैश्चैव समन्तात्परिवारितम् ।
शरदीव सुदुष्प्रेक्ष्यं परिविष्टं दिवाकरम् ॥ ३७६
एकादशशतान्येवं रुद्राणां वृषवाहनम् ।
अस्तुवं नियतात्मानं कर्मभिः शुभकर्मिणम् ३७७
आदित्या वसवः साध्या विश्वेदेवास्तथाऽश्विनौ ।
विश्वाभिः स्तुतिभिर्देवं विश्वदेवं समस्तुवन्॥३७८
शतक्रतुश्च भगवान्विष्णुश्चादितिनन्दनौ ।
ब्रह्मा रथन्तरं साम ईरयन्ति भवान्तिके ॥३७९
योगीश्वराः सुबहवो योगदं पितरं गुरुम् ।
ब्रह्मर्षयश्च ससुतास्तथा देवर्षयश्च वै ॥ ३८०
पृथिवी चान्तरिक्षं च नक्षत्राणि ग्रहास्तथा ।
मासार्धमासा ऋतवो रात्रिः संवत्सराः क्षणाः ॥
मुहूर्ताश्च निमेषाश्च तथैव युगपर्ययाः ।
दिव्या राजन्नमस्यन्ति विद्याः सत्वविदस्तथा ३८२
सनत्कुमारो देवाश्च इतिहासास्तथैव च ।
मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः॥३८३
मनवः सप्त सोमश्च अथर्वा सबृहस्पतिः ।
भृगुर्दक्षः कश्यपश्च वसिष्ठः काश्य एव च ॥३८४
छन्दांसि दीक्षा यज्ञाश्च दक्षिणाः पावको हविः ।
यज्ञोपगानि द्रव्याणि मूर्तिमन्ति युधिष्ठिर ॥ ३८५
प्रजानां पालकाः सर्वे सरितः पन्नगा नगाः ।
देवानां मातरः सर्वा देवपत्न्यः सकन्यकाः॥३८६
सहस्राणि मुनीनां च अयुतान्यर्बुदानि च ।
नमस्यन्ति प्रभुं शान्तं पर्वताःसागरा दिशः ॥३८७
गन्धर्वाप्सरसश्चैव गीतवादित्रकोविदाः ।
दिव्यतालेषु गायन्तः स्तुवन्ति भवमद्भुतम्॥३८८
विद्याधरा दानवाश्च गुह्यका राक्षसास्तथा ।

परिविष्टं परिवेषवन्तम् ॥ ३७५॥ पञ्चचत्वारिंशोऽध्यायः॥४५॥

सर्वाणि चैव भूतानि स्थावराणि चराणि च ।
नमस्यन्ति महाराज वाङ्मनःकर्मभिर्विभुम् ॥३८९
पुरस्ताद्धिष्ठितः शर्वो ममासीत्रिदशेश्वरः ॥३९०
पुरस्ताद्धिष्ठितं दृष्ट्वा ममेशानं च भारत ।
सप्रजापतिशक्रान्तं जगन्मामभ्युदैक्षत ॥ ३९१
ईक्षितुं च महादेवं न मे शक्तिरभूत्तदा ।
ततो मामब्रवीद्देवः पश्य कृष्ण वदस्व च ॥ ३९२
त्वया ह्याराधितश्चाहं शतशोऽथ सहस्रशः ।
त्वत्समो नास्ति मे कश्चित्रिषु लोकेषु वै प्रियः३९३
शिरसा वन्दिते देवे देवी प्रीता ह्युमा तदा ।
ततोऽहमब्रुवं स्थाणुं स्तुतं ब्रह्मादिभिः सुरैः ॥३९४
कृष्ण उवाच ।
नमोस्तु ते शाश्वत सर्वयोने
ब्रह्माधिपं त्वामृषयो वदन्ति ।
तपश्च सत्वं च रजस्तमश्च
त्वामेव सत्यं च वदन्ति सन्तः ॥ ३९५
त्वं वै ब्रह्मा च रुद्रश्च वरुणोऽग्निर्मनुर्भवः ।
धाता त्वष्टा विधाता च त्वं प्रभुः सर्वतोमुखः३९६
त्वत्तो जातानि भूतानि स्थावराणि चराणि च ।
त्वया सृष्टमिदं कृत्स्नं त्रैलोक्यं सचराचरम् ॥ ३९७
यानीन्द्रियाणीह मनश्च कृत्स्नं
ये वायवः सप्त तथैव चाग्नयः ।
ये देवसंस्थास्तव देवताश्च
तस्मात्परं त्वामृषयो वदन्ति ॥ ३९८
वेदाश्च यज्ञाः सोमश्च दक्षिणा पावको हविः ।
यज्ञोपगं च यत्किंचिद्भगवांस्तदसंशयम् ॥ ३९९
इष्टं दत्तमधीतं च व्रतानि नियमाश्च ये ।
ह्रीः कीर्तिः श्रीर्द्युतिस्तुष्टिः सिद्धिश्चैव तदर्पणी ॥
कामः क्रोधो भयं लोभो मदः स्तम्भोथ मत्सरः ।
आधयो व्याधयश्चैव भगवंस्तनवस्तव ॥ ४०१
कृतिर्विकारः प्रणयः प्रधानं बीजमव्ययम् ।
मनसः परमा योनिः प्रभावश्चापि शाश्वतः ॥४०२
अव्यक्तः पावनोऽचिन्त्यः सहस्रांशुर्हिरण्मयः ।
आदिर्गणानां सर्वेषां भवान्वै जीविताश्रयः॥४०३

महानात्मा मतिर्ब्रह्मा विश्वः शंभुः स्वयंभुवः ।
बुद्धिः प्रज्ञोपलब्धिश्च संवित्ख्यातिर्धृतिः स्मृतिः ॥
पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यते ।
त्वां बुद्ध्वा ब्राह्मणो वेदात्प्रमोहं विनियच्छति ॥
हृदयं सर्वभूतानां क्षेत्रज्ञस्त्वमृषिस्तुतः ॥ ४०६
सर्वतः पाणिपादस्त्वं सर्वतोक्षिशिरोमुखः ।
सर्वतः श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठसि ॥४०७
फलं त्वमसि तिग्मांशोर्निमेषादिषु कर्मसु ।
त्वं वै प्रभार्चिः पुरुषः सर्वस्य हृदि संश्रितः ।
अणिमा महिमा प्राप्तिरीशानो ज्योतिरव्ययः॥४०८
त्वयि बुद्धिर्मतिर्लोकाः प्रपन्नाः संश्रिताश्च ये ।
ध्यानिनो नित्ययोगाश्च सत्यसत्वा जितेन्द्रियाः॥
यस्त्वां ध्रुवं वेदयते गुहाशयं
प्रभुं पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान्बुद्धिमतीत्य तिष्ठति ॥ ४१०

विदित्वा सप्त सूक्ष्माणि षडङ्गं त्वां च मूर्तितः ।
प्रधानविधियोगस्थस्त्वामेव विशते बुधः ॥ ४११
एवमुक्ते मया पार्थ भवे चार्तिविनाशने ।
चराचरं जगत्सर्गं सिंहनादं तदाऽकरोत् ॥ ४१२
तं विप्रसङ्घाश्च सुरासुराश्च
नागाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव तदा प्रणेमुः ॥ ४१३
मम मूर्ध्नि च दिव्यानां कुसुमानां सुगन्धिनाम् ।
राशयो निपतन्ति स्म वायुश्च सुसुखो ववौ ॥४१४
निरीक्ष्य भगवान्देवीं ह्युमां मां च जगद्धितः ।
शतक्रतुं चाभिवीक्ष्य स्वयं मामाह शंकरः॥४१५
विद्मः कृष्ण परां भक्तिमस्मासु तव शत्रुहन् ।
क्रियतामात्मनः श्रेयः प्रीतिर्हि त्वयि मे परा ४१६
वृणीष्वाष्टौ वरान्कृष्ण दाताऽस्मि तव सत्तम ।
ब्रूहि यादवशार्दूल यानिच्छसि सुदुर्लभान् ॥४१७

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

कृष्णेन युधिष्ठिरंप्रति पार्वतीपरमेश्वराभ्यां स्वस्मै वरप्रदानकथनम् ॥ १ ॥

कृष्ण उवाच ।
मूर्ध्ना निपत्य नियतस्तेजःसन्निचये ततः ।
परमं हर्षमागत्य भगवन्तमथाब्रवम् ॥ १
धर्मे दृढत्वं युधि शत्रुघातं
यशस्तथाऽग्र्यं परमं बलं च ।
योगप्रियत्वं तव सन्निकर्षं
वृणे सुतानां च शतं शतानि ॥ २
एवमस्त्विति तद्वाक्यं मयोक्तः प्राह शंकरः॥ ३
ततो मां जगतो माता धारिणी सर्वपावनी ।
उवाचोमा प्रणिहिता शर्वाणी तपसां निधिः ।
दत्तो भगवता पुत्रः सांबो नाम तवानघ ॥ ४
मत्तोप्यष्टौ वरानिष्टान्गृहाण त्वं ददामि ते ।
प्रणम्य शिरसा सा च मयोक्ता पाण्डुनन्दन ॥५

द्विजेष्वकोपं पितृतः प्रसादं
शतं सुतानां परमं च भोगम् ।
कुले प्रीतिं मातृतश्च प्रसादं
शमप्राप्तिं प्रवृणे चापि दाक्ष्यम् ॥ ६
उमोवाच ।
एवं भविष्यत्यमरप्रभाव
नाहं मृषा जातु वदे कदाचित् ।
भार्यासहस्राणि च षोडशैव
तासु प्रियत्वं च तथाऽक्षयं च ॥ ७
प्रीतिं चाग्र्यां बान्धवानां सकाशा-
द्ददामि तेऽहं वपुषः काम्यतां च ।
भोक्ष्यन्ते वै सप्ततिं वै शतानि
गृहे तुभ्यमतिथीनां च नित्यम् ॥ ८

सन्निचये स्थितमिति शेषः ॥ १ ॥ धारिणी पोषिका ॥ ४ ॥

वासुदेव उवाच ।
एवं दत्त्वा वरान्देवो मम देवी च भारत ।
अन्तर्हितः क्षणे तस्मिन्सगणो भीमपूर्वज ॥ ९
एतदत्यद्भुतं पूर्वं ब्राह्मणायातितेजसे ।
उपमन्यवे मया कृत्स्नं व्याख्यातं पार्थिवोत्तम ।
नमस्कृत्वा तु स प्राह देवदेवाय सुव्रत ॥ १०
नास्ति शर्वसमो देवो नास्ति शर्वसमा गतिः ।
नास्ति शर्वसमो दाने नास्ति शर्वसमो रणे ॥ ११

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

उपमन्युना कृष्णंप्रति तण्डिकृतमहादेवस्तुत्यनुवादः ॥ १ ॥

उपमन्युरुवाच ।
ऋषिरासीत्कृते तात तण्डिरित्येव विश्रुतः ।
दशवर्षसहस्राणि तेन देवः समाधिना ॥ १
आराधितोऽभूद्भक्तेन तस्योदर्कं निशामय ।
स दृष्टवान्महादेवमस्तौषीच्च स्तवैर्विभुम् ॥ २
[इति तण्डिस्तपोयोगात्परमात्मानमव्ययम् ।
चिन्तयित्वा महात्मानमिदमाह सुविस्मितः ॥ ३
यं पठन्ति सदा साङ्ख्याश्चिन्तयन्ति च योगिनः ।
परं प्रधानं पुरुषमधिष्ठातारमीश्वरम् ॥ ४
उत्पत्तौ च विनाशे च कारणं यं विदुर्बुधाः ।
देवासुरमुनीनां च परं यस्मान्न विद्यते ॥ ५
अजं तमहमीशानमनादिनिधनं प्रभुम् ।
अत्यन्तसुखिनं देवमनघं शरणं व्रजे ॥ ६
एवं ब्रुवन्नेव तदा ददर्श तपसांनिधिम् ।
तमव्ययमनौपम्यमचिन्त्यं शाश्वतं ध्रुवम् ॥ ७
निष्कलं सकलं ब्रह्म निर्गुणं गुणगोचरम् ।
योगिनां परमानन्दमक्षरं मोक्षसंज्ञितम् ॥ ८
मनोरिन्द्राग्निमरुतां विश्वस्य ब्रह्मणो गतिम् ।
अग्राह्यमचलं शुद्धं बुद्धिग्राह्यं मनोमयम् ॥ ९
दुर्विज्ञेयमसङ्ख्येयं दुष्प्रापमकृतात्मभिः ।
योनिं विश्वस्य जगतस्तमसः परतः परम् ॥ १०
यः प्राणवन्तमात्मानं ज्योतिर्जीवस्थितं मनः ।
तं देवं दर्शनाकाङ्क्षी बहून्वर्षगणानृषिः ।
तपस्युग्रे स्थितो भूत्वा दृष्ट्वा तुष्टाव चेश्वरम्॥११]

उदर्कं फलोदयम् ॥ २ ॥

तण्डिरुवाच ।
पवित्राणां पवित्रस्त्वं गतिर्गतिमतांवर ॥ १२
अत्युग्रं तेजसां तेजस्तपसां परमं तपः ।
विश्वावसुहिरण्याक्षपुरुहूतनमस्कृत ॥ १३
भूरिकल्याणद विभो परं सत्यं नमोस्तु ते ।
जातीमरणभीरूणां यतीनां यततां विभो ॥ १४
निर्वाणद सहस्रांशो नमस्तेऽस्तु सुखाश्रय ।
ब्रह्मा शतक्रतुर्विष्णुर्विश्वेदेवा महर्षयः ॥ १५
न विदुस्त्वां तु तत्त्वेन कुतो वेत्स्यामहे वयम् ।
त्वत्तः प्रवर्तते सर्वं त्वयि सर्वं प्रतिष्ठितम् ॥ १६
कालाख्यः पुरुषाख्यश्च ब्रह्माख्यश्च त्वमेव हि ।
तनवस्ते स्मृतास्तिस्रः पुराणज्ञैः सुरर्षिभिः ॥ १७
अधिपौरुषमध्यात्ममधिभूताधिदैवतम् ।
अधिलोकाधिविज्ञानमधियज्ञस्त्वमेव हि ॥ १८
त्वां विदित्वाऽऽत्मदेवस्थं दुर्विदं दैवतैरपि ।
विद्वांसो यान्ति निर्मुक्ताः परं भावमनामयम् १९
अनिच्छतस्तव विभो जन्ममृत्युरनेकतः ।
द्वारं तु स्वर्गमोक्षाणामाक्षेप्ता त्वं ददासि च ॥ २०
त्वं वै स्वर्गश्च मोक्षश्च कामः क्रोधस्त्वमेव च ।
सत्वं रजस्तमश्चैव अधश्चोर्ध्वं त्वमेव हि ॥ २१
ब्रह्मा भवश्च विष्णुश्च स्कन्देन्द्रौ सविता यमः ।
वरुणेन्दू मनुर्धाता विधाता त्वं धनेश्वरः ॥ २२
भूर्वायुः सलिलाग्निश्च खं वाग्बुद्धिः स्थितिर्मतिः ।
कर्म सत्यानृते चोभे त्वमेवास्ति च नास्ति च ॥ २३
इन्द्रियाणीन्द्रियार्थाश्च प्रकृतिभ्यः परं ध्रुवम् ।

विश्वाविश्वपरो भावश्चिन्त्याचिन्त्यस्त्वमेव हि २४
यच्चैतत्परमं ब्रह्म यच्च तत्परमं पदम् ।
या गतिः साङ्ख्ययोगानां स भवान्नात्र संशयः २५
नूनमद्य कृतार्थाः स्म नूनं प्राप्ताः सतां गतिम् ।
यां गतिं प्रार्थयन्तीह ज्ञाननिर्मलबुद्धयः ॥ २६
अहो मूढाः स्म सुचिरमिमं कालमचेतसा ।
यन्न विद्मः परं देवं शाश्वतं यं विदुर्बुधाः ॥ २७
सेयमासादिता साक्षात्त्वद्भक्तिर्जन्मभिर्मया ।
भक्तानुग्रहकृद्देवो यं ज्ञात्वाऽमृतमश्नुते ॥ २८
देवासुरमुनीनां तु यच्च गुह्यं सनातनम् ।
गुहायां निहितं ब्रह्म दुर्विज्ञेयं मुनेरपि ॥ २९
स एष भगवान्देवः सर्वकृत्सर्वतोमुखः ।
सर्वात्मा सर्वदर्शी च सर्वगः सर्ववेदिता ॥ ३०
देहकृद्देहभृद्देही देहभुग्देहिनां गतिः ।
प्राणकृत्प्राणभृत्प्राणी प्राणदः प्राणिनां गतिः ३१
अध्यात्मगतिरिष्टानां ध्यायिनामात्मवेदिनाम् ।
अपुनर्भवकामानां या गतिः सोऽयमीश्वरः ॥३२
अयं च सर्वभूतानां शुभाशुभगतिप्रदः ।
अयं च जन्ममरणे विदध्यात्सर्वजन्तुषु ।
अयं संसिद्धिकामानां या गतिः सोयमीश्वरः ॥३३
भूराद्यान्सर्वभुवनानुत्पाद्य सदिवौकसः ।
दधाति देवस्तनुभिरष्टाभिर्यो बिभर्ति च ॥ ३४
अतः प्रवर्तते सर्वमस्मिन्सर्वं प्रतिष्ठितम् ।
अस्मिंश्च प्रलयं याति अयमेकः सनातनः ॥ ३५
अयं स सत्यकामानां सत्यलोकः परं सताम् ।
अपवर्गश्च मुक्तानां कैवल्यं चात्मवेदिनाम् ॥ ३६
अयं ब्रह्मादिभिः सिद्धैर्गुहायां गोपितः प्रभुः ।
देवासुरमनुष्याणामप्रकाशो भवेदिति ॥ ३७
तं त्वां देवासुरनरास्तत्त्वेन न विदुर्भवम् ।
मोहिताः खल्वनेनैव हृदिस्थेनाप्रकाशिना ॥ ३८
ये चैनं प्रतिपद्यन्ते भक्तियोगेन भाविताः ।
तेषामेवात्मनात्मानं दर्शयत्येष हृच्छयः ॥ ३९

यं ज्ञात्वा न पुनर्जन्म मरणं चापि विद्यते ।
यं विदित्वा परं वेद्यं वेदितव्यं न विद्यते ॥ ४०
यं लब्ध्वा परमं लाभं नाधिकं मन्यते बुधः ।
यां सूक्ष्मां परमां प्राप्तिं गच्छन्नव्ययमक्षयम् ॥ ४१
यं साङ्ख्या गुणतत्त्वज्ञाः साङ्ख्यशास्त्रविशारदाः ।
सूक्ष्मज्ञानतराः सूक्ष्मं ज्ञात्वा मुच्यन्ति बन्धनैः ४२
यं च वेदविदो वेद्यं वेदान्ते च प्रतिष्ठितम् ।
प्राणायामपरा नित्यं यं विशन्ति जपन्ति च ॥ ४३
ओंकाररथमारुह्य ते विशन्ति महेश्वरम् ।
अयं स देवयानानामादित्यो द्वारमुच्यते ॥ ४४
अयं च पितृयानानां चन्द्रमा द्वारमुच्यते ।
एष काष्ठा दिशश्चैव संवत्सरयुगादि च ॥ ४५
दिव्यादिव्यः परो लाभ अयने दक्षिणोत्तरे ।
एनं प्रजापतिः पूर्वमाराध्य बहुभिः स्तवैः ॥ ४६
प्रजार्थं वरयामास नीललोहितसंज्ञितम् ।
ऋग्भिर्यमनुशासन्ति तत्त्वे कर्मणि बह्वृचाः ॥४७
यजुर्भिर्यत्रिधा वेद्यं जुह्वत्यध्वर्यवोऽध्वरे ।
सामभिर्यं च गायन्ति सामगाः शुद्धबुद्धयः॥४८
ऋतं सत्यं परं ब्रह्म स्तुवन्त्याथर्वणा द्विजाः ।
यज्ञस्य परमा योनिः पतिश्चायं परः स्मृतः ॥४९
रात्र्यहःश्रोत्रनयनः पक्षमासशिरोभुजः ।
ऋतुवीर्यस्तपोधैर्यो ह्यब्दगुह्योरुपादवान् ॥ ५०
मृत्युर्यमो हुताशश्च कालः संहारवेगवान् ।
कालस्य परमा योनिः कालश्चायं सनातनः ॥५१
चन्द्रादित्यौ सनक्षत्रौ ग्रहाश्च सह वायुना ।
ध्रुवः सप्तर्षयश्चैव भुवनाः सप्त एव च ॥ ५२
प्रधानं महदव्यक्तं विशेषान्तं सवैकृतम् ।
ब्रह्मादिस्तम्बपर्यन्तं भूतादि सदसच्च यत् ॥ ५३
अष्टौ प्रकृतयश्चैव प्रकृतिभ्यश्च यः परः ।
अस्य देवस्य यद्भागं कृत्स्नं संपरिवर्तते ॥ ५४
एतत्परममानन्दं यत्तच्छाश्वतमेव च ।
एषा गतिर्विरक्तानामेष भावः परः सताम् ॥५५

सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अचेतसा अज्ञानेन ॥ २७ ॥ सूक्ष्मं लिङ्गं ज्ञानेन तरन्त्यतिक्रम्य गच्छन्ति ते सूक्ष्मज्ञानतराः ॥ ४२ ॥

एतत्पदमनुद्विग्नमेतद्ब्रह्म सनातनम् ।
शास्त्रवेदाङ्गविदुषामेतद्ध्यानं परं पदम् ॥ ५६
इयं सा परमा काष्ठा इयं सा परमा कला ।
इयं सा परमा सिद्धिरियं सा परमा गतिः ॥५७
इयं सा परमा शान्तिरियं सा निर्वृतिः परा ।
यं प्राप्य कृतकृत्याः स्म इत्यमन्यन्त योगिनः ॥५८
इयं तुष्टिरियं सिद्धिरियं श्रुतिरियं स्मृतिः ।
अध्यात्मगतिरिष्टानां विदुषां प्राप्तिरव्यया ॥ ५९
यजतां कामयानानां मखैर्विपुलदक्षिणैः ।
या गतिर्यज्ञशीलानां सा गतिस्त्वं न संशयः ॥६०
सम्यग्योगजपैः शान्तिर्नियमैर्देहतापनैः ।
तप्यतां या गतिर्देव परमा सा गतिर्भवान् ॥६१
कर्मन्यासकृतानां च विरक्तानां ततस्ततः ।
या गतिर्ब्रह्मसदने सा गतिस्त्वं सनातन ॥ ६२
अपुनर्भवकामानां वैराग्ये वर्ततां च या ।
प्रकृतीनां लयानां च सा गतिस्त्वं सनातन ॥६३
ज्ञानविज्ञानयुक्तानां निरुपाख्या निरञ्जना ।
कैवल्या या गतिर्देव परमा सा गतिर्भवान् ॥६४
वेदशास्त्रपुराणोक्ताः पञ्च ता गतयः स्मृताः ।
त्वत्प्रसादाद्धि लभ्यन्ते न लभ्यन्तेऽन्यथा विभो॥
इति तण्डिस्तपोराशिस्तुष्टावेशानमात्मना ।
जगौ च परमं ब्रह्म यत्पुरा लोककृज्जगौ ॥ ६६

उपमन्युरुवाच ।
एवं स्तुतो महादेवस्तण्डिना ब्रह्मवादिना ।
उवाच भगवान्देव उमया सहितः प्रभुः ॥ ६७
ब्रह्मा शतक्रतुर्विष्णुर्विश्वेदेवा महर्षयः ।
न विदुस्त्वामिति ततस्तुष्टः प्रोवाच तं शिवः ॥६८
अक्षयश्चाव्ययश्चैव भविता दुःखवर्जितः ।
यशस्वी तेजसा युक्तो दिव्यज्ञानसमन्वितः ॥ ६९
ऋषीणामभिगम्यश्च सूत्रकर्ता सुतस्तव ।
मत्प्रसादाद्द्विजश्रेष्ठ भविष्यति न संशयः ॥ ७०
कं वा कामं ददाम्यद्य ब्रूहि यद्वत्स काङ्क्षसे ।
प्राञ्जलिः स उवाचेदं त्वयि भक्तिर्दृढाऽस्तु मे॥७१
उपमन्युरुवाच ।
एतान्दत्त्वा वरान्देवो वन्द्यमानः सुरर्षिभिः ।
स्तूयमानश्च विबुधैस्तत्रैवान्तरधीयत ॥ ७२
अन्तर्हिते भगवति सानुगे यादवेश्वर ।
ऋषिराश्रममागम्य ममैतत्प्रोक्तवानिह ॥ ७३
यानि च प्रथितान्यादौ तण्डिराख्यातवान्मम ।
मानानि मानवश्रेष्ठ तानि त्वं शृणु सिद्धये ॥७४
दश नामसहस्राणि देवेष्वाह पितामहः ।
सर्वस्य शास्त्रेषु तथा दश नामशतानि च ॥ ७५
गुह्यानीमानि नामानि तण्डिर्भगवतोऽच्युत ।
देवप्रसादाद्देवेशः पुरा प्राह महात्मने ॥ ७६

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

कृष्णेन युधिष्ठिरंप्रत्युपमन्युना स्वात्मानं प्रत्युक्तशिवसहस्रनामानुवादः ॥ १ ॥

वासुदेव उवाच ।
ततः स प्रयतो भूत्वा मम तात युधिष्ठिर ।
प्राञ्जलिः प्राह विप्रर्षिर्नामसंग्रहमादितः ॥ १
उपमन्युरुवाच ।
ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदाङ्गसंभवैः ।
सर्वलोकेषु विख्यातं स्तुत्यं स्तोष्यामि नामभिः २
महद्भिर्विहितैः सत्यैः सिद्धैः सर्वार्थसाधकैः ।
ऋषिणा तण्डिना भक्त्या कृतैर्वेदकृतात्मना ॥ ३
यथोक्तैः साधुभिः ख्यातैर्मुनिभिस्तत्त्वदर्शिभिः ।
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम् ॥ ४
श्रुतेः सर्वत्र जगति ब्रह्मलोकावतारितैः ।
सत्यैस्तत्परमं ब्रह्म ब्रह्मप्रोक्तं सनातनम् ।

सत्यैरन्वर्थैः वेदे कृतात्मना दत्तचित्तेन कृतैः वेदात्पृथक्कृतैः ॥ ३ ॥

वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ॥ ५
वरयैनं भवं देवं भक्तस्त्वं परमेश्वरम् ।
तेन ते श्रावयिष्यामि यत्तद्ब्रह्म सनातनम् ॥ ६
न शक्यं विस्तरात्कृत्स्नं वक्तुं सर्वस्य केनचित् ।
युक्तेनापि विभूतीनामपि वर्षशतैरपि ॥ ७
यस्यादिर्मध्यमन्तं च सुरैरपि न गम्यते ।
कस्तस्य शक्नुयाद्वक्तुं गुणान्कात्स्र्न्येन माधव ॥ ८
किंतु देवस्य महतः संक्षिप्तार्थपदाक्षरम् ।
शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य धीमतः ॥ ९
अप्राप्य तु ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः ।
यदा तेनाभ्यनुज्ञातः स्तुतो वै स तदा मया ॥ १०
अनादिनिधनस्याहं जगद्योनेर्महात्मनः ।
नाम्नां कंचित्समुद्देशं वक्ष्याम्यव्यक्तयोनिनः ११
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ।
शृणु नाम्नां चयं कृष्ण यदुक्तं पद्मयोनिना ॥ १२
दश नामसहस्राणि यान्याह प्रपितामहः ।
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् १३
गिरेः सारं यथा हेम पुष्पसारं यथा मधु ।
घृतात्सारं यथा मण्डस्तथैतत्सारमुद्धृतम् ॥ १४
सर्वपापापहमिदं चतुर्वेदसमन्वितम् ।
प्रयत्नेनाधिगन्तव्यं धार्यं च प्रयतात्मना ॥ १५
माङ्गल्यं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ॥ १६
इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च ।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने ॥ १७
यश्चाभ्यसूयते देवं कारणात्मानमीश्वरम् ।
स कृष्ण नरकं याति सहपूर्वैः सहात्मजैः ॥ १८
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् ।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् ॥ १९
यं ज्ञात्वा अन्तकालेऽपि गच्छेत परमां गतिम् ।
पवित्रं मङ्गलं मेध्यं कल्याणमिदमुत्तमम् ॥ २०
इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः ।
सर्वस्तवानां राजत्वे दिव्यानां समकल्पयत् ॥ २१
तदाप्रभृति चैवायमीश्वरस्य महात्मनः ।

वरय प्रार्थय ॥६॥ पवित्रं पापनाशकम् । मेध्यं यज्ञादिफलप्रदम् ।

स्तवराज इति ख्यातो जगत्यमरपूजितः ॥ २२
ब्रह्मलोकादयं स्वर्गे स्तवराजोऽवतारितः ।
यतस्तण्डिः पुरा प्राप तेन तण्डिकृतोऽभवत् ॥ २३
स्वर्गाच्चैवात्र भूर्लोकं तण्डिना ह्यवतारितः ।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ॥ २४
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ।
ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् ॥ २५
तेजसामपि यत्तेजस्तपसामपि यत्तपः ।
शान्तीनामपि या शान्तिर्द्युतीनामपि या द्युतिः २६
दान्तानामपि यो दान्तो धीमतामपि या च धीः ।
देवानामपि यो देव ऋषीणामपि यस्त्वृषिः ॥ २७
यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः ।
रुद्राणामपि यो रुद्रः प्रभा प्रभवतामपि ॥ २८
योगिनामपि यो योगी कारणानां च कारणम् ।
यतो लोकाः संभवन्ति नभवन्ति यतः पुनः २९
सर्वभूतात्मभूतस्य हरस्यामिततेजसः ।
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ।
यच्छ्रुत्वा मनुजव्याघ्र सर्वान्कामानवाप्स्यसि ॥ ३०
स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ॥ ३१
जटी चर्मी शिखी खड्गी सर्वाङ्गः सर्वभावनः ।
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥ ३२
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानवासी भगवान्खचरो गोचरोऽर्दनः ॥ ३३
अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ॥ ३४
महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ॥ ३५
लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रं च महांश्चैव नियमो नियमाश्रितः ॥ ३६
सर्वकर्मा स्वयंभूत आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः ॥ ३७
चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।

मङ्गलमभ्युदयकरम् । उत्तमं कल्याणं परमानन्दरूपम् ॥२०॥

अत्रिरत्र्या नमस्कर्ता मृगबाणार्पणोऽनघः ॥३८
महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ ३९
योगी योज्यो महाबीजो महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः ॥ ४०
दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयं श्रेष्ठो बलवीरो बलो गणः ॥४१
गणकर्ता गणपतिर्दिग्वासाः काम एव च ।
मन्त्रवित्परमो मन्त्रः सर्वभावकरो हरः ॥ ४२
कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतघ्नी खङ्गी पट्टिशी चायुधी महान् ४३
सुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ॥ ४४
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
शृगालरूपः सिद्धार्थो मुण्डः सर्वशुभंकरः ॥ ४५
अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिङ्ग ऊर्ध्वशायी नभःस्थलः ॥४६
त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः ॥ ४७
गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः ॥ ४८
कालयोगी महानादः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ ४९
बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः ॥ ५०
घोरो महातपाः पाशो नित्यो गिरिरुहो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यतन्द्रितः ॥५१
अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयागापहारी च सुसहो मध्यमस्तथा ॥ ५२
तेजोपहारी बलहा मुदितोऽर्थोऽजितो वरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥ ५३
न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥ ५४
विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ।

तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ॥५५
विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥ ५६
उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च ॥ ५७
शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्धगो बली ।
वेणवी पणवी ताली खली कालकटंकटः ॥ ५८
नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयो गमः ।
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोमुखः ॥ ५९
विमोचनः सुसरणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महीचारी स्रुतस्तथा ॥ ६०
सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः ।
व्यालरूपो गुहावासी गुहो माली तरङ्गवित्॥ ६१
त्रिदशस्त्रिकालधृक्कर्मसर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥ ६२
साङ्ख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञो अतुल्यो यज्ञभागवित् ६३
सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ॥ ६४
लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥ ६५
मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः ।
सर्वकासप्रसादश्च सुबलो बलरूपधृत् ॥ ६६
सर्वकामवरश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिर्विरूपश्च निपाती ह्यवशः खगः ॥६७
रौद्ररूपोंऽशुरादित्यो बहुरश्मिः सुवर्चसी ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥ ६८
सर्ववासी श्रियावासी उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः संभग्नश्च सहस्रदः ॥ ६९
पक्षी च पक्षरूपश्च अतिदीप्तो विशांपतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः॥७०
वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः ॥७१
भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः ।

महासेनो विशाखश्च षष्टिभागो गवांपतिः ॥ ७२
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः ॥ ७३
वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ॥७४
ईशान ईश्वरः कालो निशाचारी पिनाकवान् ।
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो हरिः ७५
नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्धनः ।
भगहारी निहन्ता च कालो ब्रह्मा पितामहः ॥७६
चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ।
लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः॥७७
बीजाध्यक्षो बीजकर्ता अध्यात्माऽनुगतो बलः ।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ॥७८
दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ॥ ७९
अक्षरं परमं ब्रह्म बलवच्छक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः॥
बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मन्त्रकारो विद्वान्समरमर्दनः ॥ ८१
महामेघनिवासी च महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः८२
वृषणः शंकरो नित्यं वर्चस्वी धूमकेतनः ।
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ॥ ८३
स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः ॥ ८४
कृष्णवर्णः सुवर्णश्च इन्द्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ॥८५
महामूर्धा महामात्रो महानेत्रो निशालयः ।
महान्तको महाकर्णो महोष्ठश्च महाहनुः ॥ ८६
महानासो महाकम्बुर्महाग्रीवः श्मशानभाक् ।
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ॥८७
लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥ ८८
महानखो महारोमा महाकेशो महाजटः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ॥ ८९
स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥ ९०
गण्डली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥९१
यजुःपादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥९२
उपकारः प्रियः सर्वः कनकः काञ्चनच्छविः ।
नाभिर्नन्दिकरो भावः पुष्करस्थपतिः स्थिरः॥९३
द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥ ९४
सगणो गणकारश्च भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥ ९५
लोकपालस्तथा लोको महात्मा सर्वपूजितः ।
शुक्लस्त्रिशुक्लः संपन्नः शुचिर्भूतनिषेवितः ॥ ९६
आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः ।
विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चलः॥९७
कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः ।
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः॥९८
परश्वधायुधो देव अनुकारी सुबान्धवः ।
तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः ॥ ९९
उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ।
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः॥१००
बन्धनो बन्धकर्ता च सुबन्धनविमोचनः ।
स यज्ञारिः स कामारिर्महादंष्ट्रो महायुधः॥१०१
बहुधा निन्दितः शर्वः शंकरः शंकरोऽधनः ।
अमरेशो महादेवो विश्वदेवः सुरारिहा ॥ १०२
अहिर्बुध्न्योऽनिलाभश्च चेकितानो हविस्तथा ।
अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः १०३
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥
प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
उषङ्गुश्च विधाता च मांधाता भूतभावनः ॥१०५
विभुर्वर्णविभावी च सर्वकामगुणावहः ।

पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥ १०६
बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ॥ १०७
सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः ।
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित् ॥ १०८
कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥ १०९
वणिजो वर्धकी वृक्षो बकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः ॥ ११०
सिद्धार्थकारी सिद्धार्थश्छदो व्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥ १११
प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः ।
सारङ्गो नवचक्राङ्गः केतुमाली सभावनः ॥ ११२
भूतालयो भूतपतिरहोरात्रमनिन्दितः ॥ ११३
वाहिता सर्वभूतानां निलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ॥ ११४
धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधिपः ।
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः ॥ ११५
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रियः ॥ ११६
गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः ।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः ॥ ११७
महाकेतुर्महाधातुर्नैकसानुचरश्चलः ।
आवेदनीय आदेशः सर्वगन्धसुखावहः ॥ ११८
तोरणस्तारणो वातः परिधी पतिखेचरः ।
संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिकः ११९
नित्य आत्मसहायश्च देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च देवो दिवि सुपर्वणः ॥ १२०
आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ॥ १२१
शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च सर्वयोगी महाबलः ॥ १२२
समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ॥ १२३

रत्नप्रभूतो रत्नाङ्गो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ॥
आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥ १२५
युगरूपो महारूपो महानागहनो वधः ।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः ॥ १२६
बहुमालो महामालः शशी हरसुलोचनः ।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः ॥ १२७
त्रिलोचनो विषण्णाङ्गो मणिविद्धो जटाधरः ।
बिन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः ॥ १२८
निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम् १२९
मन्थानो बहुलो वायुः सकलः सर्वलोचनः ।
तलस्तालः करस्थाली ऊर्ध्वसंहननो महान् १३०
छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः क्रमः ।
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ॥
हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ॥ १३२
सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः १३३
ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ १३४
गभस्तिर्ब्रह्मकृद्ब्रह्मी ब्रह्मविद्ब्राह्मणो गतिः ।
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयंभुवः ॥ १३५
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥ १३६
कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत् ।
उमापतिरुमाकान्तो जाह्नवीधृगुमाधवः ॥ १३७
वरो वराहो वरदो वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥ १३८
पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ॥ १३९
चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो विवस्वान्सविताऽमृतः १४०

व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः ।
ऋतुः संवत्सरो मासः पक्षः सङ्ख्यासमापनः॥१४१
कला काष्ठा लवा मात्रा मुहूर्ताहःक्षपाः क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्तु निर्गमः ॥१४२
सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ १४३
निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ १४४
देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगणाश्रयः ॥ १४५
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ॥ १४६
देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽत्मसंभवः ॥१४७
उद्भिन्त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ॥१४८
विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः१४९
गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः ।
शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः ॥१५०
अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥ १५१
स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः॥
व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः ।
विमुक्तो मुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत् १५३
यथा प्रधानं भगवानिति भक्त्या स्तुतो मया ।
यन्न ब्रह्मादयो देवा विदुस्तत्त्वेन नर्षयः ।
स्तोतव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम् ॥
भक्तिं त्वेवं पुरस्कृत्य मया यज्ञपतिर्विभुः ।
ततोऽभ्यनुज्ञां संप्राप्य स्तुतो मतिमतां वरः १५५
शिवमेभिः स्तुवन्देवं नामभिः पुष्टिवर्धनैः ।
नित्ययुक्तः शुचिर्भक्तः प्राप्नोत्यात्मानमात्मना ॥
एतद्धि परमं ब्रह्म परं ब्रह्माधिगच्छति ॥ १५७
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम् ॥ १५८
स्तूयमानो महादेवस्तुष्यते नियतात्मभिः ।
भक्तानुकम्पी भगवानात्मसंस्थाकरो विभुः॥१५९
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः ॥
भक्त्या ह्यनन्यमीशानं परं देवं सनातनम् ।
कर्मणा मनसा वाचा भावेनामिततेजसः ॥१६१
शयाना जाग्रमाणाश्च व्रजन्नुपविशंस्तथा ।
उन्मिषन्निमिषंश्चैव चिन्तयन्तः पुनःपुनः ॥१६२
शृण्वन्तः श्रावयन्तश्च कथयन्तश्च ते भवम् ।
स्तुवन्तः स्तूयमानाश्च तुष्यन्ति च रमन्ति च१६३
जन्मकोटिसहस्रेषु नानासंसारयोनिषु ।
जन्तोर्विगतपापस्य भवे भक्तिः प्रजायते ॥ १६४
उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः ।
भाविनः कारणे चास्य सर्वयुक्तस्य सर्वथा ॥१६५
एतद्देवेषु दुष्प्रापं मनुष्येषु न लभ्यते ।
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी १६६
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ।
येन यान्ति परां सिद्धिं तद्भागवतचेतसः ॥१६७
ये सर्वभावानुगताः प्रपद्यन्ते महेश्वरम् ।
प्रपन्नवत्सलो देवः संसारात्तान्समुद्धरेत् ॥ १६८
एवमन्ये विकुर्वन्ति देवाः संसारमोचनम् ।
मनुष्याणामृते देवं नान्या शक्तिस्तपोबलम् १६९
इति तेनेन्द्रकल्पेन भगवान्सदसत्पतिः ।
कृत्तिवासाः स्तुतः कृष्ण तण्डिना शुभबुद्धिना ॥
स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ।
गीयते च स बुद्ध्येत ब्रह्मा शंकरसन्निधौ ॥१७१
इदं पुण्यं पवित्रं च सर्वदा पापनाशनम् ।
योगदं मोक्षदं चैव स्वर्गदं तोषदं तथा ॥ १७२
एवमेतत्पठन्ते य एकभक्त्या तु शंकरम् ।
या गतिः साङ्ख्ययोगानां व्रजन्त्येतां गतिं तदा ॥
स्तवमेतं प्रयत्नेन सदा रुद्रस्य सन्निधौ ।
अब्दमेकं चरेद्भक्तः प्राप्नुयादीप्सितं फलम् ॥ १७४
एतद्रहस्यं परमं ब्रह्मणो हृदि संस्थितम् ।

ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे॥१७५
मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तण्डिमागमत् ।
महता तपसा प्राप्तस्तण्डिना ब्रह्मसद्मनि ॥ १७६
तण्डिः प्रोवाच शुक्राय गौतमाय च भार्गवः ।
वैवस्वताय मनवे गौतमः प्राह माधव ॥ १७७
नारायणाय साध्याय समाधिष्ठाय धीमते ।
यमाय प्राह भगवान्साध्यो नारायणोच्युतः १७८
नाचिकेताय भगवानाह वैवस्वतो यमः ।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत १७९
मार्कण्डेयान्मय प्राप्तो नियमेन जनार्दन ।
तवाप्यहममित्रघ्न स्तवं दद्यां ह्यविश्रुतम् ॥ १८०
स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन संमितम् ।
नास्य विघ्नं विकुर्वन्ति दानवा यक्षराक्षसाः ॥१८१
पिशाचा यातुधाना वा गुह्यका भुजगा अपि ।
यः पठेत शुचिः पार्थ ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् ॥१८२

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

वैशंपायनेन जनमेजयंप्रति द्वैपायनादिभिर्युधिष्ठिरंप्रत्युक्तमहादेवमहिमानुवादः ॥ १ ॥

वैशंपायन उवाच ।
महायोगी तु तं प्राह कृष्णद्वैपायनो मुनिः ।
पठस्व पुत्र भद्रं ते प्रीयतां ते महेश्वरः ॥ १
पुरा पुत्र मया मेरौ तप्यता परमं तपः ।
पुत्रहेतोर्महाराज स्तव एषोऽनुकीर्तितः ॥ २
लब्धवानीप्सितं काममहं वै पाण्डुनन्दन ।
तथा त्वमपि शर्वाद्धि सर्वान्कामानवाप्स्यसि ॥३
कपिलश्च ततः प्राह साङ्ख्यर्षिर्देवसंमतः ।
मया जन्मान्यनेकानि भक्त्या चाराधितो भवः ।
प्रीतश्च भगवाञ्ज्ञानं ददौ मम भवान्तकम् ॥ ४
चारुशीर्षस्ततः प्राह शक्रस्य दयितः सखा ।
आलम्बायन इत्येवं विश्रुतः करुणात्मकः ॥ ५
मया गोकर्णमासाद्य तपस्तप्त्वा शतं समाः ।
अयोनिजानां दान्तानां धर्मज्ञानां सुवर्चसाम् ॥६
अजराणामदुःखानां शतवर्षसहस्रिणाम् ।
लब्धं पुत्र शतं शर्वात्पुरा पाण्डुनृपात्मज ॥ ७
वाल्मीकिश्चाह भगवान्युधिष्ठिरमिदं वचः ।
विवादे साग्निमुनिभिर्ब्रह्मघ्नो वै भवानिति ॥ ८
उक्तः क्षणेन चाविष्टस्तेनाधर्मेण भारत ।
सोऽहमीशानमनघममोघं शरणं गतः ॥ ९
मुक्तश्चास्मि ततः पापैस्ततो दुःखविनाशनः ।
आह मां त्रिपुरघ्नो वै यशस्तेऽग्र्यं भविष्यति ॥१०
जामदग्न्यश्च कौन्तेयमिदं धर्मभृतांवरः ।
ऋषिमध्ये स्थितः प्राह ज्वलन्निव दिवाकरः॥११
पितृविप्रवधेनाहमार्तो वै पाण्डवाग्रज ।
शुचिर्भूत्वा महादेवं गतोस्मि शरणं नृप ॥ १२
नामभिश्चास्तुवं देवं ततस्तुष्टोऽभवद्भवः ।
परशुं च ततो देवो दिव्यान्यस्त्राणि चैव मे॥१३
पापं च ते न भविता अजेयश्च भविष्यसि ।
न ते प्रभविता मृत्युरजरश्च भविष्यसि ॥ १४
आह मां भगवानेवं शिखण्डी शिवविग्रहः ।
तदवाप्तं च मे सर्वं प्रसादात्तस्य धीमतः ॥ १५
विश्वामित्रस्तदोवाच क्षत्रियोऽहं तदाऽभवम् ।
ब्राह्मणोऽहं भवानीति मया चाराधितो भवः ।
तत्प्रसादान्मया प्राप्तं ब्राह्मण्यं दुर्लभं महत् ॥१६
असितो देवलश्चैव प्राह पाण्डुसुतं नृपम् ॥ १७

पठस्व स्तवमिति शेषः । हे पुत्र युधिष्ठिर ॥ १ ॥ आलम्बायन आलम्बगोत्रः । चतुःशीर्ष इति ट. थ. पाठः ॥ ५ ॥ हे पुत्र शतं पुत्राणामिति शेषः ॥ ७ ॥ विवादे वेदविपरीतवादे । अग्निसहितैर्मुनिभिरुक्त इति संबन्धः ॥ ८ ॥ तेन वेदविरोधजेन ॥ ९ ॥ पितृतुल्या विप्रा ज्येष्ठो भ्राता पितुः सम इतिस्मृतेर्ज्येष्ठा भ्रातरस्तेषां वधेन । स तु विप्रवधेनेति ट. थ. पाठः ॥ १२ ॥ शिखण्डी कपर्दी । शिवविग्रहः कल्याणशरीरः ॥ १५ ॥

शापाच्छक्रस्य कौन्तेय विभो धर्मोऽनशत्तदा ।
तन्मे धर्मं यशश्चाग्र्यमायुश्चैवाददत्प्रभुः ॥ १८
ऋषिर्गृत्समदो नाम शक्रस्य दयितः सखा ।
प्राहाजमीढं भगवान्बृहस्पतिसमद्युतिः ॥ १९
वरिष्ठो नाम भगवांश्चाक्षुषस्य मनोः सुतः ।
शतक्रतोरचिन्त्यस्य सत्रे वर्षसहस्रिके ॥ २०
वर्तमानेऽब्रवीद्वाक्यं साम्नि ह्युच्चारिते मया ।
रथन्तरे द्विजश्रेष्ठ न सम्यगिति वर्तते ॥ २१
समीक्षस्व पुनर्बुद्ध्या पापं त्यक्त्वा द्विजोत्तम ।
अयज्ञवाहिनं पापमकार्षीस्त्वं सुदुर्मते ॥ २२
एवमुक्त्वा महाक्रोधः प्राह शंभुं पुनर्वचः ।
प्रज्ञया रहितो दुःखी नित्यभीतो वनेचरः ॥२३
दशवर्षसहस्राणि दशाष्टौ च शतानि च ।
नष्टपानीयपवने मृगैरन्यैश्च वर्जिते ॥ २४
अयज्ञीयद्रुमे देशे रुरुसिंहनिषेविते ।
भविता त्वं मृगः क्रूरो महादुःखसमन्वितः ॥२५
तस्य वाक्यस्य निधने पार्थ जातो ह्यहं मृगः ।
ततो मां शरणं प्राप्तं प्राह योगी महेश्वरः ॥ २६
अजरश्चामरश्चैव भविता दुखवर्जितः ।
साम्यं ममास्तु ते सौख्यं युवयोर्वर्धतां क्रतुः॥२७
अनुग्रहानेवमेष करोति भगवान्विभुः ।
अयं धाता विधाता च सुखदुःखे च सर्वदा ॥२८
अचिन्त्य एष भगवान्कर्मणा मनसा गिरा ।
न मे तात युधिश्रेष्ठ विद्यया पण्डितः समः॥२९
वासुदेवस्तदोवाच पुनर्मतिमतांवरः ।
सुवर्णाक्षो महादेवस्तपसा तोषितो मया ॥ ३०
ततोऽथ भगवानाह प्रीतो मा वै युधिष्ठिर ।
अर्थात्प्रियतरः कृष्ण मत्प्रसादाद्भविष्यसि ॥३१
अपराजितश्च युद्धेषु तेजश्चैवानलोपमम् ।
एवं सहस्रशश्चान्यान्महादेवो वरं ददौ ॥ ३२

प्रभुः प्रार्थितः सन्निति शेषः ॥ १८ ॥ उच्चारिते अन्यथेति शेषः ॥ २१ ॥ पापं वितथाभिनिवेशं त्यक्त्वा समीक्षस्व विचारय । अयज्ञवाहिनं न यज्ञं वहति तं पापमवाक्षरपाठजमपराधम् ॥ २२ ॥ निधने अन्ते सद्य एवेत्यर्थः ॥ २६ ॥ साम्यमवैषम्यम् । युवयोर्गृत्समदशतक्रत्वोः ॥ २७॥

मणिमन्थेऽथ शैले वै पुरा संपूजितो मया ।
वर्षायुतसहस्राणां सहस्रं शतमेव च ॥ ३३
ततो मां भगवान्प्रीत इदं वचनमब्रवीत् ।
वरं वृणीष्व भद्रं ते यस्ते मनसि वर्तते ॥ ३४
ततः प्रणम्य शिरसा इदं वचनमब्रवम् ।
यदि प्रीतो महादेवो भक्त्या परमया प्रभुः ॥३५
नित्यकालं तवेशान भक्तिर्भवतु मे स्थिरा ।
एवमस्त्विति भगवांस्तत्रोक्त्वान्तरधीयत ॥ ३६
जैगीषव्य उवाच ।
ममाष्टगुणमैश्वर्यं दत्तं भगवता पुरा ।
यत्नेनान्येन बलिना वाराणस्यां युधिष्ठिर ॥ ३७
गर्ग उवाच ।
चतुःषष्ट्यङ्गमददत्कलाज्ञानं ममाद्भुतम् ।
सरस्वत्यास्तटे तुष्टो मनोयज्ञेन पाण्डव ॥ ३८
तुल्यं मम सहस्रं तु सुतानां ब्रह्मवादिनाम् ।
आयुश्चैव सपुत्रस्य संवत्सरशतायुतम् ॥ ३९
पराशर उवाच ।
प्रसाद्येह पुरा शर्वं मनसाऽचिन्तयं नृप ।
महातपा महातेजा महायोगी महायशाः ॥ ४०
वेदव्यासः श्रियावासो ब्राह्मणः करुणान्वितः ।
अप्यसावीप्सितः पुत्रो मम स्याद्वै महेश्वरात् ४१
इति मत्वा हृदि मतं प्राह मां सुरसत्तमः ।
मयि संभावना यास्याः फलात्कृष्णो भविष्यति॥
सावर्णस्य मनोः सर्गे सप्तर्षिश्च भविष्यति ।
वेदानां च स वै वक्ता कुरुवंशकरस्तथा ॥ ४३
इतिहासस्य कर्ता च पुत्रस्ते जगतो हितः ।
भविष्यति महेन्द्रस्य दयितः स महामुनिः ॥ ४४
अजरश्चामरश्चैव पराशर सुतस्तव ।
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत ।
युधिष्ठिर महायोगी वीर्यवानक्षयोऽव्ययः ॥ ४५

अर्थः सर्वस्मात्प्रियस्ततोऽपि प्रियोऽन्तरात्मा तत्तुल्यः सर्वेषां भविष्यसीत्यर्थः ॥ ३१ ॥ पूरा पूर्वावतारे ॥ ३३ ॥ या तव मयि संभावना एतस्मात्फलमहं प्राप्स्ये इति अस्याः फलात् पुण्यात्तव कृष्णोनाम पुत्रो भविष्यति ॥ ४२ ॥

माण्डव्य उवाच ।

अचोरश्चोरशङ्कायां शूले भिन्नो ह्यहं तदा ॥ ४६
तत्रस्थेन स्तुतो देवः प्राह मां वै नरेश्वर ।
मोक्षं प्राप्स्यसि शूलाच्च जीविष्यसि समार्बुदम् ४७
रुजा शूलकृता चैव न ते विप्र भविष्यति ।
आधिभिर्व्याधिभिश्चैव वर्जितस्त्वं भविष्यसि ४८
पादाच्चतुर्थात्संभूत आत्मा यस्मान्मुने तव ।
त्वं भविष्यस्यनुपमो जन्म वै सफलं कुरु ॥ ४९
तीर्थाभिषेकं सकलं त्वमविघ्नेन चाप्स्यसि ।
स्वर्गं चैवाक्षयं विप्र विदधामि तवोर्जितम् ॥५०
एवमुक्त्वा तु भगवान्वरेण्यो वृषवाहनः ।
महेश्वरो महाराजः कृत्तिवासा महाद्युतिः ।
सगणो दैवतश्रेष्ठस्तत्रैवान्तरधीयत ॥ ५१

गालव उवाच ।

विश्वामित्राभ्यनुज्ञातो ह्यहं पितरमागतः ।
अब्रवीन्मां ततो माता दुःखिता रुदती भृशम् ॥५२
कौशिकेनाभ्यनुज्ञातं पुत्रं देवविभूषितम् ।
न तात तरुणं दान्तं पिता त्वां पश्यतेऽनघ ॥५३
श्रुत्वा जनन्या वचनं निराशो गुरुदर्शने ।
नियतात्मा महादेवमपश्यं सोऽब्रवीच्च माम् ॥५४
पिता माता च ते त्वं च पुत्र मृत्युविवर्जिताः ।
भविष्यथ विश क्षिप्रं द्रष्टासि पितरं क्षये ॥ ५५
अनुज्ञातो भगवता गृहं गत्वा युधिष्ठिर ।
अपश्यं पितरं तात इष्टिं कृत्वा विनिःसृतम् ।
उपस्पृश्य गृहीत्वेध्मं कुशांश्च शरणाकुरून् ॥ ५६
तान्विसृज्य च मां प्राह पिता सास्राविलेक्षणः ।
प्रणमन्तं परिष्वज्य मूर्ध्न्युपाघ्राय पाण्डव ॥ ५७
दिष्ट्या दृष्टोसि मे पुत्र कृतविद्य इहागत ॥ ५८

वैशंपायन उवाच ।

एतान्यत्यद्भुतान्येव कर्माण्यथ महात्मनः ।
प्रोक्तानि मुनिभिः श्रुत्वा विस्मयामास पाण्डवः ॥
ततः कृष्णोऽब्रवीद्वाक्यं पुनर्मतिमतांवरः ।
युधिष्ठिरं धर्मनिधिं पुरुहूतमिवेश्वरः ॥ ६०
उपमन्युर्मयि प्राह तपन्निव दिवाकरः ।
अशुभैः पापकर्माणो ये नराः कलुषीकृताः ॥६१
ईशानं न प्रपद्यन्ते तमोराजसवृत्तयः ॥ ६२
ईश्वरं संप्रपद्यन्ते द्विजा भावितभावनाः ॥ ६३
सर्वथा वर्तमानोपि यो भक्तः परमेश्वरे ।
सदृशोऽरण्यवासीनां मुनीनां भावितात्मनाम् ६४
ब्रह्मत्वं केशवत्वं वा शक्रत्वं वा सुरैः सह ।
त्रैलोक्यस्याधिपत्यं वा तुष्टो रुद्रः प्रयच्छति ६५
मनसाऽपि शिवं तात ये प्रपद्यन्ति मानवाः ।
विधूय सर्वपापानि देवैः सह वसन्ति ते ॥ ६६
भित्त्वाभित्त्वा च कूलानि हुत्वा सर्वमिदं जगत् ।
जयेद्देवं विरूपाक्षं न स पापेन लिप्यते ॥ ६७
सर्वलक्षणहीनोपि युक्तो वा सर्वपातकैः ।
सर्वं तुदति तत्पापं भावयञ्शिवमात्मना ॥ ६८
कीटपक्षिपतङ्गानां तिरश्चामपि केशव ।
महादेवप्रपन्नानां न भयं विद्यते क्वचित् ॥ ६९
एवमेव महादेवं भक्ता ये मानवा भुवि ।
न ते संसारवशगा इति मे निश्चिता मतिः ।
ततः कृष्णोऽब्रवीद्वाक्यं धर्मपुत्रं युधिष्ठिरम् ॥७०

विष्णुरुवाच ।

आदित्यचन्द्रावनिलानलौ च
द्यौर्भूमिरापो वसवोऽथ विश्वे ।
धाताऽर्यमा शुक्रबृहस्पती च
रुद्राः ससाध्या वरुणोऽथ गोपः ॥ ७१
ब्रह्मा शक्रो मारुतो ब्रह्म सत्यं
वेदा यज्ञा दक्षिणा वेदवाहाः ।

पादाच्चतुर्थात् । तपः शौचं दया सत्यमिति चत्वारो धर्मस्य पादास्तेषां चतुर्थात्सत्यादेव तवात्मा शरीरम् ॥ ४९ ॥ पितरं द्रक्ष्ये इति बुद्ध्या गृहमागतः । दुःखिता वैधव्यदुःखेन ॥ ५२ ॥ क्षये गृहे । विश प्रविश ॥ ५५ ॥ शरणाकुरून् वाय्वाघातेन वा स्वयं वा पक्वतया फलानामधः पतनेन विशरणं शरणा तत्प्रधानाः कुरवोऽन्नानि शरणाकुरवस्तान् । शॄ विशरणेऽस्माद्भावे ल्युः ॥ ५६ ॥ सास्रत्वादाविले ईक्षणे यस्य ॥ ५७ ॥ ईश्वरो विष्णुः ॥ ६० ॥ कूलानि गृहतटाकादीनि ॥ ६७ ॥ आत्मना चित्तेन ॥ ६८ ॥ आदित्यचन्द्रावित्यादिसर्वं सर्वाज्ज्ञातं विद्धीति सप्तमस्थेनान्वयः ॥ ७१ ॥

सोमो यष्टा यच्च हव्यं हविश्च
रक्षा दीक्षा संयमा ये च केचित् ॥ ७२
स्वाहा वौषट् ब्राह्मणाः सौरभेयी
धर्मं चाग्र्यं कालचक्रं बलं च ।
यशो दमो बुद्धिमतां स्थितिश्च
शुभाशुभं ये मुनयश्च सप्त ॥ ७३
अग्र्या बुद्धिर्मनसा दर्शने च
स्पर्शश्चाग्र्यः कर्मणां या च सिद्धिः ।
गणा देवानामूष्मपाः सोमपाश्च
लेखाः सुयामास्तुषिता ब्रह्मकायाः ॥ ७४
आभासुरा गन्धपा धूमपाश्च
वाचा विरुद्धाश्च मनोविरुद्धाः ।
शुद्धाश्च निर्माणरताश्च देवाः
स्पर्शाशना दर्शपा आज्यपाश्च ॥ ७५
चिन्त्यद्योता ये च देवेषु मुख्या
ये चाप्यन्ये देवताश्चाजमीढ ।
सुपर्णगन्धर्वपिशाचदानवा
यक्षास्तथा चारणपन्नगाश्च ॥ ७६
स्थूलं सूक्ष्मं मृदु चाप्यसूक्ष्मं
दुःखं सुखं दुःखमनन्तरं च ।
साङ्ख्यं योगं तत्पराणां परं च
शर्वाज्जातं विद्धि यत्कीर्तितं मे ॥ ७७
तत्संभूता भूतकृतो वरेण्याः
सर्वे देवा भुवनस्यास्य गोपाः ।
आविश्येमां धरणीं येऽभ्यरक्षन्
पुरातनीं तस्य देवस्य सृष्टिम् ॥ ७८
विचिन्वन्तस्तपसा तत्स्थवीयः
किंचित्तत्त्वं प्राणहेतोर्नतोस्मि ।
ददातु वेदः स वरानिहेष्टा-
नभिष्टुतो नः प्रभुरव्ययः सदा ॥ ७९
इमं स्तवं सन्नियतेन्द्रियश्च
भूत्वा शुचिर्यः पुरुषः पठेत ।
अभग्नयोगो नियतो मासमेकं
संप्राप्नुयादश्वमेधे फलं यत् ॥ ८०
वेदान्कृत्स्नान्ब्राह्मणः प्राप्नुयात्तु
जयेन्नृपः पार्थ महीं च कृत्स्नाम् ।
वैश्यो लाभं प्राप्नुयान्नैपुणं च
शूद्रो गतिं प्रेत्य तथा सुखं च ॥ ८१
स्तवराजमिमं कृत्वा रुद्राय दधिरे मनः ।
सर्वदोषापहं पुण्यं पवित्रं च यशस्विनः ॥ ८२
यावन्त्यस्य शरीरेषु रोमकूपाणि भारत ।
तावन्त्यब्दसहस्राणि स्वर्गे वसति मानवः ॥ ८३

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

पञ्चाशोऽध्यायः ॥ ५० ॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीस्वभावप्रदर्शनाय दृष्टान्ततयाऽष्टावक्रोपाख्यानकथनारम्भः ॥ १ ॥ अष्टावक्रेण भार्यार्थाय वदान्यंप्रति कन्यायाचनम् ॥ २ ॥ तथा वदान्यनियोगादुत्तरदिगन्तगमनम् ॥ ३ ॥ तथोत्तरदिगभिमानिन्या जरतीरूपधारिण्या संवादः ॥ ४ ॥

युधिष्ठिर उवाच ।
यदिदं सहधर्मेति प्रोच्यते भरतर्षभ ।
पाणिग्रहणकाले तु स्त्रीणामेतत्कथं स्मृतम् ॥ १
आर्ष एष भवेद्धर्मः प्राजापत्योऽथवाऽसुरः ।
यदेतत्सहधर्मेति पूर्वमुक्तं महर्षिभिः ॥ २
संदेहः सुमहानेष विरुद्ध इति मे मतिः ।
इह यः सहधर्मो वै प्रेत्यायं विहितः क्व नु ॥ ३
स्वर्गो मृतानां भवति सहधर्मः पितामह ।

उपनिषत् । प्राधान्यात्पृथक्कीर्तनम् । वेदवाहा वेदपाठकाः॥७२ वाचाविरुद्धाः वाङ्नियमनशीलाः । निर्माणं अनेकधाभवनं योगेनानेकशरीरधारणं तत्र रताः ॥ ७५ ॥ चिन्त्यद्योताः संकल्पितमात्रं वस्तु येषां सद्यः पुरतः प्रकाशते तादृशाः ॥ ७७ ॥ एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

सहोभौ चरतां धर्मं क्षौमे वसानौ जायापती अग्निमादधीयातामिति धर्मपत्नीसाहित्यं शास्त्रे दृश्यमानमाक्षिपति यदिदमिति । पाणग्रहणात्प्राक्साहित्याभावात्सहोभाविति वाक्यं व्याकुप्येतेति भावः ॥ १ ॥ इहैव साहित्यं दंपत्योर्दृश्यते परलोके तयोः साहित्यं क्व नु । न क्वापीत्यर्थः ॥ ३ ॥

पूर्वमेकस्तु म्रियते क्वचैकस्तिष्ठते वद ॥ ४
नानाधर्मफलोपेता नानाकर्मनिवासिताः ।
नानानिरयनिष्ठान्ता मानुषा बहवो यदा ॥ ५
अनृताः स्त्रिय इत्येवं सूत्रकारो व्यवस्यति ।
यदाऽनृताः स्त्रियस्तात सहधर्मः कुतः स्मृतः ॥६
अनृताः स्त्रिय इत्येवं वेदेष्वपि हि पठ्यते ।
धर्मो यः पूर्विको दृष्ट उपचारः क्रियाविधिः ॥ ७
गह्वरं प्रतिभात्येतन्मम चिन्तयतोऽनिशम् ।
निःसंदेहमिदं सर्वं पितामह यथाश्रुति ॥ ८
यदेतद्यादृशं चैतद्यथा चैतत्प्रवर्तितम् ।
निखिलेन महाप्राज्ञ भवानेतद्ब्रवीतु मे ॥ ९
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अष्टावक्रस्य संवादं दिशया सह भारत ॥ १०
निर्वेष्टुकामस्तु पुरा अष्टावक्रो महातपाः ।
ऋषेरथ वदान्यस्य वव्रे कन्यां महात्मनः ॥ ११
सुप्रभां नाम वै नाम्ना रूपेणाप्रतिमां भुवि ।
गुणप्रभावशीलेन चारित्रेण च शोभनाम् ॥ १२
सा तस्यर्षेर्मनो दृष्ट्वा जहार शुभलोचना ।
वनराजी यथा चित्रा वसन्ते कुसुमाश्रिता ॥१३
ऋषिस्तमाह देया मे सुता तुभ्यं हि तच्छृणु १४
'अनन्यस्त्रीजनः प्राज्ञो ह्यप्रवासी प्रियंवदः ।
सुरूपः संमतो वीरः शीलवान्भोगभुक्छुचिः ॥१५
दारानुमतयज्ञश्च सुनक्षत्रामथोद्वहेत् ।
सभृत्यः स्वजनोपेत इह प्रेत्य च मोदते ॥ १६
गच्छ तावद्दिशं पुण्यामुत्तरां द्रक्ष्यसे ततः ॥ १७
अष्टावक्र उवाच ।
किं द्रष्टव्यं मया तत्र वक्तुमर्हति मे भवान् ।
तथेदानीं मया कार्यं यथा वक्ष्यति मां भवान् ॥१८
वदान्य उवाच ।
धनदं समतिक्रम्य हिमवन्तं च पर्वतम् ।
रुद्रस्यायतनं दृष्ट्वा सिद्धचारणसेवितम् ॥ १९
संहृष्टैः पार्षदैर्जुष्टं नृत्यद्भिर्विविधाननैः ।
दिव्याङ्गरागैः पैशाचैरन्यैर्नानाविधैः प्रभोः ॥२०
पाणितालसुतालैश्च शंपातालैः समैस्तथा ।
संप्रहृष्टैः प्रनृत्यद्भिः शर्वस्तत्र निषेव्यते ॥ २१
इष्टं किल गिरौ स्थानं तद्दिव्यमिति शुश्रुम ।
नित्यं संनिहितो देवस्तथा ते पार्षदाः स्मृताः॥२२
तत्र देव्या तपस्तप्तं शंकरार्थं सुदुश्चरम् ।
अतस्तदिष्टं देवस्य तथोमाया इति श्रुतिः ॥ २३
पूर्वे तत्र महापार्श्वे देवस्योत्तरतस्तथा ॥
ऋतवः कालरात्रिश्च ये दिव्या ये च मानुषाः॥२४
देवं चोपासते सर्वे रूपिणः किल तत्र ह ।
तदतिक्रम्य भवनं त्वया यातव्यमेव हि ॥ २५
ततो नीलं वनोद्देशं द्रक्ष्यसे मेघसन्निभम् ।
रमणीयं मनोग्राहि तत्र वै द्रक्ष्यसे स्त्रियम् ॥२६
तपस्विनीं महाभागां वृद्धां दीक्षामनुष्ठिताम् ।
द्रष्टव्या सा त्वया तत्र संपूज्या चैव यत्नतः ॥२७
तां दृष्ट्वा विनिवृत्तस्त्वं ततः पाणिं ग्रहीष्यसि ।
यद्येष समयः सर्वः साध्यतां तत्र गम्यताम् ॥२८
अष्टावक्र उवाच ।
तथाऽस्तु साधयिष्यामि तत्र यास्याम्यसंशयम् ।
यत्र त्वं वदसे साधो भवान्भवतु सत्यवाक् ॥ २९
भीष्म उवाच ।
ततोऽगच्छत्स भगवानुत्तरामुत्तरां दिशम् ।
हिमवन्तं गिरिश्रेष्ठं सिद्धचारणसेवितम् ॥ ३०
स गत्वा द्विजशार्दूलो हिमवन्तं महागिरिम् ।
अभ्यगच्छन्नदीं पुण्यां बाहुदां पुण्यदायिनीम् ३१
अशोके विमले तीर्थे स्नात्वा वै तर्प्य देवताः ।
तत्र वासाय शयने कौशे सुखमुवास ह ॥ ३२
ततो रात्र्यां व्यतीतायां प्रातरुत्थाय स द्विजः ।
स्नात्वा प्रादुश्चकाराग्निं हुत्वा चैवं विधानतः ॥३३

सूत्रकारो धर्मप्रवक्ता। अनृतं साहसं माया मूर्खत्वमतिलोभतेति स्त्रीधर्मानाह ॥ ६ ॥ गह्वरं गहनं दुर्बोधमित्यर्थः ॥ ८ ॥ दिशया दिगभिमानिदेवतया ॥ १० ॥ निर्वेष्टुकामः दारसंग्रहार्थी ॥ ११ ॥ तालैः कांस्यमयैर्वाद्यभाण्डैः । शंपातालैः विद्युद्वदतिचपलैर्भ्रमणादिघटितैः गीतनृत्यक्रियामानविशेषैः । समैर्भ्रमणादिरहितैस्तैरेव ॥ २१ ॥ महापार्श्वे पर्वते । ततः कोपो महान्पार्श्वे इति ट. थ. पाठः । ततः कालो महान्पार्श्वे इति ध. पाठः ॥ २४ ॥ उत्तरां श्रेष्ठाम् ॥ ३० ॥

रुद्राणीकूपमासाद्य ह्रदे तत्र समाश्वसत् ।
विश्रान्तश्च समुत्थाय कैलासमभितो ययौ ॥३४
सोऽपश्यत्काञ्चनद्वारं दीप्यमानमिव श्रिया ।
मन्दाकिनीं च नलिनीं धनदस्य महात्मनः ॥३५
अथ ते राक्षसाः सर्वे येऽभिरक्षन्ति पद्मिनीम् ।
प्रत्युत्थिता भगवन्तं माणिभद्रपुरोगमाः ॥ ३६
स तान्प्रत्यर्चयामास राक्षसान्भीमविक्रमान् ।
निवेदयत मां क्षिप्रं धनदायेति चाब्रवीत् ॥ ३७
ते राक्षसास्तथा राजन्भगवन्तमथाब्रुवन् ।
असौ वैश्रवणो राजा स्वयमायाति तेऽन्तिकम्३८
विदितो भगवानस्य कार्यमागमनस्य यत् ।
पश्यैनं त्वं महाभागं ज्वलन्तमिव तेजसा ॥ ३९
ततो वैश्रवणोऽभ्येत्य अष्टावक्रमनिन्दितम् ।
विधिवत्कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत् ॥ ४०
सुखं प्राप्तो भवान्कच्चित्किंवा मत्तश्चिकीर्षति ।
ब्रूहि सर्वं करिष्यामि यन्मां वक्ष्यसि वै द्विज ४१
भवनं प्रविश त्वं मे यथाकामं द्विजोत्तम ।
सत्कृतः कृतकार्यश्च भवान्यास्यत्यविघ्नतः ॥ ४२
प्राविशद्भवनं स्वं वै गृहीत्वा तं द्विजोत्तमम् ।
आसनं स्वं ददौ चैव पाद्यमर्घ्यं तथैव च ॥ ४३
अथोपविष्टयोस्तत्र माणिभद्रपुरोगमाः ।
निषेदुस्तत्र कौबेरा यक्षगन्धर्वकिन्नराः ॥ ४४
ततस्तेषां निषण्णानां धनदो वाक्यमब्रवीत् ।
भवच्छन्दं समाज्ञाय नृत्येरन्नप्सरोगणाः ॥ ४५
आतिथ्यं परमं कार्यं शुश्रूषा भवतस्तथा ।
संवर्ततामित्युवाच मुनिर्मधुरया गिरा ॥ ४६
यथोर्वरा मिश्रकेशी रम्भा चैवोर्वशी तथा ।
अलम्बुसा घृताची च चित्रा चित्राङ्गदा रुचिः ॥
मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ।
विद्युता प्रशमी दान्ता विद्योता रतिरेव च ॥४८
एताश्चान्याश्च वै बह्वयः प्रनृत्ताप्सरसः शुभाः ।
अवादयंश्च गन्धर्वा वाद्यानि विविधानि च ॥४९
अथ प्रवृत्ते गान्धर्वे दिव्ये ऋषिरुपाविशत् ।
दिव्यं संवत्सरं तत्रारमतैष महातपाः ॥ ५०
ततो वैश्रवणो राजा भगवन्तमुवाच ह ।
साग्रः संवत्सरो यातो विप्रेह तव पश्यतः ॥५१
हार्योऽयं विषयो ब्रह्मन्गान्धर्वो नाम नामतः ।
छन्दतो वर्ततां विप्र यथा वदति वा भवान् ५२
अतिथिः पूजनीयस्त्वमिदं च भवतो गृहम् ।
सर्वमाज्ञाप्यतामाशु परवन्तो वयं त्वयि ॥ ५३
अथ वैश्रवणं प्रीतो भगवान्प्रत्यभाषत ।
अर्चितोस्मि यथान्यायं गमिष्यामि धनेश्वर ॥ ५४
प्रीतोस्मि सदृशं चैव तव सर्वं धनाधिप ।
तव प्रसादाद्भगवन्महर्षेश्च महात्मनः ।
नियोगादद्य यास्यामि वृद्धिमानृद्धिमान्भव ॥५५
अथ निष्क्रम्य भगवान्प्रययावुत्तरामुखः ।
'कैलासे शंकरावासमभिवीक्ष्य प्रणम्य च ॥ ५६
गौरीशं शंकरं दान्तं शरणागतवत्सलम् ।
गङ्गाधरं गोपतिनं गणावृतमकल्मषम् ॥' ५७
कैलासं मन्दरं हैमं सर्वाननुचचार ह ।
तानतीत्य महाशैलान्कैरातं स्थानमुत्तमम् ॥ ५८
प्रदक्षिणं तथा चक्रे प्रयतः शिरसा नतः ।
धरणीमवतीर्याथ पूतात्माऽसौ तदाऽभवत् ॥५९
स तं प्रदक्षिणं कृत्वा निर्यातश्चोत्तरामुखः ।
समेन भूमिभागेन ययौ प्रीतिपुरस्कृतः ॥ ६०
ततोऽपरं वनोद्देशं रमणीयमपश्यत ।
सर्वर्तुभिर्मूलफलैः पक्षिभिश्च समन्वितैः ।
रमणीयैर्वनोद्देशैस्तत्रतत्र विभूषितम् ॥ ६१
तत्राश्रमपदं दिव्यं ददर्श भगवानथ ॥ ६२
शैलांश्च विविधाकारान्काञ्चनान्रत्नभूषितान् ।
मणिभूमौ निविष्टाश्च पुष्करिण्यस्तथैव च ॥ ६३
अन्यान्यपि सुरम्याणि ददर्श सुबहून्यथ ।

भवच्छन्दं भवदिच्छाम् ॥ ४५ ॥ हार्यः हरतीति हार्यः ॥५२॥ भगवान् अष्टावक्रः ॥ ५४ ॥ वृद्धिरुपचयस्तद्वान् । ऋद्धिः संपत् तद्वान् ॥ ५५ ॥ कैरातं किरातवेषधारिणो महादेवस्य संबन्धि ॥ ५८ ॥ धरणीमवतीर्येत्यनेनाकाशमार्गेणाष्टावक्रो गच्छतीति गम्यते ॥ ५९ ॥

भृशं तस्य मनो रेमे महर्षेर्भावितात्मनः ॥ ६४
स तत्र काञ्चनं दिव्यं सर्वरत्नमयं गृहम् ।
ददर्शाद्भुतसंकाशं धनदस्य गृहाद्वरम् ॥ ६५
महान्तो यत्र विविधा मणिकाञ्चनपर्वताः ।
विमानानि च रम्याणि रत्नानि विविधानि च ६६
मन्दारपुष्पैः संकीर्णा तथा मन्दाकिनीं नदीम् ।
स्वयंप्रभाश्च मणयो वज्रैर्भूमिश्च भूषिता ॥ ६७
नानाविधैश्च भवनैर्विचित्रमणितोरणैः ।
मुक्ताजालविनिक्षिप्तैर्मणिरत्नविभूषितैः ॥ ६८
मनोदृष्टिहरै रम्यैः सर्वतः संवृतं शुभैः ।
ऋषिभिश्चावृतं तत्र आश्रमं तं मनोहरम् ॥ ६९
ततस्तस्याभवच्चिन्ता कुत्र वासो भवेदिति ।
अथ द्वारं समभितो गत्वा स्थित्वा ततोऽब्रवीत् ॥
अतिथिं समनुप्राप्तमभिजानन्तु येऽत्र वै ॥ ७१
अथ कन्याः परिवृता गृहात्तस्माद्विनिर्गताः ।
नानारूपाः सप्त विभो कन्याः सर्वा मनोहराः ७२
यांयामपश्यत्कन्यां वै सासा तस्य मनोऽहरत् ।
न च शक्तो वारयितुं मनोऽस्याथावसीदति ।
ततो धृतिः समुत्पन्ना तस्य विप्रस्य धीमतः ७३
अथ तं प्रमदाः प्राहुर्भगवान्प्रविशत्विति ।
स च तासां सुरूपेण तस्यैव भवनस्य च ।
कौतूहलं समाविष्टः प्रविवेश गृहं द्विजः ॥ ७४
तत्रापश्यज्जरायुक्तामरजोम्बरधारिणीम् ।
वृद्धां पर्यङ्कमासीनां सर्वाभरणभूषिताम् ॥ ७५
स्वस्तीति तेन चैवोक्ता सा स्त्री प्रत्यवदत्तदा ।
प्रत्युत्थाय च तं विप्रमास्यतामित्युवाच ह ॥७६

अष्टावक्र उवाच ।

सर्वाः स्वानालयान्यान्तु एका मामुपतिष्ठतु ।
प्रज्ञाता या प्रशान्ता या शेषा गच्छन्तु च्छन्दतः॥
ततः प्रदक्षिणीकृत्य कन्यास्तास्तमृषिं तदा ।
निश्चक्रमुर्गृहात्तस्मात्सा वृद्धाऽथ व्यतिष्ठत ।
'तया संपूजितस्तत्र शयने चापि निर्मले ॥' ७८
अथ तां संविशन्प्राह शयने भास्वरे तदा ।
त्वयाऽपि सुप्यतां भद्रे रजनी ह्यतिवर्तते ॥ ७९
संलापात्तेन विप्रेण तथा सा तत्र भाषिता ।
द्वितीये शयने दिव्ये संविवेश महाप्रभे ॥ ८०
अथ सा वेपमानाङ्गी निमित्तं शीतजं तदा ।
व्यपदिश्य महर्षेर्वै शयनं व्यवरोहत ॥ ८१
स्वागतेनागतां तां तु भगवानभ्यभाषत ।
सा जुगूह भुजाभ्यां तु ऋषिं प्रीत्या नरर्षभ ॥८२
निर्विकारमृषिं चापि काष्ठकुड्योपमं तदा ।
दुःखिता प्रेक्ष्य संजल्पमकार्षीदृषिणा सह ॥८३
ब्रह्मन्नकामकरोस्ति स्त्रीणां पुरुषतो धृतिः ।
कामेन मोहिता चाहं त्वां भजन्तीं भजस्व माम्८४
प्रहृष्टो भव विप्रर्षे समागच्छ मया सह ।
उपगूह च मां विप्र कामार्ताऽहं भृशं त्वयि ॥ ८५
एतद्धि तव धर्मात्मंस्तपसः पूज्यते फलम् ।
प्रार्थितं दर्शनादेव भजमानां भजस्व माम् ॥८६
सद्म चेदं धनं सर्वं यच्चान्यदपि पश्यसि ।
प्रभुस्त्वं भव सर्वत्र मयि चैव न संशयः ॥ ८७
सर्वान्कामान्विधास्यामि रमस्व सहितो मया ।
रमणीये वने विप्र सर्वकामफलप्रदे ॥ ८८
त्वद्वशाऽहं भविष्यामि रंस्यसे च मया सह ।
सर्वान्कामानुपाश्नीमो ये दिव्या ये च मानुषाः८९
नातः परं हि नारीणां विद्यते च कदाचन ।
यथा पुरुषसंसर्गः परमेतद्धि नः फलम् ॥ ९०
आत्मच्छन्देन वर्तन्ते नार्यो मन्मथचोदिताः ।
न च दह्यन्ति गच्छन्त्यः सुतप्तैरपि पांसुभिः ॥९१

अष्टावक्र उवाच ।

परदारानहं भद्रे न गच्छेयं कथंचन ।
दूषितं धर्मशास्त्रज्ञैः परदाराभिमर्शनम् ॥ ९२
'शुद्धक्षेत्रे ब्रह्महत्याप्रायश्चित्तमथोच्यते ।

सप्त इतरदिग्देवताः ॥ ७२ ॥ उत्तराधिष्ठात्री तु देवता मुख्याऽष्टमी सैव जरायुक्ता ॥ ७५ ॥ प्रज्ञाता अत्यन्तं ज्ञानवती । प्रशान्ता निर्जितचित्ता ॥ ७७ ॥ जुगूह आलिङ्गितवती ॥ ८२ ॥ ब्रह्मन्नकामतोऽन्यास्तीति झ. पाठः । तत्र अकामतोऽनिच्छातः स्वभावत इत्यर्थः । पुरुषतः पुरुषं प्राप्य स्त्रीणां धृतिर्धैर्यमन्या परकीयास्ति । पुंयोगे स्त्रीणां धृतिः स्वकीया सर्वथा नास्तीत्यर्थः ॥ ८४ ॥ प्रहृष्टः कामुको भव । उपगूह आलिङ्गस्व ॥ ८५ ॥

पुनश्च पातकं दृष्टं विप्रक्षेत्रे विशेषतः ॥' ९३
भद्रे निर्वेष्टुकामोऽहं तत्रावकिरणं मम ।
'प्रायश्चित्तं महदतो दारग्रहणपूर्वकम् ॥ ९४
बीजं न शुद्ध्यते वोढुरन्यथा कृतनिष्कृतेः ।
मातृतः पितृतः शुद्धो ज्ञेयः पुत्रो यथार्थतः ॥'९५
विषयेष्वनभिज्ञोऽहं धर्मार्थं किल संततिः ।
एवं लोकान्गमिष्यामि पुत्रैरिति न संशयः ॥९६
भद्रे धर्मं विजानीहि ज्ञात्वा चोपरमस्व ह ॥९७
स्त्र्युवाच ।
नानिलोऽग्निर्न वरुणो न चान्ये त्रिदशा द्विज ।
प्रियाः स्त्रीणां यथा कामो रतिशीला हि योषितः॥
सहस्रे किल नारीणां प्राप्येतैका कदाचन ।
तथा शतसहस्रेषु यदि काचित्पतिव्रता ॥ ९९
नैता जानन्ति पितरं न कुलं न च मातरम् ।
न भ्रातॄन्न च भर्तारं न च पुत्रान्न देवरान् ॥ १००
लीलायन्त्यः कुलं घ्नन्ति कूलानीव सरिद्वराः ।
दोषान्सर्वांश्च मत्वाऽऽशु प्रजापतिरभाषत ॥१०१
भीष्म उवाच ।
ततः स ऋषिरेकाग्रस्तां स्त्रियं प्रत्यभाषत ।
आस्यतां रुचितश्छन्दः किंच कार्यं ब्रवीहि मे१०२
सा स्त्री प्रोवाच भगवन्द्रक्ष्यसे देशकालतः ।
वस तावन्महाभाग कृतकृत्यो भविष्यसि ॥१०३
ब्रह्मर्षिस्तामथोवाच स तथेति युधिष्ठिर ।
वत्स्येऽहं यावदुत्साहो भवत्या नात्र संशयः॥१०४
अथर्षिरभिसंप्रेक्ष्य स्त्रियं तां जरयाऽर्दिताम् ।
चिन्तां परमिकां भेजे संतप्त इव चाभवत् ॥१०५
यद्यदङ्गं हि सोऽपश्यत्तस्या विप्रर्षभस्तदा ।
नारमत्तत्रतत्रास्य दृष्टी रूपविरागिता ॥ १०६
देवतेयं गृहस्यास्य शापात्किंनु विरूपिता ।
अस्याश्च कारणं वेत्तुं न युक्तं सहसा मया ॥ १०७
इति चिन्ताविषक्तस्य तमर्थं ज्ञातुमिच्छतः ।
व्यगमद्रात्रिशेषः स मनसा व्याकुलेन तु ॥ १०८
अथ सा स्त्री तथोवाच भगवन्पश्य वै रवेः ।
रूपं सन्ध्याभ्रसंरक्तं किमुपस्थाप्यतां तव ॥१०९
स उवाच ततस्तां स्त्रीं स्नानोदकमिहानय ।
उपासिष्ये ततः सन्ध्यां वाग्यतो नियतेन्द्रियः ॥

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥

एकपञ्चाशोऽध्यायः ॥ ५१ ॥

उत्तरदिगभिमानिदेवतया परदारत्वशङ्कया स्वभोगमनङ्गीकुर्वाणमष्टावक्रंप्रति जरतीरूपत्यागेन कन्यारूपस्वीकरणपूर्वकं स्वपाणिग्रहणप्रार्थना ॥ १ ॥

भीष्म उवाच ।
अथ सा स्त्री तमुवाच विप्रमेवं भवत्विति ।
तैलं दिव्यमुपादाय स्नानशाटीमुपानयत् ॥ १
अनुज्ञाता च मुनिना सा स्त्री तेन महात्मना ।
अथास्य तैलेनाङ्गानि सर्वाण्येवाभ्यमृक्षत ॥ २
शनैश्चाच्छादितस्तत्र स्नानशालामुपागमत् ।
भद्रासनं ततश्चित्रमृषिरन्वगमन्नवम् ॥ ३
अथोपविष्टश्च यदा तस्मिन्भद्रासने तदा ।
स्नापयामास शनकैस्तमृषिं सुखहस्तवत् ।
दिव्यं च विधिवच्चक्रे सोपचारं मुनेस्तदा ॥ ४

अनभिज्ञोऽप्रीतिमान् ॥ ९६ ॥ लीलायन्त्यः लीलां रतिमात्मन इच्छन्त्यः । दोषांश्च मन्दान्मन्दासुः प्रजापतिरभाषत इति ध. पाठः ॥ १०१ ॥ एकाग्रः स्त्रीदोषाननुसंदधानः स्त्रियंप्रति आस्यतां तूष्णीं स्थीयताम् । रुचितः रुचिं प्राप्य छन्दः इच्छा भवतीति अभाषत । त्वं रुचिज्ञा मामिच्छसि अहं त्वरुचिज्ञो न त्वां स्प्रष्टुमिच्छामीति भावः । एवमपि यत्कार्यं कर्तव्यं तव तन्मे ब्रवीहि ॥ १०२ ॥ द्रक्ष्यसे स्पर्शसुखं ज्ञायसे ॥ १०३ ॥ रूपे विरागिता वैराग्यवती दृष्टिर्नारमत् न रेमे ॥ १०६ ॥ व्यगच्छत्तदहःशेष इति झ. पाठः ॥ १०८ ॥ पञ्चाशोऽध्यायः ॥ ५० ॥

अभ्यमृक्षत अभ्यञ्जितवती ॥ २ ॥ शनैश्चोत्सादित इति ङ. झ. पाठः । तत्र उत्सादितः चालितः ॥ ३ ॥

जलेन सुसुखोष्णेन तस्या हस्तसुखेन च ।
व्यतीतां रजनीं कृत्स्नां नाजानात्स महाव्रतः॥५
तत उत्थाय स मुनिस्तदा परमविस्मितः ।
पूर्वस्यां दिशि सूर्यं च सोऽपश्यदुदितं दिवि ॥ ६
'सन्ध्योपासनमित्येव सर्वपापहरं न मे ।'
तस्य बुद्धिरियं किंतु मोहस्तत्त्वमिदं भवेत् ॥ ७
अथोपास्य सहस्रांशुं किं करोमीत्युवाच ताम् ।
सा चामृतरसप्रख्यं ऋषेरन्नमुपाहरत् ॥ ८
तस्य स्वादुतयाऽन्नस्य न प्रभूतं चकार सः ।
व्यगमच्चाप्यहःशेषं ततः सन्ध्याऽऽगमत्पुनः ॥९
अथ सा स्त्री भगवन्तं सुप्यतामित्यचोदयत् ।
तत्र वै शयने दिव्ये तस्य तस्याश्च कल्पिते ॥१०
[पृथक्चैव तथा सुप्तौ सा स्त्री स च मुनिस्तदा ।
तथाऽर्धरात्रे सा स्त्री तु शयनं तदुपागमत् ॥]११
अष्टावक्र उवाच ।
न भद्रे परदारेषु मनो मे संप्रसज्जति ।
उत्तिष्ठ भद्रे भद्रं ते स्वापं वै विरमस्व च ॥ १२
भीष्म उवाच ।
सा तदा तेन विप्रेण तथा धृत्या निवर्तिता ।
स्वतन्त्राऽस्मीत्युवाचर्षिं न धर्मच्छलमस्ति ते ॥१३
अष्टावक्र उवाच ।
नास्ति स्वतन्त्रता स्त्रीणामस्वतन्त्रा हि योषितः ।
प्रजापतिमतं ह्येतन्न स्त्री स्वातन्त्र्यमर्हति ॥ १४
स्त्र्युवाच ।
बाधते मैथुनं विप्र मम भक्तिं च पश्य वै ।
अधर्मं प्राप्स्यसे विप्र यन्मां त्वं नाभिनन्दसि १५
अष्टावक्र उवाच ।
हरन्ति दोषजातानि नरमिन्द्रियकिंकरम् ।
प्रभवामि सदा धृत्या भद्रे स्वशयनं व्रज ॥ १६
स्त्र्युवाच ।
शिरसा प्रणमे विप्र प्रसादं कर्तुमर्हसि ।
भूमौ निपतमानायाः शरणं भव मेऽनघ ॥ १७
यदि वा दोषजातं त्वं परदारेषु पश्यसि ।
आत्मानं स्पर्शयाम्यद्य पाणिं गृह्णीष्व मे द्विज ॥
न दोषो भविता चैव सत्येनैतद्ब्रवीम्यहम् ।
स्वतन्त्रां मां विजानीहि यो धर्मः सोस्तु वै मयि ।
त्वय्यावेशितचित्ता च स्वतन्त्राऽस्मि भजस्व माम्॥
अष्टावक्र उवाच ।
स्वतन्त्रा त्वं कथं भद्रे ब्रूहि कारणमत्र वै ।
नास्ति त्रिलोके स्त्री काचिद्या वै स्वातन्त्र्यमर्हति२०
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ।
'न वृद्धामक्षतां मन्ये न चेच्छा त्वयि मेऽनघे२१'
स्त्र्युवाच ।
कौमारं ब्रह्मचर्यं मे कन्यैवास्मि न संशयः ।
पत्नीं कुरुष्व मां विप्र श्रद्धां विजहि मा मम २२
अष्टावक्र उवाच ।
यथा मम तथा तुभ्यं यथा तुभ्यं तथा मम ।
जिज्ञासेयमृषेस्तस्य विघ्नः सत्यं नु किं भवेत् २३
आश्चर्यं परमं हीदं किंतु श्रेयो हि मे भवेत् ।
दिव्याभरणवस्त्रा हि कन्येयं मामुपस्थिता ॥ २४
किं त्वस्याः परमं रूपं जीर्णमासीत्कथं पुनः ।
कन्यारूपमिहाद्यैवं किमिवात्रोत्तरं भवेत् ॥ २५

नाजानात् न ज्ञातवान् ॥५॥ न प्रभूतं चकार पूर्णमिति नाभ्यवददित्यर्थः ॥ ९ ॥ स्वयं वै विरमस्व चेति झ. पाठः ॥ १२ ॥ स्वातन्त्र्यान्मम । न तव पारदार्यदोषोऽस्तीत्यर्थः । धर्मच्छलं परपुरुषप्रलोभनम् । नाधर्मफलमस्ति ते इति ध. पाठः ॥ १३ ॥ नास्मीति अप्रदत्तां त्वां न कामये इत्यर्थः ॥ १४ ॥ स्पर्शयामि ददामि ॥ १८ ॥ स्वतन्त्रामात्मप्रदाने इति शेषः । यो धर्मः पाणिग्रहणादिसंस्कारो मयि मन्निमित्तं सोस्तु ॥ १९ ॥

विजहि मा मा नाशय ॥ २२ ॥ तुभ्यं तव । संगमश्रद्धेत्युभयत्र शेषः । किं तस्य मया कन्यार्थिना प्रार्थितस्य तत्कर्तृका इयं जिज्ञासा मम परीक्षा किमयं साधुरसाधुर्वेति ॥ २३ ॥ विघ्नत्वमेवाह आश्चर्यमिति । पूर्वमतिजीर्णत्वेन दृष्टा पुनः कन्येव दृश्यत इति मायारूपमाश्चर्यम् ॥ २४ ॥ अत्रास्मिन्विषये किमुत्तरं श्रेष्ठतरम् । पूर्वपरिगृहीतस्यात्यागः उत एतस्याः स्वीकारः कर्तव्य इति भावः ॥ २५ ॥

यथा मे परमा शक्तिर्न व्युत्थाने कथंचन । न रोचते हि व्युत्थानं सत्येनासादयाम्यहम् ॥२६

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

उत्तरदिगभिमानिदेवतया स्वीयप्रार्थनायाः स्त्रीचापलप्रदर्शनाद्यर्थकत्वकथनपूर्वकमष्टावक्रस्य धर्मोपदेशेन स्वगृहंप्रति प्रेषणम् ॥ १ ॥ अष्टावक्रेण वदान्यकन्यापाणिग्रहणेन स्वाश्रमे सुखनिवासः ॥ २ ॥

युधिष्ठिर उवाच ।
न बिभेति कथं सा स्त्री शापाच्च परमद्युतेः ।
कथं निवृत्तो भगवांस्तद्भवान्प्रब्रवीतु मे ॥ १
भीष्म उवाच ।
अष्टावक्रोऽन्वपृच्छत्तां रूपं विकुरुषे कथम् ।
न चानृतं ते वक्तव्यं ब्रूहि ब्राह्मणकाम्यया ॥ २
स्त्र्युवाच ।
द्यावापृथिव्योर्यत्रैषा काम्या ब्राह्मणसत्तम ।
शृणुष्वावहितः सर्वं यदिदं सत्यविक्रम ॥ ३
जिज्ञासेयं प्रयुक्ता मे स्थैर्यं कर्तुं तवानघ ।
अव्युत्थानेन ते लोका जिताः सत्यपराक्रम ॥४
उत्तरां मां दिशं विद्धि दृष्टं स्त्रीचापलं च ते ।
स्थविराणामपि स्त्रीणां बाधते मैथुनज्वरः ॥ ५
'अविश्वासो न व्यसनी नातिसक्तोऽप्रवासकः ।
विद्वान्सुशीलः पुरुषः सदारः सुखमश्नुते ॥' ६
तुष्टः पितामहस्तेऽद्य तथा देवाः सवासवाः ॥ ७
सत्वं येन च कार्येण संप्राप्तो भगवानिह ।
प्रेषितस्तेन विप्रेण कन्यापित्रा द्विजर्षभ ॥ ८
प्रेषितश्चोपदेशाय तच्च सर्वं श्रुतं त्वया ॥ ९
'नितान्तं स्त्री भोगपरा प्रियवादाप्रवासनात् ।
रक्ष्यते चाकुचेलाद्यैरप्रसङ्गानुवर्तनैः ॥ १०
अपर्वस्वनिषिद्धासु रात्रिष्वप्यनृतौ व्रजेत् ।
रात्रौ च नातिनियमो न वै ह्यनियमो भवेत् ॥' ११
क्षेमैर्गमिष्यसि गृहं श्रमश्च न भविष्यति ।
कन्यां प्राप्स्यसि तां विप्र पुत्रिणी च भविष्यति १२
काम्यया पृष्टवांस्त्वं मां ततो व्याहृतमुत्तरम् ।
अनतिक्रमणीया सा कृत्स्नैर्लोकैस्त्रिभिः सदा ॥१३
गच्छस्व कृतकृत्यस्त्वं किं वाऽन्यच्छ्रोतुमिच्छसि ।
यावद्ब्रवीमि विप्रर्षे अष्टावक्र यथातथम् ॥ १४
ऋषिणा प्रसादिता चास्मि तव हेतोर्द्विजर्षभ ।
तस्य संमाननार्थं मे त्वयि वाक्यं प्रभाषितम् ॥१५
भीष्म उवाच ।
श्रुत्वा तु वचनं तस्याः स विप्रः प्राञ्जलिः स्थितः ।
अनुज्ञातस्तया चापि स्वगृहं पुनराव्रजत् ॥ १६
गृहमागत्य विश्रान्तः स्वजनं परिपृच्छ्य च ।
अभ्यगच्छच्च तं विप्रं न्यायतः कुरुनन्दन ॥ १७
पृष्टश्च तेन विप्रेण दृष्टं त्वेतन्निदर्शनम् ।
प्राह विप्रं तदा विप्रः सुप्रीतेनान्तरात्मना ॥१८
भवताऽहमनुज्ञातः प्रस्थितो गन्धमादनम् ।
तस्य चोत्तरतो देशे दृष्टं मे दैवतं महत् ॥ १९
तया चाहमनुज्ञातो भवांश्चापि प्रकीर्तितः ।
श्रावितश्चापि तद्वाक्यं गृहं चाभ्यागतः प्रभो ॥२०
तमुवाच तदा विप्रः सुतां प्रतिगृहाण मे ।
नक्षत्रतिथिसंयोगे पात्रं हि परमं भवान् ॥ २१
भीष्म उवाच ।
अष्टावक्रस्तथेत्युक्त्वा प्रतिगृह्य च तां प्रभो ।
कन्यां परमधर्मात्मा प्रीतिमांश्चाभवत्तदा ॥ २२

न व्युत्थास्येऽस्याः स्वीकारं न करिष्ये । व्युत्थानं धर्मातिक्रमो मम न रोचते किंतु सत्येनासादयाम्यहं दारानिति शेषः । धृत्यैनां साधयाम्यहमिति ध. पाठः ॥ २६ ॥ एकपञ्चाशोऽध्यायः ॥ ५१ ॥

विकुरुषेऽन्यथान्यथा करोषि । ब्राह्मणकाम्यया ब्राह्मणमानलिप्सया ॥ २ ॥ द्यावापृथिव्योः दिवि पृथिव्यां च यत्र स्थीयते तत्र एषा काम्या स्त्रीपुंसयोः अन्योन्याभिलाषरूपा इच्छास्तीत्यर्थः ॥ ३ ॥ मे मया ॥ ४ ॥ तत्कार्यं ज्ञापयामीति शेषः ॥ ८ ॥ सा काम्याऽनतिक्रमणीया ॥ १३ ॥ ऋषिणा वदान्येन ॥ १५ ॥ द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

कन्यां तां प्रतिगृह्यैव भार्यां परमशोभनाम् । उवास मुदितस्तत्र स्वाश्रमे विगतज्वरः ॥ २३

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

भीष्मेण युधिष्ठिरंप्रति ऋष्यादीनां वियोनिजत्वेपि तपोविद्यादीनामेव माहात्म्यप्रयोजकत्वे निदर्शनतया तादृशानां संभवप्रकारादिकथनम् ॥ १ ॥

'[*]युधिष्ठिर उवाच ।
वैश्ययोन्यां समुत्पन्नाः शूद्रयोन्यां तथैव च ।
ब्रह्मर्षय इति प्रोक्ताः पुराणा द्विजसत्तमाः ॥ १
कथमेतन्महाराज तत्त्वं शंसितुमर्हसि ।
विरुद्धमिह पश्यामि वियोनौ ब्राह्मणो भवेत् ॥२
भीष्म उवाच ।
अलं कौतूहलेनात्र निबोध त्वं युधिष्ठिर ।
शुभेतरं शुभं वाऽपि न चिन्तयितुमर्हसि ॥ ३
ईशन्त्यात्मन इत्येते गतिश्चैषां न सज्जते ।
ब्रह्मभूयांस इत्येव ऋषयः श्रुतिचोदिताः ॥ ४
निन्द्या न चैते राजेन्द्र प्रमाणं हि प्रमाणिनाम् ।
लोकोऽनुमन्यते चैतान्प्रमाणं ह्यत्र वै तपः ॥ ५
एवं महात्मभिस्तात तपोज्ञानसमन्वितैः ।
प्रवर्तितानि कार्याणि प्रमाणान्येव सत्तम ॥ ६
भार्याश्चतस्रो राजेन्द्र ब्राह्मणस्य स्वधर्मतः ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च भरतर्षभ ॥ ७
राज्ञां तु क्षत्रिया वैश्या शूद्रा च भरतर्षभ ।
वैश्यस्य वैश्या विहिता शूद्रा च भरतर्षभ ॥ ८
शूद्रस्यैका स्मृता भार्या प्रतिलोमे तु संकरः ।
शूद्रायास्तु नरश्रेष्ठ चत्वारः पतयः स्मृताः ॥ ९
वर्णोत्तमायास्तु पतिः सवर्णस्त्वेक एव सः ।
द्वौ क्षत्रियाया विहितौ ब्राह्मणः क्षत्रियस्तथा १०
वैश्यायास्तु नरश्रेष्ठ विहिताः पतयस्त्रयः ।
सवर्णः क्षत्रियश्चैव ब्राह्मणश्च विशांपते ॥ ११
एवंविधिमनुस्मृत्य ततस्ते ऋषिभिः पुरा ।
उत्पादिता महात्मानः पुत्रा ब्रह्मर्षयः पुरा ॥ १२
पुराणाभ्यामृषिभ्यां तु मित्रेण वरुणेन च ।
वसिष्ठोऽथ तथाऽगस्त्यो बर्हिषव्यस्तथैव च ॥१३
कक्षीवानार्ष्टिषेणश्च पुरुषः कष एव च ।
मामतेयस्य वै पुत्रा गौतमश्चात्मजाः स्मृताः १४
वत्सप्रियश्च भगवान्स्थूलरश्मिस्तथाक्षणिः ।
गौतमस्यैव तनया ये दास्यां जनिता ह्युत ॥ १५
कपिञ्जलादो ब्रह्मर्षिश्चाण्डाल्यामुदपद्यत ।
वैनतेयस्तथा पक्षी तुर्यायां च वसिष्ठतः ॥ १६
प्रसादाच्च वसिष्ठस्य शुक्राभ्युपगमेन च ।
अदृश्यन्त्याः पिता वैश्यो नाम्ना चित्रमुखः पुरा ।
ब्राह्मणत्वमनुप्राप्तो ब्रह्मर्षित्वं च कौरव ॥ १७
वैश्यश्चित्रमुखः कन्यां वसिष्ठतनयस्य वै ।
शुभां प्रादाद्यतो जातो ब्रह्मर्षिस्तु पराशरः ॥ १८
तथैव दाशकन्यायां सत्यवत्यां महानृषिः ।
पराशरात्प्रसूतश्च व्यासो योगमयो मुनिः ॥ १९
विभण्डकस्य मृग्यां च तपोयोगात्मको मुनिः ।
ऋश्यशृङ्गः समुत्पन्नो ब्रह्मचारी महायशाः ॥ २०
शार्ङ्ग्यां च मन्दपालस्य चत्वारो ब्रह्मवादिनः ।
जाता ब्रह्मर्षयः पुण्या यैः स्तुतो हव्यवाहनः ॥२१
द्रोणश्च स्तम्बमित्रश्च सारिसृकश्च बुद्धिमान् ।
जरितारिश्च विख्यातश्चत्वारः सूर्यसन्निभाः ॥ २२
महर्षेः कालवृक्षस्य शकुन्त्यामेव जज्ञिवान् ।
हिरण्यहस्तो भगवान्महर्षिः काञ्चनप्रभः ॥ २३
पावकात्तात संभूता मनसा च महर्षयः ।
पितामहस्य राजेन्द्र पुलस्त्यपुलहादयः ॥ २४
सावर्ण्यश्चापि राजर्षिः सवर्णायामजायत ।
मृण्मय्यां भरतश्रेष्ठ आदित्येन विवस्वता ॥ २५
शाण्डिल्यश्चाग्नितो जातः कश्यपस्याग्रजः प्रभुः ।

[*] एतदादिसमाध्याया दाक्षिणात्यकोशेष्वेव दृश्यन्ते ।

शरद्वतः शरस्तम्बात्कृपश्च कृपया सह ॥ २६
पश्चाच्च जज्ञे राजेन्द्र सोमपस्य महात्मनः ।
रेणुश्च रेणुका चैव राममाता यशस्विनी ॥ २७
यमुनायाः समुद्भूतः सोमकेन महात्मना ।
अर्कदन्तो महानृषिः प्रथितः पृथिवीतले ॥ २८
अग्नेराहवनीयाच्च द्रुपदस्येन्द्रवर्चसः ।
धृष्टद्युम्नश्च संभूतो वेद्यां कृष्णा च भारत ॥ २९
व्याघ्रयोन्यां ततो जाता वसिष्ठस्य महात्मनः ।
एकोनविंशतिः पुत्राः ख्याता व्याघ्रपदादयः ३०
मन्धश्च बादलोमश्च जाबालिश्च महानृषिः ।
मन्युश्चैवोपमन्युश्च सेतुकर्णस्तथैव च ।
एते चान्ये च विख्याताः पृथिव्यां गोत्रतां गताः॥
विश्वकाशस्य राजर्षेरैक्ष्वाकोस्तु महात्मनः ।
बालाश्वो नाम पुत्रोऽभूच्छिखां भित्त्वा विनिस्सृतः
मान्धाता चैव राजर्षिर्युवनाश्वेन धीमता ।
स्वयं धृतोऽथ गर्भेण दिव्यास्त्रबलसंयुतः ॥ ३३
गौरिकश्चापि राजर्षिश्चक्रवर्ती महायशाः ।
बाहुदायां समुत्पन्नो नद्यां राज्ञा सुबाहुना ॥ ३४
भूमेश्च पुत्रो नरकः संवर्तश्चैव पुष्कलः ।
अद्भिश्चैव महातेजा ऋषिर्गार्ग्योऽभ्यजायत ॥३५
एते चान्ये च बहवो राजन्या ब्राह्मणास्तथा ।
प्रभावेनाभिसंभूता महर्षीणां महात्मनाम् ।
नासाध्यं तपसा तेषां विद्ययाऽऽत्मगुणैः परैः॥३६
अस्मिन्नर्थे च मनुना गीतः श्लोको नराधिप ।
धर्मं प्रणयता राजंस्तं निबोध युधिष्ठिर ॥ ३७
ऋषीणां च नदीनां च साधूनां च महात्मनाम् ।
प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च ॥ ३८
तन्नात्र चिन्ता कर्तव्या महर्षीणां समुद्भवे ।
यथा सर्वगतो ह्यग्निस्तथा तेजो महात्मसु ॥' ३९

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

भीष्मेण युधिष्ठिरंप्रति युगचतुष्टयधर्मादिप्रतिपादकनारदमार्कण्डेयसंवादानुवादः ॥ १ ॥

'युधिष्ठिर उवाच ।
पुत्रैः कथं महाराज पुरुषस्तारितो भवेत् ।
यावन्न लब्धवान्पुत्रमफलः पुरुषो नृप ॥ १
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदेन पुरा गीतं मार्कण्डेयाय पृच्छते ॥ २
पर्वतं नारदं चैव असितं देवलं च तम् ।
आरुणेयं च रैभ्यं च एतानत्रागतान्पुरा ॥ ३
गङ्गायमुनयोर्मध्ये भोगवत्याः समागमे ।
दृष्ट्वा पूर्वं समासीनान्मार्कण्डेयोऽभ्यगच्छत ॥ ४
ऋषयस्तु मुनिं दृष्ट्वा समुत्थायोन्मुखाः स्थिताः ।
अर्चयित्वाऽर्हतो विप्रं किं कुर्म इति चाब्रुवन् ॥५
मार्कण्डेय उवाच ।
अयं समागमः सद्भिर्यत्नेनासादितो मया ।
अत्र प्राप्स्यामि धर्माणामाचारस्य च निश्चयम् ॥६
ऋजुः कृतयुगे धर्मस्तस्मिन्क्षीणे विमुह्यति ।
युगेयुगे महर्षिभ्यो धर्ममिच्छामि वेदितुम् ॥ ७
ऋषिभिर्नारदः प्रोक्तो ब्रूहि यत्रास्य संशयः ।
धर्माधर्मेषु तत्वज्ञ त्वं हि च्छेत्ता हि संशयान् ॥८
ऋषिभ्योऽनुमतं वाक्यं नियोगान्नारदस्तदा ।
सर्वधर्मार्थतत्वज्ञं मार्कण्डेयं ततोऽब्रवीत् ॥ ९
दीर्घायो तपसा दीप्त वेदवेदाङ्गतत्ववित् ।
यत्र ते संशयो ब्रह्मन्समुत्पन्नः स उच्यताम् ॥१०
धर्मं लोकोपकारं वा यच्चान्यच्छ्रोतुमिच्छसि ।
तदहं कथयिष्यामि ब्रूहि त्वं सुमहातपाः ॥ ११
मार्कण्डेय उवाच ।
युगेयुगे व्यतीतेऽस्मिन्धर्मसेतुः प्रणश्यति ।
कथं धर्मच्छलेनाहं प्राप्नुयामिति मे मतिः ॥ १२
नारद उवाच ।
आसीद्धर्मः पुरा विप्र चतुष्पादः कृते युगे ।

ततो ह्यधर्मः कालेन प्रसूतः किंचिदूनतः ॥ १३
ततस्त्रेतायुगं नाम प्रवृत्तं धर्मदूषणम् ॥ १४
तस्मिन्नतीते संप्राप्तं तृतीयं द्वापरं युगम् ।
तदा धर्मस्य द्वौ पादावधर्मौ नाशयिष्यति ॥१५
द्वापरे तु परिक्षीणे नन्दिके समुपस्थिते ।
लोकवृत्तं च धर्मं च उच्यमानं निबोध मे ॥१६
चतुर्थं नन्दिकं नाम धर्मः पादावशेषितः ।
ततः प्रभृति जायन्ते क्षीणप्रज्ञायुषो नराः ।
क्षीणप्राणधना लोके धर्माचारबहिष्कृताः ॥ १७
मार्कण्डेय उवाच ।
एवं विलुलिते धर्मे लोके चाधर्मसंयुते ।
चातुर्वर्ण्यस्य नियतं हव्यं कव्यं नियच्छति ॥१८
नारद उवाच ।
मन्त्रपूतं सदा हव्यं कव्यं चैव न नश्यति ।
प्रतिगृह्णन्ति तद्देवा दातुर्न्यायात्प्रयच्छतः ॥ १९
सत्वयुक्तं च दाता च सर्वान्कामानवाप्नुयात् ।
अवाप्तकामः स्वर्गे च महीयेत यथेप्सितम् ॥२०
मार्कण्डेय उवाच ।
चत्वारो ह्यथ ये वर्णा हव्यं कव्यं प्रदास्यति ।
मन्त्रहीनमपन्यायं तेषां दत्तं क्व गच्छति ॥ २१
नारद उवाच ।
असुरान्गच्छते दत्तं विप्रै रक्षांसि क्षत्रियैः ।
वैश्यैः प्रेतानि वै दत्तं शूद्रैर्भूतानि गच्छति ॥२२
मार्कण्डेय उवाच ।
अथ वर्णावरे जाताश्चातुर्वर्ण्योपदेशिनः ।
दास्यन्ति हव्यकव्यानि तेषां दत्तं क्व गच्छति२३
नारद उवाच ।
वर्णावराणां भूतानां हव्यकव्यप्रदातृणाम् ।
नैव देवा न पितरः प्रतिगृह्णन्ति तत्स्वयम् ॥२४
यातुधानाः पिशाचाश्च भूता ये चापि नैर्ऋताः ।
तेषां सा विहिता वृत्तिः पितृदैवतनिर्गताः ॥२५
तेषां सर्वप्रदातॄणां हव्यकव्यं समाहिताः ।
यत्प्रयच्छन्ति विधिवत्तद्वै भुञ्जन्ति देवताः ॥'२६

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

भीष्मेण युधिष्ठिरंप्रति कन्यानां प्रदानकालादिप्रतिपादकनारदमार्कण्डेयसंवादानुवादः ॥ १ ॥

'मार्कण्डेय उवाच ।
श्रुतं वर्णावरैर्दत्तं हव्यं कव्यं च नारद ।
संप्रयोगे च पुत्राणां कन्यानां च ब्रवीहि मे ॥१
नारद उवाच ।
कन्याप्रदानं पुत्राणां स्त्रीणां संयोगमेव च ।
आनुपूर्व्यान्मया सम्यगुच्यमानं निबोध मे ॥२
जातमात्रा तु दातव्या कन्यका सदृशे वरे ।
काले दत्तासु कन्यासु पिता धर्मेण युज्यते ॥ ३
यस्तु पुष्पवतीं कन्यां बान्धवो न प्रयच्छति ।
मासिमासि गते बन्धुस्तस्या भ्रौणहत्यमाप्नुते ॥ ४
यस्तु कन्यां गृहे रुन्ध्याद्ग्राम्यैर्भोगैर्विवर्जिताम् ।
अवध्यातः स कन्याया बन्धुः प्राप्नोति भ्रूणहाम् ५
दूषिता पाणिमात्रेण मृते भर्तरि दारिका ।
संस्कारं लभते नारी द्वितीये सा पुनः पतौ ॥ ६
पुनर्भूर्नाम सा कन्या सपुत्रा हव्यकव्यदा ।
अदूष्या सा प्रसूतीषु प्रजानां दारकर्मणि ॥ ७
मार्कण्डेय उवाच ।
या तु कन्या प्रसूयेत गर्भिणी या तु वा भवेत् ।
कथं दारक्रियां भूयः सा भवेदृषिसत्तम ॥ ८
नारद उवाच ।
तत्वार्थनिश्चितं शब्दं कन्यका नयतेऽग्नये ।
तस्मात्कुर्वन्ति वै भावं कुमार्यस्ता न कन्यकाः ९

नन्दिक इति कलियुगे प्रवर्तमानधर्मैकपादस्य नाम ॥ १६ ॥

चतुष्पञ्चाशोऽध्यायः ॥ ५४ ॥

ब्रह्महत्यात्रिभागेन गर्भाधानविशोधितः ।
गृह्णीयात्तां चतुर्भागविशुद्धां सर्जनात्पुनः ॥ १०
मार्कण्डेय उवाच ।
कथं कन्यासु ये जाता बन्धूनां दूषिताः सदा ।
कस्य ते हव्यकव्यानि प्रदास्यन्ति महामुने॥ ११
नारद उवाच ।
कन्यायास्तु पितुः पुत्राः कानीना हव्यकव्यदाः ।
अन्तर्वत्न्यास्तु यः पाणिं गृह्णीयात्स सहोढजः॥१२
मार्कण्डेय उवाच ।
अथ येनाहितो गर्भः कन्यायां तत्र नारद ।
कथं पुत्रफलं तस्य भवेदेतत्प्रचक्ष्व मे ॥ १३
नारद उवाच ।
धर्माचारेषु ते नित्यं दूषकाः कृतशोधनाः ।
बीजं च नश्यते तेषां मोघचेष्टा भवन्ति ते ॥ १४
मार्कण्डेय उवाच ।
अथ काचिद्भवेत्कन्या क्रीता दत्ता हृताऽपि वा ।
कथं पुत्रकृतं तस्यास्तद्भवेदृषिसत्तम ॥ १५
नारद उवाच ।
क्रीता दत्ता हृता चैव या कन्या पाणिवर्जिता ।
कौमारी नाम सा भार्या प्रसवेदौरसान्सुतान् ।
न पत्यर्थे शुभा प्रोक्ता तत्कर्मण्यपराजिते ॥ १६
मार्कण्डेय उवाच ।
केन मङ्गलकृत्येषु विनियुज्यन्ति कन्यकाः ।
एतदिच्छामि विज्ञातुं तत्वेनेह महामुने ॥ १७
नारद उवाच ।
नित्यं निवसते लक्ष्मीः कन्यकासु प्रतिष्ठिता ।
शोभना शुभयोग्या च पूज्या मङ्गलकर्मसु ॥१८
आकरस्थं यथा रत्नं सर्वकामफलोपगम् ।
तथा कन्या महालक्ष्मीः सर्वलोकस्य मङ्गलम्॥१९
एवं कन्या परा लक्ष्मी रतिस्तोषश्च देहिनाम् ।
महाकुलानां चारित्रवृत्तेन निकषोपलम् ॥ २०
आनयित्वा स्वकाद्वर्णात्कन्यकां यो भजेन्नरः ।
दातारं हव्यकव्यानां पुत्रकं या प्रसूयति ॥ २१
साध्वी कुलं वर्धयति साध्वी पुष्टिर्गृहे परा ।
साध्वी लक्ष्मी रतिः साक्षात्प्रतिष्ठा संततिस्तथा२२

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीणां भार्यात्वेन परिग्रहयोग्यताप्रतिपादकनारदमार्कण्डेयसंवादानुवादः ॥ १ ॥

'मार्कण्डेय उवाच ।
श्रुतं बहुविधं वृत्तं कन्यकानां महामते ।
इच्छामि योषितां श्रोतुं धर्माधर्मौ परिग्रहे ॥ १
नारद उवाच ।
अष्टौ भार्यागमा धर्म्या नराणां दारकर्मणि ।
प्रेत्येह च हिता यास्तु सपुत्रा हव्यकव्यदाः ॥ २
साध्वी पाणिगृहीता या कौमारी पाणिवर्जिता ।
भ्रातृभार्या स्वभार्येति प्रसूयेत्पुत्रमौरसम् ॥ ३
मार्कण्डेय उवाच ।
त्रयो भार्यागमा ज्ञेया यत्र धर्मो न नश्यति ।
पञ्चान्याः पश्चिमा ब्रूहि भार्यास्तासां च ये सुताः४
नारद उवाच ।
सगोत्रभार्या क्रीता च परभार्या च कारिता ।
गतागता च या भार्या आश्रमादाहृता च या॥५
एता भार्यागमाः पञ्च पुनर्भार्या भवन्ति याः ।
एता भार्या नृणां गम्यास्तत्पुत्रा हव्यकव्यदाः॥'६

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

चतुर्भागविशुद्धात्स्वजनात्पुनरिति ध. पाठः ॥ १० ॥ | पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

भीष्मेण युधिष्ठिरंप्रति सतीनामसतीनां गुणदोषप्रतिपादकनारदमार्कण्डेयसंवादानुवादः ॥ १ ॥

'मार्कण्डेय उवाच ।
श्रुता भार्याश्च पुत्राश्च विस्तरेण महामुने ।
आश्रमस्थाः कथं नार्यो न दुष्यन्तीति ब्रूहि भो ॥१
नारद उवाच ।
आश्रमस्थासु नारीषु बान्धवत्वं प्रणश्यति ।
नष्टवंश्या भवन्त्येता बन्धूनामथ भर्तृणाम् ॥ २
परदारा मुक्तदोषास्ता नार्योऽऽश्रमसंस्थिताः ।
स्वयमीशाः स्वदेहानां काम्यास्तद्गतमानसाः ॥३
एवं नार्यो न दुष्यन्ति नराणां तत्प्रसूतिषु ।
धर्मपत्न्यो भवन्त्येताः सपुत्रा हव्यकव्यदाः ॥४
मार्कण्डेय उवाच ।
परस्य भार्या या पूर्वं मृते भर्तरि या पुनः ।
अन्यं भजति भर्तारं ससुता असुता कथम् ॥ ५
नारद उवाच ।
असुता वा प्रसूता वा गृहस्थानां परस्त्रियः ।
परामृष्टेति ता वर्ज्या धर्माचारेषु दूषिताः ॥ ६
न चासां हव्यकव्यानि प्रतिगृह्णन्ति देवताः ।
यस्तासु जनयेत्पुत्रान्न तैः पुत्रमवाप्नुयात् ॥ ७
मार्कण्डेय उवाच ।
परक्षेत्रेषु यो बीजं चापलाद्विसृजेन्नरः ।
कथं पुत्रफलं तस्य भवेत्तदृषिसत्तम ॥ ८
नारद उवाच ।
अस्वामिके परक्षेत्रे यो नरो बीजमुत्सृजेत् ।
स्वयंवृतोऽऽश्रमस्थायां तद्बीजं न विनश्यति ॥ ९
परक्षेत्रेषु यो बीजं नरो दर्पात्समुत्सृजेत् ।
क्षेत्रिकस्यैव तद्बीजं न बीजी लभते फलम् ॥ १०
नातः परमधर्म्यं चाप्ययशस्यं तथोत्तरम् ।
गर्भादीनां च बहुभिस्ताश्च त्याज्याः समेष्वपि ११
मार्कण्डेय उवाच ।
अथ ये परदारेषु पुत्रा जायन्ति नारद ।
कस्य ते बन्धुदायादा भवन्ति परमद्युते ॥ १२
नारद उवाच ।
परदारेषु जायेते द्वौ पुत्रौ कुण्डगोलकौ ।
जीवत्यथ पतौ कुण्डो मृते भर्तरि गोलकः ॥१३
ते च जाताः परक्षेत्रे देहिनां प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयन्त्यथ दातृणाम् १४
पितुर्हि नरकायैते गोलकस्तु विशेषतः ।
चण्डालतुल्यौ तज्ज्ञौ हि परत्रेह च नश्यतः॥ १५
मार्कण्डेय उवाच ।
कस्य ते गर्हिताः पुत्राः पितॄणां हव्यकव्यदाः ।
यस्य क्षेत्रे प्रसूयन्ते यो वा ताञ्जनयेत्सुतान् १६
नारद उवाच ।
क्षेत्रिकश्चैव बीजी च द्वावेतौ निरयं गतौ ।
न रक्षति च यो दारान्परदारांश्च गच्छति ॥ १७
गर्हितास्ते नरा नित्यं धर्माचारबहिष्कृताः ।
कुण्डो भोक्ता च भोगी च कुत्सिताः पितृदैवतैः॥
मार्कण्डेय उवाच ।
तथैते गर्हिताः पुत्रा हव्यकव्यानि नारद ।
कस्य नित्यं प्रयच्छन्ति धर्मो वा तेषु किं फलं १९
नारद उवाच ।
यातुधानाः पिशाचाश्च प्रतिगृह्णन्ति तैर्हुतम् ।
हव्यं कव्यं च तैर्दत्तं ये च भूता निशाचराः॥२०
मार्कण्डेय उवाच ।
अथ ते राक्षसाः प्रीताः किं प्रयच्छन्ति दातृणाम् ।
किं वा धर्मफलं तेषां भवेत्तदृषिसत्तम ॥ २१
नारद उवाच ।
न दत्तं नश्यते किंचित्सर्वभूतेषु दातृणाम् ।
प्रेत्य चेह च तां पुष्टिमुपाश्नन्ति प्रदायिनः ॥२२
मार्कण्डेय उवाच ।
अथ गोलककुण्डाभ्यां संततिर्या भविष्यति ।
तयोर्ये बान्धवाः केचित्प्रदास्यन्ति कथं नु तं २३
नारद उवाच ।
साध्वीजाताः सुतास्तेषां तां वृत्तिमनुतिष्ठताम् ।
प्रीणन्ति पितृदैवत्यं हव्यकव्यसमाहिताः ॥ २४

॥ ३ ॥ सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

परमं मुक्तदोषास्ता या नार्योऽऽश्रमसंस्थिता इति ध. पाठः

एवं गोलककुण्डाभ्यां ये च वर्णापदेशिनः । हव्यं कव्यं च शुद्धानां प्रतिगृह्णन्ति देवताः ॥'२५

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीणामतिक्रमे प्रायश्चित्तादिप्रतिपादकनारदमार्कण्डेयसंवादानुवादः ॥ १ ॥

मार्कण्डेय उवाच ।
श्रुतं नराणां चापल्यं परस्त्रीषु प्रजायताम् ।
प्रमदानां तु चापल्ये दोषमिच्छामि वेदितुम् ॥१
नारद उवाच ।
एकवर्णे विदोषं तु गमनं पूर्वकालिकम् ।
धाता च समनुज्ञातो विष्णुना तत्तथाऽकरोत् ॥२
भगलिङ्गे महाप्राज्ञ पूर्वमेव प्रजापतिः ।
ससर्ज ताभ्यां संयोगमनुज्ञातश्चकार सः ॥ ३
अथ विष्णुप्रसादेन भगो दत्तवरः किल ।
तेन चैव प्रसादेन सर्वाँल्लोकानुपाश्नुते ॥ ४
तस्मात्तु पुरुषे दोषो ह्यधिको नात्र संशयः ।
विना गर्भं सवर्णेषु न त्याज्या गमनात्स्त्रियः ॥५
प्रायश्चित्तं यथान्यायं दण्डं कुर्यात्स पण्डितः ।
श्वभिर्वा दंशनं स्नानं सवनत्रितयं निशि ॥ ६
भूमौ च भस्मशयनं दानं भोगविवर्जितम् ।
दोषगौरवतः कालो द्रव्यगौरवमेव च ।
मर्यादा स्थापिता पूर्वमिति तीर्थान्तरं गते ॥ ७
तद्योषितां तु दीर्घायो नास्ति दोषो व्यतिक्रमे ।
भगतीर्थान्तरे शुद्धो विष्णोस्तु वचनादिह ॥ ८
रक्ष्याश्चैवान्यसंवादैरन्यगेहाद्विचक्षणैः ।
आसां शुद्धौ विशेषेण कर्मणां फलमश्नुते ॥ ९
नैता वाच्या न वै वध्या न क्लेश्याः शुभमिच्छता ।
विष्णुप्रसादादित्येव भगस्तीर्थान्तरं गतः ।
मासिमासि ऋतुस्तासां दुष्कृतान्यपकर्षति ॥ १०
स्त्रियस्तोषकस्त नृणां स्त्रियः पुष्टिप्रदाः सदा ।
पुत्रसेतुप्रतिष्ठाश्च स्त्रियो लोके महाद्युते ॥ ११

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीणामपरित्यागपरित्यागप्रयोजकगुणदोषादिप्रतिपादकनारदमार्कण्डेयसंवादानुवादः ॥ १ ॥

'मार्कण्डेय उवाच ।
श्रुतं बलं प्रभावश्च योषितां मुनिसत्तम ।
एकस्य बहुभार्यस्य धर्ममिच्छामि वेदितुम् ॥ १
नारद उवाच ।
बहुभार्यासु सक्तस्य नारीभोगेषु गेहिनः ।
ऋतौ विमुञ्चमानस्य सांनिध्ये भ्रूणहा स्मृतः ॥२
वृद्धां वन्ध्यां सुव्रतां च मृतापत्यामपुष्पिणीम् ।
कन्यां च बहुपुत्रां च वर्जयन्मुच्यते भयात् ॥ ३
व्याधितो बन्धनस्थो वा प्रवासेष्वथ पर्वसु ।
ऋतुकाले तु नारीणां भ्रूणहत्यां प्रमुञ्चति ॥ ४
मार्कण्डेय उवाच ।
वैश्यनारीषु वै जाताः परप्रेष्यासु वा सुताः ।
कस्य ते बन्धुदायादा भवन्ति हि महामुने ॥ ५
नारद उवाच ।
पण्यस्त्रीषु प्रसूता ये यस्य स्त्री तस्य ते सुताः ।
क्रयाच्च कृत्रिमाः पुत्राः प्रदानाच्चैव दत्रिमाः ॥ ६
मार्कण्डेय उवाच ।
पण्यनारीष्वनियतः पुंसोऽर्थो वर्तते ध्रुवम् ।
अत्र चाहितगर्भायाः कस्य पुत्रं वदन्ति तम् ॥७
नारद उवाच ।
तीर्थभूतासु नारीषु ज्ञायते योऽभिगच्छति ।
ऋतौ तस्य भवेद्गर्भो यं वा नारी न शङ्कते ॥ ८
मार्कण्डेय उवाच ।
नराणां त्यजतां भार्यां कामक्रोधाद्गुणान्विताम् ।

अप्रसूतां प्रसूतां वा तेषां पृच्छामि निष्कृतिम् ॥९
नारद उवाच ।
अपापां त्यजमानस्य साध्वीं मत्वा यमादितः ।
आत्मवंशस्वधर्मो वा त्यजतो निष्कृतिर्न तु॥१०
यो नरस्त्यजते भार्यां पुष्पिणीमप्रसूतिकाम् ।
स नष्टवंशः पितृभिर्युक्तस्त्यज्येत दैवतैः ॥ ११
भार्यामपत्यसंजातां प्रसूतां पुत्रपौत्रिणीम् ।
पुत्रदारपरित्यागी न स प्राप्नोति निष्कृतिम् ॥१२
एवं हि भार्यां त्यजतां नराणां नास्ति निष्कृतिः ।
नार्हन्ति प्रमदास्त्यक्तुं पुत्रपौत्रप्रतिष्ठिताः ॥ १३
मार्कण्डेय उवाच ।
कीदृशीं संत्यजन्भार्यां नरो दोषैर्न लिप्यते ।
एतदिच्छामि तत्वेन विज्ञातुमृषिसत्तम ॥ १४
नारद उवाच ।
मोक्षधर्मस्थितानां तु अन्योन्यमनुजानताम् ।
भार्यापतीनां मुक्तानामधर्मो न विधीयते ॥ १५
अन्यसङ्गां गतापत्यां शूद्रगां परगामिनीम् ।
परीक्ष्य त्यजमानानां नराणां नास्ति पातकम्१६
पातकेऽपि तु भर्तव्यौ द्वौ तु माता पिता तथा॥
मार्कण्डेय उवाच ।
भार्यायां व्यभिचारिण्यां नरस्य त्यजतो रुषा ।
कथं धर्मोऽप्यधर्मो वा भवतीह महामते ॥ १८
नारद उवाच ।
अनृतेऽपि हि सत्ये वा यो नारीं दूषितां त्यजेत् ।
अरक्षमाणः स्वां भार्यां नरो भवति भ्रूणहा ॥१९
अपत्यहेतोर्या नारी भर्तारमतिलङ्घयेत् ।
लोलेन्द्रियेति सा रक्ष्या न सन्त्याज्या कथंचन२०
नद्यश्च नार्यश्च समस्वभावा
नैताः प्रमुञ्चन्ति नरावगाढाः ।
स्रोतांसि नद्यो वहते निपातं
नारी रजोभिः पुनरेति शौचम् ॥ २१
एवं नार्यो न दुष्यन्ति व्यभिचारेऽपि भर्तृणाम् ।
मासिमासि भवेद्रागस्ततः शुद्धा भवन्त्युत ॥२२

दीर्घं नाम प्रदानं तदिति क. पाठः ॥ ३२ ॥

मार्कण्डेय उवाच ।
कानि तीर्थानि भगवन्नृणां देहाश्रितानि वै ।
तानि वै शंस भगवन्याथातथ्येन पृच्छतः ॥ २३
सर्वतीर्थेषु सर्वज्ञ किं तीर्थं परमं नृणाम् ।
यत्रोपस्पृश्य पूतो यो नरो भवति नित्यशः ॥२४
नारद उवाच ।
देवर्षिपितृतीर्थानि ब्राह्मं मध्येऽथ वैष्णवम् ।
नृणां तीर्थानि पञ्चाहुः पाणौ संनिहितानि वै॥२५
आद्यतीर्थं तु तीर्थानां वैष्णवो भाग उच्यते ।
यत्रोपस्पृश्य वर्णानां चतुर्णां वर्धते कुलम् ।
पितृदैवतकार्याणि वर्धन्ते प्रेत्य चेह च ॥ २६
मार्कण्डेय उवाच ।
नराणां कामवृत्तानां या नार्यो निरवग्रहाः ।
यासामभिग्रहो नास्ति ता मे कथय नारद ॥ २७
नारद उवाच ।
पांशुर्वेश्या नटी गोपी तान्तुकी तुन्नवायिकी ।
नारी किराती शबरी नर्तकी चानवग्रहा ॥ २८
मार्कण्डेय उवाच ।
एतासु जाता नारीषु सर्ववर्णेषु ये सुताः ।
केषु के बन्धुदायादा भवन्ति ऋषिसत्तम ॥ २९
नारद उवाच ।
य एताः परिगृह्णन्ति तेषामेव हि ते सुताः ।
सर्वत्र तु प्रवृत्तासु बीजं नश्यति देहिनाम् ॥ ३०
मार्कण्डेय उवाच ।
सर्वस्त्रीषु प्रवृत्ताश्च साधुवेदविवर्जिताः ।
मानवाः काण्डपृष्ठाश्च वेदमन्त्रबहिष्कृताः ।
नियुक्ता हव्यकव्येषु तेषां दत्तं कथं भवेत् ॥ ३१
नारद उवाच ।
नार्हन्ति हव्यकव्यानि सावित्रीवर्जिता द्विजाः ।
व्रात्येष्वन्नप्रदानं तद्यथा शूद्रेषु वै तथा ॥ ३२
मार्कण्डेय उवाच ।
धर्मेष्वधिकृतानां तु नराणां मुह्यते मनः ।
कथं न विघ्नो भवति एतदिच्छामि वेदितुम् ॥३३

एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

नारद उवाच ।
अर्थाश्च नार्यश्च समानमेत-
च्छ्रेयांसि पुंसामिह मोहयन्ति ।
रतिप्रमोदात्प्रमदा हरन्ति
भोगैर्धनं चाप्युपहन्ति धर्मान् ॥ ३४
हव्यं कव्यं च धर्मात्मा सर्वं तच्छ्रोत्रियोऽर्हति ।
दत्तं हि श्रोत्रिये साधौ ज्वलिताग्नाविवाहुतिः॥३५
मार्कण्डेय उवाच ।
श्रोत्रियाणां कुले जाता वेदार्थविदितात्मनाम् ।
हित्वा कस्मात्त्रयीं विद्यां वार्तां वृत्तिमुपाश्रिताः ३६
नारद उवाच ।
चातुर्वर्ण्यं पुरा न्यस्तं सुविद्वत्सु द्विजातिषु ।
तस्माद्वर्णैः संविभज्या वृत्तिः सङ्करवर्जिता ॥ ३७
ये चान्ये श्रोत्रिया जाताः संस्कृताः पुत्रगृध्नुभिः ।
पूर्वनिर्वाणनिर्वृत्तां जातां वृत्तिमुपाश्रिताः ॥ ३८
मार्कण्डेय उवाच ।
असंस्कृताः श्रोत्रियजाः संस्कृता ज्ञानिजाः कथम्
नारद उवाच ।
असंस्कारो वैदिकश्च स मान्यः श्रोत्रियात्मजः ।
शुद्धान्वयः श्रोत्रियस्तु सुविद्वद्भिः समोऽन्यथा४०
अनधीयानपुत्राश्च वेदसंस्कारवर्जिताः ।
तस्मात्ते वेदविज्ञाऽपि विप्राः श्रुतिनिकारिणः॥४१
ब्रह्मराशौ पुरा सृष्टा वेदसंस्कारसंस्कृताः ।
तस्मात्तेष्वेव ते जाताः साधवः कुलधारिणः ॥४२
मार्कण्डेय उवाच ।
स्वयं क्रीतासु प्रेष्यासु प्रसूयन्ते तु ये नराः ।
कस्य नार्यः सुताश्चैव भवन्ति ऋषिसत्तम ॥ ४३
नारद उवाच ।
स्वदारायां यो नरो मोहात्प्रसूयेत स पापकृत् ।
इहाभिनिन्दितः प्रेत्य अपत्यं प्रेष्यतां नयेत् ॥४४
सा तस्य भार्या पुत्रा ये हव्यकव्यप्रदास्तु ते ।
तस्या ये बान्धवाः केचिद्विषक्ताः प्रेष्यतां गताः ।
सर्वे तस्यास्तु संबन्धा मुच्यन्ते प्रेष्यकर्मसु ॥ ४५
एतत्ते कथितं सर्वं यदभिव्याहृतं त्वया ।
अथवा संशयः कश्चिद्भूयः संप्रष्टुमर्हसि ॥ ४६
मार्कण्डेय उवाच ।
अमिथ्यादर्शनालोके नारदः सर्वकोविदः ।
प्रत्यक्षदर्शी लोकानां स्वयंभुरिव सत्तमः ॥ ४७
भीष्म उवाच ।
इति संभाष्य ऋषिभिर्मार्कण्डेयो महातपाः ।
नारदं चापि सत्कृत्य तेन चैवाभिसत्कृतः ।
आमन्त्रयित्वा ऋषिभिः प्रययावाश्रमं मुनिः ॥४८
ऋषयश्चापि तीर्थानां परिचर्यां प्रचक्रमुः ॥ ४९
सुक्षेत्रबीजसंस्कारविशुद्धो ब्रह्मचर्यया ।
नित्यनैमित्तिकात्स्नातो मनश्शुद्ध्या च शुद्ध्यति ॥'

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः ॥ ६० ॥

भीष्मेण युधिष्ठिरं प्रति दाने पात्राणां लक्षणादिकथनम् ॥ १ ॥

युधिष्ठिर उवाच ।
किमाहुर्भरतश्रेष्ठ पात्रं विप्राः सनातनम् ।
ब्राह्मणं लिङ्गिनं चैव ब्राह्मणं वाऽप्यलिङ्गिनम्॥१
भीष्म उवाच ।
स्ववृत्तिमभिपन्नाय लिङ्गिने चेतराय च ।
देयमाहुर्महाराज उभावेतौ तपस्विनौ ॥ २
युधिष्ठिर उवाच ।
श्रद्धया परयाऽपूतो यः प्रयच्छेद्विजातये ।
हव्यं कव्यं तथा दानं को दोषः स्यात्पितामह॥३
भीष्म उवाच ।

ब्राह्मणं ब्रह्मविदम् । लिङ्गिनं ब्रह्मचारिणं संन्यासिनं च दण्डादिलिङ्गवन्तम् ॥ १ ॥ अपूतोपि परया श्रद्धया यदि प्रयच्छति तर्हि तस्य दातुरपूतत्वप्रयुक्तः को दोषः स्यात्तं वद ॥ ३ ॥

श्रद्धापूतो नरस्तात दुर्दान्तोऽपि न संशयः ।
पूतो भवति सर्वत्र किमुत त्वं महाद्युते ॥ ४

युधिष्ठिर उवाच ।

न ब्राह्मणं परीक्षेत दैवेषु सततं नरः ।
कव्यप्रदाने तु बुधाः परीक्ष्यं ब्राह्मणं विदुः ॥५

भीष्म उवाच ।

न ब्राह्मणः साधयते हव्यं दैवात्प्रसिद्ध्यति ।
देवप्रसादादिज्यन्ते यजमानैर्न संशयः ॥ ६

ब्राह्मणान्भरतश्रेष्ठ सततं ब्रह्मवादिनः ।
मार्कण्डेयः पुरा प्राह इति लोकेषु बुद्धिमान् ।
'ब्राह्मणाः पात्रभूताश्च शुद्धा नैवं पितृष्विह ॥ ७

युधिष्ठिर उवाच ।

अपूर्वोऽप्यथवा विद्वान्संबन्धी वा यथा भवेत् ।
तपस्वी यज्ञशीलो वा कथं पात्रं भवेत्तु सः ॥ ८

भीष्म उवाच ।

कुलीनः कर्मकृद्वैद्यस्तथैवाप्यनृशंस्यवान् ।
ह्रीमानृजुः सत्यवादी पात्रं पूर्वे च ये त्रयः ॥९

तत्रेमं शृणु मे पार्थ चतुर्णां तेजसां मतम् ।
पृथिव्याः काश्यपस्याग्नेर्मार्कण्डेयस्य चैव हि॥१०

पृथिव्युवाच ।

यथा महार्णवे क्षिप्तः क्षिप्रं नेष्टुर्विनश्यति ।
तथा दुश्चरितं सर्वं त्रयीनिल्ये निमज्जति ॥ ११

काश्यप उवाच ।

सर्वे च वेदाः सह षड्भिरङ्गैः
साङ्ख्यं पुराणं च कुले च जन्म ।
नैतानि सर्वाणि गतिर्भवन्ति
शीलव्यपेतस्य नृप द्विजस्य ॥ १२

अग्निरुवाच ।

अधीयानः पण्डितंमन्यमानो
यो विद्यया हन्ति यशः परेषाम् ।
ब्रह्मन्स तेन लभते ब्रह्मवध्यां
लोकास्तस्य ह्यन्तवन्तो भवन्ति ॥ १३

मार्कण्डेय उवाच ।

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
नाभिजानामि यज्ञं तु सत्यस्यार्धमवाप्नुयात् ॥१४

भीष्म उवाच ।

इत्युक्त्वा ते जग्मुराशु चत्वारोऽमिततेजसः ।
पृथिवी काश्यपोऽग्निश्च प्रकृष्टायुश्च भार्गवः ॥१५

युधिष्ठिर उवाच ।

यदि ते ब्राह्मणा लोके व्रतिनो भुञ्जते हविः ।
दत्तं ब्राह्मणकामाय कथं तत्सुकृतं भवेत् ॥ १६

भीष्म उवाच ।

आदिष्टिनो ये राजेन्द्र ब्राह्मणा वेदपारगाः ।
भुञ्जते ब्रह्मकामाय व्रतलुप्ता भवन्ति ते ॥ १७

युधिष्ठिर उवाच ।

अनेकान्तं बहुद्वारं धर्ममाहुर्मनीषिणः ।
किं निमित्तं भवेदत्र तन्मे ब्रूहि पितामह ॥ १८

भीष्म उवाच ।

अहिंसा सत्यमक्रोध आनृशंस्यं दमस्तथा ।
आर्जवं चैव राजेन्द्र निश्चितं धर्मलक्षणम् ॥ १९

ये तु धर्मं प्रशंसन्तश्चरन्ति पृथिवीमिमाम् ।
अनाचरन्तस्तद्धर्मं संकरेऽभिरताः प्रभो ॥ २०

तेभ्यो हिरण्यं रत्नं वा गामश्वं वा ददाति यः ।
दशवर्षाणि विष्ठां स भुङ्क्ते निरयमास्थितः ॥ २१

श्रद्धैवास्य पूतत्वं करोतीत्यर्थः ॥ ४ ॥ श्रद्धैव पूतत्वकर्त्री चेत् कव्ये पात्रपरीक्षा न विधेया स्यादित्याशयः ॥ ५ ॥ हव्यं दैवं कर्म सिध्यति फलदं भवति नतु ब्राह्मणगुणादिति भावः । इज्यन्ते देवा इति शेषः । दैवं कर्म देवानुग्रहादेव पूर्णं भवति । श्रद्धामात्रप्रियत्वाद्देवानामिति भावः ॥ ६ ॥ पित्र्यं तु कर्म ब्राह्मणानुग्रहादेव पूर्णं भवतीति तत्रानुग्रहकर्तरि तपोबलमावश्यकमित्याशयेनाह ब्राह्मणानिति ॥ ७ ॥ त्रयः अपूर्वसंबन्धितपस्विनः कुलीनत्वादिगुणसप्तकयुक्ता एव पात्रत्वं भजन्ते परिशेषात् ॥ ९ ॥ तेजसां तेजस्विनां सर्वज्ञानामिति यावत् ॥ १० ॥ नेष्टुः पांसुपिण्डः लोष्ठो विनश्यतीति ध. पाठः ॥ ११ ॥ भार्गवः मार्कण्डेयः ॥ १५ ॥ व्रतिनः ब्रह्मचारिणः । तदीयव्रतनाशात्स्वीयं श्राद्धं दुष्यति नवेति प्रश्नः ॥ १६ ॥ आदिष्टं द्वादशवर्षाणि ब्रह्मचर्यं चरेति गुर्वादेशस्तद्वन्तः । भोक्तुरेव व्रतं लुप्यते । नतु दाता प्रत्यवैति ॥ १७ ॥ अन्तो निष्ठा । अनेकान्तं अनेकफलाकारमित्यर्थः । पात्रगुणानामनन्तत्वात्के गुणा नियमेन पात्रताया निमित्तं तानेव संक्षेपेण ब्रूहीति प्रश्नार्थः ॥ १८ ॥

धनेन पुल्कसानां च तथैवान्तेवसायिनाम् ।
कृतं कर्माकृतं वाऽपि रागमोहेन जल्पताम् ॥२२
वैश्वदेवं च ये मूढा विप्राय ब्रह्मचारिणे ।
न ददन्तीह राजेन्द्र ते लोकान्भुञ्जतेऽशुभान् २३
युधिष्ठिर उवाच ।
किं परं ब्रह्मचर्यं च किं परं धर्मलक्षणम् ।
किंच श्रेष्ठतमं शौचं तन्मे ब्रूहि पितामह ॥ २४
भीष्म उवाच ।
ब्रह्मचर्यं परं तात मधुमांसस्य वर्जनम् ।
मर्यादायां स्थितो धर्मः शमः शौचस्य लक्षणम् २५
युधिष्ठिर उवाच ।
कस्मिन्काले चरेद्धर्मं कस्मिन्कालेऽर्थमाचरेत् ।
कस्मिन्काले सुखी च स्यात्तन्मे ब्रूहि पितामह ॥२६
भीष्म उवाच ।
काल्यमर्थं निषेवेत ततो धर्ममनन्तरम् ।
पश्चात्कामं निषेवेत न च गच्छेत्प्रसङ्गिताम् ॥२७
ब्राह्मणांश्चैव मन्येत गुरूंश्चाप्यभिपूजयेत् ।
सर्वभूतानुलोमश्च मृदुशीलः प्रियंवदः ॥ २८
अधिकारे यदनृतं यच्च राजसु पैशुनम् ।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥ २९
प्रहरेन्न नरेन्द्रेषु न हन्याद्गां तथैव च ।
भ्रूणहत्यासमं चैतदुभयं यो निषेवते ॥ ३०
नाग्निं परित्यजेज्जातु न च वेदान्परित्यजेत् ।
न च ब्राह्मणमाक्रोशेत्समं तद्ब्रह्महत्यया ॥ ३१
युधिष्ठिर उवाच ।
कीदृशाः साधवो विप्राः केभ्यो दत्तं महाफलम् ।
कीदृशानां च भोक्तव्यं तन्मे ब्रूहि पितामह ॥ ३२
भीष्म उवाच ।
अक्रोधना धर्मपराः सत्यनित्या दमे रताः ।
तादृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम् ३३
अमानिनः सर्वसहा दृढार्था विजितेन्द्रियाः ।
सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महाफलम् ॥ ३४
अलुब्धाः शुचयो वैद्या ह्रीमन्तः सत्यवादिनः ।
स्वकर्मनिरता ये च तेभ्यो दत्तं महाफलम् ॥३५
साङ्गांश्च चतुरो वेदानधीते यो द्विजर्षभः ।
षड्भ्यः प्रवृत्तः कर्मभ्यस्तं पात्रमृषयो विदुः ॥३६
ये त्वेवंगुणजातीयास्तेभ्यो दत्तं महाफलम् ।
सहस्रगुणमाप्नोति गुणार्हाय प्रदायकः ॥ ३७
प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः ।
तारयेत कुलं सर्वमेकोऽपीह द्विजर्षभः ।
'तृप्ते तृप्ताः सर्वदेवाः पितरो मुनयोपि च ॥'३८
गामश्वं वित्तमन्नं वा तद्विधे प्रतिपादयेत् ।
द्रव्याणि चान्यानि तथा प्रेत्यभावे न शोचति॥३९
तारयेत कुलं सर्वमेकोपि ह द्विजोत्तमः ।
किमङ्ग पुनरेवैते तस्मात्पात्रं समाचरेत् ॥ ४०
निशाम्य च गुणोपेतं ब्राह्मणं साधुसंमतम् ।
दूरादानाय्य सत्कृत्य सर्वतश्चापि पूजयेत् ॥ ४१

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः ॥ ६१ ॥

भीष्मेण युधिष्ठिरंप्रति श्राद्धे निमन्त्रणार्हानर्हब्राह्मणलक्षणादिकथनम् ॥ १ ॥

युधिष्ठिर उवाच ।
श्राद्धकाले च दैवे च पित्र्येऽपि च पितामह ।
इच्छामीह त्वयाऽऽख्यातं विहितं यत्सुरर्षिभिः॥१
भीष्म उवाच ।

मेदानां पुल्कसां चेति झ. पाठः । तत्र मेदादीनां स विष्ठां भुङ्क्ते इति संबन्धः । मेदा गोमहिष्यादीनां मृतानां मांसमश्नन्तः । पुल्कसा ये ब्राह्मणादीनपि स्वभावादेव हिंसन्ति । अन्तेवसायिनश्चर्मकारादयः । कृतमकृतं वा परकीयं पापं कर्म ॥ २२ ॥ परं श्रेष्ठम् ॥ २४ ॥ काल्यं पूर्वाह्णे ॥ २७ ॥ न शोचति प्रतिपादयन् ॥ ३९ ॥ द्विजोत्तमः निर्दोषः । एते पूर्वोक्ता गुणाश्च तत्र यदि लभ्यन्ते तर्हि तारयेतेति किमु ॥ ४० ॥ षष्टितमोऽध्यायः ॥ ६० ॥

कालादौ विहितं विशेषमिति शेषः ॥ १ ॥

दैवं पौर्वाह्णिके कुर्यादपराह्णे तु पैतृकम् ।
मङ्गलाचारसंपन्नः कृतशौचः प्रयत्नवान् ॥ २
मनुष्याणां तु मध्याह्ने प्रदद्यादुपपत्तिभिः ।
कालहीनं तु यद्दानं तं भागं रक्षसां विदुः ॥ ३
लङ्घितं चावलीढं च कालपूर्वं च यत्कृतम् ।
रजस्वलाभिदृष्टं च तं भागं रक्षसां विदुः ॥ ४
अवघुष्टं च यद्भुक्तमव्रतेन च भारत ।
परामृष्टं शुना चैव तं भागं रक्षसां विदुः ॥ ५
केशकीटावपतितं क्षुतं श्वभिरवेक्षितम् ।
रुदितं चावधूतं च तं भागं रक्षसां विदुः ॥ ६
निरोङ्कारेण यद्भुक्तं सशस्त्रेण च भारत ।
दुरात्मना च यद्भुक्तं तं भागं रक्षसां विदुः ॥ ७
परोच्छिष्टं च यद्भुक्तं परिभुक्तं च यद्भवेत् ।
दैवे पित्र्ये च सततं तं भागं रक्षसां विदुः ॥ ८
मन्त्रहीनं क्रियाहीनं यच्छ्राद्धं परिविष्यते ।
त्रिभिर्वर्णैर्नरश्रेष्ठ तं भागं रक्षसां विदुः ॥ ९
आज्याहुतिं विना चैव यत्किंचित्परिविष्यते ।
दुराचारैश्च यद्भुक्तं तं भागं रक्षसां विदुः ॥ १०
ये भागा रक्षसां प्राप्तास्त उक्ता भरतर्षभ ।
अत ऊर्ध्वं विसर्गस्य परीक्षां ब्राह्मणे शृणु ॥ ११
यावन्तः पतिता विप्रा जडोन्मत्तास्तथैव च ।
दैवे वाऽप्यथ पित्र्ये वा राजन्नार्हन्ति केतनम् १२
श्वित्री क्लीबश्च कुष्ठी च तथा यक्ष्महतश्च यः ।
अपस्मारी च यश्चान्धो राजन्नार्हन्ति केतनम् १३
चिकित्सका देवलका वृथा नियमधारिणः ।
सोमविक्रयिणश्चैव श्राद्धे नार्हन्ति केतनम् ॥१४
गायना नर्तकाश्चैव प्लवका वादकास्तथा ।
कथका योधकाश्चैव राजन्नार्हन्ति केतनम् ॥ १५
होतारो वृषलानां च वृषलाध्यापकास्तथा ।
तथा वृषलशिष्याश्च राजन्नार्हन्ति केतनम् ॥ १६
अनुयोक्ता च यो विप्रो अनुयुक्तश्च भारत ।
नार्हतस्तावपि श्राद्धं ब्रह्मविक्रयिणौ हि तौ ॥१७
अग्रणीर्यः कृतः पूर्वं वर्णावरपरिग्रहः ।
ब्राह्मणः सर्वविद्योऽपि राजन्नार्हति केतनम् ॥१८
अनग्नयश्च ये विप्रा मृतनिर्यातकाश्च ये ।
स्तेनाश्च पतिताश्चैव राजन्नार्हन्ति केतनम् ॥ १९
अपरिज्ञातपूर्वाश्च गणपूर्वाश्च भारत ।
पुत्रिकापूर्वपुत्राश्च श्राद्धे नार्हन्ति केतनम् ॥ २०
ऋणकर्ता च यो राजन्यश्च वार्धुषिको नरः ।
प्राणिविक्रयवृत्तिश्च राजन्नार्हन्ति केतनम् ॥ २१
स्त्रीपूर्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ ।
आजपा ब्राह्मणाश्चैव श्राद्धे नार्हन्ति केतनम् २२
श्राद्धे दैवे च निर्दिष्टो ब्राह्मणो भरतर्षभ ।
दातुः प्रतिग्रहीतुश्च शृणुष्वानुग्रहं पुनः ॥ २३
चीर्णव्रता गुणैर्युक्ता भवेयुर्येऽपि कर्षकाः ।
सावित्रीज्ञाः क्रियावन्तस्ते राजन्केतनक्षमाः ॥२४
क्षात्रधर्मिणमप्याजौ केतयेत्कुलजं द्विजम् ।
न त्वेव वणिजं तात श्राद्धे च परिकल्पयेत् ॥२५
अग्निहोत्री च यो विप्रो ग्रामवासी च यो भवेत् ।
अस्तेनश्चातिथिज्ञश्च स राजन्केतनक्षमः ॥ २६
सावित्रीं जपते यस्तु त्रिकालं भरतर्षभ ।
भिक्षावृत्तिः क्रियावांश्च स राजन्केतनक्षमः ॥२७

उपपत्तिभिः आदरादिभिर्युक्तः सन् ॥ ३ ॥ कलिपूर्वं चेति झ. पाठः ॥ ४ ॥ क्षुतं क्षुतेन दूषितम् ॥ ६ ॥ निरोंकारेण अननुज्ञातेन शूद्रेण वा ॥ ७ ॥ परिभुक्तं देवातिथिपितृबालकादीन्वर्जयित्वा भुक्तं स्वेनैव ॥८॥ आज्याहुतिं पात्राभिघारणं विना ॥ १० ॥ विसर्गस्य ब्राह्मणे दानस्य पात्रभूते ॥ ११ ॥ पतिताः महापातकेन जातिबहिर्भूताः । केतनं निमन्त्रणम् ॥ १२ ॥ श्वित्री श्वेतकुष्ठी । कुष्ठी मण्डलकुष्ठी । यक्ष्महतो महारोगी । अपस्मारी ग्रहग्रस्तः ॥ १३ ॥ देवलका देवार्चनवृत्तिजीविनः । वृथानियमधारिणो दम्भवन्तः ॥ १४ ॥ प्लवकाः क्रीडापराः । कथका वृथालापिनः । योधका मल्लाः ॥ १५ ॥ वृषलानां शूद्राणां होतारो याजकाः ॥ १६ ॥ अनुयोक्ता भृतकाध्यापकः । अनुयुक्तो भृतकाध्येता ॥ १७ ॥ वर्णावरपरिग्रहः शूद्रापतिः ॥ १८ ॥ गणपूर्वा ग्रामण्यः । पुत्रिकापूर्वपुत्राः । अस्यामुत्पन्नः पुत्रो मदीय इति नियमेन या दीयते तस्यां च यो जातः स पुत्रिकापूर्वपुत्रः ॥ २० ॥ ऋणकर्ता वृद्ध्यर्थं धनप्रयोक्ता ॥ २१ ॥ स्त्रीपूर्वाः स्त्रीजिताः स्त्रीपण्योपजीविनो वा । काण्डपृष्ठो वेश्यापतिः । अजपाः सन्ध्यावन्दनहीनाः ॥ २२ ॥ अनुग्रहं निषिद्धानामपि केनचिद्गुणेनाभ्यनुज्ञानम् ॥ २३ ॥ वणिजं वणिग्वृत्तिम् ॥ २५ ॥

उदितास्तमितो यश्च तथैवास्तमितोदितः ।
अहिंस्रश्चाल्पदोषश्च स राजन्केतनक्षमः ॥ २८
अकल्कको ह्यतर्कश्च ब्राह्मणो भरतर्षभ ।
संसर्गे भैक्ष्यवृत्तिश्च स राजन्केतनक्षमः ॥ २९
अव्रती कितवः स्तेनः प्राणिविक्रयिको वणिक् ।
सनिष्कृतिः पुनः सोमं पीतवान्केतनक्षमः ॥३०
अर्जयित्वा धनं पूर्वं दारुणैरपि कर्मभिः ।
भवेत्सर्वातिथिः पश्चात्स राजन्केतनक्षमः ॥ ३१
ब्रह्मविक्रयनिर्दिष्टं स्त्रिया यच्चार्जितं धनम् ।
अदेयं पितृविप्रेभ्यो यच्च क्लैब्यादुपार्जितम् ॥३२
क्रियमाणेऽपवर्गे च यो द्विजो भरतर्षभ ।
न व्याहरति यद्युक्तं तस्याधर्मो गवानृतम् ॥ ३३
श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृतं तथा ।
सोमक्षयश्च मांसं च यदारण्यं युधिष्ठिर ॥ ३४
'मुहूर्तानां त्रयं पूर्वमह्नः प्रातरिति स्मृतम् ।
जपध्यानादिभिस्तस्मिन्विप्रैः कार्यं शुभव्रतम् ३५
संगवाख्यं त्रिभागं तु मध्याह्नस्त्रिमुहूर्तकः ।
लौकिकं संगवेऽर्धं च स्नानादि ह्यथ मध्यमे ॥३६
चतुर्थमपराह्णं तु त्रिमुहूर्तं तु पित्र्यकम् ।
सायाह्नस्त्रिमुहूर्तं च मध्यमं कविभिः स्मृतम् ॥ ३७
चतुर्थे त्वपराह्णाख्ये श्राद्धं कुर्यात्सदा नृप ॥३८
प्रागुदीचीमुखा विप्राः विश्वेदेवे च दक्षिणाः ।
श्रावितेषु सुतृप्तेषु पिण्डं दद्यात्सदक्षिणम् ॥' ३९
श्राद्धापवर्गे विप्रस्य दातारो वोऽस्त्वितीरयेत् ।
क्षत्रियस्यापि यो ब्रूयात्प्रीयन्तां पितरस्त्विति ॥४०
अपवर्गे तु वैश्यस्य श्राद्धकर्मणि भारत ।
अक्षय्यमभिधातव्यं स्वस्ति शूद्रस्य भारत ॥ ४१
पुण्याहवाचनं दैवं ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं क्षत्रियस्य विधीयते ॥ ४२
वैश्यस्य दैवे वक्तव्यं प्रीयन्तां देवता इति ।
'गोहिंसायां चतुर्भागं पूर्वं विप्रातिकेतिनः ॥४३
वर्णावरेषु भुञ्जानं क्रमाच्छूद्रे चतुर्गुणम् ।
नान्यत्र ब्राह्मणो ब्रूयात्पूर्वं विप्रेण केतितः ॥४४
अभोजने च दोषः स्याद्वर्जयेच्छूद्रकेतनम् ।
शूद्रान्नरसपुष्टाङ्गो द्विजो नोर्ध्वां गतिं लभेत् ॥४५
अशुचिर्नैव चाश्नीयान्नास्तिको मानवर्जितः ।
न पूर्वं लङ्घयेल्लोभादेकवर्णोऽपि पार्थिव ॥ ४६
विप्राः स्मृता भूमिदेवा उपकुर्वाणवर्जिताः ।'
कर्मणामानुपूर्व्येण विधिपूर्वं कृतं शृणु ॥ ४७
जातकर्मादिकाः सर्वास्त्रिषु वर्णेषु भारत ।
ब्रह्मक्षत्रे हि मन्त्रोक्ता वैश्यस्य च युधिष्ठिर ॥ ४८
विप्रस्य रशना मौञ्जी मौर्वी राजन्यगामिनी ।
बाल्वजी ह्येव वैश्यस्य धर्म एष युधिष्ठिर ॥ ४९
'पालाशो द्विजदण्डः स्यादश्वत्थः क्षत्रियस्य तु ।
औदुम्बरश्च वैश्यस्य धर्म एष युधिष्ठिर ॥' ५०
दातुः प्रतिग्रहीतुश्च धर्माधर्माविमौ शृणु ।
ब्राह्मणस्यानृतेऽधर्मः प्रोक्तः पातकसंज्ञितः ।
चतुर्गुणः क्षत्रियस्य वैश्यस्याष्टगुणः स्मृतः ॥५१
नान्यत्र ब्राह्मणोऽश्नीयात्पूर्वं विप्रेण केतितः ।
[यवीयान्पशुहिंसायां तुल्यधर्मा भवेत्स हि ॥५२
तथा राजन्यवैश्याभ्यां यद्यश्नीयात्तु केतितः ।
यवीयान्पशुहिंसायां भागार्धं समवाप्नुयात् ॥ ५३

उदित आढ्यः । अस्तमितो दरिद्रः पूर्वं आढ्यः सद्यो दरिद्रः ॥ २८ ॥ अकल्ककोऽदाम्भिकः अपापो वा । अतर्कोऽहैतुकः संसर्गे संगत्यर्हे गृहे ज्ञाते भैक्ष्यवृत्तिः ॥ २९ ॥ कितवो धूर्तः ॥ ३० ॥ सर्वं देवतादिकं अतिथिरेव यस्य स सर्वातिथिः ॥ ३१ ॥ ब्रह्म वेदः । क्लैब्यात् दीनभाषणेन मिथ्याशपथादिना वा ॥ ३२ ॥ अपवर्गे श्राद्धसमाप्तौ युक्तं अस्तुस्वधेत्यादिवचनं गवानृतं अनृतगोशपथस्य पापम् ॥ ३३ ॥ सोमक्षयो दर्शः । आरण्यं मृगादिमांसं च यदा प्राप्तं तदैव श्राद्धस्य कालः ॥ ३४ ॥ स्वधा वै मुदिता भवेदिति झ. पाठः । स्वधोच्यतामिति प्रदात्रा उक्ते अस्तुस्वधेति ब्राह्मणो वदेत् । एवमुत्तरत्र मुदिता प्रीतिकरी पितॄणामित्यर्थात् ॥ ४० ॥ पुण्याहं भवन्तो ब्रुवन्त्विति यजमानेन प्रोक्ते ओं पुण्याहमस्त्विति ब्राह्मणा ब्रूयुः । दैवं सोंकारम् ॥ ४२ ॥ दैवे ओंकारस्थाने प्रीयन्तां देवताः पुण्याहमस्त्विति प्रतिवदेदित्यर्थः ॥ ४३ ॥ रशना मेखला । मौञ्जी मुञ्जमयी । मौर्वी धनुर्ज्या । बाल्बजी बल्बजस्तृणविशेषस्तन्मयी ॥ ४९ ॥ धर्मो दातुः । अधर्मः प्रतिग्रहीतुः ॥ ५१ ॥ ब्राह्मणेन केतितः सन् यदि यवीयान् भवेत्तर्हि वृथा पशुहिंसायाः पूर्णं पापं प्राप्नुयात् । क्षत्रियादिना केतितः सन् यदि यवीयान्स्यात्तर्हि वृथापशुहिंसाया अर्धं पापं प्राप्नुयादिति श्लोकद्वयार्थः ॥ ५३ ॥

दैवं वाऽप्यथवा पित्र्यं योऽश्नीयाद्ब्राह्मणादिषु ।]
अस्नातो ब्राह्मणो राजंस्तस्याधर्मोऽनृतं स्मृतम् ५४
आशौचो ब्राह्मणो राजन्योऽश्नीयाद्ब्राह्मणादिषु ।
ज्ञानपूर्वमथो लोभात्तस्याधर्मो गवानृतम् ॥ ५५
अर्थेनान्येन यो लिप्सेत्कर्मार्थं चैव भारत ।
आमन्त्रयति राजेन्द्र तस्याधर्मोऽनृतं स्मृतम् ॥५६
अवेदव्रतचारित्रास्त्रिभिर्वर्णैर्युधिष्ठिर ।
मन्त्रवत्परिविष्यन्ते तस्याधर्मो गवानृतम् ॥ ५७

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ॥ ६२ ॥

भीष्मेण युधिष्ठिरंप्रति दानादिषु पात्रलक्षणानां स्वर्गनरकप्रापकपुण्यपापानां च प्रतिपादनम् ॥१ ॥

युधिष्ठिर उवाच ।
पित्र्यं वाऽप्यथवा दैवं दीयते यत्पितामह ।
एतदिच्छाम्यहं ज्ञातुं दत्तं केषु महाफलम् ॥ १
भीष्म उवाच ।
येषां दाराः प्रतीक्षन्ते सुवृष्टिमिव कर्षकाः ।
उच्छेषपरिशेषं हि तान्भोजय युधिष्ठिर ॥ २
चारित्रनिरता राजन्ये कृशाः कृशवृत्तयः ।
अर्थिनश्चोपगच्छन्ति तेषु दत्तं महाफलम् ॥ ३
तद्भक्तास्तद्गृहा राजंस्तद्बलास्तदपाश्रयाः ।
अर्थिनश्च भवन्त्यर्थे तेषु दत्तं महाफलम् ॥ ४
तस्करेभ्यः परेभ्यो वा हृतस्वा भयदुःखिताः ।
अर्थिनो भोक्तुमिच्छन्ति तेषु दत्तं महाफलम् ॥५
अकल्ककस्य विप्रस्य रौक्ष्यात्करकृतात्मनः ।
वटवो यस्य भिक्षन्ति तेभ्यो दत्तं महाफलम् ॥६
हृतस्वा हृतदाराश्च ये विप्रा देशसंप्लवे ।
अर्थार्थमभिगच्छन्ति तेभ्यो दत्तं महाफलम् ॥ ७
व्रतिनो नियमस्थाश्च ये विप्राः श्रुतसंमताः ।
तत्समाप्त्यर्थमिच्छन्ति तेभ्यो दत्तं महाफलम् ॥८
अत्युत्क्रान्ताश्च धर्मेषु पाषण्डसमयेषु च ।
कृशप्राणाः कृशधनास्तेभ्यो दत्तं महाफलम् ॥ ९
कृतसर्वस्वहरणा निर्दोषाः प्रभविष्णुभिः ।
स्पृहयन्ति च भुक्त्वाऽन्नं तेषु दत्तं महाफलम् ॥१०
तपस्विनस्तपोनिष्ठास्तेषां भैक्षचराश्च ये ।
अर्थिनः किंचिदिच्छन्ति तेषु दत्तं महाफलम् ॥११
महाफलविधिर्दाने श्रुतस्ते भरतर्षभ ।
निरयं येन गच्छन्ति स्वर्गं चैव हि तच्छृणु ॥ १२
‘व्रतानां पारणार्थाय गुर्वर्थे यज्ञदक्षिणाम् ।
निवेशार्थं च विद्वांसस्तेषां दत्तं महाफलम् ॥ १३
पित्रोश्च रक्षणार्थाय पुत्रदारार्थमेव वा ।
महाव्याधिविमोक्षार्थं तेषु दत्तं महाफलम् ॥ १४
बालाः स्त्रियश्च वाञ्छन्ति सुभक्तं चाप्यसाधनाः ।
स्वर्गमायान्ति दत्त्वैषां निरयान्नोपयान्ति ते ॥’१५
गुर्वर्थमभयार्थं वा वर्जयित्वा युधिष्ठिर ।
येऽनृतं कथयन्ति स्म ते वै निरयगामिनः ॥ १६
परदाराभिहर्तारः परदाराभिमर्शिनः ।
परदारप्रयोक्तारस्ते वै निरयगामिनः ॥ १७

आशौचः जननमरणाशौचवान् ॥ ५५ ॥ अर्थेन प्रयोजनेन तीर्थयात्राव्यपदेशेन जीविकाद्यर्थी यो धनं लिप्सेत् यो वा कर्मार्थं मे भिक्षां देहीत्यामन्त्रयति दातारमभिमुखीकरोति तस्यापि अनृतं गवानृतमेव स्मृतम् ॥ ५६ ॥ वेदव्रतं चारित्रं च येषां नास्ति ते । येन मन्त्रवत् मन्त्रयुक्तं यथा स्यात्तथा श्राद्धे परिविष्यन्ते तस्य ॥ ५७ ॥ एकषष्टितमोऽध्यायः ॥६१॥

भोजनपात्रेऽवशिष्टमुच्छेषः तेन सहितं परिशेषं स्थाल्यामवशिष्टं प्रतीक्षन्ते । येषां पाकपर्याप्तमेव धान्यादिकमस्ति न कुसूलादौ तान् भोजय ॥ २ ॥ तद्भक्ताः चारित्रमेव भक्तोऽन्नं तद्वज्जीवनं येषां ते । तद्गृहाः तदेव गृहे रूप्यादौ येषां ते अर्थे प्रयोजने सत्येवार्थिनो भवन्ति न संग्रहार्थम् ॥ ४ ॥ रौक्ष्यात् दारिद्र्यात् । करे कृतः आत्मेवात्मा जीवनमन्नम् । हस्ते गृहीतान्नस्य वटवः क्षुधार्ताः मह्यं देहि मह्यं देवीति याचन्ते तेभ्योऽतिदरिद्रेभ्यः ॥ ६ ॥ पाषण्डानां समयो मर्यादा येषु धर्मेषु तत्र अत्युत्क्रान्ताः अत्यन्तं ततो दूरे स्थिताः ॥ ९ ॥ भुक्त्वान्नमेव स्पृहयन्ति न स्वादु । अतएव न चतुर्थी ॥ १० ॥ अभयार्थं भयनिवृत्तिरूपं प्रयोजनम् ॥ १६ ॥ अभिमर्शिनो जाराः । प्रयोक्तारः हर्त्रभिमर्शिनोर्दूताः ॥ १७ ॥

ये परस्वापहर्तारः परस्वानां च नाशकाः ।
सूचकाश्च परेषां ये ते वै निरयगामिनः ॥ १८
प्रपाणां च सभानां च संक्रमाणां च भारत ।
अगाराणां च भेत्तारो नरा निरयगामिनः ॥ १९
अनाथां प्रमदां बालां वृद्धां भीतां तपस्विनीम् ।
वञ्चयन्ति नरा ये च ते वै निरयगामिनः ॥ २०
वृत्तिच्छेदं गृहच्छेदं दारच्छेदं च भारत ।
मित्रच्छेदं तथाऽऽशायास्ते वै निरयगामिनः ॥२१
सूचकाः सेतुभेत्तारः परवृत्त्युपजीवकाः ।
अकृतज्ञाश्च मित्राणां ते वै निरयगामिनः ॥२२
पाषण्डा दूषकाश्चैव समयानां च दूषकाः ।
ये प्रत्यवसिताश्चैव ते वै निरयगामिनः ॥ २३
विषमव्यवहाराश्च विषमाश्चैव वृद्धिषु ।
लाभेषु विषमाश्चैव ते वै निरयगामिनः ॥ २४
दूतसंव्यवहाराश्च निष्परीक्षाश्च मानवाः ।
प्राणिहिंसाप्रवृत्ताश्च ते वै निरयगामिनः ॥ २५
कृताशं कृतनिर्देशं कृतभक्तं कृतश्रमम् ।
भेदैर्ये व्यपकर्षन्ति ते वै निरयगामिनः ॥ २६
पर्यश्नन्ति च ये दारानग्निभृत्यातिथींस्तथा ।
उत्सन्नपितृदेवेज्यास्ते वै निरयगामिनः ॥ २७
वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥ २८
चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः ।
विकर्मभिश्च जीवन्ति ते वै निरयगामिनः ॥२९
केशविक्रयिका राजन्विषविक्रयिकाश्च ये ।
क्षीरविक्रयिकाश्चैव ते वै निरयगामिनः ॥ ३०
ब्राह्मणानां गवां चैव कन्यानां च युधिष्ठिर ।
येऽन्तरायान्ति कार्येषु ते वै निरयगामिनः॥ ३१
शस्त्रविक्रयिकाश्चैव कर्तारश्च युधिष्ठिर ।
शल्यानां धनुषां चैव ते वै निरयगामिनः ॥३२
शिलाभिः शङ्कुभिर्वाऽपि श्वभ्रैर्वा भरतर्षभ ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिनः ॥ ३३
उपाध्यायांश्च भृत्यांश्च भक्तांश्च भरतर्षभ ।
ये त्यजन्त्यविकारांस्त्रींस्ते वै निरयगामिनः ॥३४
अप्राप्तदमकाश्चैव नासानां वेधकाश्च ये ।
बन्धकाश्च पशूनां ये ते वै निरयगामिनः ॥ ३५
अगोप्तारश्च राजानो बलिषड्भागतस्कराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ॥ ३६
क्षान्तान्दान्तांस्तथा प्राज्ञान्दीर्घकालं सहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ॥३७
बालानामथ वृद्धानां दासानां चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ॥ ३८
एते पूर्वं विनिर्दिष्टाः प्रोक्ता निरयगामिनः ।
भागिनः स्वर्गलोकस्य वक्ष्यामि भरतर्षभ ॥ ३९
सर्वेष्वेव तु कार्येषु दैवपूर्वेषु भारत ।
हन्ति पुत्रान्पशून्कृत्स्नान्ब्राह्मणातिक्रमः कृतः ४०
दानेन तपसा चैव सत्येन च युधिष्ठिर ।
ये धर्ममनुवर्तन्ते ते नराः स्वर्गगामिनः ॥ ४१
शुश्रूषाभिस्तपोभिश्च विद्यामादाय भारत ।
ये प्रतिग्रहनिःस्नेहास्ते नराः स्वर्गगामिनः ॥ ४२
भयात्पापात्तथा बाधाद्दारिद्र्याद्व्याधिधर्षणात् ।
तत्कृते धनमीप्सन्ते ते नराः स्वर्गगामिनः ॥४३
क्षमावन्तश्च धीराश्च धर्मकार्येषु चोत्थिताः ।
मङ्गलाचारसंपन्नाः पुरुषाः स्वर्गगामिनः ॥ ४४
निवृत्ता मधुमांसेभ्यः परदारेभ्य एव च ।
निवृत्ताश्चैव मद्येभ्यस्ते नराः स्वर्गगामिनः ॥ ४५

परेषां दोषस्येति शेषः ॥१८॥ आशायाश्छेदमित्येकदेशानुषङ्गः । कुर्वन्तीति शेषः ॥ २१ ॥ सूचकाः राजगामिपैशुन्यवादिनः । सेतुः आर्यमर्यादा ॥ २२ ॥ पाषण्डाः वेदविरोधिनः शाक्यादयः दूषकाः सतां निन्दकाः । समयानां धर्मसंकेतानाम् । प्रत्यवसिताः आरूढपतिताः ॥ २३ ॥ कृताशं दासमर्थिनं वा । कृतनिर्देशं निर्देशः तुभ्यमिदं दास्यामीति प्रतिज्ञा सा कृतायस्मै तम् । भक्तं वेतनम् । व्यपकर्षन्ति पत्युः सकाशाद्दूरीकुर्वन्ति ॥ २६ ॥ पर्यश्नन्ति । परित्यज्याश्नन्ति ॥ २७ ॥ विकर्मभिः स्वस्य निषिद्धैः कर्मभिः ॥ २९ ॥ केशाश्चामरकम्बलादयः ॥ ३० ॥ कर्तारः शस्त्रशल्यादीनाम् ॥ ३२ ॥ अप्राप्तानामदान्तानां पशूनाम् । अण्डमर्दनेन बलवीर्ययोर्नाशका अप्राप्तदमकाः ॥ ३५ ॥ ये ब्राह्मणातिक्रमं न कुर्वन्ति ते स्वर्गगामिन इत्यर्थः ॥ ४० ॥

आश्रमाणां च कर्तारः कुलानां चैव भारत ।
देशानां नगराणां च ते नराः स्वर्गगामिनः ॥४६
वस्त्राभरणदातारो भक्ष्यपानान्नदास्तथा ।
कुटुम्बानां च भर्तारः पुरुषाः स्वर्गगामिनः॥ ४७
सर्वहिंसानिवृत्ताश्च नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ४८
मातरं पितरं चैव शुश्रूषन्ति जितेन्द्रियाः ।
भ्रातॄणां चैव सस्नेहास्ते नराः स्वर्गगामिनः ॥४९
आढ्याश्च बलवन्तश्च यौवनस्थाश्च भारत ।
ये वै जितेन्द्रिया धीरास्ते नराः स्वर्गगामिनः॥५०
अपराधिषु सस्नेहा मृदवो मृदुवत्सलाः ।
आराधनसुखाश्चापि पुरुषाः स्वर्गगामिनः ॥ ५१
सहस्रपरिवेष्टारस्तथैव च सहस्रदाः ।
त्रातारश्च सहस्राणां ते नराः स्वर्गगामिनः ॥ ५२
सुवर्णस्य च दातारो गवां च भरतर्षभ ।
यानानां वाहनानां च ते नराः स्वर्गगामिनः॥५३
वैवाहिकानां द्रव्याणां प्रेष्याणां च युधिष्ठिर ।
दातारो वाससां चैव ते नराः स्वर्गगामिनः॥५४
विहारावसथोद्यानकूपारामसभाप्रपाः ।
वप्राणां चैव कर्तारस्ते नराः स्वर्गगामिनः ॥ ५५
निवेशनानां क्षेत्राणां वसतीनां च भारत ।
दातारः प्रार्थितानां च ते नराः स्वर्गगामिनः॥५६
रसानां चाथ बीजानां धान्यानां च युधिष्ठिर ।
स्वयमुत्पाद्य दातारः पुरुषाः स्वर्गगामिनः ॥५७
यस्मिंस्तस्मिन्कुले जाता बहुपुत्राः शतायुषः ।
सानुक्रोशा जितक्रोधाः पुरुषाः स्वर्गगामिनः५८
एतदुक्तममुत्रार्थं दैवं पित्र्यं च भारत ।
दानधर्मं च दानस्य यत्पूर्वमृषिभिः कृतम् ॥५९

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

भीष्मेण युधिष्ठिरंप्रति हिंसाभावेपि ब्रह्महत्याप्राप्तिप्रतिपादकव्यासवचनानुवादः ॥ १ ॥

युधिष्ठिर उवाच ।
इदं मे तत्त्वतो राजन्वक्तुमर्हसि भारत ।
अहिंसयित्वाऽपि कथं ब्रह्महत्या विधीयते ॥ १
भीष्म उवाच ।
व्यासमामन्त्र्य राजेन्द्र पुरा यत्पृष्टवानहम् ।
तत्तेऽहं संप्रवक्ष्यामि तदिहैकमनाः शृणु ॥ २
चतुर्थस्त्वं वसिष्ठस्य तत्त्वमाख्याहि मे मुने ।
अहिंसयित्वा केनेह ब्रह्महत्या विधीयते ॥ ३
इति पृष्टो मया राजन्पराशरशरीरजः ।
अब्रवीन्निपुणो धर्मे निःसंशयमनुत्तमम् ॥ ४
ब्राह्मणं स्वयमाहूय भिक्षार्थे कृशवृत्तिनम् ।
ब्रूयान्नास्तीति यः पश्चात्तं विद्याद्ब्रह्मघातिनम् ॥५
मध्यस्थस्येह विप्रस्य योऽनूचानस्य भारत ।
वृत्तिं हरति दुर्बुद्धिस्तं विद्याद्ब्रह्मघातिनम् ॥ ६
गोकुलस्य तृषार्तस्य जलार्थमभिधावतः ।
उत्पादयति यो विघ्नं तं विद्याद्ब्रह्मघातिनम् ॥७
यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम् ।
दूषयत्यनभिज्ञाय तं विद्याद्ब्रह्मघातिनम् ॥ ८
आत्मजां रूपसंपन्नां महतीं सदृशे वरे ।
न प्रयच्छति यः कन्यां तं विद्याद्ब्रह्मघातिनम् ॥९
अधर्मनिरतो मूढो मिथ्या यो वै द्विजातिषु ।
दद्यान्मर्मातिगं शोकं तं विद्याद्ब्रह्मघातिनम् ॥१०
चक्षुषा विप्रहीणस्य पङ्गुलस्य जडस्य वा ।
हरेत यो वै सर्वस्वं तं विद्याद्ब्रह्मघातिनम् ॥ ११
आश्रमे वा वने वाऽपि ग्रामे वा यदि वा पुरे ।
अग्निं समुत्सृजेन्मोहात्तं विद्याद्ब्रह्मघातिनम् ॥१२

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

कर्तारः पालनकर्तारः ॥ ४६ ॥ आराधनेन इतरान् सुखयन्ति ते तथा ॥ ५१ ॥ दानस्य प्रत्यर्पणस्य । दानं च तद्धर्मं चेति शोधको धर्मः दैप् शोधन इति धातुः अमुत्रार्थं परलोकफलम् ॥ ५७ ॥ द्विषष्टितमोऽध्यायः ॥ ६२ ॥

चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

भीष्मेण युधिष्ठिरंप्रति नद्यादितीर्थानां तत्तन्नामविशेषनिर्देशेन तत्सेवनफलप्रतिपादकगौतमाङ्गिरःसंवादानुवादः ॥ १ ॥

युधिष्ठिर उवाच ।
तीर्थानां दर्शनं श्रेयः स्नानं च भरतर्षभ ।
श्रवणं च महाप्राज्ञ श्रोतुमिच्छामि तत्त्वतः ॥ १
पृथिव्यां यानि तीर्थानि पुण्यानि भरतर्षभ ।
वक्तुमर्हसि मे तानि श्रोताऽस्मि नियतं प्रभो ॥२
भीष्म उवाच ।
इममङ्गिरसा प्रोक्तं तीर्थवंशं महाद्युते ।
श्रोतुमर्हसि भद्रं ते प्राप्स्यसे धर्ममुत्तमम् ॥ ३
तपोवनगतं विप्रमभिगम्य महामुनिम् ।
पप्रच्छाङ्गिरसं धीरं गौतमः संशितव्रतः ॥ ४
अस्ति मे भगवन्कश्चित्तीर्थेभ्यो धर्मसंशयः ।
तत्सर्वं श्रोतुमिच्छामि तन्मे शंस महामुने ॥ ५
उपस्पृश्य फलं किं स्यात्तेषु तीर्थेषु वै मुने ।
प्रेत्यभावे महाप्राज्ञ तद्यथाऽस्ति तथा वद ॥ ६
अङ्गिरा उवाच ।
सप्ताहं चन्द्रभागां वै वितस्तामूर्मिमालिनीम् ।
विगाह्य वै निराहारो निर्मलो मुनिवद्भवेत् ॥ ७
काश्मीरमण्डले नद्यो याः पतन्ति महास्वनम् ।
ता नदीः सिन्धुमासाद्य शीलवान्स्वर्गमाप्नुयात् ॥८
पुष्करं च प्रभासं च नैमिषं सागरोदकम् ।
देविकामिन्द्रमार्गं च स्वर्गबिन्दुं विगाह्य च ॥९
विबोध्यते विमानस्थः सोऽप्सरोभिरभिष्टुतः ।
हिरण्यबिन्दुमालक्ष्य प्रयतश्चाभिवाद्य च ॥ १०
कुशेशये च देवत्वं धूयते तस्य किल्बिषम् ।
इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ ॥ ११
करतोयां कुरङ्गे च त्रिरात्रोपोषितो नरः ।
अश्वमेधमवाप्नोति विगाह्य प्रयतः शुचिः ॥ १२
गङ्गाद्वारे कुशावर्ते बिल्वके नीलपर्वते ।
तथा कनखले स्नात्वा धूतपाप्मा दिवं व्रजेत् ॥१३
अपां ह्रद उपस्पृश्य वाजिमेधफलं लभेत् ।
ब्रह्मचारी जितक्रोधः सत्यसन्धस्त्वहिंसकः ॥ १४
यत्र भागीरथी गङ्गा वहते दिशमुत्तरम् ।
महेश्वरस्य त्रिस्थाने यो नरस्त्वभिषिच्यते ॥ १५
एकमासं निराहारः स पश्यति हि देवताः ।
सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन् ॥ १६
अर्थान्वै लभते भोक्तुं यो नरो जायते पुनः ।
महाश्रम उपस्पृश्य योऽग्निहोत्रपरः शुचिः ॥ १७
एकमासं निराहारः सिद्धिं मासेन स व्रजेत् ।
महाह्रद उपस्पृश्य भृगुतुङ्गे त्वलोलुपः ॥ १८
त्रिरात्रोपोषितो भूत्वा मुच्यते ब्रह्महत्यया ।
कन्याकूप उपस्पृश्य बलाकायां कृतोदकः ॥ १९
देवेषु लभते कीर्तिं यशसा च विराजते ॥ २०
देविकायामुपस्पृश्य तथा सुन्दरिकाह्रदे ।
अश्विन्यां रूपवर्चस्कं प्रेत्य वै लभते नरः ॥ २१
महागङ्गामुपस्पृश्य कृत्तिकाङ्गारके तथा ।
पक्षमेकं निराहारः स्वर्गमाप्नोति निर्मलः ॥ २२
वैमानिक उपस्पृश्य किङ्किणीकाश्रमे तथा ।
निवासेऽप्सरसां दिव्ये कामचारी महीयते ॥ २३
कालिकाश्रममासाद्य विपाशायां कृतोदकः ।
ब्रह्मचारी जितक्रोधस्त्रिरात्रं मुच्यते भवात् ॥२४
आश्रमे कृत्तिकानां तु स्नात्वा यस्तर्पयेत्पितॄन् ।
तोषयित्वा महादेवं निर्मलः स्वर्गमाप्नुयात् ॥ २५
महाकूपमुपस्पृश्य त्रिरात्रोपोषितः शुचिः ।
त्रसानां स्थावराणां च द्विपदानां भयं त्यजेत् ॥२६
देवदारुवने स्नात्वा धूतपाप्मा कृतोदकः ।
देवशब्दमवाप्नोति सप्तरात्रोषितः शुचिः ॥ २७
शरस्तम्बे कुशस्तम्बे द्रोणशर्मपदे तथा ।
अपांप्रपतनासेवी सेव्यते सोऽप्सरोगणैः ॥ २८

तीर्थवंशं तीर्थसंघम् ॥ ३ ॥ तीर्थेभ्यः तीर्थान्युद्दिश्य ॥ ५ ॥ प्रेत्यभावे जन्मान्तरे ॥ ६ ॥ मुनिवद्भवेत् मुनीनां गतिं लभेतेत्यर्थः ॥ ७ ॥ सिंधुं समुद्रं पतन्तीत्यन्वयः ॥ ८ ॥ स्वर्गबिन्दुं विगाह्येति थ. ध. पाठः ॥ ९ ॥ रूपवर्चसोः समाहारः रूपवर्चस्कम् । वर्चस्तेजः ॥ २१ ॥ त्रसानां जङ्गमानाम् ॥ २६ ॥

चित्रकूटे जनस्थाने तथा मन्दाकिनीजले ।
विगाह्य वै निराहारो राजलक्ष्म्या निषेव्यते॥ २९
श्यामायास्त्वाश्रमं गत्वा उषित्वा चाभिषिच्य च ।
एकपक्षं निराहारस्त्वन्तर्धानफलं लभेत् ॥ ३०
कौशिकीं तु समासाद्य वायुभक्षस्त्वलोलुपः ।
एकविंशतिरात्रेण स्वर्गमारोहते नरः ॥ ३१
मतङ्गवाप्यां यः स्नायादेकरात्रेण सिध्यति ।
विगाहति ह्यनालम्बमन्धकं वै सनातनम् ॥ ३२
नैमिषे स्वर्गतीर्थे च उपस्पृश्य जितेन्द्रियः ।
फलं पुरुषमेधस्य लभेन्मासं कृतोदकः ॥ ३३
गङ्गाह्रद उपस्पृश्य तथा चैवोत्पलावने ।
अश्वमेधमवाप्नोति तत्र मासं कृतोदकः ॥ ३४
गङ्गायमुनयोस्तीर्थे तथा कालञ्जरे गिरौ ।
दशाश्वमेधानाप्नोति तत्र मासं कृतोदकः ॥ ३५
षष्टिह्रद उपस्पृश्य चान्नदानाद्विशिष्यते ॥ ३६
दशतीर्थसहस्राणि तिस्रः कोट्यस्तथाऽपराः ।
समागच्छन्ति माघ्यां तु प्रयागे भरतर्षभ ॥ ३७
माघमासं प्रयागे तु नियतः संशितव्रतः ।
स्नात्वा तु भरतश्रेष्ठ निर्मलः स्वर्गमाप्नुयात् ॥३८
मरुद्गण उपस्पृश्य पितृणामाश्रमे शुचिः ।
वैवस्वतस्य तीर्थे च तीर्थभूतो भवेन्नरः ॥ ३९
तथा ब्रह्मसरो गत्वा भागीरथ्यां कृतोदकः ।
एकमासं निराहारः सोमलोकमवाप्नुयात् ॥ ४०
उत्पातके नरः स्नात्वा अष्टावक्रे कृतोदकः ।
द्वादशाहं निराहारो नरमेधफलं लभेत् ॥ ४१
अश्मपृष्ठे गयायां च निरविन्दे च पर्वते ।
तृतीयां क्रौञ्चपद्यां च ब्रह्महत्यां विशुध्यते ॥४२
कलविङ्क उपस्पृश्य विद्याच्च बहुशो जलम् ।
अग्नेः पुरे नरः स्नात्वा अग्निकन्यापुरे वसेत् ॥४३
करवीरपुरे स्नात्वा विशालायां कृतोदकः ।
देवह्रद उपस्पृश्य ब्रह्मभूतो विराजते ॥ ४४
पुनरावर्तनन्दां च महानन्दां च सेव्य वै ।
नन्दने सेव्यते दान्तस्त्वप्सरोभिरहिंसकः ॥ ४५
उर्वशीं कृत्तिकायोगे गत्वा चैव समाहितः ।
लौहित्ये विधिवत्स्नात्वा पुण्डरीकफलं लभेत् ॥४६
रामह्रद उपस्पृश्य विपाशायां कृतोदकः ।
द्वादशाहं निराहारः कल्मषाद्विप्रमुच्यते ॥ ४७
महाह्रद उपस्पृश्य शुद्धेन मनसा नरः ।
एकमासं निराहारो जमदग्निगतिं लभेत् ॥ ४८
विन्ध्ये संताप्य चात्मानं सत्यसन्धस्त्वहिंसकः ।
विनयात्तप आस्थाय मासेनैकेन सिध्यति ॥ ४९
'मुण्डे ब्रह्मगवा चैव निरिंचि देवपर्वतम् ।
देवह्रदमुपस्पृश्य ब्रह्मभूतो विराजते ।
कुमारपद्मास्थाय मासेनैकेन शुध्यति ॥' ५०
नर्मदायामुपस्पृश्य तथा शूर्पारकोदके ।
एकपक्षं निराहारो राजपुत्रो विधीयते ॥ ५१
जम्बूमार्गे त्रिभिर्मासैः संयतः सुसमाहितः ।
अहोरात्रेण चैकेन सिद्धिं समधिगच्छति ॥ ५२
कोकामुखे विगाह्याथ गत्वा चाञ्जलिकाश्रमम् ।
शाकभक्षश्चीरवासाः कुमारीर्विन्दते दश ॥ ५३
वैवस्वतस्य सदनं न स गच्छेत्कदाचन ।
यस्य कन्याह्रदे वासो देवलोकं स गच्छति ॥ ५४
प्रभासे त्वेकरात्रेण अमावास्यां समाहितः ।
सिद्ध्यते तु महाबाहो यो नरो जायतेऽमरः ॥ ५५
उज्जानक उपस्पृश्य आर्ष्टिषेणस्य चाश्रमे ।
पिङ्गायाश्चाश्रमे स्नात्वा सर्वपापैः प्रमुच्यते ॥ ५६
कुल्यायां समुपस्पृश्य जप्त्वा चैवाघमर्षणम् ।
अश्वमेधमवाप्नोति त्रिरात्रोपोषितो नरः ॥ ५७
पिण्डारक उपस्पृश्य एकरात्रोषितो नरः ।
अग्निष्टोममवाप्नोति प्रभातां शर्वरीं शुचिः ॥ ५८
तथा ब्रह्मसरो गत्वा धर्मारण्योपशोभितम् ।
पुण्डरीकमवाप्नोति उपस्पृश्य नरः शुचिः ॥ ५९
मैनाके पर्वते स्नात्वा तथा सन्ध्यामुपास्य च ।
कामं जित्वा च वै मासं सर्वयज्ञफलं लभेत् ॥६०

अन्तर्धानफलं गन्धर्वादिभोगम् ॥ ३० ॥ कालाञ्जने गिराविति थ. ध. पाठः ॥ ३५ ॥ समागच्छन्त्यमावास्यामिति थ. पाठः ॥ ३७ ॥ उर्वशीं उर्वशीतीर्थम् । कृत्तिकायोगे कार्तिक्यां पौर्णमास्याम् ॥ ४६ ॥

कालोदकं नन्दिकुण्डं तथा चोत्तरमानसम् ।
अभ्येत्य योजनशताद्भ्रूणहा विप्रमुच्यते ॥ ६१
नन्दीश्वरस्य मूर्तिं तु दृष्ट्वा मुच्येत किल्बिषैः ।
स्वर्गमार्गे नरः स्नात्वा ब्रह्मलोकं स गच्छति ॥६२
विख्यातो हिमवान्पुण्यः शंकरश्वशुरो गिरिः ।
आकरः सर्वरत्नानां सिद्धचारणसेवितः ॥ ६३
'दर्शनाद्गमनात्पूतो भवेदनशनादपि ।'
शरीरमुत्सृजेत्तत्र विधिपूर्वमनाशके ॥ ६४
अध्रुवं जीवितं ज्ञात्वा यो वै वेदान्तगो द्विजः ।
अभ्यर्च्य देवतास्तत्र नमस्कृत्य मुनींस्तथा ।
ततः सिद्धो दिवं गच्छेद्ब्रह्मलोकं सनातनम् ॥ ६५
कामं क्रोधं च लोभं च यो जित्वा तीर्थमावसेत् ।
न तेन किंचिन्न प्राप्तं तीर्थाभिगमनाद्भवेत् ॥६६
यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च ।
मनसा तानि गम्यानि सर्वतीर्थसमीक्षया ॥ ६७
इदं मेध्यमिदं पुण्यमिदं स्वर्ग्यमनुत्तमम् ।
इदं रहस्यं वेदानामाप्लाव्यं पावनं तथा ॥ ६८
इदं दद्याद्द्विजातीनां साधोरात्महितस्य च ।
सुहृदां च जपेत्कर्णे शिष्यस्यानुगतस्य च ॥ ६९
दत्तवान्गौतमस्यैतदङ्गिरा वै महातपाः ।
अङ्गिराः समनुज्ञातः काश्यपेन च धीमता ॥ ७०
महर्षीणामिदं जप्यं पावनानां तथोत्तमम् ।
जपंश्चाभ्युत्थितः शश्वन्निर्मलः स्वर्गमाप्नुयात् ॥७१
इदं यश्चापि शृणुयाद्रहस्यं त्वङ्गिरोमतम् ।
उत्तमे च कुले जन्म लभेज्जातीश्च संस्मरेत् ॥ ७२

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

भीष्मेण युधिष्ठिरंप्रति गङ्गामहिमप्रतिपादकसिद्धशिलवृत्तिसंवादानुवादः ॥ १ ॥

वैशंपायन उवाच ।
बृहस्पतिसमं बुद्ध्या क्षमया ब्रह्मणः समम् ।
पराक्रमे शक्रसममादित्यसमतेजसम् ॥ १
गाङ्गेयमर्जुनेनाजौ निहतं भूरितेजसम् ।
भ्रातृभिः सहितोऽन्यैश्च पर्यपृच्छद्युधिष्ठिरः ॥ २
शयानं वीरशयने कालाकाङ्क्षिणमच्युतम् ।
आजग्मुर्भरतश्रेष्ठं द्रष्टुकामा महर्षयः ॥ ३
अत्रिर्वसिष्ठोऽथ भृगुः पुलस्त्यः पुलहः क्रतुः ।
अङ्गिरा गौतमोऽगस्त्यः सुमतिः सुयतात्मवान् ॥४
विश्वामित्रः स्थूलशिराः संवर्तः प्रमतिर्दमः ।
बृहस्पत्युशनोव्यासश्च्यवनः काश्यपो ध्रुवः ॥ ५
दुर्वासा जमदग्निश्च मार्कण्डेयोऽथ गालवः ।
भरद्वाजोऽथ रैभ्यश्च यवक्रीतस्त्रितस्तथा ॥ ६
स्थूलाक्षः शबलाक्षश्च कण्वो मेधातिथिः कृशः ।
नारदः पर्वतश्चैव सुधन्वाऽथैकतो द्विजः ॥ ७
नितंभूर्भुवनो धौम्यः शतानन्दोऽकृतव्रणः ।
जामदग्न्यस्तथा रामः कचश्चेत्येवमादयः ।
समागता महात्मानो भीष्मं द्रष्टुं महर्षयः ॥ ८
तेषां महात्मनां पूजामागतानां युधिष्ठिरः ।
भ्रातृभिः सहितश्चक्रे यथावदनुपूर्वशः ॥ ९
ते पूजिताः सुखासीनाः कथाश्चक्रुर्महर्षयः ।
भीष्माश्रिताः सुमधुराः सर्वेन्द्रियमनोहराः ॥१०
भीष्मस्तेषां कथाः श्रुत्वा ऋषीणां भावितात्मनाम्।
मेने दिविष्ठमात्मानं तुष्ट्या परमया युतः ॥ ११
ततस्ते भीष्ममामन्त्र्य पाण्डवांश्च महर्षयः ।
अन्तर्धानं गताः सर्वे सर्वेषामेव पश्यताम् ॥ १२
तानृषीन्सुमहाभागानन्तर्धानगतानपि ।
पाण्डवास्तुष्टुवुः सर्वे प्रणेमुश्च मुहुर्मुहुः ॥ १३

इदं तीर्थसेवनम् । मेध्यं यज्ञफलप्रदम् । पुण्यं पापघ्नम् ॥ ६८ ॥ समनुज्ञातः प्रार्थितः । काश्यपेन एतद्विज्ञातुकामेनेति शेषः ॥ ७० ॥ चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

यदाऽपृच्छत्तदैवाजग्मुरिति द्वितीयेन यत्तदोरध्याहारेणान्वयः ॥ २ ॥

प्रसन्नमनसः सर्वे गाङ्गेयं कुरुसत्तमम् ।
उपतस्थुर्यथोद्यन्तमादित्यं मन्त्रकोविदाः ॥ १४
प्रभावं तपसस्तेषामृषीणां वीक्ष्य पाण्डवाः ।
प्रकाशन्तो दिशः सर्वा विस्मयं परमं ययुः ॥१५
महाभाग्यं परं तेषामृषीणामनुचिन्त्य ते ।
पाण्डवाः सह भीष्मेण कथाश्चक्रुस्तदाश्रयाः ॥१६
कथान्ते शिरसा पादौ स्पृष्ट्वा भीष्मस्य पाण्डवः ।
धर्म्यं धर्मसुतः प्रश्नं पर्यपृच्छद्युधिष्ठिरः ॥ १७
के देशाः के जनपदा आश्रमाः के च पर्वताः ।
प्रकृष्टाः पुण्यतः काश्च ज्ञेया नद्यः पितामह ॥१८
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शिलोञ्छवृत्तेः संवादं सिद्धस्य च युधिष्ठिर ॥ १९
इमां कश्चित्परिक्रम्य पृथिवीं शैलभूषणाम् ।
असकृद्द्विपदां श्रेष्ठः श्रेष्ठस्य गृहमेधिनः ॥ २०
शिलवृत्तेर्गृहं प्राप्तः स तेन विधिनाऽर्चितः ।
उवास रजनीं तत्र सुमुखः सुखभागृषिः ॥ २१
शिलवृत्तिस्तु यत्कृत्यं प्रातस्तत्कृतवाञ्शुचिः ।
कृतकृत्यमुपातिष्ठत्सिद्धं तमतिथिं तदा ॥ २२
तौ समेत्य महात्मानौ सुखासीनौ कथाः शुभाः ।
चक्रतुर्वेदसंबद्धास्तच्छेषकृतलक्षणाः ॥ २३
शिलवृत्तिः कथान्ते तु सिद्धमामन्त्र्य यत्नतः ।
प्रश्नं पप्रच्छ मेधावी यन्मां त्वं परिपृच्छसि ॥ २४
शिलवृत्तिरुवाच ।
के देशाः के जनपदाः केऽऽश्रमाः के च पर्वताः ।
प्रकृष्टाः पुण्यतः काश्च ज्ञेया नद्यस्तदुच्यताम् ॥२५
सिद्ध उवाच ।
ते देशास्ते जनपदास्तेऽऽश्रमास्ते च पर्वताः ।
येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा ॥ २६
तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः ।
गतिं तां न लभेज्जन्तुर्गङ्गां संसेव्य यां लभेत् ॥२७
स्पृष्टानि येषां गाङ्गेयैस्तोयैर्गात्राणि देहिनाम् ।
न्यस्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते ॥२८
सर्वाणि येषां गाङ्गेयैस्तोयैः कार्याणि देहिनाम् ।
गां त्यक्त्वा मानवा विप्र दिवि तिष्ठन्ति ते जनाः॥
पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः ।
पश्चाद्गङ्गां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम्॥३०
'युक्ताश्च पातकैस्त्यक्त्वा देहं शुद्धा भवन्ति ते ।
मुच्यन्ते देहसंत्यागाद्गङ्गायमुनसंगमे ॥' ३१
स्नातानां शुचिभिस्तोयैर्गाङ्गेयैः प्रयतात्मनाम् ।
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ॥ ३२
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ३३
अपहत्य तमस्तीव्रं यथा भात्युदये रविः ।
तथाऽपहत्य पाप्मानं भाति गङ्गाजलोक्षितः॥ ३४
विसोमा इव शर्वर्यो विपुष्पास्तरवो यथा ।
तद्वद्देशा दिशश्चैव हीना गङ्गाजलैः शिवैः ॥ ३५
वर्णाश्रमा यथा सर्वे धर्मज्ञानविवर्जिताः ।
क्रतवश्च यथाऽसोमास्तथा गङ्गां विना जगत्॥ ३६
यथा हीनं नभोऽर्केण भूः शैलैः खं च वायुना ।
तथा देशा दिशश्चैव गङ्गाहीना न संशयः ॥ ३७
त्रिषु लोकेषु ये केचित्प्राणिनः सर्व एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति गङ्गाजलैः शुभैः॥ ३८
'अन्ये च देवा मुनयः प्रेतानि पितृभिः सह ।
तर्पितास्तृप्तिमायान्ति त्रिषु लोकेषु सर्वशः ॥'३९
यस्तु सूर्येण निष्टप्तं गाङ्गेयं पिबते जलम् ।
गवां निर्हारनिर्मुक्ताद्यावकात्तद्विशिष्यते ॥ ४०
इन्दुव्रतसहस्रं तु यश्चरेत्कायशोधनम् ।
पिबेद्यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ॥४१
तिष्ठेद्युगसहस्रं तु पदेनैकेन यः पुमान् ।

महाभाग्यं योगैश्वर्यं खेचरत्वान्तर्धानशक्त्यादिसिद्धिमत्त्वम् ॥ १६ ॥ देशाः भूमिभागाः । जनपदाः महाजननिवासस्थानानि । आश्रमाः ऋषिस्थानानि ॥ १८ ॥ ते देशा इति प्रकृष्टाः पुण्यत इत्यनुषङ्गः ॥ २६ ॥ गात्राण्यस्थीनि । न्यस्तानि गङ्गायाम् । त्यक्तानि यानि वै तेषां त्यागात्स्वर्गो विधीयते इति ध. पाठः ॥ २८ ॥ व्युष्टिः पुण्यवृद्धिः ॥ ३२ ॥ यावदस्थि मनुष्याणामिति थ. ध. पाठः ॥ ३३ ॥ गवां निर्हार आहारनिर्गमनमार्गस्ततो निर्मुक्तं यावकं यवविकारस्तस्मात् । गां यवानादयित्वा तच्छकृदन्तर्गतान् यवान् पक्त्वा भुञ्जानो यावकव्रतीत्युच्यते ॥ ४० ॥ इन्दुव्रतं चान्द्रायणम् ॥ ४१ ॥

मासमेकं तु गङ्गायां समौ स्यातां न वा समौ ॥ ४२
लम्बतेऽवाक्शिरा यस्तु युगानामयुतं पुमान् ।
तिष्ठेद्यथेष्टं यश्चापि गङ्गायां स विशिष्यते ॥ ४३
अग्नौ प्रास्तं प्रधूयेत यथा तूलं द्विजोत्तम ।
तथा गङ्गावगाढस्य सर्वपापं प्रधूयते ॥ ४४
भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ।
गतिमन्वेषमाणानां न गङ्गासदृशी गतिः ॥ ४५
भवन्ति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात् ।
गङ्गाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते ॥ ४६
अप्रतिष्ठाश्च ये केचिदधर्मशरणाश्च ये ।
येषां प्रतिष्ठा गङ्गेह शरणं शर्म वर्म च ॥ ४७
प्रकृष्टैरशुभैर्ग्रस्तानने कैः पुरुषाधमान् ।
पततो नरके गङ्गा संश्रितान्प्रेत्य तारयेत् ॥ ४८
ते संविभक्ता मुनिभिर्नूनं देवैः सवासवैः ।
येऽभिगच्छन्ति सततं गङ्गां मतिमतांवर ॥ ४९
विनयाचारहीनाश्च अशिवाश्च नराधमाः ।
ते भवन्ति शिवा विप्र ये वै गङ्गामुपाश्रिताः ॥५०
यथा सुराणाममृतं पितृणां च यथा स्वधा ।
सुधा यथा च नागानां तथा गङ्गाजलं नृणाम् ॥५१
उपासते यथा बाला मातरं क्षुधयाऽर्दिताः ।
श्रेयस्कामास्तथा गङ्गामुपासन्तीह देहिनः ॥ ५२
स्वायंभुवं यथा स्थानं सर्वेषां श्रेष्ठमुच्यते ।
स्नातानां सरितां श्रेष्ठा गङ्गा तद्वदिहोच्यते ॥ ५३
'उपजीव्या यथा धेनुर्लोकानां ब्राह्ममेव वा ।
हविषां तु यथा सोमस्तरणेषु तथा त्वियम् ॥५४
यथोपजीविनां धेनुर्देवादीनां परा स्मृता ।
तथोपजीविनां गङ्गा सर्वप्राणभृतामिह ॥ ५५
देवाः सोमार्कसंस्थानि यथा सत्रादिभिर्मखैः ।
अमृतान्युपजीवन्ति तथा गङ्गाजलं नराः ॥ ५६
जाह्नवीपुलिनोत्थाभिः सिकताभिः समुक्षितम् ।
आत्मानं मन्यते लोको दिविष्ठमिव शोभितम् ॥५७
जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बिभर्ति यः ।
बिभर्ति रूपं सोऽर्कस्य तमोनाशाय निर्मलम् ॥५८
गङ्गोर्मिभिरथो दिग्धः पुरुषं पवनो यदा ।
स्पृशते सोऽस्य पाप्मानं सद्य एवापकर्षति ॥५९
व्यसनैरभितप्तस्य नरस्य विनशिष्यतः ।
गङ्गादर्शनजा प्रीतिर्व्यसनान्यपकर्षति ॥ ६०
हंसारावैः कोकरवै रवैरन्यैश्च पक्षिणाम् ।
पस्पर्ध गङ्गा गन्धर्वान्पुलिनैश्च शिलोच्चयान् ॥६१
हंसादिभिः सुबहुभिर्विविधैः पक्षिभिर्वृताम् ।
गङ्गां गोकुलसंबाधां दृष्ट्वा स्वर्गोऽपि विस्मृतः ॥६२
न सा प्रीतिर्दिविष्ठस्य सर्वकामानुपाश्नतः ।
संभवेद्या परा प्रीतिर्गङ्गायाः पुलिने नृणाम् ॥६३
वाङ्मनःकर्मजैर्ग्रस्तः पापैरपि पुमानिह ।
वीक्ष्य गङ्गां भवेत्पूतो अत्र मे नास्ति संशयः ॥६४
सप्तावरान्सप्त परान्पितॄंस्तेभ्यश्च ये परे ।
पुमांस्तारयते गङ्गां वीक्ष्य स्पृष्ट्वाऽवगाह्य च ॥६५
श्रुताभिलषिता पीता स्पृष्टा दृष्टाऽवगाहिता ।
गङ्गा तारयते नृणामुभौ वंशौ विशेषतः ॥ ६६
'तत्तीरगानां तपसा श्राद्धपारायणादिभिः ।
गङ्गाद्वारप्रभृतिभिस्तत्तीर्थैर्न परं नृणाम् ॥ ६७
सायं प्रातः स्मरेद्गङ्गां नित्यं स्नाने तु कीर्तयेत् ।
तर्पणे पितृपूजासु मरणे चापि संस्मरेत् ॥' ६८
दर्शनात्स्पर्शनात्पानात्तथा गङ्गेति कीर्तनात् ।
पुनात्यपुण्यान्पुरुषाञ्शतशोऽथ सहस्रशः ॥ ६९
य इच्छेत्सफलं जन्म जीवितं श्रुतमेव च ।
स पितॄंस्तर्पयेद्गङ्गामभिगम्य सुरांस्तथा ॥ ७०
न श्रुतैर्न च वित्तेन कर्मणा न च तत्फलम् ।
प्राप्नुयात्पुरुषोऽत्यन्तं गङ्गां प्राप्य यदाप्नुयात् ॥७१
जात्यन्धैरिह तुल्यास्ते मृतैः पङ्गुभिरेव च ।
समर्था ये न पश्यन्ति गङ्गां पुण्यजलां शिवाम् ॥७२
भूतभव्यभविष्यज्ञैर्महर्षिभिरुपस्थिताम् ।
देवैः सेन्द्रैश्च को गङ्गां नोपसेवेत मानवः ॥ ७३
वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः ।
विद्यावद्भिः श्रितां गङ्गां पुमान्को नाम नाश्रयेत् ७४
उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसंमतः ।

धूयते दूरे जायते भस्मीभूयापि न शिष्यते इत्यर्थः ॥ ४४ ॥

कामान् भोगान् ॥ ६३ ॥ उपस्थितां नित्यं सेविताम् ॥ ७३ ॥

चिन्तयेन्मनसा गङ्गां स गतिं परमां लभेत् ॥ ७५
न भयेभ्यो भयं तस्य न पापेभ्यो न राजतः ।
आदेहपतनाद्गङ्गामुपास्ते यः पुमानिह ॥ ७६
गगनाद्गां पतन्तीं वै महापुण्यां महेश्वरः ।
दधार शिरसा गङ्गां तामेव दिवि सेवते ॥ ७७
अलंकृतास्त्रयो लोकाः पथिभिर्विमलैस्त्रिभिः ।
यस्तु तस्या जलं सेवेत्कृतकृत्यः पुमान्भवेत् ॥ ७८
दिवि ज्योतिर्यथाऽऽदित्यः पितॄणां चैव चन्द्रमाः ।
देवेशश्च यथा नृणां गङ्गा च सरितां तथा ॥ ७९
मात्रा पित्रा सुतैर्दारैर्विमुक्तस्य धनेन वा ।
न भवेद्धि तथा दुःखं यथा गङ्गावियोगजम् ॥८०
नारण्यैर्नेष्टविषयैर्न सुतैर्न धनागमैः ।
तथा प्रसादो भवति गङ्गां वीक्ष्य यथा भवेत् ॥ ८१
पूर्णमिन्दुं यथा दृष्ट्वा नृणां दृष्टिः प्रसीदति ।
तथा त्रिपथगां दृष्ट्वा नृणां दृष्टिः प्रसीदति ॥ ८२
तद्भावस्तद्गतमनास्तन्निष्ठस्तत्परायणः ।
गङ्गां योऽनुगतो भक्त्या स तस्याः प्रियतां व्रजेत्८३
भूस्थैः खस्थैर्दिविष्ठैश्च भूतैरुच्चावचैरपि ।
गङ्गा विगाह्या सततमेतत्कार्यतमं सताम् ॥ ८४
विश्वलोकेषु पुण्यत्वाद्गङ्गायाः प्रथितं यशः ।
'दुर्मृताननपत्यांश्च सा मृताननयद्दिवम् ।'
यत्पुत्रान्सगरस्येतो भस्माख्याननयद्दिवम् ॥ ८५
वाग्भीरिताभिः सुमनोहराभि-
र्द्रुताभिरत्यर्थसमुत्थिताभिः ।
गङ्गोर्मिभिर्भानुमतीभिरिद्धाः
सहस्ररश्मिप्रतिमा भवन्ति ॥ ८६
पयस्विनीं घृतिनीमत्युदारां
समृद्धिनीं वेगिनीं दुर्विगाह्याम् ।
गङ्गां गत्वा यैः शरीरं विसृष्टं
गता धीरास्ते विबुधैः समत्वम् ॥ ८७
अन्धाञ्जडान्द्रव्यहीनांश्च गङ्गा
यशस्विनी बृहती विश्वरूपा ।
देवैः सेन्द्रैर्मुनिभिर्मानवैश्च
निषेविता सर्वकामैर्युनक्ति ॥ ८८
ऊर्जस्वतीं मधुमतीं महापुण्यां त्रिवर्त्मगाम् ।
त्रिलोकगोप्त्रीं ये गङ्गां संश्रितास्ते दिवं गताः॥८९
यो वत्स्यति द्रक्ष्यति वाऽपि मर्त्य-
स्तस्मै प्रयच्छन्ति सुखानि देवाः ।
तद्भाविताः स्पर्शनदर्शनेन
इष्टां गतिं तस्य सुरा दिशन्ति ॥ ९०
दक्षां पृश्निं बृहतीं विप्रकृष्टां
शिवामृद्धां भागिनीं सुप्रसन्नाम् ।
विभावरीं सर्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते ॥ ९१
ख्यातिर्यस्याः खं दिवं गां च नित्या-
मूर्ध्वं दिशो विदिशश्चावतस्थे ।
तस्या जलं सेव्य सरिद्वराया
मर्त्याः सर्वे कृतकृत्या भवन्ति ॥ ९२
इयं गङ्गेति नियतं प्रतिष्ठा
गुहस्य रुक्मस्य च गर्भयोषा ।
प्रातस्त्रिवर्गा घृतवहा विपाप्मा
गङ्गाऽवतीर्णा वियतो विश्वतोया ॥ ९३
'नारायणादक्षयात्पूर्वजाता
विष्णोः पादाच्छिशुमाराद्ध्रुवाच्च ।
सोमात्सूर्यान्मेरुरूपाच्च विष्णोः
समागता शिवमूर्ध्नो हिमाद्रिम् ।

इष्टं यागादि तत्प्राप्यैरिष्टविषयैः स्वर्ग्यैः ॥ ८१ ॥ इद्धाः निर्दोषत्वेन दीप्ताः ॥ ८६ ॥ पयोघृते यागीये हविषी समृद्धिर्यागफलं तद्वतीम् । यागादिजं पुण्यं तत्फलं स्वर्गादि च गङ्गाप्राप्त्यैव लभ्यत इत्यर्थः ॥ ८७ ॥ ऊर्क् अन्नपश्वादिः तत्प्रदामित्यर्थः । मधु कर्मफलं ब्रह्म वा तत्प्रदां मधुमतीम् ॥ ८९ ॥ योगं गामिति शेषः । तया गङ्गया भाविताः महत्त्वं गताः देवाः । स्पर्शनदर्शनेन गङ्गाया एव ॥ ९० ॥ दक्षां तारणसमर्थाम् । पृश्निं विष्णुमातरम् । बृहतीं वाचम् । वाग्वै बृहतीतिश्रुतेः । भागिनीं भगानामैश्वर्यादीनां षण्णां समूहो भागं तद्वतीम् । विभावरीं प्रकाशिकाम् ॥ ९१ ॥ गङ्गां दृष्ट्वा इयं गङ्गेति अन्यान् गङ्गां दर्शयतः पुरुषस्य नियतं नियमेन गङ्गैव प्रतिष्ठा संसारावसानहेतुर्भवति । गुहस्य कार्तिकेयस्य रुक्मस्य स्वर्णस्य च गर्भयोषा गर्भधारिणी स्त्री । वियतः सकाशात्प्रातरवतीर्णा त्रिवर्गा धर्मार्थकामदा । घृतवहा जलवाहिनी ।

सत्यावती द्रव्यपरस्य वर्या
दिवो भुवश्चापि वीक्ष्यानुरूपा ॥' ९४
सुताऽवनीध्रस्य हरस्य भार्या
दिवो भुवश्चापि कृतानुरूपा ।
भव्या पृथिव्यां भागिनी चापि राज-
न्गङ्गा लोकानां पुण्यदा वै त्रयाणाम्॥९५
मधुस्रवा घृतधारा घृतार्चि-
र्महोर्मिभिः शोभिता ब्राह्मणैश्च ।
दिवश्च्युता शिरसाऽऽप्ता शिवेन
गङ्गाऽवनीध्रात्रिदिवस्य माता ॥ ९६
योनिर्वरिष्ठा विरजा वितन्वी
शय्याऽचिरा वारिवहा यशोदा ।
विश्वावती चाकृतिरिष्टसिद्धा
गङ्गोक्षितानां भुवनस्य पन्थाः ॥ ९७
क्षान्त्या मह्या गोपने धारणे च
दीप्त्या कृशानोस्तपनस्य चैव ।
तुल्या गङ्गा संमता ब्राह्मणानां
गुहस्य ब्रह्मण्यतया च नित्यम् ॥ ९८
ऋषिष्टुतां विष्णुपदीं पुराणां
सुपुण्यतोयां मनसाऽपि लोके ।
सर्वात्मना जाह्नवीं ये प्रपन्ना-
स्ते ब्रह्मणः सदनं संप्रयाताः ॥ ९९
लोकानिमान्नयति या जननीव पुत्रा-
न्सर्वात्मना सर्वगुणोपपन्ना ।
तत्स्थानकं ब्राह्ममभीप्समानै-
र्गङ्गा सदैवात्मवशैरुपास्या ॥ १००
'न तैर्जुष्टां स्पृशतीं विश्वतोया-
मिरावज्ञां रेवतीं भूधराणाम् ।'
उस्रां पुष्टां मिषतीं विश्वभोज्या-
मिरावतीं धारिणीं भूधराणाम् ।
शिष्टाश्रयाममृतां ब्रह्मकान्तां
गङ्गां श्रयेदात्मवान्सिद्धिकामः ॥ १०१
प्रसाद्य देवान्सविभून्समस्ता-
न्भगीरथस्तपसोग्रेण गङ्गाम् ।
गामानयत्तामभिगम्य शश्व-
त्पुंसां भयं नेह चामुत्र विद्यात् ॥ १०२
उदाहृतः सर्वथा ते गुणानां
मयैकदेशः प्रसमीक्ष्य बुद्ध्या ।
शक्तिर्न मे काचिदिहास्ति वक्तुं
गुणान्सर्वान्परिमातुं तथैव ॥ १०३
मेरोः समुद्रस्य च सर्वरत्नैः
सङ्ख्योपलानामुदकस्य वाऽपि ।
शक्यं वक्तुं नेह गङ्गाजलानां
गुणाख्यानं परिमातुं तथैव ॥ १०४
तस्मादेतान्परया श्रद्धयोक्ता-
न्गुणान्सर्वाञ्जाह्नवीयान्सदैव ।
भवेद्वाचा मनसा कर्मणा च
भक्त्या युक्तः श्रद्धया श्रद्दधानः ॥ १०५
लोकानिमांस्त्रीन्यशसा वितत्य
सिद्धिं प्राप्य महतीं तां दुरापाम् ।
गङ्गाकृतानचिरेणैव लोका-
न्यथेष्टमिष्टान्विहरिष्यसि त्वम् ॥ १०६

विश्वतोया विश्वप्रियतोया ॥ ९३ ॥ अवनीध्रस्य मेरोः हिमवतो वा पर्वतस्य । कृतं अनुरूपं अलंकारो यया सा कृतानुरूपा ॥ ९५ ॥ मधुस्रवा धर्मद्रवा । घृतधारा तेजोधारा घृतार्चिः आज्यस्येव अर्चिर्वर्चो यस्याः । सा अवनीध्रात् पृथिवीं प्राप्तेति शेषः ॥ ९६ ॥ वरिष्ठा योनिः परमकारणम् । विरजा निर्मला । वितन्वी विशेषेण तन्वी सूक्ष्मा । शय्या दीर्घनिद्रा तल्पः । मरणं जाह्नवीतट इति वचनात् । अचिरा शीघ्रा । विश्वावती विश्वं अवन्ती पालयन्ती । नुमभाव आर्षः । इष्टसिद्धा इष्टाः सिद्धा यस्याः सा, सिद्धानामिष्टा इति वा । उक्षितानां स्नातानाम् । भुवनस्य स्वर्गस्य । पुष्पाविला परिवाहा यशोदेति ध. पाठः ॥ ९७ ॥ क्षान्त्यादित्रये मह्या तुल्येति संबन्धः । गुहस्य कुमारस्य संमता । ब्रह्मण्यतया ब्राह्मणजात्यनुग्राहकतया ॥ ९८ ॥ मनसापि प्रपन्नाः किमुत साक्षात् ॥ ९९ ॥ उस्रां धेनुममृतदुघामिति यावत् । मिषतीं पश्यन्तीं सर्वज्ञामित्यर्थः । इरावतीमन्नवतीम् । ब्रह्मणोपि कान्तां चेतोहराम् ॥ १०१ ॥ सविभून् सेश्वरान् । गां पृथ्वीम् ॥ १०२ ॥ मदुक्तान् गङ्गागुणान् ज्ञात्वा वागादिभिः स्तोत्रध्यानस्नानादिषु श्रद्दधानो भवेदिति संबन्धः । गङ्गाकृतान् गङ्गासेवनप्राप्तान् ।

तव मम च गुणैर्महानुभावा
जुषतु मतिं सततं स्वधर्मयुक्तैः ।
अभिमतजनवत्सला हि गङ्गा
जगति युनक्ति सुखैश्च भक्तिमन्तम् ॥१०७
भीष्म उवाच ।
इति परममतिर्गुणानशेषा-
ञ्शिलरतये त्रिपथानुयोगरूपान् ।
बहुविधमनुशास्य तथ्यरूपा-
न्गगनतलं द्युतिमान्विवेश सिद्धः ॥१०८
शिलवृत्तिस्तु सिद्धस्य वाक्यैः संबोधितस्तदा ।
गङ्गामुपास्य विधिवत्सिद्धिं प्राप सुदुर्लभाम् ॥१०९
तथा त्वमपि कौन्तेय भक्त्या परमया युतः ।
गङ्गामभ्येहि सततं प्राप्स्यसे सिद्धिमुत्तमाम् ॥११०
वैशंपायन उवाच ।
श्रुत्वेतिहासं भीष्मोक्तं गङ्गायाः स्तवसंयुतम् ।
युधिष्ठिरः परां प्रीतिमगच्छद्भ्रातृभिः सह ॥१११

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः ॥ ६६ ॥

भीष्मेण युधिष्ठिरंप्रति मानवेषु पूज्यताप्रयोजकगुणप्रतिपादककृष्णनारदसंवादानुवादः ॥ १ ॥

युधिष्ठिर उवाच ।
के पूज्या वै त्रिलोकेऽस्मिन्मानवा भरतर्षभ ।
विस्तरेण तदाचक्ष्व न हि तृप्यामि कथ्यतः ॥ १
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं वासुदेवस्य चोभयोः ॥ २
नारदं प्राञ्जलिं दृष्ट्वा पूजयानं द्विजर्षभान् ।
केशवः परिपप्रच्छ भगवन्कान्नमस्यसि ॥ ३
बहुमानपरस्तेषु भगवन्यान्नमस्यसि ।
शक्यं चेच्छ्रोतुमस्माभिर्ब्रूह्येतद्धर्मवित्तम ॥ ४
नारद उवाच ।
शृणु गोविन्द यानेतान्पूजयाम्यरिमर्दन ।
त्वत्तोऽन्यः कः पुमाँल्लोके श्रोतुमेतदिहार्हति ॥ ५
वरुणं वायुमादित्यं पर्जन्यं जातवेदसम् ।
स्थाणुं स्कन्दं महालक्ष्मीं विष्णुं ब्रह्माणमेव च ॥६
वाचस्पतिं चन्द्रमसमपः पृथ्वीं सरस्वतीम् ।
सततं ये नमस्यन्ति तान्नमस्याम्यहं विभो ॥ ७
तपोधनान्वेदविदो नित्यं वेदपरायणान् ।
महार्हान्वृष्णिशार्दूल सदा संपूजयाम्यहम् ॥ ८
अभुक्त्वा देवकार्याणि कुर्वते येऽविकत्थनाः ।
संतुष्टाश्च क्षमायुक्तास्तान्नमस्याम्यहं विभो ॥ ९
सम्यग्यजन्ति ये चेष्टीः क्षान्ता दान्ता जितेन्द्रियाः
सत्यं धर्मं क्षितिं गाश्च तान्नमस्यामि यादव ॥१०
ये वै तपसि वर्तन्ते वने मूलफलाशनाः ।
असंचयाः क्रियावन्तस्तान्नमस्यामि यादव ॥ ११
ये भृत्यभरणे शक्ताः सततं चातिथिव्रताः ।
भुञ्जते देवशेषाणि तान्नमस्यामि यादव ॥ १२
ये वेदं प्राप्य दुर्धर्षा वाग्मिनो ब्रह्मचारिणः ।
याजनाध्यापने युक्ता नित्यं तान्पूजयाम्यहम् ॥१३
प्रसन्नहृदयाश्चैव सर्वसत्त्वेषु नित्यशः ।
आपृष्ठतापात्स्वाध्याये युक्तास्तान्पूजयाम्यहम् १४
गुरुप्रसादे स्वाध्याये यतन्तो ये स्थिरव्रताः ।
शुश्रूषवोऽनसूयन्तस्तान्नमस्यामि यादव ॥ १५

इष्टान् संकल्पसिद्धान् ॥ १०६ ॥ महानुभावा गङ्गा मतिं जुषतु प्रीणातु । गङ्गादर्शनादिना मतिः प्रसीदत्वित्यर्थः । अभिमतः श्रद्धालुः ॥ १०७ ॥ पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

मानवैर्भरतर्षभेति झ. थ. ध. पाठः ॥ १ ॥ तेषु मानवेषु बहुमानपरः सन् कान्नमस्यसीति योज्यम् ॥ ४ ॥ महार्हान् महान् अर्हः पूजा येषाम् । अतिपूज्यानित्यर्थः ॥ ८ ॥ अविकत्थनाः श्लाघाहीनाः ॥ ९ ॥ सत्यं धर्मं च यजन्ति पूजयन्ति । क्षितिं गाश्च यजन्ति ब्राह्मणेभ्यः प्रयच्छन्ति । यज देवपूजासंगतिकरणदानेषु । सस्यं धनं क्षितिमिति थ. ध. पाठः ॥ १० ॥ आपृष्ठतापान् यावन्मध्याह्नम् ॥ १४ ॥ स्वाध्याये

सुव्रता मुनयो ये च ब्राह्मणाः सत्यसंगराः ।
वोढारो हव्यकव्यानां तान्नमस्यामि यादव ॥ १६
भैक्षचर्यासु निरताः कृशा गुरुकुलाश्रयाः ।
निःसुखा निर्धना ये तु तान्नमस्यामि यादव ॥१७
निर्ममा निष्प्रतिद्वन्द्वा निर्ह्रीका निष्प्रयोजनाः ।
ये वेदं प्राप्य दुर्धर्षा वाग्मिनो ब्रह्मवादिनः ॥१८
अहिंसानिरता ये च ये च सत्यव्रता नराः ।
दान्ताः शमपराश्चैव तान्नमस्यामि केशव ॥ १९
देवतातिथिपूजायां युक्ता ये गृहमेधिनः ।
कपोतवृत्तयो नित्यं तान्नमस्यामि यादव ॥ २०
येषां त्रिवर्गः कृत्येषु वर्तते नोपहीयते ।
शिष्टाचारप्रवृत्ताश्च तान्नमस्याम्यहं सदा ॥ २१
ब्राह्मणाः श्रुतसंपन्ना ये त्रिवर्गमनुष्ठिताः ।
अलोलुपाः पुण्यशीलास्तान्नमस्यामि केशव ॥२२
'अवन्ध्यकाला येऽलुब्धास्त्रिवर्गे साधनेषु च ।
विशिष्टाचारयुक्ताश्च नारायण नमामि तान् ॥'२३
अब्भक्षा वायुभक्षाश्च सुधाभक्षाश्च ये सदा ।
व्रतैश्च विविधैर्युक्तास्तान्नमस्यामि माधव ॥ २४
अयोनीनग्नियोनींश्च ब्रह्मयोनींस्तथैव च ।
सर्वभूतात्मयोनींश्च तान्नमस्याम्यहं सदा ॥ २५
नित्यमेतान्नमस्यामि कृष्ण लोककरानृषीन् ।
लोकज्येष्ठान्कुलज्येष्ठांस्तमोघ्नाँल्लोकभास्करान् २६
तस्मात्त्वमपि वार्ष्णेय द्विजान्पूजय नित्यदा ।
पूजिताः पूजनार्हा हि सुखं दास्यन्ति तेऽनघ ॥ २७
अस्मिँल्लोके सदा ह्येते परत्र च सुखप्रदाः ।
चरन्ते मान्यमाना वै प्रदास्यन्ति सुखं तव ॥ २८
ये सर्वातिथयो नित्यं गोषु च ब्राह्मणेषु च ।
नित्यं सत्ये चाभिरता दुर्गाण्यतितरन्ति ते ॥२९
नित्यं शमपरा ये च तथा ये चानसूयकाः ।
नित्यस्वाध्यायिनो ये च दुर्गाण्यतितरन्ति ते ॥३०
सर्वान्देवान्नमस्यन्ति ये चैकं वेदमाश्रिताः ।
श्रद्दधानाश्च दान्ताश्च दुर्गाण्यतितरन्ति ते ॥ ३१
तथैव विप्रप्रवरान्नमस्कृत्य यतव्रताः ।
भवन्ति ये दानरता दुर्गाण्यतितरन्ति ते ॥ ३२
तपस्विनश्च ये नित्यं कौमारब्रह्मचारिणः ।
तपसा भावितात्मानो दुर्गाण्यतितरन्ति ते ॥३३
देवतातिथिभृत्यानां पितॄणां चार्चने रताः ।
शिष्टान्नभोजिनो ये च दुर्गाण्यतितरन्ति ते ॥३४
अग्निमाधाय विधिवत्प्रणता धारयन्ति ये ।
प्राप्ताः सोमाहुतिं चैव दुर्गाण्यतितरन्ति ते ॥३५
मातापित्रोर्गुरुषु च सम्यग्वर्तन्ति ये सदा ।
यथा त्वं वृष्णिशार्दूलेत्युक्त्वैवं विरराम सः ॥३६
तस्मात्त्वमपि कौन्तेय पितृदेवद्विजातिथीन् ।
सम्यक्पूजयसे नित्यं गतिमिष्टामवाप्स्यसि ॥ ३७

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

भीष्मेण युधिष्ठिरंप्रति शरणागतरक्षणफलप्रतिपादकश्येनकपोतोपाख्यानकथनम् ॥ १ ॥

युधिष्ठिर उवाच ।
पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
त्वत्तोऽहं श्रोतुमिच्छामि धर्मं भरतसत्तम ॥ १
शरणागतं ये रक्षन्ति भूतग्रामं चतुर्विधम् ।

ब्रह्मयज्ञे मन्त्रजपे वा ॥ १५ ॥ निर्ह्रीका निष्प्रयोजनाः इति झ. पाठः । निर्ह्रीकाः दिगम्बराः ॥ १८ ॥ कपोतवृत्तयः कणश आदाय ये संग्रहं न कुर्वन्तीत्यर्थः ॥ २० ॥ त्रिवर्गो धर्मार्थकामाः । कृत्येषु कर्तुं योग्येषु कर्मसु वर्तते उत्तममध्यमाधमभावेन वर्तते नतु हीयते अधममध्यमोत्तमभावेनेत्यर्थः ॥ २१ ॥ सुधा वैश्वदेवशेषः ॥ २४ ॥ अयोनीन् अकृतदारान् । अग्नियोनीन् दाराग्निहोत्रयुतान् । ब्रह्मणो वेदस्य योनीन् आश्रयभूतान् । अब्योनीनग्नियोनींश्चेति थ. ध. पाठः ॥ २५ ॥ लोकज्येष्ठाञ्ज्ञाननिष्ठानिति थ. ध. पाठः ॥२६॥ स्वाध्याये सर्वे यज्ञा अन्तर्भवन्तीत्यर्थः ॥३१॥ षट्षष्टितमोऽध्यायः ॥६६॥

* अयमध्यायो झ. पाठ एव दृश्यते ।

किं तस्य भरतश्रेष्ठ फलं भवति तत्त्वतः ॥ २
भीष्म उवाच ।
इदं शृणु महाप्राज्ञ धर्मपुत्र महायशः ।
इतिहासं पुरावृत्तं शरणार्थे महाफलम् ॥ ३
प्रपात्यमानः श्येनेन कपोतः प्रियदर्शनः ।
वृषदर्भं महाभागं नरेन्द्रं शरणं गतः ॥ ४
स तं दृष्ट्वा विशुद्धात्मा त्रासादङ्कमुपागतम् ।
आश्वास्याश्वसिहीत्याह न तेऽस्ति भयमण्डज ॥ ५
भयं ते सुमहत्कस्मात्कुत्र किं वा कृतं त्वया ।
येन त्वमिह संप्राप्तो विसंज्ञो भ्रान्तचेतनः ॥ ६
नवनीलोत्पलापीड चारुवर्ण सुदर्शन ।
दाडिमाशोकपुष्पाक्ष मा त्रसस्वाभयं तव ॥ ७
मत्सकाशमनुप्राप्तं न त्वां कश्चित्समुत्सहेत् ।
मनसा ग्रहणं कर्तुं रक्षाध्यक्षपुरस्कृतम् ॥ ८
काशिराज्यं तदद्यैव त्वदर्थे जीवितं तथा ।
त्यजेयं भव विस्रब्धः कपोत न भयं तव ॥ ९
श्येन उवाच ।
ममैतद्विहितं भक्ष्यं न राजंस्त्रातुमर्हसि ।
अतिक्रान्तं च प्राप्तं च प्रयत्नाच्चोपपादितम् ॥ १०
मांसं च रुधिरं चास्य मज्जा मेदश्च मे हितम् ।
परितोषकरो ह्येष मम माऽस्याग्रतो भव ॥ ११
तृष्णा मे बाधतेऽत्युग्रा क्षुधा निर्दहतीव माम् ।
मुञ्चैनं नहि शक्ष्यामि राजन्मन्दयितुं क्षुधाम् ॥ १२
मया ह्यनुसृतो ह्येष मत्पक्षनखविक्षतः ।
किंचिदुच्छ्वासनिःश्वासं न राजन्गोप्तुमर्हसि ॥ १३
यदि स्वविषये राजन्प्रभुस्त्वं रक्षणे नृणाम् ।
खेचरस्य तृषार्तस्य न त्वं प्रभुरथोत्तम ॥ १४
यदि वैरिषु भृत्येषु स्वजनव्यवहारयोः ।
विषयेष्विन्द्रियाणां च आकाशे मा पराक्रम ॥ १५
प्रभुत्वं हि पराक्रम्य सम्यक् पक्षहरेषु ते ।
यदि त्वमिह धर्मार्थी मामपि द्रष्टुमर्हसि ॥ १६
भीष्म उवाच ।
श्रुत्वा श्येनस्य तद्वाक्यं राजर्षिर्विस्मयं गतः ।
संभाव्य चैनं तद्वाक्यं तदर्थी प्रत्यभाषत ॥ १७
राजोवाच ।
गोवृषो वा वराहो वा मृगो वा महिषोऽपि वा ।
त्वदर्थमद्य क्रियतां क्षुधाप्रशमनाय ते ॥ १८
शरणागतं न त्यजेयमिति मे व्रतमाहितम् ।
न मुञ्चति ममाङ्गानि द्विजोऽयं पश्य वै द्विज ॥ १९
श्येन उवाच ।
न वराहं न चोक्षाणं न चान्यान्विविधान्द्विजान् ।
भक्षयामि महाराज किमन्नाद्येन तेन मे ॥ २०
यस्तु मे विहितो भक्ष्यः स्वयं देवैः सनातनः ।
श्येनाः कपोतान्खादन्ति स्थितिरेषा सनातनी ॥ २१
उशीनर कपोते तु यदि स्नेहस्तवानघ ।
ततस्त्वं मे प्रयच्छाद्य स्वमांसं तुलया धृतम् ॥ २२
राजोवाच ।
महाननुग्रहो मेऽद्य यस्त्वमेवमिहात्थ माम् ।
बाढमेव करिष्यामीत्युक्त्वाऽसौ राजसत्तमः ॥ २३
उत्कृत्योत्कृत्य मांसानि तुलया समतोलयत् ।
अन्तःपुरे ततस्तस्य स्त्रियो रत्नविभूषिताः ॥ २४
हाहाभूता विनिष्क्रान्ताः श्रुत्वा परमदुःखिताः ।
तासां रुदितशब्देन मन्त्रिभृत्यजनस्य च ॥ २५
बभूव सुमहान्नादो मेघगम्भीरनिःस्वनः ।
निरुद्धं गगनं सर्वं व्यभ्रं मेघैः समन्ततः ॥ २६
मही प्रचलिता चासीत्तस्य सत्येन कर्मणा ॥ २७
स राजा पार्श्वतश्चैव बाहुभ्यामूरुतश्च यत् ।
तानि मांसानि संछिद्य तुलां पूरयतेऽशनैः ।
तथापि न समस्तेन कपोतेन बभूव ह ॥ २८
अस्थिभूतो यदा राजा निर्मांसो रुधिरस्रवः ।
तुलां ततः समारूढः स्वं मांसक्षयमुत्सृजन् ॥ २९

प्रपात्यमान आकाशादिति शेषः । वृषदर्भमौशीनरं शिबिम् ॥ ४ ॥ नवं नीलं च यदुत्पलं लस्याऽऽपीड इवालंकारभूत ॥ ७ ॥ अतिक्रान्तं गतप्रायजीवितम् ॥ १० ॥ यदि वैर्यादिषु पराक्रमसे तद्युक्तं न त्वाकाशे आकाशचारिषु ॥ १५ ॥ पक्षहरेष्वाज्ञाभञ्जिषु शत्रुषु ॥ १६ ॥ तदर्थी कपोतार्थी ॥ १७ ॥ द्विजः पक्षी ॥ १९ ॥ अशनैः शीघ्रम् ॥ २८ ॥ मांसक्षयं

ततः सेन्द्रास्त्रयो लोकास्तं नरेन्द्रमुपस्थिताः ।
भेर्यश्चाकाशगैस्तत्र वादिता देवदुन्दुभिः ॥ ३०
अमृतेनावसिक्तश्च वृषदर्भो नरेश्वरः ।
दिव्यैश्च सुसुखैर्माल्यैरभिवृष्टः पुनःपुनः ॥ ३१
देवगन्धर्वसंघातैरप्सरोभिश्च सर्वतः ।
नृत्तश्चैवोपगीतश्च पितामह इव प्रभुः ॥ ३२
हेमप्रासादसंबाधं मणिकाञ्चनतोरणम् ।
सर्ववैडूर्यमणिस्तम्भं विमानं समधिष्ठितः ॥ ३३
स राजर्षिर्गतः स्वर्गं कर्मणा तेन शाश्वतम् ।
शरणागतेषु चैवं त्वं कुरु सर्वं युधिष्ठिर ॥ ३४
भक्तानामनुरक्तानामाश्रितानां च रक्षिता ।
दयावान्सर्वभूतेषु परत्र सुखमेधते ॥ ३५
साधुवृत्तो हि यो राजा सद्वृत्तमनुतिष्ठति ।
किं न प्राप्तं भवेत्तेन स्वव्याजेनेह कर्मणा ॥ ३६
स राजर्षिर्विशुद्धात्मा धीरः सत्यपराक्रमः ।
काशीनामीश्वरः ख्यातस्त्रिषु लोकेषु कर्मणा ॥३७
योऽप्यन्यः कारयेदेवं शरणागतरक्षणम् ।
सोपि गच्छेत तामेव गतिं भरतसत्तम ॥ ३८
इदं वृत्तं हि राजर्षे वृषदर्भस्य कीर्तयन् ।
पूतात्मा वै भवेल्लोके शृणुयाद्यश्च नित्यशः ॥३९

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

भीष्मेण युधिष्ठिरंप्रति ब्राह्मणमहिमकथनम् ॥ १ ॥

युधिष्ठिर उवाच ।
किं राज्ञः सर्वकृत्यानां गरीयः स्यात्पितामह ।
कुर्वन्किं कर्म नृपतिरुभौ लोकौ समश्नुते ॥ १
भीष्म उवाच ।
एतद्राज्ञः कृत्यतममभिषिक्तस्य भारत ।
ब्राह्मणानां रक्षणं च पूजा च सुखमिच्छतः ॥ २
कर्तव्यं पार्थिवेन्द्रेण तथैव भरतर्षभ ।
श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत् ॥ ३
पौरजानपदांश्चापि ब्राह्मणांश्च बहुश्रुतान् ।
सांत्वेन भोगदानेन नमस्कारैः सदाऽर्चयेत् ॥ ४
एतत्कृत्यतमं राज्ञो नित्यमेवोपलक्षयेत् ।
यथाऽऽत्मानं यथा पुत्रांस्तथैतान्प्रतिपालयेत् ॥ ५
ये चाप्येषां पूज्यतमास्तान्दृढं प्रतिपूजयेत् ।
तेषु शान्तेषु तद्राष्ट्रं सर्वमेव विराजते ॥ ६
ते पूज्यास्ते नमस्कार्या मान्यास्ते पितरो यथा ।
तेष्वेव यात्रा लोकानां भूतानामिव वासवे ॥ ७
अभिचारैरुपायैश्च दहेयुरपि चेतसा ।
निःशेषं कुपिताः कुर्युरुग्राः सत्यपराक्रमाः ॥ ८
नान्तमेषां प्रपश्यामि न दिशश्चाप्यपावृताः ।
कुपिताः समुदीक्षन्ते दावेष्वग्निशिखा इव ॥ ९
'मान्यास्तेषां साधवो ये न निन्द्याश्चाप्यसाधवः ।'
बिभ्यत्येषां साहसिका गुणास्तेषामतीव हि ।
कूपा इव तृणच्छन्ना विशुद्धा द्यौरिवापरे ॥ १०
प्रसह्यकारिणः केचित्कार्पासमृदवोऽपरे ।
सन्ति चैषामतिशठास्तथैवान्ये तपस्विनः ॥ ११
कृषिगोरक्ष्यमप्येके भैक्ष्यमन्येऽप्यनुष्ठिताः ।
चोराश्चान्येऽनृताश्चान्ये तथाऽन्ये नटनर्तकाः॥१२
सर्वकर्मसहाश्चान्ये पार्थिवेष्वितरेषु च ।
विविधाचारयुक्ताश्च ब्राह्मणा भरतर्षभ ॥ १३
नानाकर्मसु रक्तानां बहुकर्मोपजीविनाम् ।
धर्मज्ञानां सतां तेषां नित्यमेवानुकीर्तयेत् ॥ १४
पितृणां देवतानां च मनुष्योरगरक्षसाम् ।

मांसालयं शरीरम् ॥ २९ ॥ नृत्तः नृत्येन तोषितः । एवमुपगीतः ॥ ३२ ॥ साधुवृत्तः सुशीलः । सद्वृत्तं शिष्टाचारम् । स्वव्याजेन सुतरां निष्कपटेन॥३६॥ सप्तषष्टितमोऽध्यायः॥६७॥
एषां ब्राह्मणानां मध्ये ॥ ६ ॥ वासवे पर्जन्ये ॥ ७ ॥

अभिचारैः श्येनयागादिभिः । उपायैः कौलिकशास्त्रप्रसिद्धैः । चेतसा सङ्कल्पमात्रेण ॥ ८ ॥ एषां एभ्यः साहसिका अकार्यकारिणोऽपि बिभ्यति किमुत विवेकिनः ॥ १० ॥

पुराऽप्येते महाभागा ब्राह्मणा वै जनाधिप॥१५
नैते देवैर्न पितृभिर्न गन्धर्वैर्न राक्षसैः ।
नासुरैर्न पिशाचैश्च शक्या जेतुं द्विजातयः ॥१६
अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ।
यमिच्छेयुः स राजा स्याद्यं द्विष्युः स पराभवेत् १७
परिवादं च ये कुर्युर्ब्राह्मणानामचेतसः ।
सत्यं ब्रवीमि ते राजन्विनश्येयुर्न संशयः ॥ १८
निन्दाप्रशंसाकुशलाः कीर्त्यकीर्तिपरायणाः ।
परिकुप्यन्ति ते राजन्सततं द्विषतां द्विजाः ॥१९
ब्राह्मणा यं प्रशंसन्ति पुरुषः स प्रवर्धते ।
ब्राह्मणैर्यः पराक्रुष्टः पराभूयात्क्षणाद्धि सः ॥२०
शका यवनकाम्भोजास्तास्ताः क्षत्रियजातयः ।
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ॥ २१
द्राविडाश्च कलिङ्गाश्च पुलिन्दाश्चाप्युशीनराः ।
कोलिसर्पा महिषकास्तास्ताः क्षत्रियजातयः॥ २२
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ।
श्रेयान्पराजयस्तेभ्यो न जयो जयतांवर ॥ २३
यस्तु सर्वमिदं हन्याद्ब्राह्मणं च न तत्समम् ।
ब्रह्मवध्या महान्दोष इत्याहुः परमर्षयः ॥ २४
परिवादो द्विजातीनां न श्रोतव्यः कथंचन ।
आसीताधोमुखस्तूष्णीं समुत्थाय व्रजेत वा॥२५
न स जातो जनिष्यो वा पृथिव्यामिह कश्चन ।
यो ब्राह्मणविरोधेन सुखं जीवितुमुत्सहेत् ॥ २६
दुर्ग्राह्यो मुष्टिना वायुर्दुःस्पर्शः पाणिना शशी ।
दुर्धरा पृथिवी मूर्ध्ना दुर्जया ब्राह्मणा भुवि ॥२७

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

भीष्मेण युधिष्ठिरंप्रति ब्राह्मणमाहात्म्यप्रतिपादकपृथ्वीवासुदेवसंवादानुवादः ॥ १ ॥

भीष्म उवाच ।
ब्राह्मणानेव सततं भृशं संपरिपूजयेत् ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥ १
एते भोगैरलंकारैरन्यैश्चैव किमिच्छकैः ।
सदा पूज्या नमस्कारै रक्ष्याश्च पितृवन्नृपैः ।
ततो राष्ट्रस्य शान्तिर्हि भूतानामिव वासवात् ॥२
ज्ञानवान्ब्रह्मवर्चस्वी राष्ट्रे वै ब्राह्मणः शुचिः ।
महारथश्च राजन्य एष्टव्यः शत्रुतापनः ॥ ३
ब्राह्मणं जातिसंपन्नं धर्मज्ञं संशितव्रतम् ।
भोजयीत गृहे राजन्न तस्मात्परमस्ति वै ॥ ४
ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णन्ति देवताः ।
पितरः सर्वभूतानां नैतेभ्यो विद्यते परम् ॥ ५
आदित्यश्चन्द्रमा विष्णुः शंकरोऽग्निः प्रजापतिः ।
सर्वे ब्राह्मणमाविश्य सदाऽन्नमुपभुञ्जते ॥ ६
न तस्याश्नन्ति पितरो यस्य विप्रा न भुञ्जते ।
देवाश्चाप्यस्य नाश्नन्ति पापस्य ब्राह्मणद्विषः ॥७
ब्राह्मणेषु तु तुष्टेषु प्रीयन्ते पितरः सदा ।
तथैव देवता राजन्नात्र कार्या विचारणा ॥ ८
तथैव तेऽपि प्रीयन्ते येषां भवति तद्धविः ।
न च प्रेत्य विनश्यन्ति गच्छन्ति च परां गतिम् ॥९
येनयेनैव हविषा ब्राह्मणांस्तर्पयेन्नरः ।
तेनतेनैव प्रीयन्ते पितरो देवतास्तथा ॥ १०
ब्राह्मणादेव तद्भूतं प्रभवन्ति यतः प्रजाः ।
यतश्चायं प्रभवति प्रेत्य यत्र च गच्छति ॥ ११
वेदैष मार्गं स्वर्गस्य तथैव नरकस्य च ।
आगतानागते चोभे ब्राह्मणो द्विपदांवरः ॥ १२

एते पूज्या इति शेषः । यतो महाभागाः ॥ १५ ॥ परायणाः हेतवः ॥ १९ ॥ अदर्शनात् अननुग्रहात् ॥ २१ ॥ अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

सोमो राजा येषां ते सोमराजानः ॥ १ ॥ किमिच्छसीति प्रश्नपूर्वकं यत्तदिष्टं दीयते तत्किमिच्छकम् ॥ २ ॥ चन्द्रमा वायुरापो भूरम्बरं दिशः इति झ. पाठः ॥ ६ ॥ तेपि दातारोपि । तत् प्रदेयं द्रव्यम् ॥ ९ ॥ तद्यज्ञादिकम् । भूतमुत्पन्नम् । ब्राह्मणो वेद तद्भूतमिति थ. ध. पाठः ॥ ११ ॥

ब्राह्मणो द्विपदां श्रेष्ठः स्वधर्मं चैव वेद यः।
ये चैनमनुवर्तन्ते ते न यान्ति पराभवम्।
न ते प्रेत्य विनश्यन्ति गच्छन्ति न पराभवम् ॥१३
यद्ब्राह्मणमुखात्प्राप्तं प्रतिगृह्णन्ति वै वचः।
कृतात्मानो महात्मानस्ते न यान्ति पराभवम्॥१४
क्षत्रियाणां प्रतपतां तेजसा च बलेन च।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च बलानि च॥१५
भृगवस्तालजङ्घांश्च नीपानाङ्गिरसोऽजयन्।
भरद्वाजो वैतहव्यानैलांश्च भरतर्षभ ॥ १६
चित्रायुधांश्चाप्यजयन्नेते कृष्णाजिनध्वजाः।
प्रक्षिप्याथ च कुम्भान्वै पारगामिनमारभेत् ॥१७
यत्किंचित्कथ्यते लोके श्रूयते पठ्यतेऽपि वा।
सर्वं तद्ब्राह्मणेष्वेव गूढोऽग्निरिव दारुषु ॥ १८
अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
संवादं वासुदेवस्य पृथ्व्याश्च भरतर्षभ ॥ १९
वासुदेव उवाच।
मातरं सर्वभूतानां पृच्छे त्वां संशयं शुभे।
केनस्वित्कर्मणा पापं व्यपोहति नरो गृही ॥ २०
पृथिव्युवाच।
ब्राह्मणानेव सेवेत पवित्रं ह्येतदुत्तमम्।
ब्राह्मणान्सेवमानस्य रजः सर्वं प्रणश्यति।
अतो भूतिरतः कीर्तिरतो बुद्धिः प्रजायते ॥२१
महारथश्च राजन्य एष्टव्यः शत्रुतापनः।
इति मां नारदः प्राह सततं सर्वभूतये ॥ २२
ब्राह्मणं जातिसंपन्नं धर्मज्ञं संशितं शुचिम्।
अपरेषां परेषां च परेभ्यश्चैव ये परे ॥ २३
ब्राह्मणा यं प्रशंसन्ति स मनुष्यः प्रवर्धते।
अथ यो ब्राह्मणान्क्रुष्टः पराभवति सोचिरात् ॥२४
यथा महार्णवे क्षिप्त आमलोष्टो विनश्यति।
तथा दुश्चरितं विप्रे पराभावाय कल्पते ॥ २५
पश्य चन्द्रे कृतं लक्ष्म समुद्रे लवणोदकम्।
तथा भगसहस्रेण महेन्द्रः परिचिह्नितः ॥ २६
तेषामेव प्रभावेन सहस्रनयनो ह्यसौ।
शतक्रतुः समभवत्पश्य माधव यादृशम् ॥ २७
इच्छन्कीर्तिं च भूतिं च लोकांश्च मधुसूदन।
ब्राह्मणानुमते तिष्ठेत्पुरुषः शुचिरात्मवान् ॥ २८
भीष्म उवाच।
इत्येतद्वचनं श्रुत्वा मेदिन्या मधुसूदनः।
साधुसाध्विति कौरव्य मेदिनीं प्रत्यपूजयत् ॥२९
एतां श्रुत्वोपमां पार्थ प्रयतो ब्राह्मणर्षभान्।
सततं पूजयेथास्त्वं ततः श्रेयोऽभिपत्स्यसे ॥ ३०

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः ॥ ७० ॥

भीष्मेण युधिष्ठिरंप्रति ब्राह्मणमाहात्म्यकथनम् ॥ १ ॥

भीष्म उवाच।
जन्मनैव महाभागो ब्राह्मणो नाम जायते।
नमस्यः सर्वभूतानामतिथिः प्रश्रिताग्रभुक् ॥ १
सर्वेषां सुहृदस्तात ब्राह्मणाः सुमनोमुखाः।
'सर्वानेते हनिष्यन्ति ब्राह्मणा जातमन्यवः।'
गीर्भिर्मङ्गलयुक्ताभिरनुध्यायन्ति पूजिताः ॥ २
सर्वान्नो द्विषतस्तात ब्राह्मणा जातमन्यवः।
गीर्भिर्दारुणयुक्ताभिर्हन्युश्चैते ह्यपूजिताः ॥ ३

कुं पृथिवीं ब्राह्मणाय प्रक्षिप्य दत्त्वा पारगामिनं परलोकहितं कर्म आरभेदाचरेत्। भान् दीप्तिं कुर्वन्नुभयलोके इति शेषः। पुरगामिनमाहरन्निति थ. पाठः ॥ १७ ॥ अपरे ब्राह्मणं सर्वभूतये इच्छेदित्याहुरिति विपरिणामेनानुषङ्गः ॥ २३ ॥ क्रुष्टः क्रोशति। कर्तरि क्तः ॥ २४ ॥ एकोनसप्ततितमोऽध्यायः॥६९॥

जन्मनैव संस्काराद्यभावेऽपि ब्राह्मणो नमस्य एव। प्रश्रितं पक्वमन्नं तत्स्वाग्रे भोक्तुमर्हः प्रश्रिताग्रभुक् ॥ १ ॥ सुमनसां देवानां मुखमिव भूताः सुमनोमुखाः ॥ २ ॥ नोऽस्माकं द्विषतः शत्रून्। तैरपूजिता ब्राह्मणा हन्युरिति संबन्धः ॥ ३ ॥

अत्र गाथाः पुरा गीताः कीर्तयन्ति पुराविदः ।
सृष्ट्वा द्विजातीन्धाता हि यथापूर्वं समादधत् ॥४
न वोऽन्यदिह कर्तव्यं किंचिदूर्ध्वायनं विधि ।
गुप्तो गोपायते ब्रह्मा श्रेयो वस्तेन शोभनम् ॥५
स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति ।
प्रमाणं सर्वभूतानां प्रग्रहाश्च भविष्यथ ॥ ६
न शौद्रं कर्म कर्तव्यं ब्राह्मणेन विपश्चिता ।
शौद्रं हि कुर्वतः कर्म ब्राह्मी श्रीरुपरुध्यते ॥ ७
श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी ।
स्वाध्यायेनैव माहात्म्यं विपुलं प्रतिपत्स्यथ ॥ ८
हुत्वा चाहवनीयस्थं महाभाग्ये प्रतिष्ठिताः ।
अग्रभोज्याः प्रसूतीनां श्रिया ब्राह्म्याऽनुकल्पिताः
श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया ।
दमस्वाध्यायनिरताः सर्वान्कामानवाप्स्यथ ॥ १०
यच्चैव मानुषे लोके यच्च देवेषु किंचन ।
सर्वं वस्तपसा साध्यं ज्ञानेन नियमेन च ॥ ११
'युष्मत्संमाननां प्रीतिं पावनैः क्षत्रिया भृशम् ।
अमुत्रेह समायान्ति वैश्यशूद्राधिकास्तथा ॥ १२
अरक्षिताश्च युष्माभिर्विरुद्धा यान्ति विप्लवम् ।
युष्मत्तेजोधृता लोकास्तद्रक्ष्यथ जगत्त्रयम् ॥' १३
इत्येवं ब्रह्मगीतास्ते समाख्याता मयाऽनघ ।
विप्रानुकम्पार्थमिदं तेन प्रोक्तं हि धीमता ॥१४

भूयस्तेषां बलं मन्ये यथा राज्ञस्तपस्विनः ।
दुरासदाश्च चण्डाश्च तपसा क्षिप्रकारिणः ॥ १५
सन्त्येषां सिंहसत्वाश्च व्याघ्रसत्वास्तथाऽपरे ।
वराहमृगसत्वाश्च गजसत्वास्तथाऽपरे ॥ १६
सर्पस्पर्शसमाः केचित्तथाऽन्ये मकरस्पृशः ।
विभाष्य घातिनः केचित्तथा चक्षुर्हणोऽपरे ॥१७
सन्ति चाशीविषसमाः सन्ति मन्दास्तथाऽपरे ।
विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर ॥ १८
मेकला द्राविडा लाटाः पौण्ड्राः कान्वशिरास्तथा ।
शौण्डिका दरदा दार्वाश्चोराः शबरबर्बराः ॥ १९
किराता यवनाश्चैव तास्ताः क्षत्रियजातयः ।
वृषलत्वमनुप्राप्ता ब्राह्मणानामदर्शनात् ॥ २०
ब्राह्मणानां परिभवादसुराः सलिलेशयाः ।
ब्राह्मणानां प्रसादाच्च देवाः स्वर्गनिवासिनः ॥२१
अशक्यं स्प्रष्टुमाकाशमचाल्यो हिमवान्गिरिः ।
अवार्या सेतुना गङ्गा दुर्जया ब्राह्मणा भुवि ॥२२
न ब्राह्मणविरोधेन शक्या शास्तुं वसुंधरा ।
ब्राह्मणा हि महात्मानो देवानामपि देवताः ॥२३
तान्पूजयस्व सततं दानेन परिचर्यया ।
यदीच्छसि महीं भोक्तुमिमां सागरमेखलाम् ॥२४
प्रतिग्रहेण तेजो हि विप्राणां शाम्यतेऽनघ ।
प्रतिग्रहं ये नेच्छेयुस्तेऽपि रक्ष्यास्त्वया नृप ॥२५

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः ॥ ७१ ॥

भीष्मेण युधिष्ठिरंप्रति ब्राह्मणमाहात्म्यप्रतिपादकशक्रशम्बरसंवादानुवादः ॥ १ ॥

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शक्रशम्बरसंवादं तन्निबोध युधिष्ठिर ॥ १
शक्रो ह्यज्ञातरूपेण जटी भूत्वा सुदारुणः ।
विप्ररूपं समास्थाय प्रश्नं पप्रच्छ शम्बरम् ॥ २
केन शम्बर वृत्तेन स्वजात्यानधितिष्ठसि ।
श्रेष्ठं त्वां केन मन्यन्ते तद्वै प्रब्रूहि तत्त्वतः ॥ ३
शम्बर उवाच ।

समादधत् समाधिं नियमं कृतवान् ॥ ४ ॥ ब्रह्मा ब्राह्मणः । वः शोभनं श्रेयस्तेनैव ॥ ५ ॥ प्रग्रहाः दमनक्षमा रज्जव इव ॥ ६ ॥ शौद्रं कर्म सेवा ॥ ७ ॥ श्रीश्चेत्यादेः श्रियमित्यादिरर्थः ॥ ८ ॥ आहवनीयस्थं देवतागणं प्रसूतीनां शिशुभ्योऽप्यग्रे भोज्यं येषां ते । ब्राह्म्या श्रिया विद्ययाऽनुकल्पिताः पात्रीभूताः ॥ ९ ॥ चण्डत्वादिदोषवन्तोपि पूज्या एवेत्यर्थः ॥ १५ ॥ कार्पासमृदवः केचिदिति थ. पाठः ॥ १७ ॥ अदर्शनात् अननुग्रहात् ॥ २० ॥ सप्ततितमोऽध्यायः ॥ ७० ॥

नासूयामि सदा विप्रान्ब्राह्ममेव च मे मतम् ।
शास्त्राणि वदतो विप्रान्संमन्यामि यथासुखम् ॥४
श्रुत्वा च नावजानामि नापराध्यामि कर्हिचित् ।
अभ्यर्च्याभ्यनुपृच्छामि पादौ गृह्णामि धीमताम् ५
ते विस्रब्धाः प्रभाषन्ते संयच्छन्ति च मां सदा ।
प्रमत्तेष्वप्रमत्तोऽस्मि सदा सुप्तेषु जागृमि ॥ ६
ते मां शास्त्रपथे युक्तं ब्रह्मण्यमनसूयकम् ।
समासिञ्चति शास्तारः क्षौद्रं मध्विव मक्षिकाः ॥७
यच्च भाषन्ति संतुष्टास्तच्च गृह्णाम्यमायया ।
समाधिमात्मनो नित्यमनुलोममचिन्तयम् ॥ ८
सोहं वागग्रमृष्टानां रसानामवलेहकः ।
स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ॥९
एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमम् ।
यद्ब्राह्मणमुखाच्छास्त्रमिह श्रुत्वा प्रवर्तते ॥ १०
एतत्कारणमाज्ञाय दृष्ट्वा देवासुरं पुरा ।
युद्धं पिता मे हृष्टात्मा विस्मितः समपद्यत ॥११
दृष्ट्वा च ब्राह्मणानां तु महिमानं महात्मनाम् ।
पर्यपृच्छत्कथममी सिद्धा इति निशाकरम् ॥ १२

सोम उवाच ।
ब्राह्मणास्तपसा सर्वे सिध्यन्ते वाग्बलाः सदा ।
भुजवीर्याश्च राजानो वागस्त्राश्च द्विजातयः ॥१३
प्रवसन्वाप्यधीयीत ब्राह्मीर्दुर्वसतीर्वसन् ।
निर्मन्युरपि निर्वाणो यतिः स्यात्समदर्शनः ॥१४
अपि च ज्ञानसंपन्नः सर्वान्वेदान्पितुर्गृहे ।
श्लाघमान इवाधीयाद्ग्राम्य इत्येव तं विदुः ॥१५
भूमिरेतौ निगिरति सर्पो बिलशयानिव ।
राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनम् ॥१६
अभिमानः श्रियं हन्ति पुरुषस्याल्पमेधसः ।
गर्भेण दुष्यते कन्या गृहवासेन च द्विजः ॥ १७
'विद्याविदो लोकविदस्तपोदमसमन्विताः ।
नित्यपूज्याश्च वन्द्याश्च द्विजा लोकद्वयेच्छुभिः१८
इत्येतन्मे पिता श्रुत्वा सोमादद्भुतदर्शनात् ।
ब्राह्मणान्पूजयामास तथैवाहं महाव्रतान् ॥ १९
भीष्म उवाच ।
श्रुत्वैतद्वचनं शक्रो दानवेन्द्रमुखाच्युतम् ।
द्विजान्संपूजयामास महेन्द्रत्वमवाप च ॥ २०

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

भीष्मेण युधिष्ठिरंप्रति पात्रलक्षणादिकथनम् ॥ १ ॥

युधिष्ठिर उवाच ।
अपूर्वं वा भवेत्पात्रमथवाऽपि चिरोषितम् ।
दूरादभ्यागतं वाऽपि किं पात्रं स्यात्पितामह ॥१
भीष्म उवाच ।
क्रिया भवति केषांचिदुपांशुव्रतमुत्तमम् ।
यो नो याचेत यत्किंचित्सर्वं दद्याम इत्यपि ॥२

अपीडयन्भृत्यवर्गमित्येवमनुशुश्रुम ।
पीडयन्भृत्यवर्गं हि आत्मानमपकर्षति ॥ ३
अपूर्वं चापि यत्पात्रं यच्चापि स्याच्चिरोषितम् ।
दूरादभ्यागतं चापि तत्पात्रं न विदुर्बुधाः ॥ ४
युधिष्ठिर उवाच ।
अपीडया च भूतानां धर्मस्याहिंसया तथा ।

मां मयि । मधु अमृततुल्यां विद्यां समासिञ्चन्ति क्षौद्रं मधुपटलम् मक्षिका मध्विवेत्यावृत्त्या योज्यम् ॥ ७ ॥ समाधिं ब्राह्मणेषु निष्ठाम् ॥ ८ ॥ वागग्रे जिह्वाग्रे मृष्टं विद्यामृतं येषां ब्राह्मणानाम् । रसानामुक्तिसुधानाम् ॥ ९ ॥ ब्राह्मीर्वेदार्थाः दुर्वसतीः गुरुकुलवासक्लेशात् । अपि अपिवा । सति वैराग्ये यतिः स्यात् ॥ १४ ॥ पितुर्गृहे वेदाध्ययनं निन्दति अपीति ॥ १५ ॥ अप्रवासिनं वेदार्थं ग्रामान्तरे वा समकुर्वाणम् ॥ १६ ॥ एकसप्ततितमोऽध्यायः ॥ ७१ ॥

कश्चिद्यज्ञार्थं कश्चित् गुरुदक्षिणार्थं कश्चित्कुटुम्बभरणार्थमिति एवंरूपा क्रिया केषांचित्पात्रत्वे प्रधानं भवति केषांचिदुपांशुव्रतं मौनं पारिव्राज्यमिति । दद्यामः ददाम इत्येव वक्तव्यं नत्वेतेषु कंचित्प्रत्याचक्षीतेत्यर्थः ॥ २ ॥

पात्रं विद्यामतत्त्वेन यस्मै दत्तं न संतपेत् ॥ ५
भीष्म उवाच ।
ऋत्विक्पुरोहिताचार्याः शिष्यसंबन्धिबान्धवाः ।
सर्वे पूज्याश्च मान्याश्च श्रुतवन्तोऽनसूयकाः ॥ ६
अतोऽन्यथा वर्तमानाः सर्वे नार्हन्ति सत्क्रियाम् ।
तस्माद्गुणैः परीक्षेत पुरुषान्प्रणिधाय वै ॥ ७
अक्रोधः सत्यवचनमहिंसा दम आर्जवम् ।
अद्रोहोऽनभिमानश्च ह्रीस्तितिक्षा दमः शमः ॥८
यस्मिन्नेतानि दृश्यन्ते न चाकार्याणि भारत ।
स्वभावतो निविष्टानि तत्पात्रं मानमर्हति ॥ ९
तथा चिरोषितं चापि संप्रत्यागतमेव च ।
अपूर्वं चैव पूर्वं च तत्पात्रं मानमर्हति ॥ १०
अप्रामाण्यं च वेदानां शास्त्राणां चाभिलङ्घनम् ।
अव्यवस्था च सर्वत्र एतन्नाशनमात्मनः ॥ ११
भवेत्पण्डितमानी यो ब्राह्मणो वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ॥ १२
हेतुवादान्ब्रुवन्सत्सु विजेताऽहेतुवादकः ।
आक्रोष्टा चातिवक्ता च ब्राह्मणानां सदैव हि ॥१३
सर्वाभिशङ्की मूढश्च बालः कटुकवागपि ।
बोद्धव्यस्तादृशस्तात नरं श्वानं हि तं विदुः ॥१४
यथा श्वा भषितुं चैव हन्तुं चैवावसज्जते ।
एवं संभाषणार्थाय सर्वशास्त्रवधाय च ।
'अल्पश्रुताः कुतर्काश्च दृष्टाः स्पष्टाः कुपण्डिताः १५
श्रुतिस्मृती चेतिहासपुराणारण्यवेदिनः ।
अनुरुन्ध्याद्बहुज्ञांश्च सारज्ञाश्चैव पण्डिताः ॥' १६
लोकयात्रा च द्रष्टव्या धर्मश्चात्महितानि च ।
एवं नरो वर्तमानः शाश्वतीर्वर्धते समाः ॥ १७
ऋणमुन्मुच्य देवानामृषीणां च तथैव च ।
पितृणामथ विप्राणामतिथीनां च पञ्चमम् ॥१८
पर्यायेण विमुक्तो यः सुनिर्णिक्तेन कर्मणा ।
एवं गृहस्थः कर्माणि कुर्वन्धर्मान्न हीयते ॥ १९

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीस्वभावप्रतिपादकनारदपञ्चचूडासंवादानुवादः ॥ १ ॥

युधिष्ठिर उवाच ।
स्त्रीणां स्वभावमिच्छामि श्रोतुं भरतसत्तम ।
स्त्रियो हि मूलं दोषाणां लघुचित्ता हि ताः स्मृताः १
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं पुंश्चल्या पञ्चचूडया ॥ २
लोकाननुचरन्सर्वान्देवर्षिर्नारदः पुरा ।
ददर्शाप्सरसं ब्राह्मीं पञ्चचूडामनिन्दिताम् ॥ ३
तां दृष्ट्वा चारुसर्वाङ्गीं पप्रच्छाप्सरसं मुनिः ।
संशयो हृदि कश्चिन्मे ब्रूहि तन्मे सुमध्यमे ॥ ४
एवमुक्ताऽथ सा विप्रं प्रत्युवाचाथ नारदम् ।
विषये सति वक्ष्यामि समर्थां मन्यसे च माम् ५
नारद उवाच ।
न त्वामविषये भद्रे नियोक्ष्यामि कथंचन ।
स्त्रीणां स्वभावमिच्छामि त्वत्तः श्रोतुं वरानने ॥६
एतच्छ्रुत्वा वचस्तस्य देवर्षेरप्सरोत्तमा ।

दत्तं प्रदेयवस्त्वभिमानिनी देवता न संतपेत् । विप्रे वेदविवर्जिते । दीयमानं रुदत्यन्नमिति स्मृतेः।अतः कस्तादृश इति प्रश्नः ॥ ५ ॥ मुख्यं पात्रं विशेषेण श्रुतवन्तोऽनसूयका इति ॥ ६ ॥ तथा अक्रोधादिगुणविशिष्टम् ॥१० ॥ अपात्रताबीजमाह अप्रामाण्यमिति । आत्मनः पात्रताया इति शेषः ॥ ११ ॥ निरर्थिकां श्रुतिविरोधित्वेन मोक्षानुपयोगिनीम् ॥ १२ ॥ अहेतुवादकः शास्त्रोक्तहेतुवादविरोधात् ॥ १३ ॥ बोद्धव्यः अस्पृश्यत्वेनेति शेषः ॥ १४ ॥ धर्मश्चात्महिताय चेति थ. ध. पाठः ॥ १७ ॥ देवानामृणं यज्ञेन ऋषीणां वेदाधिगमेन पितॄणां प्रजोत्पादनेन विप्राणां दानमानेनाऽतिथीनां सम्यगातिथ्येन चोन्मुच्याऽपाकृत्य कर्माणि कुर्वन्नित्युत्तरेणान्वयः ॥ १८ ॥ द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

लघुचित्ताः वायुवत् चलचित्ताः ॥ १ ॥ ब्राह्मीं ब्रह्मलोकस्थाम् ॥ ३ ॥ विषये वक्तुं योग्यत्वे ॥ ५ ॥

प्रत्युवाच न शक्ष्यामि स्त्री सती निन्दितुं स्त्रियः॥
विदितास्ते स्त्रियो याश्च यादृशाश्च स्वभावतः।
न मामर्हसि देवर्षे नियोक्तुं कार्य ईदृशे॥ ८
तामुवाच स देवर्षिः सत्यं वद सुमध्यमे।
मृषावादे भवेद्दोषः सत्ये दोषो न विद्यते॥ ९
इत्युक्ता सा कृतमतिरभवच्चारुहासिनी।
स्त्रीदोषाञ्शाश्वतान्सत्यान्भाषितुं संप्रचक्रमे॥१०
कुलीना रूपवत्यश्च नाथवत्यश्च योषितः।
मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद ११
न स्त्रीभ्यः किंचिदन्यद्वै पापीयस्तरमस्ति वै।
स्त्रियो हि मूलं दोषाणां तथा त्वमपि वेत्थ ह॥
समाज्ञातानृद्धिमतः प्रतिरूपान्वशे स्थितान्।
पतीनन्तरमासाद्य नालं नार्यः परीक्षितुम्॥१३
असद्धर्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो।
पापीयसो नरान्यद्वै लज्जां त्यक्त्वा भजामहे १४
स्त्रियं हि यः प्रार्थयते सन्निकर्षं च गच्छति।
ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः॥ १५
अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च।
मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु॥१६
नासां कश्चिदगम्योस्ति नासां वयसि निश्चयः।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते॥ १७
न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथंचन।
न ज्ञातिकुलसंबन्धात्स्त्रियस्तिष्ठन्ति भर्तृषु॥१८
यौवने वर्तमानानां मृष्टाभरणवाससाम्।
नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः॥१९
याश्च शश्वद्बहुमता रक्ष्यन्ते दयिताः स्त्रियः।
अपि ताः संप्रसज्जन्ते कुब्जान्धजडवामनैः॥२०
पङ्गुष्वथ च देवर्षे ये चान्ये कुत्सिता नराः।
स्त्रीणामगम्यो लोकेऽस्मिन्नास्ति कश्चिन्महामुने॥
यदि पुंसां गतिर्ब्रह्मन्कथंचिन्नोपपद्यते।
अप्यन्योन्यं प्रवर्तन्ते न हि तिष्ठन्ति भर्तृषु॥२२
'दुष्टाचाराः पापरता असत्या मायया वृताः।
अदृष्टबुद्धिबहुलाः प्रायेणेत्यवगम्यताम्॥ २३
अलाभात्पुरुषाणां हि भयात्परिजनस्य च।
वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः॥२४
चलस्वभावा दुःसेव्या दुर्ग्राह्या भावतस्तथा।
प्राज्ञस्य पुरुषस्येह यथाभावास्तथा स्त्रियः॥ २५
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः॥२६
इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम्।
दृष्ट्वैव पुरुषं ह्यन्यं योनिः प्रक्लिद्यते स्त्रियाः॥२७
कामानामपि दातारं कर्तारं मानसान्त्वयोः।
रक्षितारं न मृष्यन्ति स्वभर्तारमसत्स्त्रियः॥ २८
न कामभोगान्विपुलान्नालंकारार्थसंचयान्।
तथैव बहुमन्यन्ते यथा रत्यामनुग्रहम्॥ २९
अन्तकः शमनो मृत्युः पातालं बडबामुखम्।
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः॥ ३०
यतश्च भूतानि महान्ति पञ्च
यतश्च लोका विहिता विधात्रा।
यतः पुमांसः प्रमदाश्च निर्मिता-
स्ततश्च दोषाः प्रमदासु नारद॥ ३१

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि त्रिसप्ततितमोऽध्यायः॥ ७३॥

चतुःसप्ततितमोऽध्यायः॥ ७४॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीणां दुश्चरितकथनम्॥ १॥

युधिष्ठिर उवाच।
इमे वै मानवा लोके स्त्रीषु सज्जन्त्यभीक्ष्णशः।
मोहेन परमाविष्टा दैवदृष्टेन कर्मणा॥ १
स्त्रियश्च पुरुषेष्वेव प्रत्यक्षं लोकसाक्षिकम्।

नियोक्तुं प्रश्न ईदृशे इति ट. थ. ध. पाठः॥ ८॥ कृतमतिः वक्ष्यामीति कृतनिश्चयाऽभवत्॥१०॥ गतिः प्राप्तिः। अन्योन्यं कृत्रिमलिङ्गधारिण्यो भूत्वा मैथुनार्थं प्रवर्तन्ते। एतच्च लोकप्रसिद्धम्। भर्तृषु दूरस्थेषु इति शेषः। नहि तिष्ठन्ति धैर्ये इति शेषः॥ २२॥ भयात्परिभवस्य चेति थ. ध. पाठः॥ २४॥ काष्ठानां काष्ठैः॥ २६॥ त्रिसप्ततितमोऽध्यायः॥ ७३॥

अत्र मे संशयस्तीव्रो हृदि संपरिवर्तते ॥ २
कथमासां नराः सङ्गं कुर्वते कुरुनन्दन ।
स्त्रियो वातेषु रज्यन्ते विरज्यन्ते च ताः पुनः॥ ३
इति ताः पुरुषव्याघ्र कथं शक्यास्तु रक्षितुम् ।
प्रमदाः पुरुषेणेह तन्मे व्याख्यातुमर्हसि ॥ ४
भीष्म उवाच ।
एता हि स्त्रीयमायाभिर्वञ्चयन्तीह मानवान् ।
न चासां मुच्यते कश्चित्पुरुषो हस्तमागतः ॥ ५
गावो नवतृणानीव गृह्णन्त्येता नवंनवम् ॥ ६
शम्बरस्य च या माया माया या नमुचेरपि ।
बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥ ७
हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्ति च ।
अप्रियं प्रियवाक्यैश्च गृह्णते कालयोगतः ॥ ८
'यदि जिह्वासहस्रं स्याज्जीवेच्च शरदां शतम् ।
अनन्यकर्मा स्त्रीदोषाननुक्त्वा निधनं व्रजेत् ॥' ९
उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्त्री बुद्ध्या न विशिष्येत तास्तु रक्ष्याः कथं नरैः ॥
अनृतं सत्यमित्याहुः सत्यं चापि तथाऽनृतम् ।
इति यास्ताः कथं वीर संरक्ष्याः पुरुषैरिह ।
'दोषास्पदेऽशुचौ देहे ह्यासां सक्तास्त्वहो नराः' ॥
स्त्रीणां बुद्ध्यर्थनिष्कर्षादर्थशास्त्राणि शत्रुहन् ।
बृहस्पतिप्रभृतिभिर्मन्ये सद्भिः कृतानि वै ॥ १२
संपूज्यमानाः पुरुषैर्विकुर्वन्ति मनो नृषु ।
अपास्ताश्च तथा राजन्विकुर्वन्ति मनः स्त्रियः ॥१३
इमाः प्रजा महाबाहो धार्मिक्य इति नः श्रुतम् १४
सत्कृतासत्कृताश्चापि विकुर्वन्ति मनः सदा ।
कस्ताः शक्तो रक्षितुं स्यादिति मे संशयो महान् ॥
तथा ब्रूहि महाभाग कुरूणां वंशवर्धन ।
यदि शक्या कुरुश्रेष्ठ रक्षा तासां कदाचन ।
कर्तुं वा कृतपूर्वं वा तन्मे व्याख्यातुमर्हसि ॥१६

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीणां पुरुषचित्तप्रमथनाय शक्तिशेषदानपूर्वकं ब्रह्मणा सृष्टतया तद्रक्षणस्य दुष्करत्वकथनम् ॥ १ ॥ स्त्रीणां रक्षणस्य दुश्शकत्वे दृष्टान्ततया विपुलोपाख्यानकथनारम्भः ॥ २ ॥ गुरुणा स्वभार्यारक्षणं नियुक्तेन विपुलनाम्ना तदर्थं योगेन तच्छरीरप्रवेशः ॥ ३ ॥

भीष्म उवाच ।
एवमेतन्महाबाहो नात्र मिथ्याऽस्ति किंचन ।
यथा ब्रवीषि कौरव्य नारीं प्रति जनाधिप ॥ १
अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
यथा रक्षा कृता पूर्वं विपुलेन महात्मना ॥ २
प्रमदाश्च यथा सृष्टा ब्रह्मणा भरतर्षभ ।
यदर्थं तच्च ते तात प्रवक्ष्यामि नराधिप ॥ ३
न हि स्त्रीभ्यः परं पुत्र पापीयः किंचिदस्ति वै ।
अग्निर्हि प्रमदा दीप्तो मायाश्च मयजा विभो ।
क्षुरधारा विषं सर्पो मृत्युरित्येकतः स्त्रियः ॥ ४
प्रजा इमा महाबाहो धार्मिक्य इति नः श्रुतम् ।
स्वयं गच्छन्ति देवत्वं ततो देवानियाद्भयम् ॥ ५
अथाभ्यगच्छन्देवास्ते पितामहमरिंदम ।
निवेद्य मानसं चापि तूष्णीमासन्नधोमुखाः ॥ ६
तेषामन्तर्गतं ज्ञात्वा देवानां स पितामहः ।
मानवानां प्रमोहार्थं कृत्या नार्योऽसृजत्प्रभुः ॥७
पूर्वसर्गे तु कौन्तेय साध्व्यो नार्य इहाभवन् ।
असाध्व्यस्तु समुत्पन्नाः कृत्याः सर्गात्प्रजापतेः ८
ताभ्यः कामान्यथाकामं प्रादाद्धि स पितामहः ।
ताः कामलुब्धाः प्रमदाः प्रामथ्नन्त नरान्सदा ९

कुहकानि च वार्ष्णेय सर्वास्ता इति ट. थ. पाठः ॥ ७ ॥ एताः पूजिता धिक्कृता वा तुल्यवद्विकारं जनयन्तीत्यर्थः ॥ १३ ॥ इमाः स्त्रीरूपाः धार्मिक्य इति श्रुतं सावित्र्यादिषु दृष्टं च ॥ १४ ॥ चतुः सप्ततितमोऽध्यायः ॥ ७४ ॥

अस्ति हि प्रमदा दीप्तेति ट. थ. पाठः ॥ ४ ॥

क्रोधं कामस्य देवेशः सहायं चासृजत्प्रभुः ।
असज्जन्त प्रजाः सर्वाः कामक्रोधवशंगताः॥१०
‘द्विजानां च गुरूणां च महागुरुनृपादिनाम् ।
क्षणस्त्रीसङ्गकामोत्था यातनाहो निरन्तरा ॥ ११
अरक्तमनसां नित्यं ब्रह्मचर्यामलात्मनाम् ।
तपोदमार्चनाध्यानयुक्तानां शुद्धिरुत्तमा ॥’ १२
न च स्त्रीणां क्रियाः काश्चिदिति धर्मो व्यवस्थितः।
निरिन्द्रिया ह्यशास्त्राश्च स्त्रियोऽनृतमिति श्रुतिः॥
शय्यासनमलंकारमन्नपानमनार्यताम् ।
दुर्वाग्भावं रतिं चैव ददौ स्त्रीभ्यः प्रजापतिः॥ १४
न तासां रक्षणं शक्यं कर्तुं पुंसां कथंचन ।
अपि विश्वकृता तात कुतस्तु पुरुषैरिह ॥ १५
वाचा च वधबन्धैर्वा क्लेशैर्वा विविधैस्तथा ।
न शक्या रक्षितुं नार्यस्ता हि नित्यमसंयताः॥१६
इदं तु पुरुषव्याघ्र पुरस्ताच्छ्रुतवानहम् ।
यथा रक्षा कृता पूर्वं विपुलेन गुरुस्त्रियाः॥ १७
ऋषिरासीन्महाभागो देवशर्मेति विश्रुतः ।
तस्य भार्या रुचिर्नाम रूपेणासदृशी भुवि ॥ १८
तस्या रूपेण संमत्ता देवगन्धर्वदानवाः ।
विशेषेण तु राजेन्द्र वृत्रहा पाकशासनः ॥ १९
नारीणां चरितज्ञश्च देवशर्मा महामतिः ।
यथाशक्ति यथोत्साहं भार्यां तामभ्यरक्षत ॥२०
पुरंदरं च जानंश्च परस्त्रीकामचारिणम् ।
तस्माद्यत्नेन भार्याया रक्षणं स चकार ह ॥ २१
स कदाचिदृषिस्तात यज्ञं कर्तुमनास्तदा ।
भार्यासंरक्षणं कार्यं कथं स्यादित्यचिन्तयत् ॥२२
रक्षाविधानं मनसा स संचिन्त्य महातपाः ।
आहूय दयितं शिष्यं विपुलं प्राह भार्गवम् ॥२३
यज्ञकारो गमिष्यामि रुचिं चेमां सुरेश्वरः ।
यतः प्रार्थयते नित्यं तां रक्षस्व यथाबलम् ॥२४
अप्रमत्तेन ते भाव्यं सदा प्रति पुरंदरम् ।
स हि रूपाणि कुरुते विविधानि भृगूत्तम ॥२५
भीष्म उवाच ।
इत्युक्तो विपुलस्तेन तपस्वी नियतेन्द्रियः ।

दरिद्राश्च ह्यमन्त्राश्च स्त्रियो नित्यमिति श्रुतिरिति ध. पाठः॥१३॥

सदैवोग्रतपा राजन्नग्न्यर्कसदृशद्युतिः ॥ २६
धर्मज्ञः सत्यवादी च तथेति प्रत्यभाषत ।
पुनश्चेदं महाराज पप्रच्छ प्रस्थितं गुरुम् ॥ २७
कानि रूपाणि शक्रस्य भवन्त्यागच्छतो मुने ।
वपुस्तेजश्च कीदृग्वै तन्मे व्याख्यातुमर्हसि ॥२८
भीष्म उवाच ।
ततः स भगवांस्तस्मै विपुलाय महात्मने ।
आचचक्षे यथातत्त्वं मायां शक्रस्य भारत ॥२९
बहुमायः स विप्रर्षे बलहा पाकशासनः ।
तांस्तान्विकुरुते भावान्बहूनथ मुहुर्मुहुः ॥ ३०
किरीटी वज्रधृग्धन्वी मुकुटी बद्धकुण्डलः ।
भवत्यथ मुहूर्तेन चण्डालसमदर्शनः ॥ ३१
शिखी जटी चीरवासाः पुनर्भवति पुत्रक ।
बृहच्छरीरश्च पुनश्चीरवासाः पुनः कृशः ॥ ३२
गौरं श्यामं च कृष्णं च वर्णं विकुरुते पुनः ।
विरूपो रूपवांश्चैव युवा वृद्धस्तथैव च ॥ ३३
‘प्राज्ञो जडश्च मूकश्च ह्रस्वो दीर्घस्तथैव च ।’
ब्राह्मणः क्षत्रियश्चैव वैश्यः शूद्रस्तथैव च ॥ ३४
प्रतिलोमोऽनुलोमश्च भवत्यथ शतक्रतुः ।
शुकवायसरूपी च हंसकोकिलरूपवान् ॥ ३५
सिंहव्याघ्रगजानां च रूपं धारयते पुनः ।
दैवं दैत्यमथो राज्ञां वपुर्धारयतेऽपि च ॥ ३६
अकृशो वायुभग्नाङ्गः शकुनिर्विकृतस्तथा ।
चतुष्पाद्बहुरूपश्च पुनर्भवति बालिशः ॥ ३७
मक्षिकामशकादीनां वपुर्धारयतेऽपि च ।
न शक्यमस्य ग्रहणं कर्तुं विपुल केनचित् ॥ ३८
अपि विश्वकृता तात येन सृष्टमिदं जगत् ।
पुनरन्तर्हितः शक्रो दृश्यते ज्ञानचक्षुषा ॥ ३९
वायुभूतश्च स पुनर्देवराजो भवत्युत ।
एवंरूपाणि सततं कुरुते पाकशासनः ।
तस्माद्विपुल यत्नेन रक्षेमां तनुमध्यमाम् ॥ ४०
यथा रुचिं नावलिहेद्देवेन्द्रो भृगुसत्तम ।
क्रतावुपहिते न्यस्तं हविः श्वेव दुरात्मवान् ॥४१
एवमाख्याय स मुनिर्यज्ञकारोऽगमत्तदा ।

देवशर्मा महाभागस्ततो भरतसत्तम ॥ ४२
विपुलस्तु वचः श्रुत्वा गुरोश्चिन्तामुपेयिवान् ।
रक्षां च परमां चक्रे देवराजान्महाबलात् ॥ ४३
किंनु शक्यं मया कर्तुं गुरुदाराभिरक्षणे ।
मायावी हि सुरेन्द्रोसौ दुर्धर्षश्चापि वीर्यवान् ॥ ४४
नापिधायाश्रमं शक्यो रक्षितुं पाकशासनः ।
उटजं वा तथा ह्यस्य नानाविधसरूपता ॥ ४५
वायुरूपेण वा शक्रो गुरुपत्नीं प्रधर्षयेत् ।
तस्मादिमां संप्रविश्य रुचिं स्थास्येहमद्य वै ॥४६
अथवा पौरुषेणेयं न शक्या रक्षितुं मया ।
बहुरूपो हि भगवाञ्छ्रूयते पाकशासनः ॥ ४७
सोहं योगबलादेनां रक्षिष्ये पाकशासनात् ।
गात्राणि गात्रैरस्याहं संप्रवेक्ष्ये हि रक्षितुम् ॥४८
यद्युच्छिष्टामिमां पत्नीमद्य पश्यति मे गुरुः ।
शप्स्यत्यसंशयं कोपाद्दिव्यज्ञानो महातपाः ॥४९
न चेयं रक्षितुं शक्या यथाऽन्या प्रमदा नृभिः ।
मायावी हि सुरेन्द्रोसावहो प्राप्तोस्मि संशयम् ५०
अवश्यं करणीयं हि गुरोरिह हि शासनम् ।
यदि त्वेतदहं कुर्यामाश्चर्यं स्यात्कृतं मया ॥ ५१
योगेनाथ प्रविश्येदं गुरुपत्न्याः कलेवरम् ।
असक्तः पद्मपत्रस्थो जलबिन्दुर्यथा चलः ॥ ५२
एवमेव शरीरेऽस्या निवत्स्यामि समाहितः ।
निर्मुक्तस्य रजोरूपान्नापराधो भवेन्मम ॥ ५३
यथाहि शून्यां पथिकः सभामध्यावसेत्पथि ।
तथाऽद्यावासयिष्यामि गुरुपत्न्याः कलेवरम् ।
एवमेव शरीरेऽस्या निवत्स्यामि समाहितः ॥५४
इत्येवं धर्ममालोक्य वेदवेदांश्च सर्वशः ।
तपश्च विपुलं दृष्ट्वा गुरोरात्मन एव च ॥ ५५
इति निश्चित्य मनसा रक्षां प्रति स भार्गवः ।
अन्वतिष्ठत्परं यत्नं यथा तच्छृणु पार्थिव ॥ ५६
गुरुपत्नीं समासीनो विपुलः स महातपाः ।
उपासीनामनिन्द्याङ्गीं कथार्थैः समलोभयत् ॥५७
नेत्राभ्यां नेत्रयोरस्या रश्मिं संयोज्य रश्मिभिः ।
विवेश विपुलः कायमाकाशं पवनो यथा ॥५८
लक्षणं लक्षणेनैव वदनं वदनेन च ।
अविचेष्टन्नतिष्ठद्वै छायेवान्तर्गतो मुनिः ॥ ५९
ततो विष्टभ्य विपुलो गुरुपत्न्याः कलेवरम् ।
उवास रक्षणे युक्तो न च सा तमबुध्यत ॥ ६०
यं कालं नागतो राजन्गुरुस्तस्य महात्मनः ।
क्रतुं समाप्य स्वगृहं तं कालं सोऽभ्यरक्षत ॥६१

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

इन्द्रेण देवशर्ममुन्यसंनिधाने तद्भार्याविलोभनाय तदाश्रमाभिगमनम् ॥ १ ॥ तथा विपुलतपोऽभिभूतेन भयात्ततो निर्गमनम् ॥ २ ॥ विपुलेन शक्रवृत्तान्तनिवेदनतुष्टाद्गुरोर्वरग्रहणपूर्वकं तपश्चरणम् ॥ ३ ॥

भीष्म उवाच ।
ततः कदाचिद्देवेन्द्रो दिव्यरूपवपुर्धरः ।
इदमन्तरमित्येवमभ्यगात्तमथाश्रमम् ॥ १
रूपमप्रतिमं कृत्वा लोभनीयं जनाधिपः ।
दर्शनीयतमो भूत्वा प्रविवेश तमाश्रमम् ॥ २
स ददर्श तमासीनं विपुलस्य कलेवरम् ।
निश्चेष्टं स्तब्धनयनं यथाऽऽलेख्यगतं तथा ॥ ३
रुचिं च रुचिरापाङ्गीं पीनश्रोणिपयोधराम् ।
पद्मपत्रविशालाक्षीं संपूर्णेन्दुनिभाननाम् ॥ ४
सा तमालोक्य सहसा प्रत्युत्थातुमियेष ह ।
रूपेण विस्मिता कोऽसीत्यथ वक्तुमिवेच्छती ॥५
उत्थातुकामा तु सती विष्टब्धा विपुलेन सा ।
निगृहीता मनुष्येन्द्र न शशाक विचेष्टितुम् ॥६
तामाबभाषे देवेन्द्रः साम्ना परमवल्गुना ।

अशक्यकरणीयं हीति ध. पाठः ॥ ५१ ॥

पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

त्वदर्थमागतं विद्धि देवेन्द्रं मां शुचिस्मिते ॥ ७
क्लिश्यमानमनङ्गेन त्वत्संकल्पभवेन ह ।
तत्पर्याप्नुहि मां सुभ्रु पुरा कालोऽतिवर्तते ॥ ८
तमेवंवादिनं शक्रं शुश्राव विपुलो मुनिः ।
गुरुपत्न्याः शरीरस्थो ददर्श त्रिदशाधिपम् ॥ ९
न शशाक च सा राजन्प्रत्युत्थातुमनिन्दिता ।
वक्तुं च नाशकद्राजन्विष्टब्धा विपुलेन सा ॥१०
आकारं गुरुपत्न्यास्तु स विज्ञाय भृगूद्वहः ।
निजग्राह महातेजा योगेन बलवत्प्रभो ।
बबन्ध योगबन्धैश्च तस्याः सर्वेन्द्रियाणि सः॥ ११
तां निर्विकारां दृष्ट्वा तु पुनरेव शचीपतिः ।
उवाच व्रीडितो राजंस्तां योगबलमोहिताम्॥१२
एह्येहीति ततः सा तु प्रतिवक्तुमियेष तम् ।
स तां वाचं गुरोः पत्न्या विपुलः पर्यवर्तयत् ॥ १३
भोः किमागमने कृत्यमिति तस्यास्तु निःसृता ।
वक्त्राच्छशाङ्कसदृशाद्वाणी संस्कारभूषणा ॥ १४
व्रीडिता सा तु तद्वाक्यमुक्त्वा परवशा तदा ।
पुरन्दरश्च संत्रस्तो बभूव विमना भृशम् ॥ १५
स तद्वैकृतमालक्ष्य देवराजो विशांपते ।
अवैक्षत सहस्राक्षस्तदा दिव्येन चक्षुषा ॥ १६
स ददर्श मुनिं तस्याः शरीरान्तरगोचरम् ।
प्रतिबिम्बमिवादर्शे गुरुपत्न्याः शरीरगम् ॥ १७
स तं घोरेण तपसा युक्तं दृष्ट्वा पुरंदरः ।
प्रावेपत सुसंत्रस्तो व्रीडितश्च तदा विभो ॥ १८
विमुच्य गुरुपत्नीं तु विपुलः सुमहातपाः ।
स्वकलेवरमाविश्य शक्रं भीतमथाब्रवीत् ॥ १९
अजितेन्द्रिय दुर्बुद्धे पापात्मक पुरंदर ।
न चिरं पूजयिष्यन्ति देवास्त्वां मानुषास्तथा ॥ २०
किंनु तद्विस्मृतं शक्र न तन्मनसि ते स्थितम् ।
गौतमेनासि यन्मुक्तो भगाङ्कपरिचिह्नितः ॥ २१
जाने त्वां बालिशमतिमकृतात्मानमस्थिरम् ।
मयेयं रक्ष्यते मूढ गच्छ पाप यथागतम् ॥ २२
नाहं त्वामद्य मूढात्मन्दहेयं हि स्वतेजसा ।
कृपायमानस्तु न ते दग्धुमिच्छामि वासव ॥२३
स च घोरतमो धीमान्गुरुर्मे पापचेतसम् ।
दृष्ट्वा त्वां निर्दहेदद्य क्रोधदीप्तेन चक्षुषा ॥ २४
नैवं तु शक्र कर्तव्यं पुनर्मान्याश्च ते द्विजाः ।
मा गमः ससुतामात्यः क्षयं ब्रह्मबलार्दितः ॥२५
अमरोस्मीति यद्बुद्धिं समास्थाय प्रवर्तसे ।
मावमंस्था न तपसा न साध्यं नाम किंचन २६
भीष्म उवाच ।
तच्छ्रुत्वा वचनं शक्रो विपुलस्य महात्मनः ।
न किंचिदुक्त्वा व्रीडार्तस्तत्रैवान्तरधीयत ॥ २७
मुहूर्तयाते तस्मिंस्तु देवशर्मा महातपाः ।
कृत्वा यज्ञं यथाकाममाजगाम स्वमाश्रमम् ॥२८
आगतेऽथ गुरौ राजन्विपुलः प्रियकर्मकृत् ।
रक्षितां गुरवे भार्यां न्यवेदयदनिन्दिताम् ॥ २९
अभिवाद्य च शान्तात्मा स गुरुं गुरुवत्सलः ।
विपुलः पर्युपातिष्ठद्यथापूर्वमशङ्कितः ॥ ३०
विश्रान्ताय ततस्तस्मै सहासीनाय भार्यया ।
निवेदयामास तदा विपुलः शक्रकर्म तत् ॥ ३१
तच्छ्रुत्वा स मुनिस्तुष्टो विपुलस्य प्रतापवान् ।
बभूव शीलवृत्ताभ्यां तपसा नियमेन च ॥ ३२
विपुलस्य गुरौ वृत्तिं भक्तिमात्मनि तत्प्रभुः ।
धर्मे च स्थिरतां दृष्ट्वा साधुसाध्वित्यभाषत ॥३३
प्रतिनन्द्य च धर्मात्मा शिष्यं धर्मपरायणम् ।
वरेण च्छन्दयामास देवशर्मा महामतिः ॥ ३४
स्थितिं च धर्मे जग्राह स तस्माद्गुरुवत्सलः ।
अनुज्ञातश्च गुरुणा चचारानुत्तमं तपः ॥ ३५
तथैव देवशर्मापि सभार्यः स महातपाः ।
निर्भयो बलवृत्रघ्नाच्चचार विजने वने ॥ ३६

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

कामात्मक पुरन्दरेति ध. पाठः ॥ २० ॥

षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

गुरुनियोगाद्दिव्यपुष्पनयनार्थं गतेन विपुलेन मध्येमार्गं नरवरमिथुनात्स्वगतिनिन्दाश्रवणम् ॥ १ ॥ निन्दितगतिप्रापकस्वदुश्चरितं चिन्तयता तेन चिराय तदनुस्मरणम् ॥ २ ॥

भीष्म उवाच ।
विपुलस्त्वकरोत्तीव्रं तपः कृत्वा गुरोर्वचः ।
तपोयुक्तमथात्मानममन्यत स वीर्यवान् ॥ १
स तेन कर्मणा स्वर्गं पृथिवीं पृथिवीपते ।
चचार गतभीः प्रीतो लब्धकीर्तिवरो नृप ॥ २
उभौ लोकौ जितौ चापि तथैवामन्यत प्रभुः ।
कर्मणा तेन कौरव्य तपसा विपुलेन च ॥ ३
अथ काले व्यतिक्रान्ते कस्मिंश्चित्कुरुनन्दन ।
रुच्या भगिन्या आदानं प्रभूतधनधान्यवत् ॥ ४
एतस्मिन्नेव काले तु दिव्या काचिद्वराङ्गना ।
बिभ्रती परमं रूपं जगामाथ विहायसा ॥ ५
तस्याः शरीरात्पुष्पाणि पतितानि महीतले ।
तस्याश्रमस्याविदूरे दिव्यगन्धानि भारत ॥ ६
तान्यगृह्णात्ततो राजन्रुचिर्ललितलोचना ।
तदा निमन्त्रकस्तस्या अङ्गेभ्यः क्षिप्रमागमत् ॥ ७
तस्या हि भगिनी तात ज्येष्ठा नाम्ना प्रभावती ।
भार्या चित्ररथस्याथ बभूवाङ्गेश्वरस्य वै ॥ ८
पिनह्य तानि पुष्पाणि केशेषु वरवर्णिनी ।
आमन्त्रिता ततोऽगच्छद्रुचिरङ्गपतेर्गृहम् ॥ ९
पुष्पाणि तानि दृष्ट्वा तु तदाङ्गेन्द्रवराङ्गना ।
भगिनीं चोदयामास पुष्पार्थे चारुलोचना ॥ १०
सा भर्त्रे सर्वमाचष्ट रुचिः सुरुचिरानना ।
भगिन्या भाषितं सर्वमृषिस्तच्चाभ्यनन्दत ॥ ११
ततो विपुलमानाय्य देवशर्मा महातपाः ।
पुष्पार्थे चोदयामास गच्छगच्छेति भारत ॥ १२
विपुलस्तु गुरोर्वाक्यमविचार्य महातपाः ।
स तथेत्यब्रवीद्राजंस्तं च देशं जगाम ह ॥ १३
यस्मिन्देशे तु तान्यासन्पतितानि नभस्तलात् ।
अम्लानान्यपि तत्रासन्कुसुमान्यपराण्यपि ॥ १४
स ततस्तानि जग्राह दिव्यानि रुचिराणि च ।
प्राप्तानि स्वेन तपसा दिव्यगन्धानि भारत ॥ १५
संप्राप्य तानि प्रीतात्मा गुरोर्वचनकारकः ।
तदा जगाम तूर्णं च चम्पां चम्पकमालिनीम् ॥ १६
स वने निर्जने तात ददर्श मिथुनं नृणाम् ।
चक्रवत्परिवर्तन्तं गृहीत्वा पाणिना करम् ॥ १७
तत्रैकस्तूर्णमगमत्तत्पदे च विवर्तयन् ।
एकस्तु न तदा राजंश्चक्रतुः कलहं ततः ॥ १८
त्वं शीघ्रं गच्छसीत्येकोऽब्रवीन्नेति तथाऽपरः ।
पतितेति च तौ राजन्परस्परमथोचतुः ॥ १९
तयोर्विस्पर्धतोरेवं शपथोऽयमभूत्तदा ।
सहसोद्दिश्य विपुलं ततो वाक्यमथोचतुः ॥ २०
आवयोरनृतं प्राह यस्तस्याभूद्द्विजस्य वै ।
विपुलस्य परे लोके या गतिः सा भवेदिति ॥ २१
एतच्छ्रुत्वा तु विपुलो विषण्णवदनोऽभवत् ।
एवं तीव्रतपाश्चाहं कष्टश्चायं परिश्रमः ॥ २२
मिथुनस्यास्य किं मे स्यात्कृतं पापं यथा गतिः ।
अनिष्टा सर्वभूतानां कीर्तिताऽनेन मेऽद्य वै ॥ २३
एवं संचिन्तयन्नेव विपुलो राजसत्तम ।
अवाङ्मुखो दीनमना दध्यौ दुष्कृतमात्मनः ॥ २४
ततः षडन्यान्पुरुषानक्षैः काञ्चनराजतैः ।
अपश्यद्दीव्यमानान्वै लोभामर्षान्वितांस्तथा ॥ २५
कुर्वतः शपथं तेन यः कृतो मिथुनेन तु ।
विपुलं वै समुद्दिश्य तेपि वाक्यमथाब्रुवन् ॥ २६
लोभमास्थाय योऽस्माकं विषमं कर्तुमुत्सहेत् ।
विपुलस्य परे लोके या गतिस्तामवाप्नुयात् ॥ २७
एतच्छ्रुत्वा तु विपुलो नापश्यद्धर्मसंकरम् ।

आदीयतेऽस्मिन्बान्धवैर्दत्तं उपायनादिकं स आदानं विवाहाद्युत्सवः । प्रभूतं बहुधनादिकं यत्र ॥ ४ ॥ निमन्त्रकः आकारणार्थं दूतः ॥ ७ ॥ तत्पदे इतरस्य पदे पांसुषु व्यक्ते आकर्षणेन विवर्तयन् विषमतां नयन् ॥ १८ ॥

जन्मप्रभृति कौरव्य कृतपूर्वमथात्मनः ॥ २८
स प्रदध्यौ तथा राजन्नग्नावग्निरिवाहितः।
दह्यमानेन मनसा शापं श्रुत्वा तथाविधम् ॥ २९
तस्य चिन्तयतस्तात बह्वीर्वाचो निशम्य तु ।
इदमासीन्मनसि च रुच्या रक्षणकारितम् ॥ ३०
लक्षणं लक्षणेनैव वदनं वदनेन च ।
विधाय न मया चोक्तं सत्यमेतद्गुरोस्तथा ॥ ३१
एतदात्मनि कौरव्य दुष्कृतं विपुलस्तदा ।
अमन्यत महाभाग तथा तच्च न संशयः ॥ ३२
स चम्पां नगरीमेत्य पुष्पाणि गुरवे ददौ ।
पूजयामास च गुरुं विधिवत्स गुरुप्रियः ॥ ३३

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

देवशर्मणा स्वशिष्यं विपुलंप्रति तद्दृष्टानां मिथुनानां षट्पुरुषाणां च क्रमेणाहोरात्रऋत्वभिमानिदेवतात्वकथनम् ॥ १ ॥ तथा स्वस्मिन्स्वदाररक्षणाय योगेन तच्छरीरप्रवेशानिवेदनस्य दुर्गतिहेतुत्वकथनम् ॥ २ ॥ तथा तत्कृतस्वदाररक्षणपरितोषेण तद्दुरितदूरीकरणपूर्वकं तेन स्वभार्यया च सह स्वर्गे सुखविहरणम् ॥ ३ ॥

भीष्म उवाच ।
तमागतमभिप्रेक्ष्य शिष्यं वाक्यमथाब्रवीत् ।
देवशर्मा महातेजा यत्तच्छृणु जनाधिप ॥ १
देवशर्मोवाच ।
किं त्वया मिथुनं दृष्टं तस्मिञ्शिष्य महावने ।
ते त्वां जानन्ति निपुणा आत्मा च रुचिरेव च ॥ २
विपुल उवाच ।
ब्रह्मर्षे मिथुनं किंतत्के च षट्पुरुषा विभो ।
ये मां जानन्ति तत्त्वेन यन्मां त्वं परिपृच्छसि ॥३
देवशर्मोवाच ।
यद्वै तन्मिथुनं ब्रह्मन्नहोरात्रं हि विद्धि तत् ।
चक्रवत्परिवर्तेत तत्ते जानाति दुष्कृतम् ॥ ४
ये च ते पुरुषा विप्र अक्षैर्दीव्यन्ति हृष्टवत् ।
ऋतूंस्तानभिजानीहि ते ते जानन्ति दुष्कृतम् ॥ ५
न मां कश्चिद्विजानीत इति कृत्वा न विश्वसेत् ।
नरो रहसि पापात्मा पापकं कर्म वै द्विज ॥ ६
कुर्वाणं हि नरं कर्म पापं रहसि सर्वदा ।
पश्यन्ति ऋतवश्चापि तथा दिननिशेऽच्युत ॥ ७
तथैव हि भवेयुस्ते लोकाः पापकृतो यथा ।
कृत्वाऽनाचक्षतः कर्म मम तच्च यथा कृतम् ॥ ८
ते त्वां हर्षस्मितं दृष्ट्वा गुरोः कर्मानिवेदकम् ।
स्मारयन्तस्तथा प्राहुस्ते यथा श्रुतवान्भवान् ॥ ९
अहोरात्रं विजानाति ऋतवश्चापि नित्यशः ।
पुरुषे पापकं कर्म शुभं वाऽशुभकर्मिणः ॥ १०
तत्त्वया मम यत्कर्म व्यभिचाराद्भयात्मकम् ।
नाख्यातमिति जानन्तस्ते त्वामाहुस्तथा द्विज ११
तेनैव हि भवेयुस्ते लोकाः पापकृतो यथा ।
कृत्वा नाचक्षतः कर्म मम यच्च त्वया कृतम् ॥१२
तथाऽशक्याश्च दुर्वृत्ता रक्षितुं प्रमदा द्विज ।
न च त्वं कृतवान्किंचिदागः प्रीतोस्मि तेन ते॥ १३
'मनोदोषविहीनानां न दोषः स्यात्तथा तव ।
अन्यथाऽऽलिङ्ग्यते कान्ता स्नेहेन दुहिताऽन्यथा ॥
यतेश्च कामुकानां च योषिद्रूपेऽन्यथा मतिः ।
अशिक्षयैव मनसः प्रायो लोकस्तु वञ्च्यते ॥१५
लालेत्युद्विजते लोको वक्रासव इति स्पृहा ।
अबन्धायोग्यमनसामिति मन्त्रात्मदैवकम् ॥ १६
न रागस्नेहलोभान्धं कर्मिणां तन्महाफलम् ।
निष्कषायो विशुद्धस्त्वं रुच्यावेशान्न दूषितः॥१७

वचः श्रुत्वा तथाविधमिति ध. पाठः ॥ २९ ॥ रुच्याः गुरुभार्यायाः ॥ ३० ॥ लक्षणं स्त्रीपुंसयोरसाधारणं चिह्नं विधाय एकीकृत्य ॥ ३१ ॥ सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

हर्षस्मितं हर्षेण गर्वितम् ॥ ९ ॥ तेनैव अनाख्यानेनैव ॥ १२ ॥ लाला वदनात्स्रुतो गलज्जलधारा ॥ १६ ॥

यदि त्वहं त्वां दुर्वृत्तमद्राक्षं द्विजसत्तम ।
शपेयं त्वामहं क्रोधान्न मेऽत्रास्ति विचारणा १८
सज्जन्ति पुरुषे नार्यः पुंसां सोऽर्थश्च पुष्कलः ।
अन्यथा रक्षतः शापोऽभविष्यत्ते मतिश्च मे॥१९
रक्षिता च त्वया पुत्र मम चापि निवेदिता ।
अहं ते प्रीतिमांस्तात स्वस्थः स्वर्गं गमिष्यसि२०
इत्युक्त्वा विपुलं प्रीतो देवशर्मा महानृषिः ।
मुमोद स्वर्गमास्थाय सहभार्यः सशिष्यकः ॥२१
इदमाख्यातवांश्चापि ममाख्यानं महामुनिः ।
मार्कण्डेयः पुरा राजन्गङ्गाकूले कथान्तरे ॥ २२
तस्माद्ब्रवीमि पार्थ त्वां स्त्रियो रक्ष्याः सदैव च ।
उभयं दृश्यते तासु सततं साध्वसाधु च ॥ २३
स्त्रियः साध्व्यो महाभागाः संमता लोकमातरः।
धारयन्ति महीं राजन्निमां सवनकाननाम् ॥२४
असाध्व्यश्चापि दुर्वृत्ताः कुलघ्नाः पापनिश्चयाः ।
विज्ञेया लक्षणैर्दुष्टैः स्वगात्रसहजैर्नृप ॥ २५
एवमेतासु रक्षा वै शक्या कर्तुं महात्मभिः ।
अन्यथा राजशार्दूल न शक्या रक्षितुं स्त्रियः २६
एता हि मनुजव्याघ्र तीक्ष्णास्तीक्ष्णपराक्रमाः ।
नासामस्ति प्रियो नाम मैथुने संगमेति यः॥२७
एताः कृत्याश्च कष्टाश्च कृतघ्ना भरतर्षभ ।
न चैकस्मिन्नमन्त्येताः पुरुषे पाण्डुनन्दन ॥ २८
नासु स्नेहो नरैः कार्यस्तथैवेर्ष्या जनेश्वर ।
खेदमास्थाय भुञ्जीत धर्ममास्थाय चैव ह ।
'अनृताविह पर्वादिदोषवर्जं नराधिप ॥' २९
विहन्येतान्यथा कुर्वन्नरः कौरवनन्दन ।
सर्वथा राजशार्दूल युक्तः सर्वत्र युज्यते ॥ ३०
तेनैकेन तु रक्षा वै विपुलेन कृता स्त्रियाः ।
नान्यः शक्तस्त्रिलोकेऽस्मिन्रक्षितुं नृप योषितः३१

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

भीष्मेण युधिष्ठिरंप्रति विवाहविभागकथनम् ॥ १ ॥ तथा कन्यानां भार्यात्वप्रापकविध्यादिनिरूपणम् ॥ २ ॥

युधिष्ठिर उवाच ।
यन्मूलं सर्वधर्माणां प्रजनस्य गृहस्य च ।
पितृदेवातिथीनां च तन्मे ब्रूहि पितामह ॥ १
अयं हि सर्वधर्माणां धर्मश्चिन्त्यतमो मतः ।
कीदृशाय प्रदेया स्यात्कन्येति वसुधाधिप ॥ २
भीष्म उवाच ।
शीलवृत्ते समाज्ञाय विद्यां योनिं च कर्म च ।
अद्भिरेव प्रदातव्या कन्या गुणवते भवेत् ।
ब्राह्मणानां सतामेष नित्यं धर्मो युधिष्ठिर ॥ ३
आवाह्यमावहेदेवं यो दद्यादनुकूलतः ।
शिष्टानां क्षत्रियाणां च धर्म एष सनातनः ॥ ४
आत्माभिप्रेतमुत्सृज्य कन्याभिप्रेत एव यः ।
अभिप्रेता च या यस्य तस्मै देया युधिष्ठिर ।
गान्धर्वमिति तं धर्मं प्राहुर्वेदविदो जनाः ॥ ५
धनेन बहुधा क्रीत्वा संप्रलोभ्य च बान्धवान् ।
असुराणां नृपैतं वै धर्ममाहुर्मनीषिणः ॥ ६
हत्वा छित्त्वा च शीर्षाणि रुदतां रुदतीं गृहात् ।
प्रसह्य हरणं तात राक्षसो विधिरुच्यते ॥ ७

सहजैः पाणिपादरेखादिभिः॥२५॥ कृत्याः प्राणग्राहिदेवतारूपाः ॥ २८ ॥ खेदमास्थायाऽप्रीत्या विष्टिगृहीतवत् भुञ्जीत नतु प्रीत्या । धर्मे ऋतुकालानुरोधम् ॥ २९ ॥ अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

योनिं मातृतः पितृतश्च शुद्धिम् । अयं ब्राह्मः प्रथमो विवाहः ॥ ३ ॥ एवं उक्तगुणवन्तं आवाह्यं विवाहयोग्यं आवहेत् आकारयेत् । ततश्च अनुकूलतो धनदानादिना अभिमुखीकृताय दद्यात् । अयं प्राजापत्यो नाम द्वितीयो विप्राणां क्षत्रियाणां च प्रशस्ततरः ॥ ४ ॥ आसुरं चतुर्थमाह धनेनेति ॥६॥ हत्वेति राक्षसः पञ्चमः । अत्रैव प्रमत्तानां बन्धूनां कन्याहरणात् पैशाचो हरणसामान्यादन्तर्भवति ॥ ७ ॥

'सुप्तां मत्तां प्रमत्तां वा रहो रात्रौ च गच्छति ।
स पापिष्ठो विवाहानां पैशाचः कथितोऽधमः॥८
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ युधिष्ठिर ।
पैशाचश्चासुरश्चैव न कर्तव्यौ कथंचन ॥ ९
ब्राह्मः क्षात्रोऽथ गान्धर्व एते धर्म्या नरर्षभ ।
पृथग्वा यदि वा मिश्राः कर्तव्या नात्र संशयः॥१०
तिस्रो भार्या ब्राह्मणस्य द्वे भार्ये क्षत्रियस्य तु ।
वैश्यः स्वजात्यां विन्देत तास्वपत्यं हिताय हि॥११
द्विजस्य ब्राह्मणी श्रेष्ठा क्षत्रिया क्षत्रियस्य तु ।
रत्यर्थमपि शूद्रा स्यान्नेत्याहुरपरे जनाः ॥ १२
अपत्यजन्म शूद्रायां न प्रशंसन्ति साधवः ।
शूद्रायां जनयन्विप्रः प्रायश्चित्ती विधीयते ॥१३
'नातिबालां वहन्त्यन्ये अनित्यत्वात्प्रजार्थिनः ।
वहन्ति कर्मिणस्तस्यामन्तः शुद्धिव्यपेक्षया ॥१४
अपरान्वयसंभूतां संस्वप्नादिविवर्जिताम् ।
कामो यस्यां निषिद्धश्च केचिदिच्छन्ति चापदि १५
त्रिंशद्वर्षो दशवर्षां भार्यां विन्देत नग्निकाम् ।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् ॥ १६
यस्यास्तु न भवेद्भ्राता पिता वा भरतर्षभ ।
नोपयच्छेत तां जातु पुत्रिकाधर्मिणी हि सा ॥१७
त्रीणि वर्षाण्युदीक्षेत कन्या ऋतुमती सती ।
चतुर्थेऽत्वथ संप्राप्ते स्वयं भर्तारमर्जयेत् ॥ १८
प्रजा न हीयते तस्या रतिश्च भरतर्षभ ।
अतोऽन्यथा वर्तमाना भवेद्वाच्या प्रजापतेः॥१९
असपिण्डा च या मातुरसगोत्रा च या पितुः ।
इत्येतामुपयच्छेत तं धर्मं मनुरब्रवीत् ॥ २०
युधिष्ठिर उवाच ।
शुल्कमन्येन दत्तं स्याद्ददानीत्याह चापरः ।
बलादन्यः प्रभाषेत धनमन्यः प्रदर्शयेत् ॥ २१
पाणिग्रहीता चान्यः स्यात्कस्य भार्या पितामह ।
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् २२
भीष्म उवाच ।
यत्किंचित्कर्म मानुष्यं संस्थानाय प्रदृश्यते ।
मन्त्रवन्मन्त्रितं तस्य मृषावादस्तु पातकः ॥ २३
भार्यापत्यृत्विगाचार्याः शिष्योपाध्याय एव च ।
मृषोक्ते दण्डमर्हन्ति नेत्याहुरपरे जनाः ॥ २४
नह्यकामेन संवादं मनुरेवं प्रशंसति ।
अयशस्यमधर्म्यं च यन्मृषा धर्मगोपनम् ॥ २५
नैकान्तो दोष एकस्मिंस्तदा केनोपपद्यते ।
धर्मतो यां प्रयच्छन्ति यां च क्रीणन्ति भारत ॥२६
बन्धुभिः समनुज्ञाते मन्त्रहोमौ प्रयोजयेत् ।
तथा सिध्यन्ति ते मन्त्रा नादत्तायाः कथंचन ॥२७
यस्त्वत्र मन्त्रसमयो भार्यापत्योर्मिथः कृतः ।
तमेवाहुर्गरीयांसं यश्चासौ ज्ञातिभिः कृतः ॥२८
देवदत्तां पतिर्भार्यां वेत्ति धर्मस्य शासनात् ।
स दैवीं मानुषीं वाचमनृतां पर्युदस्यति ॥ २९
युधिष्ठिर उवाच ।
कन्यायां प्राप्तशुल्कायां ज्यायांश्चेदात्रजेद्वरः ।
धर्मकामार्थसंपन्नो वाच्यमत्रानृतं न वा ॥ ३०
तस्मिन्नुभयतो दोषे कुर्वञ्श्रेयः समाचरेत् ।
अयं नः सर्वधर्माणां धर्मश्चिन्त्यतमो मतः ॥३१
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ।
तदेतत्सर्वमाचक्ष्व न हि तृप्यामि कथ्यताम्॥३२
भीष्म उवाच ।
नैव निष्ठाकरं शुल्कं ज्ञात्वाऽऽसीत्तेन नानृतम् ।
न हि शुल्कपराः सन्तः कन्यां ददति कर्हिचित् ।

नग्निकां एकवाससम् । अजातस्त्रीव्यञ्जनामिति यावत् ॥ १६ ॥ पुत्रिकाधर्मिणी यस्याः पिता इयमेव दुहिता मम पुत्रस्थाने इत्यभिप्रायवान्न वेति न ज्ञायते सा ॥ १७ ॥ वाच्या निन्द्या । प्रजनो हीयते इति ध. पाठः ॥ १९ ॥ संस्थानाय व्यवस्थार्थं मन्त्रवन्मन्त्रितं विचारवद्भिः सर्वैरेकीभूय मन्त्रितमियमस्मै देयेति विचारितम् । तस्य मृषाकरणं पातकः पातयितुं भवती-त्यर्थः । मृषावादस्त्वपातकमिति थ. ध. पाठः ॥ २३ ॥ तत्र नेति पक्षं निन्दति नहीति ॥ २५ ॥ यद्यपि ज्ञातिभिः कृतः समयो गुरुस्तथापि मन्त्रपूर्वकः समयो गुरुतर इत्यर्थः ॥ २८ ॥ देवः प्राक्कर्म ईश्वरो वा । वेत्ति लभते ॥ २९ ॥ दोषे सति कुर्वन् कर्ता श्रेयः प्रशस्ततरं किं समाचरेदित्यध्याहृत्य योज्यम् ॥ ३१ ॥ कथ्यतामित्यादरसूचनार्था पुनरुक्तिः ॥ ३२ ॥

अन्यैर्गुणैरुपेतं तु शुल्कं याचन्ति बान्धवाः॥३३
अलंकृत्वा वहस्वेति यो दद्यादनुकूलतः ।
यच्च तां च ददत्येवं न शुल्कं विक्रयो न सः।
प्रतिगृह्य भवेद्देयमेष धर्मः सनातनः ॥ ३४
दास्यामि भवते कन्यामिति पूर्वं नभाषितम् ।
ये चाहुर्ये च नाहुर्ये ये चावश्यं वदन्त्युत ॥३५
तस्मादाग्रहणात्पाणेर्याचयन्ति परस्परम् ।
कन्यावरः पुरा दत्तो मरुद्भिरिति नः श्रुतम् ॥३६
नानिष्टाय प्रदातव्या कन्या इत्यृषिचोदितम् ।
तन्मूलं काममूलस्य प्रजनस्येति मे मतिः ॥ ३७
समीक्ष्य च बहून्दोषान्संवासाद्विद्धि पाणयोः ।
यथा निष्ठाकरं शुल्कं न जात्वासीत्तथा शृणु३८
अहं विचित्रवीर्यस्य द्वे कन्ये समुदावहम् ।
जित्वाऽङ्गमागधान्सर्वान्काशीनथ च कोसलान्॥
गृहीतपाणिरेकाऽऽसीत्प्राप्तशुल्काऽपराऽभवत् ।
कन्याऽगृहीता तत्रैव विसर्ज्या इति मे पिता ।
अब्रवीदितरां कन्यामावहेति स कौरवः ॥ ४०
अप्यन्याननुपप्रच्छ शङ्कमानः पितुर्वचः ।
अतीव ह्यस्य धर्मेच्छा पितुर्मेऽभ्यधिकाऽभवत्४१
ततोऽहमब्रवं राजन्नाचारेप्सुरिदं वचः ।
आचारं तत्त्वतो वेत्तुमिच्छामि च पुनःपुनः॥४२
ततो मयैवमुक्ते तु वाक्ये धर्मभृतांवरः ।
पिता मम महाराज बाह्लीको वाक्यमब्रवीत् ४३
यदि वः शुल्कतो निष्ठा न पाणिग्रहणात्तथा ।
लाजान्तरमुपासीत प्राप्तशुल्क इति स्मृतिः ॥४४
न हि धर्मविदः प्राहुः प्रमाणं वाक्यतः स्मृतम् ।
येषां वै शुल्कतो निष्ठा न पाणिग्रहणात्तथा॥४५
प्रसिद्धं भाषितं दाने नैषां प्रत्यायकं पुनः ।
ये मन्यन्ते क्रयं शुल्कं न ते धर्मविदो नराः ४६
न चैतेभ्यः प्रदातव्या न वोढव्या तथाविधा ।
न ह्येव भार्या क्रेतव्या न विक्रय्या कथंचन ४७
ये च क्रीणन्ति दासीवद्विक्रीणन्ति तथैव च ।
भवेत्तेषां तथा निष्ठा लुब्धानां पापचेतसाम् ४८
अस्मिन्नर्थे सत्यवन्तं पर्यपृच्छन्त वै जनाः ।
कन्यायाः प्राप्तशुल्कायाः शुल्कदः प्रशमं गतः ॥
पाणिग्रहीता वाऽन्यः स्यादत्र नो धर्मसंशयः ।
तन्नश्छिन्धि महाप्राज्ञ त्वं हि वै प्राज्ञसंमतः ५०
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ।
तानेवं ब्रुवतः सर्वान्सत्यवान्वाक्यमब्रवीत् ॥५१
यत्रेष्टं तत्र देया स्यान्नात्र कार्या विचारणा ।
कुर्वते जीवतोऽप्येवं मृते नैवास्ति संशयः ॥ ५२
देवरं प्रविशेत्कन्या तप्येद्वाऽपि तपः पुनः ।
तमेवानुगता भूत्वा पाणिग्राहस्य नाम सा ॥५३
लिखन्त्येव तु केषांचिदपरेषां शनैरपि ।

गुणैर्वयोधिकत्वादिभिः ॥ ३३ ॥ कन्यार्थालंकारग्रहणे न दोषोऽस्तीत्याह अलंकृत्वेति ॥ ३४ ॥ नभाषितमित्येकपदम् । ये पूर्वं दास्यामीत्याहुर्ये च नदास्यामीत्याहुर्ये च अवश्यं दास्यामीति वदन्ति तत्सर्वं नभाषितं अनुक्तवदेवेत्यर्थः ॥ ३५ ॥ यस्मादेवं तस्मात् आपाणिग्रहणात्कन्यां याचेतेति मरुतां वरस्तेन ततः पूर्वं विशिष्टवरार्थमपहारेपि न दोष इति भावः ॥ ३६ ॥ तत्कन्या कामो मूलं यस्य । तस्मादुत्तमदौहित्रार्थिना श्रेयसे एव कन्या प्रदेयेति भावः ॥ ३७ ॥ संवासाच्चिरपरिचयात् । पाणयोः क्रयविक्रययोः संवादे विद्धिषाणयोरिति ध. पाठः ॥ ३८ ॥ वीर्यमपि शुल्कं भवतीत्यभिप्रायेणाह अहमिति । अम्बिकाम्बालिकयोरेकत्वविवक्षयां द्वे इत्युक्तम् ॥ ३९ ॥ प्राप्तशुल्का वीर्येण निर्जितापि कन्या अगृहीता अप्राप्तपाणिग्रहेयं अम्बा विसर्ज्या उत्स्रष्टुं योग्या इति पिता पितृव्यो बाह्लीकोऽब्रवीत् ॥ ४० ॥ अनुपप्रच्छ अनुपृष्टवानहम् ॥ ४१ ॥ प्राप्तं शुल्कं येन । पाठान्तरे यस्याः सा । कन्यापिता कन्या वा लाजान्तरं वरान्तरमुपासीत इति या स्मृतिस्तर्हि बाध्येतेत्यध्याहृत्य योजना । लाजा विद्यन्ते हौम्यद्रव्यमस्य स इति लाजशब्दोऽर्शआद्यच्प्रत्ययान्तः। लाजोप्तारमुपासीतेति थ. ध. पाठः ॥ ४४ ॥ येषां शुल्कतो निष्ठा तेषां वाक्यतो वाक्यं प्रमाणं स्मृतमिति धर्मविदो नह्याहुरित्यन्वयः ॥ ४५ ॥ लोकविरोधमप्याहार्धेन । प्रसिद्धमिति कन्याया दानमित्येवोच्यते नतु क्रयो जयो वेति । एषां शुल्कवादिनां प्रत्यायकं भार्यात्वज्ञापकं किमपि नास्ति । परिणयनादेव भार्या भवति न शुल्कमात्रादिति लोकव्यवहारस्य स्पष्टत्वादित्यर्थः ॥ ४६ ॥ जीवत इत्यनादरे षष्ठी । जीवन्तमपि शुल्कदमनादृत्य शिष्टा एवं यथेष्टदानं कुर्वत इत्यर्थः ॥ ५२ ॥ देवरमिति युगान्तरधर्मः ॥ ५३ ॥ केषांचिन्मते देवरादयः अलिखितां भ्रातृभार्यां लिखन्त्येव सुरतेन योजयन्त्येव । अपरेषां मते

इति ये संवदन्त्यत्र त एतं निश्चयं विदुः ॥ ५४
तत्पाणिग्रहणात्पूर्वमन्तरं यत्र वर्तते ।
सर्वमङ्गलमन्त्रं वै मृषावादस्तु पातकः ॥ ५५
पाणिग्रहणमन्त्राणां निष्ठा स्यात्सप्तमे पदे ।
पाणिग्रहस्य भार्या स्याद्यस्य चाद्भिः प्रदीयते ॥५६
इति देयं वदन्त्यत्र त एतं निश्चयं विदुः ।
अनुकूलामनुवशां भ्रात्रा दत्तामुपाग्निकाम् ।
परिक्रम्य यथान्यायं भार्यां विन्देद्द्विजोत्तमः॥५७

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

अशीतितमोऽध्यायः ॥ ८० ॥

भीष्मेण युधिष्ठिरंप्रति वैवाहिकविध्यादेर्दायार्हतादेश्च कथनम् ॥ १ ॥

युधिष्ठिर उवाच
कन्यायां प्राप्तशुल्कायां पतिश्चेन्नास्ति कश्चन ।
तत्र का प्रतिपत्तिः स्यात्तन्मे ब्रूहि पितामह ॥ १
भीष्म उवाच ।
या पुत्रकस्य ऋद्धस्य प्रतिपाल्या तदा भवेत् ।
अथवा सा हरेच्छुल्कं क्रीता शुल्कप्रदस्य सा ॥२
तस्यार्थेऽपत्यमीहेत येन न्यायेन शक्नुयात् ।
न तस्मान्मन्त्रवत्कार्यं कश्चित्कुर्वीत किंचन ॥ ३
स्वयंवृतेन साज्ञप्ता पित्रा वै प्रत्यपद्यत ।
तत्तस्यान्ये प्रशंसन्ति धर्मज्ञा नेतरे जनाः ॥ ४
एतत्तु नापरे चक्रुरपरे जातु साधवः ।
साधूनां पुनराचारो गरीयान्धर्मलक्षणः ॥ ५
अस्मिन्नेव प्रकारे तु सुक्रतुर्वाक्यमब्रवीत् ।
नप्ता विदेहराजस्य जनकस्य महात्मनः ॥ ६
असदाचरिते मार्गे कथं स्यादनुकीर्तनम् ।
अनुप्रश्नः संशयो वा सतामेवमुपालभेत् ॥ ७
असदेव हि धर्मस्य प्रदानं धर्म आसुरः ।
नानुशुश्रुम जात्वेतामिमां पूर्वेषु कर्मसु ॥ ८
भार्यापत्योर्हि संबन्धः स्त्रीपुंसोस्तुल्य एव तु ।
रतिः साधारणो धर्म इति चाह स पार्थिवः ॥ ९

युधिष्ठिर उवाच ।
अथ केन प्रमाणेन पुंसामादीयते धनम् ।
पुत्रवद्धि पितुस्तस्य कन्या भवितुमर्हति ॥ १०
भीष्म उवाच ।
यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥११
मातुश्च यौतकं यत्स्यात्कुमारीभाग एव सः ।
दौहित्र एव तद्रिक्थमपुत्रस्य पितुर्हरेत् ॥ १२
ददाति हि स पिण्डान्वै पितुर्मातामहस्य च ।
पुत्रदौहित्रयोरेव विशेषो नास्ति धर्मतः ॥ १३
अन्यत्र जामया सार्धं प्रजानां पुत्र ईहते ।
दुहिताऽन्यत्र जातेन पुत्रेणापि विशिष्यते ॥ १४
दौहित्रकेण धर्मेण तत्र पश्यामि कारणम् ।
विक्रीतासु हि ये पुत्रा भवन्ति पितुरेव ते ॥ १५
असूयवस्त्वधर्मिष्ठाः परस्वादायिनः शठाः ।
आसुरादधिसंभूता धर्माद्विषमवृत्तयः ॥ १६
अत्र गाथा यमोद्गीताः कीर्तयन्ति पुराविदः ।
धर्मज्ञा धर्मशास्त्रेषु निबद्धा धर्मसेतुषु ॥ १७
यो मनुष्यः स्वकं पुत्रं विक्रीय धनमिच्छति ।
कन्यां वा जीवितार्थाय यः शुल्केन प्रयच्छति १८

शनैर्मन्थरा इयं प्रवृत्तिः । ऐच्छिकी नतु वैधीत्यर्थः ॥ ५४ ॥ संकल्पपूर्वकं दत्ताया अपि कन्याया योऽपहारस्तज्जन्यो मृषावादः पातको भवति दातुर्नतु तावन्मात्रेण तस्यां भार्यात्वमुत्पन्नमित्यर्थः ॥ ५५ ॥ एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

शुल्कदश्चेत्प्रोषितस्तद्भयादन्यश्च न वृणुते तदा तत्पित्रा किं कर्तव्यमिति प्रश्नार्थः ॥ १ ॥ या कन्या पितुः प्रतिपाल्या पिता च यदि तत् शुल्कं परपक्षीयेभ्यः परावृत्य न दद्यात्तर्हि सा कन्या शुल्कप्रदस्यैव ज्ञेया ॥ २ ॥ स्वयंवृतेति सावित्रीति धर्मज्ञानपरा जना इति च. ध. पाठः ॥ ४ ॥ धर्मस्य स्त्रीणामस्वातन्त्र्यलक्षणस्य धर्मस्य प्रदानं खण्डनं यत्स आसुरो धर्मः एतां पद्धतिम् । पूर्वेषु वृद्धेषु । कर्मसु विवाहेषु । जात्वेव तदिदं पूर्वजन्मस्विति ध. पाठः ॥ ८ ॥ जामया कन्ययापि तामपेक्ष्येत्यर्थः । अन्यत्र जायते सोपि प्रजया पुत्र ईयते इति ट. थ. ध. पाठः ॥ १४ ॥

सप्तावरे महाघोरे निरये कालसाह्वये ।
स्वेदं मूत्रं पुरीषं च तस्मिन्मूढः समश्नुते ॥ १९
आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।
अल्पो वा बहु वा राजन्विक्रयस्तावदेव सः ॥२०
यद्यप्याचरितः कैश्चिन्नैष धर्मः सनातनः ।
अन्येषामपि दृश्यन्ते लोभतः संप्रवृत्तयः ॥ २१
वश्यां कुमारीं बलतो ये तां समुपभुञ्जते ।
एते पापस्य कर्तारस्तमस्यन्धे च शेरते ॥ २२
अन्योप्यथ न विक्रेयो मनुष्यः किं पुनः प्रजाः ।
अधर्ममूलैर्हि धनैस्तैर्न धर्मोऽथ कश्चन ॥ २३

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥

एकाशीतितमोऽध्यायः ॥ ८१ ॥

भीष्मेण युधिष्ठिरंप्रति स्त्रीणां प्रशंसनम् ॥ १ ॥

भीष्म उवाच ।
प्राचेतसस्य वचनं कीर्तयन्ति पुराविदः ।
यस्याः किंचिन्नाददते ज्ञातयो न स विक्रयः ॥१
अर्हणं तत्कुमारीणामानृशंस्यं व्रतं च तत् ।
सर्वं च प्रतिदेयं स्यात्कन्यायै तदशेषतः ॥ २
पितृभिर्भ्रातृभिश्चापि श्वशुरैरथ देवरैः ।
पूज्या लालयितव्याश्च बहुकल्याणमीप्सुभिः ॥३
यदि वै स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अप्रमोदात्पुनः पुंसः प्रजनो न प्रवर्धते ॥ ४
पूज्या लालयितव्याश्च स्त्रियो नित्यं जनाधिप ।
स्त्रियो यत्र च पूज्यन्ते रमन्ते तत्र देवताः ॥ ५
अपूजिताश्च यत्रैताः सर्वास्तत्राफलाः क्रियाः ।
तदा चैतत्कुलं नास्ति यदा शोचन्ति जामयः ॥ ६
जामीशप्तानि गेहानि निकृत्तानीव कृत्यया ।
नैव भान्ति न वर्धन्ते श्रिया हीनानि पार्थिव ॥ ७
स्त्रियः पुंसां परिददौ मनुर्जिगमिषुर्दिवम् ।
अबलाः स्वल्पकौपीनाः सुहृदः सत्यजिष्णवः ॥८
ईर्ष्यवो मानकामाश्च चण्डाश्च सुहृदोऽबुधाः ।
स्त्रियस्तु मानमर्हन्ति ता मानयत मानवाः ॥ ९
स्त्रीप्रत्ययो हि वै धर्मो रतिभोगाश्च केवलाः ।
परिचर्या नमस्कारास्तदायत्ता भवन्तु वः ॥ १०
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रीत्यर्थं लोकयात्रायाः पश्यत स्त्रीनिबन्धनम् ॥ ११
संमान्यमानाश्चैता हि सर्वकार्याण्यवाप्स्यथ ।
विदेहराजदुहिता चात्र श्लोकमगायत ॥ १२
नास्ति यज्ञः स्त्रियाः कश्चिन्न श्राद्धं नोपवासकम् ।
धर्मः स्वभर्तृशुश्रूषा तया स्वर्गं जयन्त्युत ॥ १३
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्राश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ १४
श्रिय एताः स्त्रियो नाम सत्कार्या भूतिमिच्छता ।
लालिताऽनुगृहीता च श्रीः स्त्री भवति भारत ॥१५

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥

कालसाह्वये कालसूत्राख्ये ॥ १९ ॥ बलतो वश्यां नतु स्वच्छन्दत इत्यर्थः ॥ २२ ॥ अन्योपि पशुरपि ॥ २३ ॥ अशीतितमोऽध्यायः ॥ ८० ॥

प्राचेतसस्य दक्षस्य । ज्ञातयः कन्यापक्षीयाः । स्वयं नाददतेऽथ च कन्यालंकारार्थमिच्छन्ति स विक्रयो न भवतीत्यर्थः ॥१॥ न रोचेत न कामयेत । न प्रमोदयेत्कामुकं न कुर्यात् । प्रजनः सन्ततिः ॥ ४ ॥ स्वल्प ईषदायासेन अपनेयः कौपीनो गुह्याच्छादनपटो यासाम् । सद्योहार्या इत्यर्थः । सुहृदः सौहार्दयुक्ताः ॥ ८ ॥ न बुध्यन्त इत्यबुधाः ॥ ९ ॥ स्त्रीप्रत्ययः स्त्रीहेतुकः ॥ १० ॥ अत्र स्त्रीधर्मविषये ॥ १२ ॥ एकाशीतितमोऽध्यायः ॥ ८१ ॥

द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

भीष्मेण युधिष्ठिरंप्रति ब्राह्मणादीनां दायविभजनविधिनिरूपणम् ॥ १ ॥

युधिष्ठिर उवाच ।
सर्वशास्त्रविधानज्ञ राजधर्मविदुत्तम ।
अतीव संशयच्छेत्ता भवान्वै प्रथितः क्षितौ ॥ १
कश्चित्तु संशयो मेऽस्ति तन्मे ब्रूहि पितामह ।
'अस्मामापदि कष्टायामन्यं पृच्छाम कं वयम्' ॥
जातेऽस्मिन्संशये राजन्नान्यं पृच्छेम कंचन ॥ २
यथा नरेण कर्तव्यं धर्ममार्गानुवर्तिना ।
एतत्सर्वं महाबाहो भवान्व्याख्यातुमर्हति ॥ ३
चतस्रो विहिता भार्या ब्राह्मणस्य पितामह ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः ४
तत्र जातेषु पुत्रेषु सर्वासां कुरुसत्तम ।
आनुपूर्व्येण कस्तेषां पित्र्यं दायाद्यमर्हति ॥ ५
केन वा किं ततो हार्यं पितृवित्तात्पितामह ।
एतदिच्छामि कथितं विभागस्तेषु कः स्मृतः ॥६
भीष्म उवाच ।
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
एतेषु विहितो धर्मो ब्राह्मणस्य युधिष्ठिर ॥ ७
वैषम्यादथवा लोभात्कामाद्वाऽपि परंतप ।
ब्राह्मणस्य भवेच्छूद्रा न तु दृष्टा न तु स्मृता ॥८
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ।
प्रायश्चित्तीयते चापि विधिदृष्टेन कर्मणा ॥ ९
तत्र जातेष्वपत्येषु द्विगुणं स्याद्युधिष्ठिर ।
अतस्ते नियमं वित्ते संप्रवक्ष्यामि भारत ॥ १०
लक्षण्यं गोवृषो यानं यत्प्रधानतमं भवेत् ।
ब्राह्मण्यास्तद्धरेत्पुत्र एकांशं वै पितुर्धनात् ॥ ११
शेषं तु दशधा कार्यं ब्राह्मणस्वं युधिष्ठिर ।
तत्र तेनैव हर्तव्याश्चत्वारोंशाः पितुर्धनात् ॥ १२
क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोप्यसंशयः ।
स तु मातुर्विशेषेण त्रीनंशान्हर्तुमर्हति ॥ १३
वर्णे तृतीये जातस्तु वैश्यायां ब्राह्मणादपि ।
द्विरंशस्तेन हर्तव्यो ब्राह्मणस्वाद्युधिष्ठिर ॥ १४
शूद्रायां ब्राह्मणाज्जातो नित्यादेयधनः स्मृतः ।
अल्पं चापि प्रदातव्यं शूद्रापुत्राय भारत ॥ १५
दशधा प्रविभक्तस्य धनस्यैष भवेत्क्रमः ।
सवर्णासु तु जातानां समान्भागान्प्रकल्पयेत् ॥१६
अब्राह्मणं तु मन्यन्ते शूद्रापुत्रमनैपुणात् ।
त्रिषु वर्णेषु जातो हि ब्राह्मणाद्ब्राह्मणो भवेत् ॥१७
स्मृताश्च वर्णाश्चत्वारः पञ्चमो नाधिगम्यते ।
हरेच्च दशमं भागं शूद्रापुत्रः पितुर्धनात् ॥ १८
तत्तु दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।
अवश्यं हि धनं देयं शूद्रापुत्राय भारत ॥ १९
आनृशंस्यं परो धर्म इति तस्मै प्रदीयते ।
यत्रतत्र समुत्पन्नं गुणायैवोपपद्यते ॥ २०
यद्यप्येष सुपुत्रः स्यादपुत्रो यदि वा भवेत् ।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय भारत ॥ २१
'स्मृत एकश्चतुर्भागः कन्याभागस्तु धर्मतः ।
अभ्रातृका समग्राह्या चार्धांशेत्यपरे विदुः ॥'२२
त्रैवार्षिकाद्यदा भक्तादधिकं स्याद्द्विजस्य तु ।
यजेत तेन द्रव्येण न वृथा साधयेद्धनम् ॥ २३
त्रिसहस्रपरो दायः स्त्रियै देयो धनस्य वै ।
भर्त्रा तच्च धनं दत्तं यथार्हं भोक्तुमर्हति ॥ २४
स्त्रीणां तु पतिदायाद्यमुपभोगफलं स्मृतम् ।
नापहारं स्त्रियः कुर्युः पितृवित्तात्कथंचन ॥ २५
स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं युधिष्ठिर ।
ब्राह्मण्यास्तद्धरेत्कन्या यथा पुत्रस्तथाऽस्य सा ॥२६
सा हि पुत्रसमा राजन्विहिता कुरुनन्दन ।
एवमेव समुद्दिष्टो धर्मो वै भरतर्षभ ।

एवमृत्विगात्मस्त्रीशुद्धिमुक्त्वा धनशुद्ध्यर्थं दायविभागं प्रस्तौति ॥ ३ ॥ रतिमिच्छत एव विहिता नतु धर्मम् ॥ ४ ॥ किं कियत्प्रमाणम् ॥ ६ ॥ प्रायश्चित्तमात्मन इच्छति प्रायश्चित्तीयते ॥ ९ ॥ द्विगुणं प्रायश्चित्तम् ॥ १० ॥ एकांशं मुख्यांशम् ॥ ११ ॥ तेनैव ब्राह्मणीपुत्रेणैव ॥ १२ ॥ समुत्पन्नं आनृशंस्यम् ॥ २० ॥ वृथा यज्ञादिप्रयोजनंविना न साधयेत् ॥ २३ ॥ स्त्रियोऽधिको दायो न देय इत्यर्थः । तच्चतुर्धा धनं दत्तं नादत्तंभोक्तुमर्हतीति थ. ध. पाठः ॥ २४ ॥ कुर्युः पुत्रा इति शेषः । पतिवित्तात्कथं चनेति झ. पाठः । पतिवित्तात्पत्या दत्ताद्वित्तात् ॥ २५ ॥ धर्मो विभागप्रकारः । वृथा अन्यायेन

एवं धर्ममनुस्मृत्य न वृथा साधयेद्धनम् ॥ २७
युधिष्ठिर उवाच ।
शूद्रायां ब्राह्मणाज्जातो यद्यदेयधनः स्मृतः ।
केन प्रतिविशेषेण दशमोऽप्यस्य दीयते ॥ २८
ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः ।
क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥२९
कस्मात्तु विषमं भागं भजेरन्नृपसत्तम ।
यदा सर्वे त्रयो वर्णास्त्वयोक्ता ब्राह्मणा इति ॥३०
भीष्म उवाच ।
दारा इत्युच्यते लोके नाम्नैकेन परंतप ।
प्रोक्तेन चैव नाम्नाऽयं विशेषः सुमहान्भवेत् ॥ ३१
तिस्रः कृत्वा पुरो भार्याः पश्चाद्विन्देत ब्राह्मणीम् ।
सा ज्येष्ठा सा च पूज्या स्यात्सा च ताभ्यो गरीयसी
स्नानं प्रसाधनं भर्तुर्दन्तधावनमञ्जनम् ।
हव्यं कव्यं च यच्चान्यद्धर्मयुक्तं गृहे भवेत् ॥ ३३
न तस्यां जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति ।
ब्राह्मणीत्वेव कुर्याद्वा ब्राह्मणस्य युधिष्ठिर ॥ ३४
अन्नं पानं च माल्यं च वासांस्याभरणानि च ।
ब्राह्मण्यैतानि देयानि भर्तुः सा हि गरीयसी ॥ ३५
मनुनाऽभिहितं शास्त्रं यच्चापि कुरुनन्दन ।
तत्राप्येष महाराज दृष्टो धर्मः सनातनः ॥ ३६
अथ चेदन्यथा कुर्याद्यदि कामाद्युधिष्ठिर ।
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥ ३७
ब्राह्मण्याः सदृशः पुत्रः क्षत्रियायाश्च यो भवेत् ।
राजन्विशेषो यस्त्वत्र वर्णयोरुभयोरपि ॥ ३८
न तु जात्या समा लोके ब्राह्मण्याः क्षत्रिया भवेत् ।
ब्राह्मण्याः प्रथमः पुत्रो भूयान्स्याद्राजसत्तम ॥३९
भूयोभूयोपि संहार्यः पितृवित्ताद्युधिष्ठिर ।
यथा न सदृशी जातु ब्राह्मण्याः क्षत्रिया भवेत् ४०
क्षत्रियायास्तथा वैश्या न जातु सदृशी भवेत् ।
श्रीश्च राज्यं च कोशश्च क्षत्रियाणां युधिष्ठिर ॥ ४१
विहितं दृश्यते राजन्सागरान्तां च मेदिनीम् ।
क्षत्रियो हि स्वधर्मेण श्रियं प्राप्नोति भूयसीम् ।
राजा दण्डधरो राजन्रक्षा नान्यत्र क्षत्रियात् ॥ ४२
ब्राह्मणा हि महाभागा देवानामपि देवताः ।
तेषु राजा प्रवर्तेत पूजया विधिपूर्वकम् ॥ ४३
प्रणीतमृषिभिर्ज्ञात्वा धर्मं शाश्वतमव्ययम् ।
लुप्यमानं स्वधर्मेण क्षत्रियो रक्षति प्रजाः ॥ ४४
दस्युभिर्ह्रियमाणं च धनं दारांश्च सर्वशः ।
सर्वेषामेव वर्णानां त्राता भवति पार्थिवः ॥ ४५
भूयान्स्यात्क्षत्रियापुत्रो वैश्यापुत्रान्न संशयः ।
भूयस्तेनापि हर्तव्यं पितृवित्ताद्युधिष्ठिर ॥ ४६
युधिष्ठिर उवाच ।
उक्तं ते विधिवद्राजन्ब्राह्मणस्य पितामह ।
इतरेषां तु वर्णानां कथं वै नियमो भवेत् ॥ ४७
भीष्म उवाच ।
क्षत्रियस्यापि भार्ये द्वे विहिते कुरुनन्दन ।
तृतीया च भवेच्छूद्रा न तु दृष्टा न तु स्मृता ४८
एष एव क्रमो हि स्यात्क्षत्रियाणां युधिष्ठिर ।
अष्टधा तु भवेत्कार्यं क्षत्रियस्वं जनाधिप ॥ ४९
क्षत्रियाया हरेत्पुत्रश्चतुरोंशान्पितुर्धनात् ।
युद्धावहारिकं यच्च पितुः स्यात्स हरेत्तु तत् ॥५०
वैश्यापुत्रस्तु भागांस्त्रीञ्शूद्रापुत्रस्तथाऽष्टमम् ।
सोपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ॥ ५१
एकैव हि भवेद्भार्या वैश्यस्य कुरुनन्दन ।
द्वितीया तु भवेच्छूद्रा न तु दृष्टा न तु स्मृता ॥५२
वैश्यस्य वर्तमानस्य वैश्यायां भरतर्षभ ।
शूद्रायां चापि कौन्तेय तयोर्विनियमः स्मृतः ॥५३
पञ्चधा तु भवेत्कार्यं वैश्यस्वं भरतर्षभ ।
तयोरपत्ये वक्ष्यामि विभागं च जनाधिप ॥ ५४
वैश्यापुत्रेण हर्तव्याश्चत्वारोंशाः पितुर्धनात् ।
पञ्चमस्तु स्मृतो भागः शूद्रापुत्राय भारत ॥५५
सोपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।
त्रिभिर्वर्णैः सदा जातः शूद्रो देयधनो भवेत् ॥५६

॥ २७ ॥ आद्रियन्ते त्रिवर्गार्थिभिरिति दारपदप्रवृत्तिनिमित्तमादरः । यतश्च भर्त्रा आदरस्तासु वर्णक्रमेण यथायोग्यं तारतम्यक्रमेण क्रियत इति तत्पुत्राणां भागवैषम्यं चास्तीत्यभिप्रायः ॥ ३१ ॥ भूयोभूयोपि अधिकमधिकम् ॥ ४० ॥ उक्तं दायविभागादि ॥ ४७ ॥ युद्धेऽवह्रियते तद्रथगजायुधकवचादिकं युद्धावहारिकम् ॥ ५० ॥

शूद्रस्य स्यात्सवर्णैव भार्या नान्या कथंचन ।
समभागाश्च पुत्राः स्युर्यदि पुत्रशतं भवेत् ॥ ५७
जातानां समवर्णायाः पुत्राणामविशेषतः ।
सर्वेषामेव वर्णानां समभागो धनात्स्मृतः ॥ ५८
ज्येष्ठस्य भागो ज्येष्ठः स्यादेकांशो यः प्रधानतः ।
एष दायविधिः पार्थ पूर्वमुक्तः स्वयंभुवा ॥ ५९
समवर्णासु जातानां विशेषोऽस्त्यपरो नृप ।
विवाहवैशिष्ट्यकृतः पूर्वपूर्वो विशिष्यते ॥ ६०
हरेज्ज्येष्ठः प्रधानांशमेकभार्यासुतेष्वपि ।
मध्यमो मध्यमं चैव कनीयांस्तु कनीयसम् ॥६१
एवं जातिषु सर्वासु सवर्णः श्रेष्ठतां गतः ।
महर्षिरपि चैतद्वै मारीचः काश्यपोऽब्रवीत् ॥ ६२

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

भीष्मेण युधिष्ठिरंप्रति संकरजातीनां शीलविभागादिनिरूपणम् ॥ १ ॥

युधिष्ठिर उवाच ।
अर्थाश्रयाद्वा कामाद्वा वर्णानां चाप्यनिश्चयात् ।
अज्ञानाद्वापि वर्णानां जायते वर्णसंकरः ॥ १
तेषामेतेन विधिना जातानां वर्णसंकरे ।
को धर्मः कानि कर्माणि तन्मे ब्रूहि पितामह ॥२
भीष्म उवाच ।
चातुर्वर्ण्यस्य कर्माणि चातुर्वर्ण्यं च केवलम् ।
असृजत्स हि यज्ञार्थे पूर्वमेव प्रजापतिः ॥ ३
भार्याश्चतस्रो विप्रस्य द्वयोरात्मा प्रजायते ।
आनुपूर्व्याद्द्वयोर्हीनौ मातृजात्यौ प्रसूयतः ॥ ४
परं शवाद्ब्राह्मणस्यैव पुत्रः
शूद्रापुत्रं पारशवं तमाहुः ।
शुश्रूषकः स्वस्य कुलस्य स स्या-
त्स्वचारित्रं नित्यमथो न जह्यात् ॥ ५
सर्वानुपायानथ संप्रधार्य
समुद्धरेत्स्वस्य कुलस्य तन्त्रम् ।
ज्येष्ठो यवीयानपि यो द्विजस्य
शुश्रूषया दानपरायणः स्यात् ॥ ६
तिस्रः क्षत्रियसंबन्धाद्द्वयोरात्माऽस्य जायते ।
हीनवर्णास्तृतीयायां शूद्रा उग्रा इति स्मृतिः॥७
द्वे चापि भार्ये वैश्यस्य द्वयोरात्माऽस्य जायते ।
शूद्रा शूद्रस्य चाप्येका शूद्रमेव प्रजायते ॥ ८
अतोऽविशिष्टस्त्वधमो गुरुदारप्रधर्षकः ।
बाह्यं वर्णं जनयति चातुर्वर्ण्यविगर्हितम् ॥ ९
अयाज्यं क्षत्रियो व्रात्यं सूतं स्तोत्रक्रियापरम् ।
वैश्यो वैदेहकं चापि मौद्गल्यमपवर्जितम् ॥ १०
शूद्रश्चण्डालमत्युग्रं वध्यघ्नं बाह्यवासिनम् ।
ब्राह्मण्यां संप्रजायन्त इत्येते कुलपांसनाः ।
एते मतिमतांश्रेष्ठ वर्णसंकरजाः प्रभो ॥ ११
बन्दी तु जायते वैश्यान्मागधो वाक्यजीवनः ।
शूद्रान्निषादो मत्स्यघ्नः क्षत्रियायां व्यतिक्रमात् ॥
शूद्रादायोगवश्चापि वैश्यायां ग्राम्यधर्मिणः ।
ब्राह्मणैरप्रतिग्राह्यस्तक्षा स्वधनजीवनः ॥ १३
एतेऽपि सदृशान्वर्णाञ्जनयन्ति स्वयोनिषु ।
मातृजात्या प्रसूयन्ते ह्यवरा हीनयोनिषु ॥ १४
यथा चतुर्षु वर्णेषु द्वयोरात्माऽस्य जायते ।

सवर्णाज्ज्येष्ठतां गतेति थ. ध. पाठः ॥ ६२ ॥ द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

एतेन उक्तेन । विधिना प्रकारेण ॥ २ ॥ शूद्राणां सेवाद्वारा यज्ञार्थत्वं नतु साक्षात् ॥ ३ ॥ मातृजात्यौ वैश्यायां वैश्योऽम्बष्ठो नाम । शूद्रायां शूद्रो निषादो नाम पारशवाख्यो भवति ॥ ४ ॥ शवस्थानतुल्याच्छूद्रात्परमुत्कृष्टम् । परोंशभाग्ब्राह्मणस्यैव पुत्र इति थ. ध. पाठः ॥ ५ ॥ तन्त्रमुपकरणम् । वयसा ज्येष्ठोऽपि पारशवो द्विजस्य त्रिवर्णजस्य यवीयान् कनीयानेवेति संबन्धः ॥ ६ ॥ अतः स्वपितुरविशिष्ठो नाधिकः सन्नधमः शूद्रो गुरूणां ब्राह्मणादीनां दारप्रधर्षकश्चेत् बाह्यं चाण्डालादिम् ॥ ९ ॥ विप्रायां क्षत्रियो बाह्यं सूतं स्तोमक्रियापरमिति झ. पाठः ॥ १० ॥ वध्यानां चोरादीनां शिरश्छेदादिकार्यकारिणं वध्यघ्नम् ॥ ११ ॥

आनन्तर्यात्प्रजायन्ते यथा बाह्या प्रधानतः ॥ १५
ते चापि सदृशं वर्णं जनयन्ति स्वयोनिषु ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥ १६
यथा शूद्रोऽपि ब्राह्मण्यां जन्तुं बाह्यं प्रसूयते ।
एवं बाह्यतराद्बाह्यश्चातुर्वर्ण्यात्प्रजायते ॥ १७
प्रतिलोमं तु वर्धन्ते बाह्याद्बाह्यतरात्पुनः ।
हीनाद्धीनाः प्रसूयन्ते वर्णाः पञ्चदशैव तु ॥ १८
अगम्यागमनाचैव जायते वर्णसंकरः ।
बाह्यानामनुजायन्ते सैरन्ध्र्यां मागधेषु च ।
प्रसाधनोपचारज्ञमदासं दासजीवनम् ॥ १९
क्षत्रा ह्यायोगवं सूते वागुराबन्धजीवनम् ।
मैरेयकं च वैदेहः संप्रसूतेऽथ माधुकम् ॥ २०
निषादो मद्गुरं सूते दासं नावोपजीविनम् ।
मृतपं चापि चाण्डालः श्वपाकमिति विश्रुतम् २१
चतुरो मागधी सूते क्रूरान्मायोपजीविनः ।
मांसं स्वादुकरं क्षौद्रं सौगन्धमिति विश्रुतम् ॥२२
वैदेहकाच्च पापिष्ठा क्रूरं मायोपजीविनम् ।
निषादान्मद्रनाभं च खरयानप्रयायिनम् ॥ २३
चण्डालात्पुल्कसं चापि खराश्वगजभोजिनम् ।
मृतचैलप्रतिच्छन्नं भिन्नभाजनभोजिनम् ॥ २४
आयोगवीषु जायन्ते हीनवर्णास्तु ते त्रयः ।
क्षुद्रो वैदेहकादन्ध्रो बहिर्ग्रामप्रतिश्रयः ॥ २५
कारावरो निषाद्यां तु चर्मकारः प्रसूयते ।
चाण्डालात्पाण्डुसौपाकस्त्वक्सारव्यवहारवान् २६
आहिण्डको निषादेन वैदेह्यां संप्रसूयते ।
चण्डालेन तु सौपाकश्चण्डालसमवृत्तिमान् ॥२७
निषादी चापि चण्डालात्पुत्रमन्तेवसायिनम् ।
श्मशानगोचरं सूते बाह्यैरपि बहिष्कृतम् ॥ २८
इत्येते संकरे जाताः पितृमातृव्यतिक्रमात् ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः २९
चतुर्णामेव वर्णानां धर्मो नान्यस्य विद्यते ।
वर्णानां धर्महीनेषु सङ्ख्या नास्तीह कस्यचित् ॥३०
यदृच्छयोपसंपन्नैर्यज्ञसाधुबहिष्कृतैः ।
बाह्या बाह्यैश्च जायन्ते यथावृत्ति यथाश्रयम् ॥३१
चतुष्पथश्मशानानि शैलांश्चान्यान्वनस्पतीन् ।
कार्ष्णायसमलंकारं परिगृह्य च नित्यशः ।
वसेयुरेते विज्ञाता वर्तयन्तः स्वकर्मभिः ॥ ३२
युञ्जन्तो वाऽप्यलंकारांस्तथोपकरणानि च ।
गोब्राह्मणाय साहय्यं कुर्वाणा वै न संशयः ॥ ३३
आनृशंस्यमनुक्रोशः सत्यवाक्यं तथा क्षमा ।
स्वशरीरैरपि त्राणं बाह्यानां सिद्धिकारणम् ।
भवन्ति मनुजव्याघ्र तत्र मे नास्ति संशयः ॥३४

यथोपदेशं परिकीर्तितासु
नरः प्रजायेत विचार्य बुद्धिमान् ।
निहीनयोनिर्हि सुतोऽवसादये-
त्तितीर्षमाणं हि यथोपलो जले ॥ ३५

अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
नयन्ति ह्युपथं नार्यः कामक्रोधवशानुगम् ॥ ३६
स्वभावश्चैव नारीणां नराणामिह दूषणम् ।
अत्यर्थं न प्रसज्जन्ते प्रमदासु विपश्चितः ॥ ३७

युधिष्ठिर उवाच ।

वर्णापेतमविज्ञाय नरं कलुषयोनिजम् ।
आर्यरूपमिवानार्यं कथं विद्यामहे वयम् ॥ ३८

भीष्म उवाच ।

योनिसंकलुषे जातं नानाभावसमन्वितम् ।
कर्मभिः सज्जनाचीर्णैर्विज्ञेयाः शुद्धयोनिकाः ॥३९
अनार्यत्वमनाचारः क्रूरत्वं निष्क्रियात्मता ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ ४०
पित्र्यं वा भजते शीलं मातृजं वा तथोभयम् ।
न कथंचन संकीर्णः प्रकृतिं स्वां नियच्छति ॥४१
यथैव सदृशो रूपे मातापित्रोर्हि जायते ।
व्याघ्रबिन्दोस्तथा योनिं पुरुषः स्वां नियच्छति ४२

चातुर्वर्ण्यस्यैव धर्माः शास्त्रे विहिताः इतरेषां तु जातिभेदानां धर्मनियम इयत्ता च नास्ति ॥ ३० ॥ निहीनासु रेतःसेकं न कुर्यादिति भावः ॥ ३५ ॥ कलुषयोनिजं संकरयोनिजम् ॥ ३८ ॥ नानाभावैरार्येभ्यः पृथग्भूताभिश्चेष्टाभिः समन्वितं नरं संकरयोनिजं जानीयात् ॥ ३९ ॥ प्रकृतिं योनिम् । नियच्छति गूहितुं न शक्नोतीत्यर्थः ॥ ४१ ॥ यथा तिर्यक्स्थावरादिकं बीजगुणं न त्यजत्येवं मनुष्योऽपीत्यर्थः ॥ ४२ ॥

कुले स्रोतसि संच्छन्ने यस्य स्याद्योनिसंकरः ।
संश्रयत्येव तच्छीलं नरोऽल्पमथवा बहु ॥ ४३
आर्यरूपसमाचारं चरन्तं कृतके पथि ।
सवर्णमन्यवर्णं वा स्वशीलं शास्ति निश्चये ॥ ४४
नानावृत्तेषु भूतेषु नानाकर्मरतेषु च ।
जन्मवृत्तसमं लोके सुश्लिष्टं न विरज्यते ॥ ४५
शरीरमिह सत्त्वेन न तस्य परिकृष्यते ।
ज्येष्ठमध्यावरं सत्त्वं तुल्यसत्त्वं प्रमोदते ॥ ४६
ज्यायांसमपि शीलेन विहीनं नैव पूजयेत् ।
अपि शूद्रं च धर्मज्ञं सद्वृत्तमभिपूजयेत् ॥ ४७
आत्मानमाख्याति हि कर्मभिर्नरः
सुशीलचारित्रकुलैः शुभाशुभैः ।
प्रनष्टमप्यात्मकुलं तथा नरः
पुनः प्रकाशं कुरुते स्वकर्मतः ॥ ४८
योनिष्वेतासु सर्वासु संकीर्णास्वितरासु च ।
यत्रात्मानं न जनयेद्बुधस्तां परिवर्जयेत् ॥ ४९

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

चतुरशीतितमोऽध्यायः ॥ ८४ ॥

भीष्मेण युधिष्ठिरंप्रत्यौरसादिपुत्रनिरूपणम् ॥ १ ॥

युधिष्ठिर उवाच ।
ब्रूहि तात कुरुश्रेष्ठ वर्णानां त्वं पृथक् पृथक् ।
कीदृश्यां कीदृशाश्चापि पुत्राः कस्य च के च ते ॥ १
विप्रवादाः सुबहवः श्रूयन्ते पुत्रकारिणाम् ।
अत्र नो मुह्यतां राजन्संशयं छेत्तुमर्हसि ॥ २
भीष्म उवाच ।
'आत्मा पुत्रस्तु विज्ञेयः प्रथमो बहुधा परे ॥ ३
स्वे क्षेत्रे संस्कृते यस्तु पुत्रमुत्पादयेत्स्वयम् ।
तमौरसं विजानीयात्पुत्रं प्रथमकल्पितम् ॥ ४
अग्निं प्रजापतिं चेष्ट्वा वराय प्रतिपादिता ।
पुत्रिका स्याद्दुहितरि संकल्पे वाऽपि वा सुतः ॥ ५
तल्पे जातः प्रमीतस्य क्लीबस्य पतितस्य वा ।
स्वधर्मेण नियुक्तो यः स पुत्रः क्षेत्रजः स्मृतः ॥ ६
माता पिता च दद्यातां यमद्भिः पुत्रमापदि ।
सदृशप्रीतिसंयुक्तो विज्ञेयो दत्रिमः सुतः ॥ ७
सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं विज्ञेयः स तु कृत्रिमः ॥ ८
उत्पद्यते यस्य गूढं न च ज्ञायेत कस्यचित् ।
स भवेद्गूढजो नाम तस्य स्याद्यस्य तल्पतः ॥ ९
मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वा ।
यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यते ॥ १०
पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदन्नाम्ना वोढुः कन्यासमुद्भवे ॥ ११
या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति उच्यते ॥ १२
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोपि वा ॥ १३
या पत्या वा परित्यक्ता विधवा वा स्वकेच्छया ।
उत्पादयति पुनर्भूत्वा स पौनर्भव उच्यते ॥ १४
सा चेदक्षतयोनिः स्याद्गतप्रत्यागताऽपि वा ।
पौनर्भवेन भर्त्रा सा पुनःसंस्कारमर्हति ॥ १५
मातापितृहनो यः स्यात्त्यक्तो वा स्यादकारणम् ।
आत्मानं स्पर्शयेद्यस्तु स्वयंदत्तस्तु स स्मृतः ॥ १६
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।
स पावयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥ १७
दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥ १८
क्षेत्रजादीन्सुतानेतानेकादश यथोदितान् ।

संच्छन्ने सुगुप्तेऽपि यस्य जन्मनीति शेषः । सः तच्छीलं संकरकर्तुः स्वभावम् ॥ ४३ ॥ तस्य संकरजस्य शरीरं सत्त्वेन शास्त्रीयबुद्ध्या न परिकृष्यते न नीचमार्गादपकृष्यते । बीजगुणस्य प्राबल्यात् ॥ ४६ ॥ त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

विप्रवादाः विविधाः प्रवादाः पूर्वोक्ता एव ॥ २ ॥
तल्पे कलत्रे ॥ ६ ॥

पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥१९
भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् ।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ २०
सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥' २१
आत्मा पुत्रश्च विज्ञेयस्तस्यानन्तरजश्च यः ।
निरुक्तजश्च विज्ञेयः सुतः प्रसृतजस्तथा ॥ २२
पतितस्य तु भार्याया भर्त्रा सुसमवेतया ।
तथा दत्तकृतौ पुत्रावध्यूढश्च तथाऽपरः ॥ २३
षडपध्वंसजाश्चापि कानीनापसदास्तथा ।
इत्येते वै समाख्यातास्तान्विजानीहि भारत ॥२४
युधिष्ठिर उवाच ।
षडपध्वंसजाः के स्युः के वाऽप्यपसदास्तथा ।
एतत्सर्वं यथातत्त्वं व्याख्यातुं मे त्वमर्हसि ॥२५
भीष्म उवाच ।
त्रिषु वर्णेषु ये पुत्रा ब्राह्मणस्य युधिष्ठिर ।
वर्णयोश्च द्वयोः स्यातां यौ राजन्यस्य भारत ॥२६
एको द्विवर्ण एवाथ तथाऽत्रैवोपलक्षितः ।
षडपध्वंसजास्ते हि तथैवापसदाञ्शृणु ॥ २७
चाण्डालो व्रात्यवर्णौ तु ब्राह्मण्यां क्षत्रियासु च ।
वैश्यायां चैव शूद्रस्य लक्ष्यास्तेऽपसदास्त्रयः ॥२८
मागधो वामकश्चैव द्वौ वैश्यस्योपलक्षितौ ।
ब्राह्मण्यां क्षत्रियायां च क्षत्रियस्यैक एव तु ॥२९
ब्राह्मण्यां लक्ष्यते सूत इत्येतेऽपसदाः स्मृताः ।
पुत्रा ह्येते न शक्यन्ते मिथ्या कर्तुं नराधिप ॥३०
युधिष्ठिर उवाच ।
क्षेत्रजं केचिदेवाहुः सुतं केचित्तु शुक्रजम् ।
तुल्यावेतौ सुतौ कस्य तन्मे ब्रूहि पितामह ॥३१
भीष्म उवाच ।
रेतजो वा भवेत्पुत्रः पुत्रो वा क्षेत्रजो भवेत् ।
अध्यूढः समयं भित्त्वेत्येतदेव निबोध मे ॥ ३२
युधिष्ठिर उवाच ।
रेतजं विद्म वै पुत्रं क्षेत्रजस्यागमः कथम् ।
अध्यूढं विद्म वै पुत्रं भित्त्वा तु समयं कथम् ॥३३
भीष्म उवाच ।
आत्मजं पुत्रमुत्पाद्य यस्त्यजेत्कारणान्तरे ।
न तत्र कारणं रेतः स क्षेत्रस्वामिनो भवेत् ॥३४
पुत्रकामो हि पुत्रार्थे यां वृणीते विशांपते ।
तत्र क्षेत्रं प्रमाणं स्यान्न वै तत्रात्मजः सुतः॥ ३५
अन्यत्र क्षेत्रजः पुत्रो लक्ष्यते भरतर्षभ ।
न ह्यात्मा शक्यते हन्तुं दृष्टान्तोपगतो ह्यसौ ॥३६
कचिच्च कृतकः पुत्रः संग्रहादेव लक्ष्यते ।
न तत्र रेतः क्षेत्रं वा प्रमाणं स्याद्युधिष्ठिर ॥ ३७
युधिष्ठिर उवाच ।
कीदृशः कृतकः पुत्रः संग्रहादेव लक्ष्यते ।
शुक्रं क्षेत्रं प्रमाणं वा यत्र लक्ष्यं न भारत ॥ ३८
भीष्म उवाच ।
मातापितृभ्यां यस्त्यक्तः पथि यस्तं प्रकल्पयेत् ।
न चास्य मातापितरौ ज्ञायेतां स हि कृत्रिमः ॥ ३९
अस्वामिकस्य स्वामित्वं यस्मिन्संप्रतिलक्ष्यते ।
यो वर्णः पोषयेत्तं च तद्वर्णस्तस्य जायते ॥ ४०
युधिष्ठिर उवाच ।
कथमस्य प्रयोक्तव्यः संस्कारः कस्य वा कथम् ।
देया कन्या कथं चेति तन्मे ब्रूहि पितामह ॥ ४१
भीष्म उवाच ।
आत्मवत्तस्य कुर्वीत संस्कारं स्वामिवत्तथा ।
त्यक्तो मातापितृभ्यां यः सवर्णं प्रतिपद्यते ॥ ४२

अनन्तरजः औरसः । निरुक्तजः स्वक्षेत्रेऽन्यो रेतःसेकार्थमुक्तस्तज्जः । प्रसृतोऽनिरुक्तोऽपि यो लौल्यात्परक्षेत्रे रेतः सिञ्चति तज्जः प्रसृतजः ॥ २२ ॥ तथा पतितात्स्वभार्यायामेव जातः । भार्यायाः तृतीयार्थे षष्ठी । दत्तः पञ्चमः । कृतः क्रीतः स्वयमुपायगम्यो वा षष्ठः । अध्यूढः यस्य माता गर्भवत्येव ऊढा तादृशः सप्तमः ॥ २३ ॥ षडपध्वंसजा वक्ष्यमाणाः । कानीनः कन्यायां विवाहात् प्रागुत्पन्नश्चतुर्दशः । अपसदा वक्ष्यमाणाः षट् । एते विंशतिः । तान्सर्वान् पुत्रानिति विजानीहि ॥ २४ ॥ कारणान्तरे लोकापवादादिभये सति ॥ ३४ ॥ यां गर्भवतीं कन्यां वृणीते तत्र स पुत्रो वोढुरेव क्षेत्रजो नतु सेक्तुरात्मजः ॥ ३५ ॥ चतुरशीतितमोऽध्यायः ॥ ८४ ॥

तद्गोत्रबन्धुजं तस्य कुर्यात्संस्कारमच्युत ।
अथ देया तु कन्या स्यात्तद्वर्णस्य युधिष्ठिर ॥ ४३
संस्कर्तुं वर्णगोत्रं च मातृवर्णविनिश्चये ।
कानीनाध्यूढजौ वाऽपि विज्ञेयौ पुत्रकिल्बिषौ ४४
तावपि स्वाविव सुतौ संस्कार्याविति निश्चयः ।
क्षेत्रजो वाऽप्यपसदो येऽध्यूढास्तेषु चाप्युत ॥ ४५
आत्मवद्वै प्रयुञ्जीरन्संस्कारान्ब्राह्मणादयः ।
'स्वं जन्म मातृगोत्रेण संस्कारं ब्राह्मणादयः ॥'४६
धर्मशास्त्रेषु वर्णानां निश्चयोऽयं प्रदृश्यते ।
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥४७

॥ इति श्रीमन्महाभारते अनुशासनपर्वणि दानधर्मपर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥

पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

भीष्मेण युधिष्ठिरंप्रति महद्दर्शनसहवासयोर्गवां च प्रभावबोधनाय च्यवनोपाख्यानकथनारम्भः ॥ १ ॥ गङ्गायमुना संगमेऽन्तर्जले निमज्य तपस्यतश्च्यवनस्य दाशैर्जालेन जलचरैः सह कूलप्रापणम् ॥ २ ॥ दाशैः प्रार्थितेन तेन तान्प्रति मत्स्यैः सह स्वस्य प्राणजालान्यतरस्मान्मोचनचोदना ॥ ३ ॥

युधिष्ठिर उवाच ।
दर्शने कीदृशः स्नेहः संवासे च पितामह ।
महाभाग्यं गवां चैव तन्मे व्याख्यातुमर्हसि ॥ १
भीष्म उवाच ।
हन्त ते कथयिष्यामि पुरावृत्तं महाद्युते ।
नहुषस्य च संवादं महर्षेश्च्यवनस्य च ॥ २
पुरा महर्षिश्च्यवनो भार्गवो भरतर्षभ ।
उदवासकृतारम्भो बभूव स महाव्रतः ॥ ३
निहत्य मानं क्रोधं च प्रहर्षं शोकमेव च ।
वर्षाणि द्वादश मुनिर्जलवासे धृतव्रतः ॥ ४
आदधत्सर्वभूतेषु विस्रम्भं परमं शुभम् ।
जलेचरेषु सर्वेषु शीतरश्मिरिव प्रभुः ॥ ५
स्थाणुभूतः शुचिर्भूत्वा दैवतेभ्यः प्रणम्य च ।
गङ्गायमुनयोर्मध्ये जलं संप्रविवेश ह ॥ ६
गङ्गायमुनयोर्वेगं सुभीमं भीमनिःस्वनम् ।
प्रतिजग्राह शिरसा वातवेगसमं जवे ॥ ७
गङ्गा च यमुना चैव सरितश्च सरांसि च ।
प्रदक्षिणमृषिं चक्रुर्न चैनं पर्यपीडयन् ॥ ८
अन्तर्जलेषु सुष्वाप काष्ठभूतो महामुनिः ।
ततश्चोर्ध्वस्थितो धीमानभवद्भरतर्षभ ॥ ९
जलौकसां ससत्वानां बभूव प्रियदर्शनः ।
उपाजिघ्रन्त च तदा मत्स्यास्तं हृष्टमानसाः ।
तत्र तस्यासतः कालः समतीतोऽभवन्महान् ॥१०
ततः कदाचित्समये कस्मिंश्चिन्मत्स्यजीविनः ।
तं देशं समुपाजग्मुर्जालहस्ता महाद्युते ॥ ११
निषादा बहवस्तत्र मत्स्योद्धरणनिश्चयाः ।
व्यायता बलिनः शूराः सलिलेष्वनुवर्तिनः ।
अभ्याययुश्च तं देशं निश्चिता जालकर्मणि ॥१२
जालं ते योजयामासुर्नवसूत्रकृतं दृढम् ।
मत्स्योद्धरणमाकर्षुस्तदा भरतसत्तम ॥ १३
ततस्ते बहुभिर्योगैः कैवर्ता मत्स्यकाङ्क्षिणः ।
गङ्गायमुनयोर्वारि जालेनावकिरन्ति ते ॥ १४
जालं सुविततं तेषां नवसूत्रकृतं तथा ।
विस्तारायामसंपन्नं यत्तत्र सलिले क्षमम् ॥ १५
ततस्ते सुमहच्चैव बलवच्च सुवर्तितम् ।
अवतीर्य ततः सर्वे जालं चकृषिरे तदा ॥ १६
अभीतरूपाः संहृष्टा अन्योन्यवशवर्तिनः ।
बबन्धुस्तत्र मत्स्यांश्च तथाऽन्याञ्जलचारिणः ॥१७
तथा मत्स्यैः परिवृतं च्यवनं भृगुनन्दनम् ।
आकर्षयन्महाराज जालेनाथ यदृच्छया ॥ १८
नदीशैवलदिग्धाङ्गं हरिश्मश्रुजटाधरम् ।

परपीडादर्शने परैः सह संवासे च कीदृशः स्नेह आनृशंस्यं च कर्तव्यम् । गवां माहात्म्यं च ब्रूहीति प्रश्नद्वयम् ॥ १ ॥

सरितश्च तथानुगा इति ट. थ. ध. पाठः ॥ ८ ॥ ऊर्ध्वस्थितः उपविष्टः ॥ ९ ॥ आसतः आसीनस्य ॥ १० ॥

	मू.	मा. व्य.
पञ्चदशी—रामकृष्णविरचितव्याख्यासहिता.	।।।॰	८=
पञ्चरत्नगीता—भगवद्गीता, विष्णुसहस्रनाम, भीष्मस्तवराजः, अनुस्मृतिः, गजेन्द्रमोक्षश्च इत्येतैः प्रकरणैः सहिता, कौशेयवस्त्रबद्धा स्थूलाक्षरा.....	।।।॰	८≡
पञ्चरत्नगीता—कौशेयवस्त्रबद्धा मध्यमाक्षरा.	।≡	८-
पञ्चरत्नगीता—कौशेयवस्त्रबद्धा सूक्ष्माक्षरा.	।-।।	८-
पञ्चरत्नगीता—पत्रबद्धा मध्यमाक्षरा.....	।-	८-
पाण्डवगीता.	८-	८।।
ब्रह्मसूत्रशांकरभाष्यम्—रत्नप्रभा-भामती-आनन्दगिरीय (न्यायनिर्णय) व्याख्यात्रयोपेतम्.	८	।।=
भगवद्गीता—शंकरानन्दीव्याख्यासहिता । इयं व्याख्या परमहंसश्रीमच्छंकरानन्दस्वामिप्रणीता सुविस्तृता गीताहृद्यार्थद्योतिन्यस्तीति सुप्रसिद्धमेव । अस्या मूल्यमेतावत्पर्यन्तं ५ रु. आसीत्, संप्रति तु ग्राहकसौकर्यायाधुनिकरीत्या पदवाक्यच्छेदपरसवर्णादि यथा शीघ्रमर्थावगमः स्यादिति व्यवस्थया परिशोध्य पुस्तकं (बुकसाईज) तथा सुन्दरायसाक्षरैरुत्तमपत्रेष्वानङ्क्य सुदृढपुटबद्धस्याप्यस्य रूप्यकद्वयमात्रमेव मूल्यं स्थापितमस्ति.	२	।॰
भगवद्गीता—(श्रीधरीव्याख्यासहिता) इयं व्याख्यातीव सुलभा नातिविस्तृतापि गीतापदपदार्थबोधनेऽत्यन्तं सहायकारिण्यस्तीत्यस्याः सर्वेषां सौलभ्येन लाभार्थमस्माभिर्मुद्रिता.	।।।॰	८=
भगवद्गीता—कौशेयपट्टवेष्टिता, स्थूलाक्षरा.	।।॰	८-।।
भगवद्गीता—कौशेयाच्छादनयुता, मध्यमाक्षरा.	।=	८।।
भगवद्गीता—कौशेयाच्छन्ना, सूक्ष्माक्षरा.	।॰	८।।
भगवद्गीता—पत्रबद्धा, मध्यमाक्षरा.	८≡	८।।
भगवद्गीता—मध्यमाक्षरा (बुकसाईज).	८≡	८।।
भगवद्गीता मूलं—(स्थूलाक्षरा) पत्रमात्रा.	।=	८-
भगवद्गीता—इयं लघ्वक्षराकारायामविस्ताराप्यतिमनोहरा कौशेयपट्टबद्धा चिक्कणपत्रैर्नूत्नायसाक्षरैश्च मुद्रिता.....	८=।।	८-
भगवद्गीता—सप्तश्लोकात्मिका.	८।	८।।
महावाक्यरत्नावलिः—श्रीमत्परमहंसपरिव्राजकाचार्यरामचन्द्रयतिकृता । अस्मिन्ग्रन्थे ईशावास्याद्यष्टोत्तरशतोपनिषदन्तर्गतानि सर्वतः सारभूतानि वाक्यान्येकीकृत्य तेषां क्रमेण सार्धान्तिकादिविदेहमुक्त्यन्तानि विंशतिप्रकरणानि कृतानि सन्ति.	८=	८।।
रामगीता, रामगीतामाहात्म्यं च.	८।।।	८।।
लघुयोगवासिष्ठम्—आत्मसुखकृतया वासिष्ठचन्द्रिकाटीकया सहितम्.	५	।।॰
शिवगीता—पत्रबद्धा.....	।॰।	८-
शिवगीता—कौशेयपट्टवेष्टिता	।=	८-
शिवगीता—लक्ष्मीनरहरिसूनुकृतया बालानन्दिनीटीकया, शंकराचार्यकृतकालभैरवाष्टकेन च सहिता.	१	८=
स्वात्मनिरूपणम्—श्रीमच्छंकराचार्यविरचितं, सच्चिदानन्दसरस्वतीप्रणीतया टीकयासह.	।॰	८।।
स्वानुभवाष्टकम्—गोपीनाथदाधीचकृतं, स्वकृतसारबोधिन्या टीकया सहितम्.	८-	८।।

निर्णयसागरयन्त्रालयाधिपतिः

तुकाराम जावजी,

कालकादेवीरोड, मुंबई.